अविद्यापूर्वकर्मनिबन्धनत्वे ऽप्यनादौ संसारे ऽनन्तत्वात्कर्मणामनियतविपाककालत्वाच्च प्रतिसर्गावस्थाया इव मुक्त्यवस्थाया अपि प्रत्युदावृत्तिभयं न व्यावर्तते। अविद्यानिबन्धनत्वे ऽपि तस्या निर्हेतुत्वान्निष्प्रयोजनत्वाच्च प्रवृत्तेस्तथैव पुनः पुनः प्रवृत्तिः केन वार्यते। तथा च सुषुप्ते ब्रह्मप्राप्तेः प्रत्युदावृत्तिर्दृश्यते। स्वतन्त्रे तु ब्रह्मणि विभक्तानां जीवानां देहेन्द्रियोपभोगहेतावविभक्तानां वा विभज्य भोगादिभिर्हेतुभिर्न पुनर्देहादिभेदो न स-

5.4–5 *Ślokavārttika* Sambandhākṣepaparihāra 100:
चैतन्यं योग्यता पुंसः प्रकृतेस्तदनात्मता। भोग्यभोक्तृत्वयोस्ते च न ताभ्यामपगच्छतः॥

5.6–8 Cf. *Bhāvaśuddhi* (97.12–15): सत्यामपि योग्यतायां न तन्मात्रादेव सः, अपि तु पुरुषार्थप्रयुक्तः, स च दुःखाद्युपभोगः, सत्त्वपुरुषान्यताख्यातिश्च, तदेतदुभयमभिनिर्वृत्य कञ्चित्पुरुषं प्रति कृतकार्या प्रकृतिरुदास्त इत्यर्थः।
5.10–12 Cf. *Bhāvaśuddhi* (97.15–17, 20–21): अथ सकृच्छब्दाद्यनुभवेन कृतकार्यता, सर्वशब्दाद्यनुभवेन वा? आद्यं दूषयति– सकृदिति। सहसैव संसारोच्छित्तिः स्यादित्यर्थः। …विकारानन्त्यान्न कस्यचिदपि क्वचिदपि कदाचिदपि संसारोच्छेद इत्यर्थः।

5.8 प्रकृतिरुदास्ते] MS^{pc}; प्रतिरुदास्ते MS^{ac} • तदेतदाह] *em.*; तदितदाह MS **5.10** °द्यनुभवेन] *em.*; °द्यन्नभवेन MS **5.11** उत्तरस्मिंस्तु विकारा°] MS^{pc}; उत्त। रस्मिंस्तु विकार°MS^{ac} **5.12–13**शब्दादीननु] *em.*; शब्दादीन् नु° MS **5.13** °भावयत्या] MS^{pc}; °भावत्या MS^{ac} **5.14** °शक्त्योरैकात्म्य°] *em.*; °शक्त्योनैकात्म्य° MS

म्भाव्यते। स्वतन्त्रो हि क्रीडया स्वातन्त्र्यख्यापनेन वा स्वभावेन वा पुनर्बध्नीयाल्लौकिक इवेश्वरः। अथैष कर्मापेक्षः, न कर्मस्वस्य स्वातन्त्र्यम्। तथापि कर्मणामानन्त्याद्विपाककालनियमाभावाच्च कल्पशतातिक्रमे ऽपि प्राप्तविपाककालेभ्यः कर्मभ्यः पुनर्बन्धः सम्भाव्यते। यतो नैकभविकः कर्माशयः, न ह्यस्य प्रायणमेवाभिव्यञ्जकमपि तु देशकालादयो ऽपि। तथा हि– एकस्मिन्नपि देहे क्रमेण कर्मफलभोगो दृश्यते, विरुद्धजातिभोगनिमित्तानां च कर्मणां युगपदावापगमनानुपपत्तेः, गर्भमृत्यूनां चाकर्मणां विमुक्तिप्रसङ्गात्।

तत्रोच्यते– अभयमिति। परा हीयं क्षेमप्राप्तिः श्रूयते। नास्यां पुनःसंसारभयमस्ति। न तावत्कर्मनिमित्तः पुनःसंसारः, विद्यया प्रायश्चित्तेनेवाकृतभोगानामनन्तानामपि कर्मणां प्रक्षयात्। उक्तं हि–'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति। तथा 'क्षीयन्ते चास्य कर्माणि' इति। अथवा विद्ययाविद्यानिवृत्तौ प्रविलीन एव कर्तृकर्मफलप्रविभागः। तस्य कुतः सम्भवः। नाप्यविद्यानिमित्तः, तत्प्रवृत्तिहेतोरभावात्। अनादिर्ह्यविद्या, अनादित्वादेव न हेतुमपेक्षते। प्रागभावे हि हेतुव्यापारः, असति प्रागभावे कदा हेतुर्व्याप्रियेत। न हि सतो हेतुकृत्यमस्ति, विद्यया तूच्छिन्ना प्रागसती प्रवर्तमाना नाकस्मात्प्रवर्तितुमर्हति। सुषुप्ते तु विक्षेपमात्रं निवृत्तम्, तत्संस्कारो ऽग्रहणं च नैव निवृत्ते। अन्यथा न तुरीयाद्भिद्येत। विक्षेपमात्राभावात्तु ब्रह्मप्राप्त्यभिधानम्। तस्मात्सुष्ठूक्तम्– अभयमिति।

6.16विमुक्तिप्रसङ्गात्] B; विमुक्तिप्रसङ्गः *edn*

6.20 *Bhagavadgītā* 4.37: ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।
6.21 *Muṇḍakopaniṣad* 2.2.8: क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।

एवं हि सत्यविद्यानिबन्धनत्वमस्याभ्युपेतं भवति, तदभिमानस्य तत्त्वात्। तन्नि[षे]धति– **अविद्यापूर्वक**[र्मेनि](बन्धनत्व इति। प्रतिस)र्गो विशेषाणामविशेषेषु लयः, तेषां लिङ्गमात्रे तस्याप्यलिङ्ग इति। **आवापगमनं** बीजभावमात्रेणावस्थानम्। [अ](नन्तानामिति। संख्यया)वधारणमन्तः स येषां नास्ति तेषाम्। **अथवेत्यादि**। द्वयी खल्वियमविद्या विपरीतख्यातिर्यां विक्षेप इत्याचक्ष[ते], (अख्यातिश्च यामाचक्ष)ते लय इति। तत्र सुषुप्ते यद्यपि विक्षेपिकाविद्या निवृत्ता, तत्संस्कारो न नश्यति। **अन्यथेति**। यदि विक्षेप(संस्कारयोर्निवृत्तिस्तर्हि भेदो) नैवेत्यर्थः। अहरहर्ब्रह्मप्राप्त्यभिधानस्य बीजमुच्यते– **विक्षेपमात्राभावा**[दिति।

केन पुनः प्रमाणेनास्यार्थस्य समधिगमः। न तावत् प्रत्यक्षेण, तस्यैतद्विपरीतभेदविषयत्वात्। नाप्यनुमानेन, तत्पूर्वकत्वात्। नोपमानेन, सादृश्यविषयत्वात्, तस्य च भेदाधिष्ठानत्वात्। अर्थापत्तिस्तु विपर्यये, न भेदमन्तरेण कश्चिद्व्यवहार उपपद्यते यतः। अभेदो ऽपि हि प्रमात्रादिविभागादृते दुरवगमः। अभावो

6.2–3 *Tattvavaiśāradī* on *Vyāsabhāṣya* (IV.34): कृतकरणीयतया पुरुषार्थशून्यानां यः प्रतिप्रसवः स्वकारणे प्रधाने लयस्तेषां कार्यकारणात्मकानां गुणानां व्युत्थानसमाधिनिरोधसंस्कारा मनसि लीयन्ते, मनो ऽस्मितायाम्, अस्मिता लिङ्गे, लिङ्गमलिङ्ग इति। यो ऽयं गुणानां कार्यकारणात्मकानां प्रतिसर्गस्तत्कैवल्यम्, यं कश्चित्पुरुषं प्रति प्रधानस्य मोक्षः।

6.4–4 Cf. *Bhāvaśuddhi* (99.16–17): आवापगमनम् (आवाप (ग?) नम् *edn*)- फलनिक्षेपाया ऽऽगमनम्, बीजभावेनावस्थानं वा।

6.7–9 Cf. *Bhāvaśuddhi* (101.10–12): अग्रहणपदेनाच्छादिकानाद्यनिर्वचनीयाज्ञानमुच्यते, विक्षेपसंस्कारयोरपि (विक्षेपसंस्कार (ाल) योरपि *edn*) निवृत्तौ दण्डमाह– अन्यथेति॥ अहरहर्ब्रह्मलोकप्राप्त्यभिधानस्य बीजमाह– विक्षेपेति॥

6.1 ॰भ्युपेतं] *em.*; ॰भ्युपेंत MS **6.2** विशेषाणामविशेषेषु] *em.*; विशेषाणांमविशेषेषु MS **6.4** ॰मात्रेणावस्थानम्] *em.*; ॰मात्रेणावन्वेवं MS • स येषां] स द्येषां MS; स *ow.* MS **6.5** विपरीत॰] MS^{pc}; विपरित॰ MS **6.7** निवृत्ता] *em.*; निवृत्तस्तु MS • नश्यति] *em.*; पश्वति MS • विक्षेप॰] MS^{pc}; विवेक्षेप॰ MS^{ac} **6.8** नैवे॰] *em.*; नेवे॰ MS • अहरहर्ब्रह्म॰] *em.*; अहरहब्रह्म॰ MS **6.8–9** ॰प्राप्त्यभिधानस्य बीजमुच्यते] *em.*; ॰प्राप्यत्तिधानस्य रिजन्यते MS **6.9** ॰मात्राभावा॰] *em.*; ॰मात्रात्ताव॰ MS

ऽपि न भावरूपतत्त्वावगमायालम्। नापि प्रपञ्चाभावावगमाय, प्रत्यक्षादिषु सत्सु तदसंभवात्।

केन पुनः] **प्रमाणेना[त्मा](द्वैतरूपस्यास्यार्थस्य) समधिगमः**। अधिगमो हि प्रमाणस्य कार्यमसति प्रमाणे न भवति धूम इव ⟨f.33^{r}⟩ धूमध्वजाभाव इत्यर्थः। तत्र यथासम्भवं प्रमाणान्युपन्यस्य निराकरोति। **न प्रत्यक्षेणेति**। प्रत्यक्षं हि नीलमिति (वा पीतमिति वा नू)नमन्यव्यावृत्तमेव वस्तु गोचरयत्यन्यथा व्याहारव्यवहारनियमानुपपत्तिः। वदन्ति वृद्धाः –

तदयुक्तं प्रति[द्र](व्यं भिन्नरूपोपलम्भनात्। इ)ति।

अनुमानोपमाने च भेदग्रहनान्तरीयके अभेदविरोधिनी। **अर्थापत्तिस्त्विति**।

7.6 *Ślokavārttika* Pratyakṣasūtra 117ab: तदयुक्तं प्रतिद्रव्यं भिन्नरूपोपलम्भनात्।

7.1 Cf. *Śaṅkhapāṇi* (61.1): केन पुनः प्रमाणेनास्य प्रथमश्लोकोक्तस्याद्वयात्मतत्त्वरूपस्यार्थस्यावगमः?
7.2–6 Cf. *Bhāvaśuddhi* (101.15–19): अधिगमो हि प्रमाणकार्यमसति प्रमाणे न भवति धूम इव धूमध्वजाभाव इत्यर्थः। यथासम्भवं प्रमाणान्युपन्यस्य निराकरोति। न तावदिति॥ हेतुमाह– तस्येति॥ नीलमिति वा, पीतमिति वा व्यावृत्तरूपगोचरत्वात्, अन्यथा व्यवहारनियमानुपपत्तेः। उक्तं हि 'प्रतिद्रव्यं भिन्नरूपोपलम्भनादि'ति।
7.3–5 Cf. *Abhiprāyaprakāśikā* (101.26–102.20): तत्र यथासम्भवं प्रमाणान्युपन्यस्य निराकरोति– न प्रत्यक्षेणेत्यादिना। नीलमिति वा पीतमिति वा प्रत्यक्षं व्यावृत्तमेव वस्तु गमयति; अन्यथा व्यवहारनियमानुपपत्तेरित्यर्थः।
7.7–12 Cf. *Bhāvaśuddhi* (102.2–12): भेदग्रहणनान्तरीयकमनुमानमुपजीव्यविरोधे दुर्बलमित्यर्थः। …ब्रह्म सर्वप्रकारभेदरहितमित्युपमानात्तत्सिद्धिं निराह– नोपमानेनेति॥ भेदग्रहणनान्तरीयकत्वाच्चेति। …अर्थापत्तिस्त्विति॥ तुशब्देनोक्तेभ्यः प्रमाणेभ्यो भिनत्ति हेतुम्– न भेदमिति॥ भेदाधिष्ठानविश्वव्यवहारदर्शनान्यथानुपपत्तिप्रभवा भेदमन्तरेण (°प्रभावभेद° *edn*) व्यवहारानुपपत्तेः साक्षादेव भेदं गोचरयन्ती सुतरामद्वैतविरोधिनीत्यर्थः। आस्तां तावद् व्यवहारमात्रम्, भवदभिमताद्वैतावगमलक्षणो ऽपि व्यवहारः प्रमाणप्रमेयप्रमातृप्रमाविभागमन्तरेण न शक्यत इत्याह– अभेदो ऽपीति॥
Cf. *Abhiprāyaprakāśikā* (102.21–24): अर्थापत्तिस्त्विति॥ भेदाधिष्ठानविश्वव्यवहारदर्शनान्यथानुपपत्तिप्रभवा भेदमन्तरेण व्यवहारानुपपत्तेः साक्षादेव भेदं गमयतीत्यर्थः। आस्तामयं भेद(व्यवहारः, अ)भेदव्यवहारो ऽपि भवदभिमतो न भेदमन्तरेणेत्याह– अभेदो ऽपीति॥

7.2 भवति] MS^{pc}; भविति MS^{ac} **7.3** निराकरोति] MS^{pc}; निराकेरोति MS^{ac} **7.4** नीलमिति] *conj.*; नीलमित MS • °व्यावृत्तमेव] MS^{pc}; °व्यावृत्त्यमेव MS^{ac} • गोचरयत्य°] *em.*; नोचरयत्त्य° MS **7.6** तदयुक्तं] MS^{pc}; तत्र युक्तं MS^{ac} **7.7** °पत्तिस्त्विति] MS^{pc}; °पत्तिस्तिति MS^{ac}

अर्थापत्तिः पुनर्भेदाधिष्ठा[न](विश्वव्यवहारदर्शना)न्यथानुपपत्तिप्रभवा भेदमन्तरेण व्यवहारानुपपत्तेः साक्षादेव भेदं गोचरयन्ती सुतरामद्वैतविरोधि[नी](त्यर्थः। तुशब्देनोक्तेभ्यः)प्रमाणेभ्यो भिनत्ति। आस्तां तावद्व्यवहारमात्रं भवदभिमताद्वैतावगमलक्षणो ऽपि यावद्व्यवहारः प्रमातृप्रमाणप्र[मे](य प्रमाविभागमन्त) ⟨f.33v⟩रेणाशक्य इत्याह– **अभेदो ऽपि हीति।**

आगमो ऽपि न तावदाप्तप्रणेतृको ऽत्र क्रमते, प्रमाणान्तराधिगतगोचरत्वात्। नापि स्वतन्त्रः, विधिनिषेधरूपत्वात्, तयोश्च स्थिते तत्त्वे ऽसंभवात्। नापि तदनपेक्षं व्यवस्थितवस्तुविषयमेव प्रामाण्यम्, भूतानुवादत्वे प्रमाणान्तरापेक्षत्वात्। लोकाच्च शब्दसामर्थ्याधिगमः। तत्र कार्यपरतयैव कार्यान्वयिष्वर्थेषु पदानि प्रयुज्यन्ते, तथार्थवत्त्वात्। न हि प्रवृत्तिनिवृत्तिशून्यस्य वचसः कश्चिदर्थः। अपि च न भूतानुवादाद्वचसः सम्बन्धानुगमः, अपि तु प्रवर्तकात्। प्रवृत्त्या ह्यनुमायार्थप्रत्ययं तत्र शब्दस्य सामर्थ्यप्रतीतिः।

आगमो ऽपीति। यद्यपि हि शब्दानामौत्सर्गिकी नियोगपरतैव तथापि पौरुषे[या](नां शब्दानां कृतकत्वमि)ति पुरुषविवक्षाधीनरचनास्तद्विवक्षामनुवर्तमानास्तस्याश्च मानान्तरार्थाधीनत्वान्मानान्तरमनुरुध्यमाना मानान्त [

8.9 °प्रतीतिः] *em.*; °प्रतीतेः *edn*

8.1–4 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 196.16–17, 22–23): औत्सर्गिकी च नियोगपरता शब्दानां, नेयमसत्यपवादे शक्या निह्नोतुम्। स्पष्टदृष्टेन पौरुषेयत्वेन मुख्यमपि नियोगार्थत्वमपोद्य लक्षणया विनियोगपरत्वापादनात्।

Cf. *Vidhiviveka (196.1–3)*:अतः प्रमाणान्तरोपलब्धिविवक्षापुरःसरप्रवृत्तित्वाद्विधिमदितरद्वा पुरुषवचः सापेक्षमतथाभावाद्वैदिकमुभयमप्यनपेक्षमिति चतुरश्रम्।

7.9 °न्तरेण व्यवहारानुपपत्तेः] MS^{pc}; °न्तेरेण व्यवहारानुपपत्ति MS^{ac} **7.10** भिनत्ति] त्ति *ow.* MS • आस्तां] *em.*; अस्तान् MS **7.11** भवदभिमताद्वैतावगम°] MS^{pc}; भवमतावगम° MS^{ac} **8.1** °मौत्सर्गिकी] *em.*; °मोत्सर्ग्गिकी MS **8.2** °विवक्षाधीनरचना°] MS^{pc}; °विवक्षाधीननुचना° MS^{ac} **8.3** मानान्तरार्थाधीन°] *em.*; मान्तराद्य। धीन° MS

र] (ग्रहणे च तेषां सापेक्षत्वा)त्तदुत्थापितानां श[ब्दा]नां नियोगपरत्वानुपपत्तेस्तत्सम्बन्धिनां पदार्थानामन्योन्यस्य समन्वयं मानान्तरग्रहणा(द्भवतीति ते भूतम)प्यर्थमवगाहन्ते। न च ब्रह्म भूतमपि मानान्तरगोचर इति न पौरुषेयशब्दविषय इत्यर्थः।

स्वतन्त्र आगमो(ऽपि ब्रह्मणि न प्रमाणमित्या)ह– **नापि स्वतन्त्रः**, तस्य वक्ष्यमाणेन न्यायेन **विधिनिषेधरूपत्वात्**। विधीयते निषिध्यते ऽनेनेति व्युत्पाद्यो (ऽत्र साधकतमत्वविवक्ष) ⟨f.34^{r}⟩ या शब्दोऽपि विधिनिषेधरूप इति। अस्तु विधिनिषेधरूपत्वं किमत इत्यत आह– **तयोश्च स्थिते तत्त्वे ऽसम्भवात्**। [का](र्यरूपौ हि विधिनिषेधौ), कार्यं च कृत्यवच्छिन्नं तत्स्वरूपे व्यवतिष्ठते। कृतिश्च पुरुषप्रयत्नः, स च विधिषु प्रेरको विधारकश्च निषेधेषु सो ऽयमुभ[य](थाप्यनाधेयमना)गतोत्पाद्यभावं गोचरयितुमर्हति। द्रव्यगुणादीनामपि भावार्थसम्बन्धमुखेन कृतिस्पर्शः। न चात्र साक्षान्नापि द्वारेण ब्रह्मण[ः](कृतिसंबन्ध इत्युपपा)दयिष्यते। न च कृतेरसंबन्धि विधिनिषेधौ स्पृशतः। तदिदमुक्तम्– **स्थिते तत्त्व** इति। अत्र च तत्त्व इति कार्यतापरिपन्थिनं (भूतार्थमधिकृत्य निषे)धति व्यापारताम्। द्रव्यादिवदपि

8.8–14 Cf. *Bhāvaśuddhi* (102.17–103.5): नापीति॥ विधीयते, निषिध्यते ऽनेनेति व्युत्पत्त्या साधकतमत्वविवक्षया शब्दो ऽपि विधिनिषेधरूप इत्यस्तु (°रूपावित्यस्तु *edn*) विधिनिषेधरूपत्वम्, किमत इति? अत्राह– तयोश्चेति॥ कार्यरूपौ हि विधिनिषेधौ, कार्यं च कृत्यवच्छिन्नम्। कृतिश्च पुंप्रयत्नो विधिषु प्रेरकः, निषेधेष्वनाधेयानागतोत्पाद्यभावगोचरो न सिद्धं गोचरयेदित्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (103.15–18): विधीयते, निषिध्यते ऽनेनेति करणव्युत्पत्त्या विधिनिषेधरूपत्वमागमस्य। विधिनिषेधतया तर्हि ब्रह्म सिध्यतामिति, अत्राह– तयोश्चेति॥ विधिनिषेधयोः कार्यगोचरत्वात्, कार्यस्य च कृत्यवच्छिन्नत्वेन प्रयत्नरूपाया अनागतोत्पाद्यधात्वर्थगोचरत्वान्न सिद्धे ब्रह्मणि सम्भव इत्यर्थः।

8.4 °दुत्थापितानां] MS^{pc}; °द्दु। त्थापितानां MS^{ac} **8.5** °स्तत्सम्बन्धिनां] *em.*; °स्तत्सम्बन्धिनं MS^{pc}; °स्त्यत्स। म्बन्धिनं MS • पदार्थानाम°] MS^{pc}; पदार्थनाम° MS^{ac} **8.6** °गाहन्ते] MS^{pc}; °गाहन्तो MS^{ac} • इति] MS^{pc}; इ MS^{ac} **8.8** स्वतन्त्र आगमो] *em.*; अतन्त्र आगमौ MS **8.9** °माणेन] *em.*; °माणन MS **8.11** किमत] MS^{pc}; मिमकिमत MS^{ac} **8.12** तत्स्वरूपे] *em.*; तत्स्वरूप MS **8.13** पुरुष°] पुरूष° MS^{pc}; रूष° MS^{ac} • विधारकश्च] MS^{pc}; विधारक MS^{ac} • निषेधेषु] *em.*; निधेषु MS **8.14** °भावं] *em.*; °भाव MS **8.15** द्रव्यगुणा°] MS^{pc}; द्रव्यत्रेणा° MS^{ac} • न चात्र साक्षान्नापि] *conj.*; न चानापि MS **8.16** द्वारेण ब्रह्मणः] *conj.*; द्वाराद्ब्रह्मणः MS **8.17** अत्र] अ *ow.* MS

न ब्रह्मणः ⟨कृतिस्पर्शः⟩। विधिनिषेधपरत्वे शब्दानां सिद्धे भवेदेतत्। तदेव त्वसिद्धम्, सिद्धविषया(णामपि तेषामुपाख्या)नादौ विधिनिषेधानपेक्षाणां बहुलमुपलब्धेरित्यत आह– **न च तद्विधिनिषेधानपेक्षं व्यवस्थितवस्तुवि [ष](यमेव प्रामाण्यमिति।)** ⟨f.34ᵛ⟩ [कस्मात्]? भूतानुवादत्वे प्रमाणान्तरापेक्षत्वात्तद्विरुद्धाप्रामाण्यप्रसक्तेः।

इदमत्राकूतम्– अपौरुषेयत्वे हि शब्दा(नां नियोगपरतेति ल)क्षणं सिध्यति। अपौरुषेयत्वं च मानान्तरागोचरत्वेन तदर्थस्यादृष्टपूर्वस्य कार्यात्मनस्तत्त्वसमारोपाभ्यां बुद्ध्या (ग्रहणे प्रकाशने चासाम)र्थ्यादशक्यवचनत्वेनोपपद्येत। अथ पुनर्भूतार्थत्वे वेदवाक्यानां मानान्तरार्थगोचरतया शक्यवचनत्वेनाबाधित[मि](ह पौरुषेयत्वम्। तदेवं तदु)पनीतपौरुषेयभावानां पुरुषबुद्धिप्रभवत्वात्तस्याश्च कार्यप्रभवत्वे परस्पराश्रयप्रसङ्गा(त्तस्य कार्यस्यानधिगत)पूर्वत्वे चान्धपरम्परावन्निर्मूलतया मिथ्यान्वाख्यानान्मानान्तरं मूलमास्थेयम्। त-

---

8.19–21 Cf. *Bhāvaśuddhi* (103.6–8): विधिनिषेधपरत्वे शब्दानां सिद्धे भवेदेतत्, तदेव त्वसिद्धम् (तदेव त्वसिद्धिम् *edn*); सिद्धविषयाणामपि तेषामुपाख्यानादौ विधिनिषेधानपेक्षाणां बहुलमुपलम्भात्।

8.24–25 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 196.16–17): औत्सर्गिकी च नियोगपरता शब्दानां, नेयमसत्यपवादे शक्या निह्नोतुम्।

Cf. *Tattvasamīkṣā* (7.1): यद्यपि हि शब्दानामौत्सर्गिकी नियोगपरतैव तथापि …

8.26 , 30–31 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 195.17–18): लोकस्तु प्रमाणेनोपलभ्यार्थमन्यत्रोपलब्धं वा समारोप्य वचनानि रचयति।

8.27 , 30–31 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 196.23–25): यदि पुनराम्नायस्य भूतार्थता भवेत्तदा तस्य प्रमाणान्तरयोग्यतया शक्यवचनत्वेन पौरुषेयता दुर्वारा भवेदिति प्रयत्नेन भूतार्थतामपनीय कार्यपरत्वमाम्नायस्य व्युत्पाद्यत इति।

8.30–31 Cf. *Tattvasamīkṣā* (15.1–2): यत्तावदुक्तं भूतार्थत्वे मानान्तरापेक्षत्वेनानुवादकत्वादप्रामाण्यमाम्नायस्येत्याह।

8.19 भवेदे°] *em.*; भावदे° MS • °देव] MS^{pc}; °देत्वव MS^{ac} **8.20** °नादौ] ना *ow.* MS • °नपेक्षाणां] *em.*; °नापेक्षाणां MS **8.21** बहुल°] MS^{pc}; बहुकुल° MS^{ac} **8.22** °नुवादत्वे] *em.*; °नवादत्वे MS **8.25** °यत्वं च] *em.*; °यत्व चं MS **8.26** °रोपाभ्यां] *em.*; °रोप्याभ्यां MS • अशक्यवचन°] *em.*; अशक्यरचन° MS^{pc}; असक्षरचन° MS^{ac} **8.27** अथ] *em.*; अद्य MS • °गोचरतया] MS^{pc}; °गोचर MS^{ac} • शक्यवचनत्वेना°] *em.*; सक्यरनात्वेना° MS^{pc}; सक्षरनात्वेना° MS^{ac} **8.28** °बुद्धिप्रभव°] *em.*; °बुद्धिषभव° MS **8.29** °प्रसङ्गा°] MS^{pc} (deleted akṣaras enclosed within braces); °प्रकृतेदुरुत्साहेसङ्गा° MS^{ac} **8.30** चान्ध°] *em.*; वात्व° MS • °नान्तरं] MS^{pc}; °नान्तनान्तरं MS^{ac} • °मास्थेयम्] *em.*; °मस्थेयं MS

था च तदपेक्षत्वेनाप्रामा[ण्य](माम्नायस्य स्यादित्यर्थः।) तदेवं यत्प्रथमश्रुताच्छब्दादर्थप्रतीतेरनुत्पत्तेः सम्बन्धसंविदपेक्षः शब्दो ऽर्थमवबोधयति। ⟨f.35r⟩ सम्बन्धबोधश्च प्रेक्षावतां प्रयोगेष्वापतते। ते च तत्रैव शब्दं प्रयुञ्जते यत्परे बुभुत्सन्ते। यत्प्रयोजनवत्तदेव च प्रयो[ज](नत्वेनावगतमीप्साजिहा)साभ्यां प्रवृत्तिनिवृत्तिगोचरः। प्रवृत्तिनिवृत्ती च कर्तव्यतावगमाधीने इति कर्तव्यतापरता साक्षात्तदभिधानेन तदर्थाभिधानेन च सर्व(शब्दानामित्याह– **लोका**)-च्चेति॥

तथा च न प्रवृत्तिसम्बन्धरहितेष्वर्थेषु शब्दानां शक्तिर्गम्यते। तथा सत्यनवगतसामर्थ्याः शब्दा भूते ऽर्थे कथं तदवगमयेयुः। अपि च प्रमाणान्तरावसितश्चेत्सो ऽर्थः, न शब्दस्य तत्र प्रामाण्यम्। अथानवसितः, नतराम्। अपदार्थत्वे वाक्यविषयत्वासम्भवात्। पदार्थ एव हि विशिष्टतया वाक्यार्थीभवति। अत्यन्तापरिदृष्टस्तु पदादनवगम्यमानः पदार्थसंसर्गात्मके वाक्यार्थे न गुणत्वेन प्रधानत्वेन वानुप्रवेशमर्हति।

न केवलं प्रवृत्तिनिवृत्तिशून्यस्य वचसः प्रयोगानर्हतनोः सम्बन्धापरिज्ञानमपि तु प्रयोगार्हत्वे ऽपि न शक्यः[सं](बन्धो ज्ञातुम्, सम्बन्धज्ञानस्य)

8.33–36 Cf. *Bhāvaśuddhi* (104.2–5): वृद्धाश्च तत्रैव शब्दान् प्रयुञ्जते। यत्परे बुभुत्सन्त इत्यर्थः। ···तदेव फलवत्, यदवगतमीप्साजिहासाभ्यां प्रवृत्तिनिवृत्तिगोचरः। प्रवृत्तिनिवृत्ती च कर्तव्यतावगमाधीने इति कर्तव्यतापरता सर्वशब्दानामित्यर्थः।
9.1–5 Cf. *Bhāvaśuddhi* (104.7–12): न केवलं प्रवृत्तिनिवृत्तिशून्यस्य वचसः प्रयोगानर्हतया सम्बन्धाज्ञानम्, किन्तु प्रयोगार्हत्वे ऽपि न शक्यः संबन्धो (शक्यसंबन्धो *edn*) ज्ञातुमित्याह। ···सम्बन्धज्ञानस्य बुद्धिभेदानुमानमूलत्वादित्यर्थः। किमतः? तत्राह– तथा चेति॥ अप्रवृत्तिनिवृत्तिपरेषु च वचस्सु पुरुषसमीहालक्षणस्य लिङ्गस्याभावेनानुमानानुत्पत्तिरित्यर्थः। प्रवृत्तिदर्शनेन प्रवर्तकान्वितार्थे पदानां सामर्थ्यावगमान्न सिद्धे मानत्वमित्याह– तथा सतीति॥

8.31 प्रथमश्रुता॰] MS^{pc}; प्रथमस्रुत्याता॰ MS^{ac} **8.32** सम्बन्ध॰] MS^{pc}; सम्बन्धन्ध॰ MS^{ac} **8.34** प्रयुञ्जते] *em.*; प्रयुंक्षते MS^{ac} **8.34** ॰वत्तदेव] MS^{pc}; ॰वत्ततदेव MS^{ac} **8.34–35** ॰भ्यां प्रवृत्तिनिवृत्तिगोचरः। प्रवृत्ति॰] MS^{pc}; ॰भ्यां प्रवृत्ति॰ MS^{ac} **8.35** कर्तव्यताव॰] MS^{pc}; कर्त्तव्यत्सव॰ MS^{ac} **8.36** तदर्थाभिधानेन] *em.*; तदर्थत्वार्थाभिधानेन MS **9.1** ॰नर्हतनोः] *em.*; ॰नर्हतनो MS **9.2** तु] *em.*; च्च MS • न शक्यः] *em.*; न शक्षः MS

बुद्धिभेदानुमानमूलत्वात्। अप्रवृत्तिनिवृत्तिपरेषु च वचस्सु पुरुषसमीहालक्षणस्य लिङ्गस्याभावेनानुमानानुत्पत्ति(रित्यर्थः। प्रवृत्तिदर्शने)न तदुत्पत्तेरप्रत्यूहमुपपत्तिरित्याह– **अपि च** ब्रह्म मानान्तरेणावसितमनवसितं वा स्यात्। उभयथापि दूषय(ति– **प्रमाणान्तरावसित**) ⟨f.35^{v}⟩ इति। मानान्तरावसेयो हि शक्यो ऽनुवाद्यतया प्रतिपादयितुं वचसा। अनवसेयस्तु प्रमेयो नानुवाद्य इति **नतरामित्युक्तम्**(।

अपि च प्रलीननिखिलावच्छेदं तत्त्वमगोचर एव प्रतिपत्तेः। सर्वा हि प्रतिपत्तिः– 'एवम्, नैवम्' इति व्यवच्छेदेन प्रवर्तते। अन्यथा न कश्चित्प्रतिपन्नः स्यात्। सर्वविशेषप्रत्यस्तमये तु कथं प्रतिपत्तिः स्यादित्यत्राह–

आम्नायतः प्रसिद्धिं च कवयो ऽस्य प्रचक्षते।
भेदप्रपञ्चविलयद्वारेण च निरूपणाम्॥ २॥

एवं ब्रह्मणि प्रमाण)गतमसामर्थ्यमापाद्य प्रमाकर्मभावमपि प्रति ब्रह्मणो योग्यतां निषेधति– **अपि च प्र[ली]ननिखिलावच्छेदं तत्त्वमिति**। ए[वं](नैवमिति विधिनि)षेधाभ्यां हि प्रतिपत्तिः प्रत्येतव्ये वर्तमाना प्रकारभेदभाजमेवार्थमवगाहते नाप्रकारभेदम्। न च प्रलीन[नि](खिलावच्छेद)तया प्रस्तुतत्वं प्रकारभेदवद्भवितुमर्हति यतः प्रतीतिगोचरः स्यादित्यर्थः। तत्राह–

आम्नायतः प्रसिद्धिं च कव[यो](ऽस्य प्रचक्षते।

10.1–5 Cf. *Bhāvaśuddhi* (105.8–12): एवं ब्रह्मणि प्रमाणगतमसामर्थ्यमापाद्य, प्रमाकर्मभावमपि प्रति ब्रह्मणो योग्यतां (ऽयोग्यतां *edn*) निषेधति– अपि चेति॥ हेतुमाह– सर्वा हीति॥ 'एवं नैवम्' इति विधिनिषेधाभ्यां प्रकारभेदाभावे दण्डमाह– अन्यथेति॥ तदुपपादयति– सर्वेति॥ प्रलीननिखिलावच्छेदतया प्रस्तुतत्वं न प्रकारवत्, यतः प्रतीतिगोचरः स्यादित्यर्थः॥

9.3 वचस्सु] *em.*; वचप्सु MS • पुरुषसमीहा°] *em.*; पुरुसमीहा° MS **9.4** °रप्रत्यू°] *em.*; °रप्रत्यु° MS **9.5** °पत्तिरित्याह] *em.*; °पदेरित्याह MS **9.6** इति। माना°] इति माना° MS^{pc}; माना° MS^{ac} **9.7** प्रमेयो] MS^{pc}; प्रयोमेयो MS^{ac} **10.1** °गतमसामर्थ्य°] MS^{pc}; °गतसामर्थ्य° MS^{ac} **10.3** प्रत्येतव्ये] त्ये *ow.* MS **10.4** न च प्रलीन°] MS^{pc}; न च न प्रलीनविष° MS^{ac} **10.5** °वद्भवितुमर्हति यतः] MS^{pc}; °व। द्भवितुमर्हति। यतः MS^{ac}

भेदप्र)पञ्चविलयद्वारेण च निरूपणाम्॥

भूतार्थवादित्वे ऽप्यपौरुषेयस्य न सापेक्षत्वमिति वक्ष्यते। न च कार्यनिष्ठान्येव लोके वचांसि। तथा हि प्रियाख्यानानि 'दिष्ट्या वर्धसे, पुत्रस्ते जातः' इति न प्रवृत्तये निवृत्तये वा, दृश्यन्ते च सुखोत्पादनप्रयोजनानि। न च सुखी भव इति तत्र प्रवृत्तिरुपदिश्यते, वस्तुसामर्थ्यादेव तत्सिद्धेरुपदेशस्यानपेक्षणात्।

तत्र यत्तावदुक्तं भूतार्थत्वे मानान्तरापेक्षत्वेनानुवादकत्वादप्रामाण्यमाम्नाय(स्येति, तत्राह– **भूतार्थ**) ⟨f.36ʳ⟩ **वादित्वे ऽप्यपौरुषेयस्येति**। पौरुषेयो हि पदसमूहः पुरुषबुद्धिपूर्वस्तद्बुद्धिविषयीकृतं पश्चात्तदपेक्ष एव वद(त्यर्थम्। अपौरुषेय)स्त्वनपेक्षो ऽप्रत्ययपूर्वं मानान्तरायोग्यमपि वदत्येव, न त्वनुवदतीति नाप्रमाणमिति नियोगकाण्ड उपपादयिष्यते। अ[त](एव तत्रानुवादकमिति वदि)मनुनोपसृजति। यच्च चोदितं प्रवृत्तिनिवृत्त्योरेव प्रयोजनत्वाद्भूतार्थनिष्ठे च वचसि तयोरभावात्प्रेक्षावत्प्रयोगानुपप[त्ते](र्न सम्बन्धबोध इति। तदयु)क्तम्, प्रवृत्तिनिवृत्त्यतिरिक्तस्यापि प्रयोजनस्य संभवादित्याह– **न च कार्यनिष्ठान्येव लोके वचांसि**। तथा ह्यनभिसंहितजात(संस्कारादिकर्तव्यान्त)-

11.1–2 Cf. *Bhāvaśuddhi* (106.2–3): यदुक्तम्– भूतार्थत्वे मानान्तरापेक्षत्वादनुवादकत्वेनामात्वमिति, तत्राह– भूतार्थेति॥

11.6–8 Cf. *Bhāvaśuddhi* (106.5–7): यच्चोक्तम्– भूतार्थे प्रवृत्तिशून्ये प्रयोगानुपपत्तेर्न संबन्धबोधः– इति, तदयुक्तम्; प्रवृत्तिनिवृत्तिव्यतिरिक्तस्यापि प्रयोजनस्य भावादित्याह– न च कार्येति॥

11.8–12 Cf. *Abhiprāyaprakāśikā* (106.21–23): न चेति॥ तत्रापि जातेष्ट्यादिपरता किं न स्यादिति? अत्राह– न प्रवृत्तय इति॥ अनभिसंहितकर्तव्यान्तरस्यापि परप्रीत्यर्थमेव प्रयोगदर्शनादित्यर्थः।

10.7 °द्वारेण च] MS^{pc}; °द्वारेण MS^{ac} **11.1** तत्र यत्तावदुक्तं] MS^{pc}; ये तत्र यत्तावदुक्तं MS^{ac} • मानान्तरापेक्ष°] MS^{pc}; मानान्तरावपेक्ष MS^{ac} • °वादकत्वाद°] *em.*; °वादत्वाद° MS **11.3** पश्चात्तदपेक्ष] MS^{pc}; पश्चात्तयदपेक्ष MS^{ac} **11.4** °पूर्वं] *em.*; °पूर्व्वं MS • न त्व°] *ow.* MS **11.6** °मनु] *em.*; °ननु MS^{pc}; °नानु MS^{ac} • °त्त्योरेव] रे *ow.* MS **11.7** तयो°] त *ow.* MS **11.8** °क्तम्] *em.*; °न्तम् MS • प्रवृत्तिनिवृत्त्यति°] MS^{pc}; प्रवृत्तिनिवृत्त्यनि° MS^{ac}; त्ति *ow.* MS • प्रयोजनस्य] MS^{pc}; प्रयोजनस्या MS^{ac} • °दित्याह] MS^{pc}; °दित्यत आह MS^{ac} • न च] MS^{pc}; न MS^{ac} **11.9** वचांसि] वचां *ow.* MS • °जात°] MS^{pc}; °जान° MS^{ac}

रप्रवृत्तिनिवृत्तेः सुजनस्य परः सुखी भवत्विति प्रियार्थचिख्यापयिषया प्रयुक्तस्य **प्रियाख्यानानि दिष्ट्या वर्धसे पुत्रस्ते जा**[त] (इति न प्रवृत्तये निवृत्तये) **वा**। न निष्प्रयोजनानीत्याह– **दृश्यन्ते च सुखोत्पादनप्रयोजनानि**। नन्वेतत्प्रयोजनानि चेदत्रैव तर्हि तैरयं प्रवर्त्यतामि[त्य](त आह– **न च सुखी**) ⟨f.36^{v}⟩ **भवेति तत्र प्रवृत्तिरुपदिश्यते वस्तुसामर्थ्यादेव तत्सिद्धेः**। सुखी भवेत्युपदेशस्यानपेक्षणादनपेक्षिताभिधायिनः प्रे[क्षा](वत्त्वव्याघातादित्यर्थः।

अथ मतम्– अस्ति तावत्तत्र प्रवृत्तिविशेषः, वचसश्च तत्र तात्पर्यम्। सत्यम्, उत्पत्त्या तात्पर्यं न प्रतिपत्त्या। प्रतिपत्तिर्हि भूतार्थनिष्ठैव। न भूतार्थपर्यवसितस्यैव शब्दस्य प्रयोजनवत्त्वे प्रवृत्त्यवधिर्व्यापारः कल्पयितुं शक्यते।

अस्ति ताव)दिति। **अथ मतमस्ति तावत्प्रवृत्तिविशेषः** सुखीभवनरूपः, तस्य पुरुषार्थतया वचसश्च तत्र तात्पर्यम्। **सत्यमुत्पत्त्या तु, न प्रतिप**(**त्त्या**। यत्र न प्रमाणं तत्र कारक)हेतुः प्रमाणं भवितुमर्हति विधिः, यत्र च प्रमाणं न तत्र विधिस्तस्य सिद्धत्वाद्विधेश्च कर्तव्यतावगाहित्वादित्याह– **प्रतिपत्ति**[रि]-(ति। सुखोत्पत्तौ प्रमाणभूतो विधिः)कारकहेतुरपि न वचः सुखीभवनप्रवृत्तावित्याह– **न भूतार्थपर्यवसितस्यैवे**ति।

12.2 प्रतिपत्तिर्हि] AB; प्रतिपत्तिस्तु *edn* **12.3** न भूतार्थ॰] न च भूतार्थ॰ *edn*

11.14–15 Cf. *Bhāvaśuddhi* (106.11–12): हेतुमाह– वस्तुसामर्थ्यादिति॥ अनपेक्षिताभिधायिनां प्रेक्षावत्त्वव्याघातादित्यर्थः।
12.1–2,5–6 Cf. *Abhiprāyaprakāśikā* (106.26–28): शङ्कते– अथेति॥ प्रवृत्तिविशेषः=सुखीभवनरूपः, तस्य च पुरुषार्थत्वाद्वचसश्च तात्पर्यं तत्रास्तीत्यर्थः। सुखीभवने तात्पर्यं वचसो न वारयामः, किं तु तदुत्पादकतया, न तु तज्ज्ञापकतयेति ब्रूम इति सत्यमिति॥
12.3–4 Cf. *Bhāvaśuddhi* (106.16–107.2): यत्र प्रमाणम्, न तत्र विधिः; तस्य सिद्धत्वात्, विधेश्च कर्तव्यतावगाहित्वादित्याह– प्रतिपत्तिर्हीति॥
12.5–6 Cf. *Abhiprāyaprakāśikā* (107.17–18): सुखीभवनप्रवृत्तेरुत्पादकमपि न वच इत्याह– न चेति॥

11.10 ॰निवृत्तेः] त्ते *ow.* MS • ॰यिषया] ष *ow.* MS **11.12** सुखोत्पादन॰] *conj.*; सुखोत्पाद॰ MS • नन्वेत॰] *em.*; नत्वेत॰ MS; त्वे *ow.* MS **11.15** ॰भिधायिनः] MS^{pc}; ॰भिधानःयिनः MS^{ac} **12.4** ॰द्विधेश्च] धेश्च *ow.* MS • ॰दित्याह] त्या *ow.* MS **12.5** कारक॰] MS^{pc}; कारका॰ MS^{ac}

अपि चोपाये वाप्रवृत्तः पुरुषः प्रवर्त्यते, अज्ञातोपायत्वाद्वा उपेये प्रागप्रवृत्त उपायप्रज्ञापनद्वारेण तत्र। इह न तावदुपाये पुत्रजन्मनि, तस्य निष्पन्नत्वात्। नोपेये सुखे, तदर्थव्यापारान्तराभावात्। तथा दुर्जनवचनान्यप्रियाख्यानानि विषादप्रयोजनानि न प्रवृत्तिं निवृत्तिं वोपदिशन्ति पूर्वेणैव न्यायेन। तथा रज्जुवेष्टितस्य सर्पवेष्टितमात्मानं मन्यमानस्य भयनिवृत्तये तत्त्वाख्यानं दृश्यते, न तु तत्र 'मा भैषीः' इति नियोगः। तत्र हि नियोगो भवति, यत्र नियोगार्थं प्रतिबुध्य पुरुषो बुद्धिपूर्वं नियोगसामर्थ्यादिच्छया वा पुनः प्रवर्तते निवर्तते वा। इह तु तत्त्वप्रतिपत्तिमात्रान्नियोगेच्छानपेक्षस्य हेत्वभावादेव तस्य भयनिवृत्तिः। न च भयनिवृत्तौ पुरुषार्थत्वात् स्वयंप्रवृत्तः पुरुषो नियोज्यः, नापि तदुपाये तत्त्वप्रतिपत्तौ, 'रज्जुः, न सर्पः' इति शब्दादेव तदुत्पत्तेः, शब्दार्थप्रतिपत्त्युत्तरकालस्य च व्यापारस्य विधिनिबन्धनत्वात्। तथा दूरदेशवृत्तान्ताख्यानानि पृष्टवतां कुतूहलिनामौत्सुक्यनिवृत्त्यर्थानि भूतार्थपर्यवसितानि न हानायोपादानाय वा।

अपि चास्याः प्रवृत्तेर्गोचरो न वि(चारं सहत इत्यत्राह– **अ**)**पि चोपाये वेति**। उपेये स्वयमुन्मुखो ऽपि हि चेतन उपायापरिज्ञानान्न प्रवर्तते। कामयन्त एव हि सर्वज्ञतां पुमां[सो](न को ऽपि पुनस्तदुपायः प्र)वृत्तिगोचरः।

13.1–2 Cf. *Bhāvaśuddhi* (107.5–6): किं चास्याः प्रवृत्तेर्गोचरो न विचारं सहत इति, अत्राह– अपि चेति॥ उपेये स्वयमुन्मुखो ऽपि चेतन उपायापरिज्ञानादप्रवृत्त इत्यर्थः।
13.2–3 Cf. *Nyāyakaṇikā* (414.10–415.7): कामयन्त एव हि सर्वज्ञतां पुमांसो न पुनरियमनुपाया शक्यप्राप्तिरिति नास्यां प्रवर्तन्ते। एवमुपायज्ञानस्य पुरस्तात्काम्या अपि स्वर्गादयो न प्रवृत्तिगोचरा इति नियोगस्तदुपायमवगमयंस्तत्र प्रवर्तयति तदर्थिनमित्यर्थः।

13.1 °र्गोचरो] MS^{pc}; °र्गोचरे MS^{ac} • चोपाये] MS^{pc}; चोपायो MS^{ac} **13.2** उपेये] पेये *ow.* MS • उपायापरि°] MS^{pc}; उपायायापरि° MS^{ac} **13.2–3**कामयन्त] MS^{pc}; कामन्त MS^{ac} का *ow.* MS **13.3** पुमांसो] पु *ow.* MS

तदिदमुक्तम्– **अज्ञातोपायत्वाद्वेति**। **नियोगसामर्थ्यादिति**। नैमित्तिकनिषेधक्रत्वर्थेषु **नियोगसाम[र्थ्या](त्प्रवृत्तिर्निवृत्तिर्वा। इच्छया)** ⟨f.37r⟩ **वेति**। काम्येषु प्रवृत्तिरिच्छानिबन्धना, तन्नियोगस्तत्रोदास्त इति प्राभाकराः।

यत्रापि भूतार्थप्रतिपत्तौ हानमुपादानं वा संभवति, यथा– 'एष प्रतिरोधकवानध्वा, निधिमानेष भूभागः' इति। तत्रापि हानोपादानयोः शब्दो व्याप्रियते, भूतार्थोपक्षयात्। शब्दाङ्गतमर्थं प्रतिपद्य तस्य प्रमाणान्तरावगतामुपकारहेतुतामपकारहेतुतां वा संस्मृत्य इच्छया प्रवर्तते द्वेषेण निवर्तते वा। ननु प्रयोक्ता बुद्धिपूर्वकारी श्रोतुः प्रवृत्त्यर्थं निवृत्त्यर्थं वा वचनं प्रयुङ्क्ते। तथा च प्रवृत्तिनिवृत्तिपर्यवसितमेव। इदं हि तत्र प्रयोक्तव्यं न प्रयुज्यते 'न गन्तव्यमनेनाध्वना' तथा 'गृहाणेतो निधिम्' इति।

यत्रापि शब्दार्थप्रतिपत्त्युत्तरकाला प्रवृत्तिर्निवृत्ति(र्वा न विध्यधीना, त)द्यथा निधिमानेष भूभागः प्रतिरोधकवानध्वेति, **तत्रापि** न प्रवृत्तिनिवृत्त्यर्थता वचसः, तयोरन्यत एव प्रतिलम्भादनन्यल[भ्य](त्वाभावे शब्दार्थत्वहानि)प्रसङ्गादित्याह– **यत्रापि भूतार्थप्रतिपत्ताविति**। **तस्येति** जात्यभिप्रायम्, त-

---

14.1यत्रापि] अपि च यत्रापि *edn*

13.4–6 Cf. *Bhāvaśuddhi* (108.5–7): नियोगसामर्थ्यान्नैमित्तिकनिषेधक्रत्वर्थेषु प्रवृत्तिः, काम्येषु प्रवृत्तिरिच्छानिबन्धना, तन्नियोगस्तत्रोदास्त इति प्राभाकरा इत्यर्थः।
14.1–4 Cf. *Abhiprāyaprakāśikā* (108.5–7): शब्दार्थप्रतिपत्त्युत्तरकाला अपि प्रवृत्तिनिवृत्तयो न नियमेन विध्यधीनाः; अन्यतो ऽपि सम्भवात्, अनन्यलभ्यस्य च शब्दार्थत्वादित्याह– अपि च यत्रेति॥
14.3–4 Cf. *Bhāvaśuddhi* (109.6–7): अतो ऽनन्यलभ्यत्वाभावान्न तयोः शब्दार्थतेत्यर्थः॥
14.4–6 Cf. *Abhiprāyaprakāśikā* (109.21–22): तस्य=तज्जातीयस्येति यावत्। संस्मृत्य=तज्जातीयतया शब्दावगतस्यापि तद्धेतुतामनुमायेति शेषः॥

13.5 काम्येषु] *em.*; कामेषु MS **14.1** यत्रापि] MS[pc]; यत्रापिप्र MS • °काला प्र°] MS[pc]; °कालात्प्र° MS[ac] **14.2** °मानेष] MS[pc]; °माने MS[ac] • °वानध्वेति] ध्वे *ow.* MS **14.3** तयो°] MS[pc]; तायो° MS[ac] **14.4** °सङ्गादित्याह] ङ्गा *ow.* MS • यत्रापि] पि *ow.* MS

ज्जातीयस्योपकारहेतुतामपकारहेतुतां वा व्या(कृत्येति यावत्। **सं**)**स्मृत्य** तज्जातीयतया शब्दावगतस्यापि तद्धेतुतामनुमायेति शेषः। भूतार्थपर्यवसितव्यापारस्य निष्प्रयोजनतया (प्रेक्षावत्प्रवृत्त्यनुप)पत्तेः प्रवृत्तिनिवृत्त्यवधिरेव व्यापारः कल्पनीय इति चोदयति– **ननु प्रयोक्तेति**।

नैतत्सारम्। भूतार्थपर्यवसितस्यापि वचसो भूतार्थावगममुखेन प्रवृत्तिनिवृत्त्यङ्गभावो यतो न व्याहन्यते प्रत्यक्षादीनामिव। भूतार्थप्रमापरिसमाप्तव्यापृतयः प्रत्यक्षादयो मात्रयाप्यगोचरीकृतप्रवृत्तिनिवृत्तयो न प्रवृत्तिनिवृत्त्यङ्गभावं जहति, तथा शब्दोऽपीति न किंचित्प्रदुष्यति। प्रयोक्त्रभिसंहिते प्रवृत्तिनिवृत्ती इति चेत्, न प्रयोक्त्रभिसंधानाच्छब्दार्थत्वमपि तु सामर्थ्यात्। अन्यथा निधिप्राप्तिद्वारिका नानाविधपुरुषार्थावाप्तिरपि तस्याभिसंहितेति शब्दार्थः स्यात्। यदा च प्रवृत्तिं निवृत्तिं वाभिसंधाय किंचित्प्रत्यक्षादिभिर्जिज्ञास्यते, तदाभिसंहिते अपि प्रवृत्तिनिवृत्ती न प्रत्यक्षादिप्रमेये। तदाभिसंहिते अपि प्रवृत्तिनिवृत्ती न शब्दार्थौ। इतश्चैतदेवम्– यत्कस्यचिदुपादानबुद्धिः, अन्यस्योपेक्षा। शब्दार्थत्वे हि सर्वेषामुपादानबुद्धिरेव स्यात्।

स पुनरयं प्रेक्षावत्प्रयोगो ऽन्यथा(सिद्धो न प्रवृत्तिनिवृत्तिप)र्यन्ततां वाचां व्यापारस्य गमयतीति परिहरति– **नैतत्सारमिति**। ननु न प्रेक्षावत्प्र-

---

15.11इतश्चैतदेवम्] इतश्च तदेवम् *edn*

14.6–8 Cf. *Bhāvaśuddhi* (109.8–10): भूतार्थपर्यवसितव्यापारस्य शब्दस्य निष्प्रयोजनतया प्रेक्षावत्प्रवृत्त्यनुपपत्तेः प्रवृत्तिनिवृत्त्यन्तरविधिरेव व्यापारः कल्पनीय इति चोदयति– नन्विति॥
15.1–2 Cf. *Bhāvaśuddhi* (109.11–12): प्रेक्षावत्प्रयोगो ऽन्यथासिद्धो न प्रवृत्तिनिवृत्तिपर्यन्ततां वाचां व्यवहारस्य गमयतीति परिहरति– नैतदिति॥
15.2–7 Cf. *Bhāvaśuddhi* (109.16–110.2): ···न प्रेक्षावत्प्रयोगानुपपत्त्या प्रवृत्तिनिवृत्त्य-

---

14.6 तज्जातीय॰] MS^{pc}; ततज्जातीय॰ MS^{ac} • तद्धेतुता॰] द्धे and ता *ow.* MS
14.7 ॰व्यापारस्य] MS^{pc}; ॰व्यापारस्यापि MS^{ac} • प्रवृत्तिनिवृत्त्यवधिरेव] *ow.* MS
15.2 व्यापारस्य] MS^{pc}; व्यापारस्यापि MS^{ac}

योगान्यथानुपपत्त्या प्रवृत्तिनिवृ[त्त्योः] ⟨f.37^{v}⟩ शब्दार्थतामाचक्ष्महे, किं तु तदभिसन्धानात्। अभिसंहितप्रवृत्तिनिवृत्तयो हि प्रेक्षावन्तः प्रयुञ्जते वाक्यानि निधिमानित्येवमा[दी](नि। तदवगच्छामो ऽवगच्छ)न्ति नूनमेते प्रवृत्तिनिवृत्त्यवधिव्यापारतां वाक्यानामिति शङ्कते– **प्रयोक्त्रभिसंहित** इति। निराकरोति– **न प्रयोक्त्रभि**(संधानाच्छब्दार्थत्वम)पि तु सामर्थ्यात्। तच्चान्यथानुपपत्त्येककल्पनीयमन्यथोपपत्तावप्रामाणिकम्। दर्शिता च प्रवृत्तिनिवृत्तिप्रतीत्योरन्यथोपपत्ति[रि](ति नान्यथानुपपत्तिः। तद)भिसन्धानस्य शब्दार्थत्वहेतुत्वे ऽतिप्रसङ्गः स्यादित्याह– **इतश्चैतदेवम्**। यन्निधिमानयं भूभाग इति **कस्यचिद्धनाय यदु**[पा](**दानबुद्धिरन्यस्य** समी)हाप्रतिष्ठायामुपेक्षा, एवं प्रतिरोधकवानध्वेत्यत्रापि तस्करान्नियन्तुमनस उपादानबुद्धिरन्यस्य तु भी[रोः] (समीहानियमनादावुपेक्षा।) ···

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

इदमिदानीं विचार्यते– किं कृत्स्न आम्नायो भेदप्रपञ्चविलयमुखेन ब्रह्म निरूपयति, आहोस्वित्कश्चिदस्यैकदेशः? तत्र केचिदाहुः– सर्वत्रैवाम्नाये क्वचित्कस्यचिद्भेदस्य प्रविलयो गम्यते, यथा 'स्वर्गकामो यजेत' इति शरीरात्मभावस्य प्रविलयः। अत्र हि देहव्यतिरिक्तस्वर्गोपभोगसमर्थो ऽधिकारी गम्यते, ते-

---

16.4 Taittirīyasaṃhitā II.5.5: स्वर्गकामो यजेत।

र्थतामाचक्ष्महे, किं तु तदभिसन्धानात्, अभिसंहितप्रवृत्तिनिवृत्तयो हि (॰त्त्योर्हि *edn*) प्रेक्षावन्तः प्रयुञ्जते– निधिमानित्यादि, तदवगच्छामो ऽवगच्छन्ति नूनमेते प्रवृत्तिनिवृत्त्यन्तरपरता वाक्यानामिति शङ्कते– प्रयोक्त्रिति॥

15.8–10 Cf. *Abhiprāyaprakāśikā* (110.21–22): न चात्रानुपपत्तिः प्रवृत्तिनिवृत्त्योः, अन्यथा ऽप्युपपत्तेर्दर्शितत्वादित्यर्थः। अभिसंहितत्वमात्रेण शब्दार्थत्वे दोषमाह– अन्यथेति॥

15.3 ॰योगान्यथा॰] MS^{pc}; ॰योन्यथा॰ MS^{ac} • ॰चक्ष्महे] क्ष्महे *ow.* MS **15.4** ॰भिसन्धाना॰] *em.*; ॰भिसत्वाना॰ MS **15.6** प्रवृत्तिनिवृत्ति॰] MS^{pc}; प्रवृत्तिप्रवृत्तिनिवृत्ति॰ MS^{ac} (deleted akṣaras enclosed within braces) • वाक्यानामिति] MS^{pc}; वाक्यनामिति MS^{ac} **15.8–9**प्रवृत्तिनिवृत्ति॰] MS^{pc}; प्रवृत्ति॰ MS^{ac} **15.10** भूभाग] *em.*; भूग MS **15.11** ॰चिद्धनाय] MS^{pc}; ॰चिद्धना MS^{ac} • ॰मुपेक्षा] MS^{pc}; ॰मुछपेक्षा MS^{ac} **15.12** ॰नध्वे॰] *ow.* MS

न देहात्मभावप्रविलयः। तथा 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यधिकृताधिकारादधिकारिभेदप्रविलयः। तथा विधिनिषेधचोदनास्वपि नैसर्गिकीणां रागादिनिबन्धनानां प्रवृत्तीनां प्रविलयः। निषेधेषु साक्षात्, विधिषु प्रवृत्त्यन्तर्नियोगेन। लोकेऽप्यनभिप्रेतात्पथः साक्षाद्वा निवारणम्, पथ्यन्तरोपदेशेन वा। एवं च रागादिनिबन्धननैसर्गिकप्रवृत्तिभेदविलयद्वारेण दृष्टेनैव कर्मविधय आत्मज्ञानाधिकारोपयोगिनः। तथा हि– शान्तस्य दान्तस्य समाहितस्य चात्मनि दर्शनमुपदिश्यते। शक्यं च। न हि विषयैराकृष्यमाणस्तदुपायप्रवृत्तिकृतचेताः शक्नोत्यात्मनि समाधातुम्। नैसर्गिकीभ्यस्तु प्रवृत्तिभ्य उपरतो नियतमानस आत्मदर्शनेनाधिक्रियते, सामर्थ्यात्।

अन्ये मन्यन्ते– अनवाप्तकामः कामोपहतमना न परमाद्वैतदर्शनयोग्यः। कर्मभिस्तु कृतकामनिबर्हणः सहस्रसंवत्सरपर्यन्तैः प्राजापत्यात्पदात्परमाद्वैतमात्मानं प्रतिपद्यत इति। उभयोरपि पक्षयोरनयोः कृत्स्न आम्नाय आत्मज्ञानैकपर्यवसायी। अन्येषां दर्शनम्– पृथक्कार्या एव सन्तः कर्मविधय आत्मज्ञानाधिकारमवतारयन्ति पुरुषम्, अनपाकृतर्णत्रयस्य तत्रानधिकारात्– 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति। अन्ये तु संयोगपृथक्त्वेन सर्वकर्मणामेवात्मज्ञानाधिकारानुप्रवेशमाहुः 'विविदिषन्ति यज्ञेन' इति श्रुतेः, 'येन केनचन यजेतापि दर्वीहोमेनानुपहतमना एव भवति' इति च। अन्ये तु पुरुष-

16.17अन्ये] A; अन्ये तु *edn*

16.6–7 *Āpastambaśrautasūtra* I.16.3: गोदोहनेन पशुकामस्य प्रणयेत्।
16.23 *Manusmṛti* VI.35: ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
16.25 *Bṛhadāraṇyakopaniṣad* IV.4.22: विविदिषन्ति यज्ञेन …
16.25–26 Source Unknown: येन केनचन यजेतापि दर्वीहोमेनानुपहतमना एव भवति।

संस्कारतयात्मज्ञानाधिकारसंस्पर्शी कर्मणां वर्णयन्ति – 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः', 'यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः' इति च। अन्ये त्वेतदेव विपरीतं वर्णयन्ति, आत्मज्ञानमेव कर्तृसंस्कारतया कर्माधिकारानुप्रवेशीति। अन्ये तु परस्परविरोधिनोः कर्मात्मज्ञानयोः द्वैताद्वैतविषयत्वेनासंबन्ध एवेति मन्यन्ते।

... (पशुपुत्रस्वर्गादीनां तत्तद्दुःखसह)⟨f.40r⟩स्रसंभेदेन मधुविषसंपृक्तान्नकल्पानामनर्थतया पुरुषोपकारत्वाभावेनातत्कामानां तत्साधनेषु कर्मस्वधिका[रा]-(संभवाद्विगलितनिखिलदुः)खानुषङ्गपरमानन्दमयब्रह्मज्ञानाधिकारानुप्रवेशित्वं सर्वेषामेव कर्मविधीनां स्वर्गपुत्रपशुकामाद्युपहारस(म्पादितकामनिबर्हणावा)न्तरव्यापाराणाम्। तन्मतमुपन्यस्यति – **अन्ये मन्यन्ते अनवाप्तकाम** इति। **संयोगपृथक्त्वेने**ति। यथा खलु 'अग्निहोत्रं (जुहुयात्स्वर्गकामः' इति स्वा)-

16.28 *Manusmṛti* II.28: महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।
16.28–29 *Gautamadharmasūtra* VIII.22: यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः।
16.6 *Maitrāyaṇyupaniṣad* IV.36: अग्निहोत्रं जुहुयात्स्वर्गकामः।

16.1–5 Cf. *Bhāvaśuddhi* (117.12–16): पशु-पुत्र-स्वर्गादीनां तत्तद्दुःखसहस्रसम्भेदेन मधु-विष-सम्पृक्तान्नकल्पानामनर्थतया (°संयुक्तान्न° *edn*) पुरुषोपकारत्वाभावेनातत्कामानां तत्साधनकर्मस्वधिकारासम्भवाद्विगलितनिखिलदुःखानुषङ्गपरमानन्दाद्वयब्रह्मज्ञानाधिकारानुप्रवेशित्वं सर्वेषामेव कर्मविधीनां पशु-पुत्र-स्वर्गाद्युपहारसम्पादितकामनिबर्हणावान्तरव्यापाराणाम्।

16.6–14 Cf. *Bhāvaśuddhi* (118.7–16): संयोगपृथक्त्वेनेति॥ यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति स्वाधिकारवाक्यसन्निधिसमाम्नातं 'दध्ना जुहोति' इति वाक्यं प्रकृतहोमानुवादेन दधिगुणं विदधत् क्रत्वर्थतामापादयति, एवं 'दध्नेन्द्रियकामस्य जुहुयात्' इत्येतस्यैव दध्नो होममाश्रितस्येन्द्रियफलत्वं विदधत्पुरुषार्थतामापादयति; अधिकृताधिकारप्रतीतेरधिकाराभेदात्, यथा 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यत्र संयोगपृथक्त्वमुत्पत्त्यधिकारवाक्ययोरधिकारिभेदाभावात्, तथेहापि दर्शपूर्णमासादेर्यज्ञस्य स्ववाक्येषु प्रातिस्विकाधिकारिभेदभावः। 'विविदिषन्ति यज्ञेन' इत्यादिवाक्यापादितात्मज्ञानकार्यस्य सम्भवति संयोगपृथक्त्वेनोभयार्थतेत्यर्थः।

16.1 मधुविषसंपृक्तान्न°] MS^{pc}; मधुविषयसंपृक्तानु° MS^{ac} **16.2** °नातत्कामानां] *em.*; °न तत्कामानां MS^{pc}; °न भुत्कामानां MS^{ac} **16.4** सर्वेषामेव] MS^{pc}; सर्वेषांमेव MS^{ac} **16.6** खल्वग्नि°] MS^{pc}; त्वखल्वग्नि° MS^{ac}

धिकारवाक्यसन्निधिसमाम्नातं 'दध्ना जुहोति' इति वाक्यं प्रकृतहोमानुवादेन दधिलक्षणं गुणं विदधदस्य क्रत्वर्थतामापादयति,[ए](वं 'दध्नेन्द्रियकामस्य जुहुया)त्' इति तस्यैव दध्नो होमाश्रितस्येन्द्रियफलत्वं विदधत्पुरुषार्थतामापादयत्यधिकृताधिकारप्रतीतेरधिकाराभेदात्। ननु 'अग्निहो(त्रं जुहुयात्स्व)र्गकामः' इत्यत्र संयोगपृथक्त्वमुत्पत्त्यधिकारवाक्ययोरधिकारिभेदाभावात्, तथेहापि दर्शपूर्णमासादेर्यज्ञस्य स्ववा[क्ये](षु प्रातिस्विकाधिकारि)⟨f.40ᵛ⟩भेदभाज उपलब्धस्य 'विविदिषन्ति यज्ञेन' इत्यादिवाक्यापादितात्मज्ञानकार्यस्य सम्भवति संयोगपृथक्त्वेनोभयार्थते[त्यर्थः॥

तत्र न तावत्प्रथमः कल्पः। न हि कर्मादिविधयः स्ववाक्यसमधिगतस्वर्गादिकार्याः कार्यान्तरमपेक्षन्ते। नाप्यात्मज्ञानविधिर्यथोदितब्रह्मचर्यादिसाधननिराकाङ्क्षः कर्मविधीनपेक्षते। तत्र कुत एकाधिकारत्वम्। यदि मन्येतानवगतकार्या एव कर्मादिविधयः, स्वर्गादीनां गुणत्वेन संबन्धादिति, स्वर्गकामाधिकरणमस्मै व्याचक्षीत।

तत्र न](**तावत्प्रथमः कल्पः। न**) **हि कर्मादिविधय** इति स्वर्गकामाधिकरणसिद्धान्ताभिप्रायम्। **यदि मन्येतानवगतकार्या** इति पूर्वपक्षाभिप्रायम्। दर्शित[स्वा](भिप्रायं तमुपहसति– **स्वर्ग**)**कामाधिकरणमस्मै व्याचक्षीते**ति।

17.4यदि मन्येतानवगत॰] अथ अनवगत॰ *edn*

16.7 *Maitrāyaṇīsaṃhitā* IV.7.7: दध्ना जुहोति।
16 16.8–9 *Taittirīyabrāhmaṇa* II.1.5.6: दध्नेन्द्रियकामस्य जुहुयात्।

17.3 Cf. *Śaṅkhapāṇi* (73.15): सिद्धान्ती तु सोपहासमाह– स्वर्गेति।

16.8 गुणं विदधदस्य] MS^{pc}; विदधस्य MS^{ac} **16.9** ॰श्रितस्येन्द्रियफलत्वं] MS^{pc}; ॰श्रितफलस्येन्द्रियफलत्वं MS^{ac} **16.10** ॰कारप्रतीतेरधिकाराभेदात्] *em.*; ॰कारप्रतीतेरधिकारभेदात् MS^{pc}; ॰कारभेदात् MS^{ac} • नन्वग्नि॰] MS^{ac}; नन्विग्नि॰ MS^{pc} **16.11** ॰पृथक्त्वमुत्पत्त्यधिकारवाक्ययोरधिकारिभेदा॰] *em.*; ॰पृथक्त्वप्रत्पन्नाधि वाक्ययोरधिकारं भेदा॰MS^{pc}; ॰पृथक्त्वप्रत्पन्नधि वाक्ययोरधिकारं भेदा॰ MS^{ac} **16.12** तथेहापि] MS^{pc}; तथेहापीति MS^{ac} **16.13** ॰वाक्यापादितात्मज्ञान॰] *em.*; ॰वाक्यार्थादितात्मज्ञान॰ MS^{pc}; ॰वाक्यार्थादिज्ञान॰ MS^{ac} **16.14** ॰पृथक्त्वेनो॰] MS^{pc}; ॰पृत्क्वेनो॰ MS^{ac} **17.1–2**॰धिकरणसिद्धान्ता॰] MS^{pc}; ॰धिकरणसिद्धा॰ MS^{ac}; धि *ow.* MS **17.3** ॰कामा॰] MS^{pc}; ॰कामो॰ MS^{ac} • व्याचक्षीतेति] च *ow.* MS

तत्रेदं व्याख्यातम्– न खलु प्रवर्त्तनामात्रमविशेषं लिङर्थः, किं त्वाज्ञाभ्यर्थनानुज्ञो(पदेशाद्यनुषक्तमेव तृन्नादी)नामिव कर्तृत्वं ताच्छील्याद्यनुषक्तम्। सामान्यमात्रशब्दत्वं हि विशेषे प्रमाणाभावे सति सङ्गतिसंवेदने तन्मात्रगमक(त्वेन व्याप्तम्, लिङादि)षु तथा दर्शनात्तृन्नादिषु चादर्शनात्। न चेहाज्ञादिभेदप्रमाणाभावे सत्यस्ति प्रवर्त्तनामात्रगतिर्लिङादिभ्यो (विशेषबोधकोपदेशा)दिपदेभ्यः। सेयमाज्ञादिभेदग्राहिणि प्रमाणे प्रवर्तनामात्रप्रतीतिर्निवर्तमाना स्वव्याप्यं तन्मात्राभिधायित्वमपि निवर्तयतीति सिद्धमाज्ञाद्यनुषक्त(मेव शब्दार्थ इति।) ···

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

अपि च सर्वविधिनिषेधानां नामरूपप्रविलयकार्यापवर्गित्वे जन्तूनामभ्युदयविनिपाता अकर्मनिमित्ता आकस्मिकाः स्युः। तथापवर्गोऽपि स्यादिति वैयर्थ्यं शास्त्रस्यापि। अथ स्वर्गादिकार्यद्वारेण कर्मविधीनां ज्ञानाधिकारानुप्रवेशिता मार्गग्रामगमनोपदेशानामिवाभिमतनगरगमनोपदेशानुप्रवेशित्वम्। तदसत्। युक्तं मार्गग्रामप्राप्तेरनभिमतदेशप्राप्त्युपदेशानुप्रवेशित्वम्। न हि

17.4–9 Cf. *Vidhiviveka (317.1–5):* न तावत्सामान्यं लिङाद्यर्थः। प्रेषणाध्येषणाभ्यनुज्ञोपदेशानां तु विशेषाणामेव लोके प्रतीतेः, मोहादिभेदान्तरावगतेश्च। न हि प्रवृत्तिहेतुमात्रावबोधः क्वचिदस्ति। सामान्यशब्दाद्विशेषप्रमाणाभावे तन्मात्रावगतिः। अतो न तन्मात्रं शब्दार्थः। विशेषानुषक्तमेव तु तृन्नादीनामिव कर्तृत्वं ताच्छील्याद्यनुषक्तम्।

Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 317.7–8, 19–21): प्रवर्तनामात्रं शब्दार्थ इति हि मन्यमानेन स्वर्गादेः साध्यत्वं निरासीति तदेव तावद्दूषयति– न तावत्सामान्यं लिङाद्यर्थः। ···

सामान्यशब्दत्वं हि विशेषप्रमाणाभावे गृहीतसम्बन्धस्य सामान्यमात्रावबोधकत्वेन व्याप्तम्, तदिहोक्तेन क्रमेण सामान्यमात्रावबोधकत्वं निवर्तमानं स्वव्याप्यं सामान्यशब्दतामपि लिङो निवर्तयति।

17.4 प्रवर्त्तनामात्रमविशेषं] MS^{pc}; प्रवर्त्तमानात्रामविशेषं MS^{ac} **17.5** कर्तृत्वं ताच्छील्या॰] न्ता *ow.* MS **17.6** प्रमाणा॰] MS^{pc}; प्र माणा॰ MS^{ac} **17.7** ॰न्नादिषु] षु *ow.* MS **17.9** ॰दिपदेभ्यः। सेयमाज्ञादिभेदग्राहिणि प्रमाणे प्रवर्तना॰] MS^{pc}; ॰दिभ्यः प्रवर्तना॰ MS^{ac} • प्रतीति] तीति *ow.* MS **17.10** सिद्धमाज्ञाद्यनुषक्त॰] MS^{pc}; सिद्धज्ञाद्यनुषक्त॰ MS^{ac}; ष *ow.* MS

मार्गग्रामोपदेशेषु पुरुषार्थप्राप्तिः। अतः साकाङ्क्षत्वाद्यत्र पुरुषार्थप्राप्तिः, तमनुप्रविशन्ति। न त्वेवं कर्मविधिषु पुरुषार्थस्यालाभः, स्वर्गादीनां पुरुषेणार्थ्यमानत्वात्। तत्र च नैराकाङ्क्ष्ये कथमन्यानुप्रवेशः? अथ मतम्– यदोपच्छन्द्य नीयत उत्तरोत्तरग्रामगुणोपदर्शनेनाभिप्रेतं देशम्, तदा पूर्वग्रामोपदेशाः प्राप्ताभिमतकार्या उपदेशान्तरानुप्रवेशिनश्चेति। युक्तं तत्रापि प्रमाणान्तरेण वक्तुरभिप्रायाधिगमात्। प्रमाणान्तरेण हि तत्रेदमधिगतम्– एतद्देशप्राप्ताविदमस्य समीहितं वक्तुः संपद्यते, तस्मादिदमस्य विवक्षितमिति। न तु शब्दवृत्तिमात्रानुसारेण।

··· (आज्ञाभ्यर्थनानुज्ञादी)⟨f.42^{r}⟩राम्। अस्तु वा तन्मात्राभिधानम्, तथापि तस्यापि सामान्यात्मन आज्ञादय एव विशेषा एषितव्याः। न च निर्विशेषं सम्भव[ति], (तस्मादाज्ञाभ्यर्थनानु)ज्ञादीनामन्यतमो विशेष आस्थेयः। तत्र तावदाज्ञाभ्यर्थनाभ्यां नियोज्यस्तद्विषयादसमीहमानः स्वोपकारं तदभि(प्रायानुरोधादेवा)ज्ञापयितुरभ्यर्थयमानस्य वोपकारं समीहमानः प्रवर्तते। अनुज्ञायां तु यद्यपि तद्विषयादेव कश्चिदुपकार(स्तथापि तत्कार्याय प्रवृत्ता)वभिप्रायं नियोक्तुरनुविधत्ते नियोज्यः, तदभावे समीहमानस्याप्यप्रवृत्तेः। तदे–

18.15शब्दवृत्तिमात्रा°] शब्दप्रवृत्तिमात्रा° A; शब्दवृत्तमात्रा° *edn*

18.4–6 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 320.last–321.14): आज्ञाभ्यर्थनयोर्हि कर्मणः समीहितसिद्धिं प्रति सामर्थ्यमनपेक्षमाणो ऽत एव तद्विशेषं तस्य कर्मणः प्रयोजनविषयं विशेषमनाद्रियमाणस्तदभिप्रायानुरोधादेव किंचित्समीहमानस्तुष्टो ऽयमाज्ञापयिता किंचिदभिमतं मे करिष्यतीति समीहमानो ऽभिप्रायानुरोधी प्रवर्तते। अनुज्ञाने ऽपि यद्यपि क्रियाफलात्प्रवृत्तिस्तथाप्यभिप्रायानुकूल्यमपेक्षते।
18.7–14 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 320.21–26): आज्ञादिकः प्रयोक्तृध-

---

18.1 अस्तु] स्तु *ow.* MS • तथापि] *em.*; तथापिं MS **18.2** सामान्यात्मन] MS^{pc}; सामात्मन MS^{ac} **18.3** °मन्यतमो] MS^{pc}; °मतन्यतमो MS^{ac} • आस्थेयः] MS^{pc}; आस्थैयः MS^{ac} **18.4** °भ्यर्थनाभ्यां] MS^{pc}; °भ्यनाभ्यां MS^{ac} • नियोज्य°] *em.*; नियोसु° MS • स्वोपकारं तदभि°] *em.*; स्वोपकारतुमपि° MS; स्वो *ow.* MS **18.5** °ज्ञापयि°] *em.*; °न्यापयि° MS • वोपकारं] *em.*; वा स्वोपकारं MS **18.7** °रनुविधत्ते] MS^{pc}; °रन्यनुविधत्ते MS^{ac}

तेषु सर्वेष्वाज्ञादिषु पुरुषाभिप्रायेण दृश्यते [प्र](वृत्तिरित्येतान्याज्ञादी)न्यपौरुषेये न सम्भवन्ति। सम्भवति तूपदेशः। न खल्वतो ऽभिप्रायमनुरुध्यमानः प्रवर्तते येनायमपौरुषेये न (कदाचित्प्रवर्तेत, अपि त्व)स्य स्वोपकारोपजननसामर्थ्यमभिसमीक्ष्य प्रेक्षावान् प्रवर्तते। यद्यपि चायमनुग्रहाभिप्रायस्त(द्भिमतसाधनतयोपदे)(f.42^{v})शोत्पत्तौ व्या[प्रियते न तत्कार्याय प्रवृत्तौ] सा तु तद्गोचरस्य समीहितसाधनत्व आपतते, तदभावे सत्यप्यनुग्रहाभिप्राये प्र[वृत्त्य](भावान्नास्त्यसमीहितसा)धनोपदेशेषु शब्दार्थः। तथा च ‘स्वर्गकामो

18.14–15 *Taittirīyasaṃhitā* II.5.5: स्वर्गकामो यजेत।

र्मो वेदे नास्त्येव, न तूपदेशः। चोदयति– ननूपदेशो ऽप्यनुग्रहाभिप्रायात्मक इति न प्रयोक्तृधर्मतामतिवर्तते। …परिहरति– नैतत्सारम्। कुतः? उपदेशे प्रैषादिष्विव प्रवृत्तिहेतुत्वादभिप्रायस्य।

Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 321.8–14): उपदेशस्याज्ञादिभ्यो ऽभिप्रायाननुरोधं विशेषमाह– उपदेशे तु सत्यप्यनुग्रहाभिप्राये कर्मणः समीहितशक्त्याद्यभावे न प्रवर्तते। कर्मशक्तिं त्ववबुध्योपदेष्टुरप्रतारकत्वमात्रेण विप्रलम्भनिमित्ताभावेन हेतुना सत्यार्थाद्वचनादसत्यप्यनुग्रहाभिप्राये वक्तुः प्रवर्तते। तस्मादुपदेशप्रवृत्तेः प्रवृत्तिविषयसमीहितसाधनत्वभावानुविधानादभिप्रायाननुविधानाच्च नानुग्रहाभिप्रायः शब्दार्थो ऽभिमतसाधनता तु कर्मणः शब्दार्थ इति सांप्रतम्।

18.14–29 Cf. *Bhāmatī* (730.11–731.15): तथा च ‘स्वर्गकामो यजेत’ इत्यादिषु स्वर्गकामादेः समीहितोपायतया गम्यन्ते यागादयः, इतरथा तु न साधयितारमनुगच्छेयुः तदुक्तमृषिणा– ‘असाधकं तु तादर्थ्यात्’ इति। अनुष्ठात्रपेक्षितोपायतारहितप्रवर्तनामात्रार्थत्वे यजेतेत्यादीनामसाधकं कर्म यागादि स्यात्। साधयितारं नाधिगच्छेदित्यर्थः। न चैते साक्षाद्भावनाभाव्या अपि कर्त्रपेक्षितसाधनात्मकविध्युपहितमर्यादा भावनोद्देश्या भवितुमर्हन्ति, येन पुंसो ऽनुपकारकाः सन्तो नाधिकारभाजो भवेयुः, दुःखत्वेन कर्मणां चेतनसमीहानास्पदत्वात्। स्वर्गादीनां तु भावनापूर्वरूपकामनोपधानाच्च प्रीत्यात्मकत्वाच्च नामपदाभिधेयानामपि पुरुषविशेषणानामपि भावनोद्देश्यतालक्षणभाव्यत्वप्रतीतेः, फलार्थप्रवृत्तभावनाभाव्यत्वलक्षणेन च यागादिसाध्यत्वेन फलोद्देश्यप्रवृत्तभावनाभाव्यत्वरूपस्य

18.8 सर्वेष्वाज्ञादिषु पुरुषाभिप्रायेण] र्वेष्वाज्ञादिषु पुरुषाभिप्रा *ow.* MS • पुरुषाभिप्रायेण दृश्यते] *em.*; पुरुषाभिप्राप्रायेण दृश्यते MS^{pc}; पुरुषाभिप्रा MS^{ac} **18.9** तूपदेशः] तू *ow.* MS • खल्वतो] MS^{pc}; खल्वितो MS^{ac} • °मनुरुध्यमानः] *conj.*; °मरुच्यमानः MS **18.11** प्रेक्षावान्] MS^{pc}; प्रेक्षवान् MS^{ac} **18.12** °भिप्रायस्त°] *conj.*; °भिप्रायमसतः प्रायेण सतः MS **18.12** तत्कार्याय] MS^{pc}; तत्कार्या MS^{ac} **18.13** °साधनत्व] साध *ow.* MS • सत्यप्यनु°] MS^{pc}; सत्यनु° MS^{ac} **18.14** °पदेशेषु] MS^{pc}; °पदेषु MS^{ac}

यजेत' इत्यादिष्वपौरुषेयेषूपदेशेषु स्वर्गकामादेः साधयितुः समीहि[तो]-(पायतया गम्यन्ते यागादयः, इ)तरथा तु न साधयितारमधिगच्छेयुः। तदुक्तमृषिणा– 'असाधकं तु तादर्थ्याद्' इति। अपेक्षितोपायतारहितप्रवर्त(नामात्रार्थत्वे यजेतेत्या)दीनामसाधकं यागादि स्यादित्यर्थः। न चैते साक्षाद्भावनाभाव्या अपि कर्त्रपेक्षितसाधनात्मकविध्युपहितसीमानो भा[व](नोद्देश्या भवितुमर्हन्ति) येन पुंसो ऽनुपकारकाः सन्तो नाधिकारभाजो भवेयुः, दुःखत्वेन कर्मणां चेतनसमीहानास्पदत्वात्। स्वर्गादी[नां] (तु भावनापूर्वरूपकाम)नोपधानाच्च प्रीत्यात्मकत्वाच्च नामपदाभिधेयानामपि पुरुषविशेषणानामपि भावनोद्देश्यतालक्षणभाव्य[त्व](प्रतीतेः, फलार्थप्रवृत्तभा)(f.43ʳ)वनाव्याप्यतामात्रलक्षणेन यागादिसाध्यत्वेन फलोद्देश्यप्रवृत्तभावनाभाव्यत्वरूपस्य फलसाध्यत्वस्य समप्रधानत्वाभा(वेनैकवाक्यसमवायसं)भवाद्भावनाभाव्यतामात्रस्य च करणत्वे ऽप्यविरोधादन्यथा सर्वत्र तदुच्छेदात्परश्वादेरपि च्छिदादिषु तथाभावात्फ[ल](स्य साक्षाद्भावनाव्याप्य)त्वविरहिणस्तदुद्देश्यतामात्रेण सर्वत्र तद्व्याप्यत्वव्यवस्थानात्स्वर्गसाधने यागादौ स्वर्गकामादेरधिकार इति सिद्धम्।

18.17 *Mīmāṃsāsūtra* VI.1.2: असाधकं तु तादर्थ्यात्।

फलसाध्यत्वस्य समप्रधानत्वाभावेनैकवाक्यसमवायसंभवात्, भावनाभाव्यत्वमात्रस्य च करणत्वे ऽप्यविरोधात्, अन्यथा सर्वत्र तदुच्छेदात्, परश्वादेरपि च्छिदादिषु तथाभावात्, फलस्य साक्षाद्भावनाव्याप्यत्वविरहिणो ऽपि तदुद्देश्यतया सर्वत्र व्यापितया व्यवस्थानात्स्वर्गसाधने यागादौ स्वर्गकामादेरधिकार इति सिद्धम्।

18.15 °कामादेः साधयितुः समी°] *em.*; °कामोदेः साधयितुः समी° MS^{pc}; °कामो ----यितुमसमी° MS^{ac} **18.16** तु] MS^{pc}; त्र MS^{ac} **18.17** तु ताद°] MS^{pc}; नु द ताद° MS^{ac} • अपेक्षितो°] MS^{pc}; अपिक्षितो° MS^{ac} **18.18** °दीनामसाधकं यागादि] MS^{pc}; °दीनांमसाधकं योगादि MS^{ac} **18.19** कर्त्र°] MS^{pc}; कर्तु° MS^{ac} • °सीमानो भाव°] *conj.*; °सीम भावे° MS **18.20** °नुपकारकाः] *Bhāmatī*; °नुकारकारकाः MS **18.21** °समीहा°] हा *ow.* MS **18.22** °कत्वाच्च] MS^{pc}; °कत्वाद MS^{ac} **18.23–24** °वनाव्याप्यता°] MS^{pc}; °वानाव्याप्य° MS^{ac} **18.24** °भावना°] MS^{pc}; °भावेना° MS^{ac} **18.25** °प्रधान°] MS^{pc}; °प्रधाने° MS^{ac} **18.26** °मात्रस्य च] MS^{pc}; °मात्रस्य MS^{ac} **18.27** °विरहिणः] MS^{pc}; °विरहिरणः MS^{ac} • तदुद्देश्यता°] MS^{pc}; तदुद्देसता° MS^{ac} **18.28** °साधने यागादौ] MS^{pc}; °साधन यादौ MS^{ac} **18.29** सिद्धम्।] MS^{pc}; सिद्धां MS^{ac}

संप्र[ति स एव समुच्चयवा]दी निह्नोतुमधिकारमसमर्थः स्वर्गादीनामवान्तरकार्यतया ज्ञानाधिकारानुप्रवेशित्वं सर्वेषामेव कर्मविधीनां मन्य(मानश्चोदयति– **अथे**)ति। प्राप्ताभिमतकार्याणामपि पूर्वोपदेशानां मानान्तरवशेनोपदेशान्तरानुप्रवेशित्वं **न** पुनः **शब्दवृत्तिमात्रानु**[सा](रेणेत्यर्थः। एतदु)(f.43^{v})क्तं भवति– मानान्तरवशेनास्मिन्नर्थे शब्दः प्रवर्तते न पुनः केवल इति।

इतश्चैतदेवम्– यत्प्रतिग्रामं वक्तुः श्रोतुश्च सत्यामर्थप्राप्तौ प्रमाणान्तरेणानधिगते परदेशप्राप्त्यभिप्राये पूर्वोपदेशान् पूर्वार्थानेव पार्श्वस्थाः प्रतिपत्तारः प्रतिपद्यन्ते, परदेशोपदेशं च स्वार्थनिष्ठम्। यद्यपि वस्तुस्थित्या पूर्वोपदेशार्थाः परोपकारिणः, तथापि न शब्दस्य तात्पर्यम्, द्रव्यार्जनादिविधेरिव क्रतुविध्यर्थोपकारे ऽपि। शब्दवृत्तानुसारेण चेह तात्पर्यम्, प्रमाणान्तराभावादिति।

संप्रति तु सत्यपि मानान्तरे न वक्तृभिप्रायस्य पर[शे](षत्वं गम्यते)येन पूर्वोपदेशानां तत्र तात्पर्यमपि तु स्वार्थेष्वेवेत्याह– **इतश्चैतदेवमिति**। अथ पूर्वोपदेशार्थानां परोपदेशार्थोप(कारित्वे सति क)स्मान्न पूर्वे परोपदेशार्था इत्यत आह– **यद्यपीति**। न खलु यो यदुपकारकस्तत्तस्य तन्मात्रत्वादेव

18.30–32 Cf. *Abhiprāyaprakāśikā* (121.25–26): सम्प्रति स एव कर्मविधीनां स्वर्गाद्यवान्तरप्रयोजनद्वारेण ज्ञानाधिकारानुप्रवेशित्वं शङ्कते– अथेति॥

19.1–4 Cf. *Abhiprāyaprakāśikā* (122.23–25): लोकेऽप्यसति प्रमाणान्तरे स्वार्थपरत्वमेव, न तूत्तरोपदेशशेषत्वमित्याह– इतश्चेति॥ वस्तुस्थित्या पूर्वोपदेशार्थानां परोपदेशार्थकारित्वे सति कथं न तच्छेषतेति? अत आह– यद्यपीति॥

19.4–5 Cf. *Śaṅkhapāṇi* (75.16): यद्यपीति; नोपकारमात्रेण शाब्दमैदमर्थ्यं भवतीति भावः।

18.30 निह्नोतु°] *conj.*; निह्नेतु° MS **18.31** °नुप्रवेशित्वं] *em.*; °नुप्रदेसित्वं MS^{pc}; °त्रप्रदेसित्वं MS^{ac} **18.33** °प्रवेशित्वं] प्रवेशि *ow.* MS **18.34** °न्तरवशेनास्मिन्नर्थे शब्दः प्रवर्तते न पु°] MS^{pc}; rubbed out MS^{ac} **19.1** मानान्तरे न] *em.*; मानान्तरेण MS • वक्तृभिप्रायस्य] MS^{pc}; वक्रभिप्रायस्य MS^{ac} **19.3** परोपदेशार्था] रो and र्था *ow.* MS **19.4** यदुप°] दु *ow.* MS • °स्तत्तस्य] MS^{pc}; °स्तस्य MS^{ac}; त्त *ow.* MS

तदैदमर्थ्यम्। न ह्यना[र](म्भकं वाक्यं 'ब्राह्मणः प्र)तिग्रहादिना' इत्याह– ये द्रव्यार्जनादिनियमविधयो जीवनप्रयुक्तपुरुषार्थाव्यभिचरितास्ते क्रतुसम्बद्ध-द्रव्यार्जना(भावे ऽपि तदुप)कारकत्वेन तदभावे द्रव्यसाध्यक्रतुनिर्वृत्त्यभावा-द्भवन्ति फलवन्तः। क्रतुप्रकरणसमाम्नातवनीवननक्रत्वर्था …

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

यत्र श्रौतैरर्थैः प्रमाणार्थनिष्पत्तेरसम्भवः, तत्र द्वितीयस्या अ-पि वृत्तेः शब्दानां प्रवृत्तिदर्शनात्तया प्रमाणविषयलाभः। यत्र तु शब्दाः स्वरसेन लभन्ते विषयम्, तत्र न प्रमाणान्तरवि-रोधादपावर्तन्ते। न ह्येषां प्रमाणान्तरनिबन्धनो ऽर्थो येन त-द्वशादपावर्तेरन्। अथ मतम्– उभयानुग्रहादेवं कल्प्यते। एवं हि शब्दः प्रत्यक्षादयश्चानुगृहीता भवन्ति। अन्यथा प्रत्यक्षादयो ऽत्यन्तमपबाधिताः स्युः।

…(यथा 'मासमग्निहोत्रं जुहोति' इत्यत्राग्निहोत्रशब्दो नै)⟨f.57r⟩यमिका-

20.7 °मपबाधिताः] A; °मेव बाधिताः *edn*

20.1 *Tāṇḍyamahābrāhmaṇa* XXV.4.1.2: मासमग्निहोत्रं जुहोति।

19.5–7 Cf. *Bhāvaśuddhi* (122.16–19): तदुपकारि न तदङ्गमिति व्याहतम्, अत्राह– द्र-व्येति॥ 'ब्राह्मणः प्रतिग्रहादिना द्रव्यमर्जयेद्राजन्यो युद्धादिना वैश्यो वाणिज्यादिना' इति द्रव्यार्जनं विधीयते। तस्य द्रव्यद्वारोत्तरक्रतूपकारे ऽपि न तदङ्गत्वम्; विनियोजकाभा-वात्।

Cf. *Abhiprāyaprakāśikā* (122.25–28): असति द्रव्ये द्रव्यसाध्यक्रतोरसम्भवात्, द्रव्या-र्जनविधेः क्रतूपकारकत्वे विनियोजकश्रुत्यादिप्रमाणाभावाद्यथा न क्रत्वङ्गता, तथेहापि प्रमाणान्तराभावादुपकारित्वे ऽपि न तदङ्गतेत्यर्थः।

20.1–6 Cf. *Abhiprāyaprakāśikā* (160.18–26): अयं भावः– यथा 'मासमग्निहोत्रं जु-

19.5 तदैदमर्थ्यम्] दै and र्थ्य *ow.* MS • ये] *em.*; यो MS **19.6** द्रव्यार्जनादि°] MS^{pc}; द्रव्यार्जिनादि° MS^{ac} • °नियमविधयो] नि *ow.* MS • जीवन°] व *ow.* MS • °व्यभिचरितास्ते] *conj.*; °व्यभिचरित MS^{pc}; °व्यभिचरतित° MS^{ac} • °सम्बद्ध°] *em.*; °सम्बन्ध° MS **19.7** °त्वेन तदभावे] *conj.*; °त्वे तदभावे MS^{pc}; °त्वेन दभावे MS^{ac} **19.8** फलवन्तः] *conj.*; फलवत् MS • °समाम्नात°] *em.*; °समाम्नात्° MS • °वननक्रत्वर्था°] *conj.*; °वननत्क्रत्वर्था° MS

ग्निहोत्रप्रकरणान्तरापादितस्तदन्यत्वेन विधेये कर्मणि वर्तितुमसमर्थो वाक्यार्थनिष्पत्तावपर्याप्तस्तन्निष्पत्तये गौ(णीं वृत्तिमवलम्बते न तु माना)न्तराविरोधाय, एवम् ‘आदित्यो यूपः, यजमानः प्रस्तरः’ इत्यादावपि द्रष्टव्यम्। **द्वितीयस्या अपि वृत्ते**र्गौण्या लाक्षणि(क्या वा हेतोः **शब्दानामर्थेषु**) **प्रवृत्तिदर्शनादिति** योजना। **अन्यथा प्रत्यक्षादयो** ऽत्यन्तमपबाधिताः स्युरिति। सांव्यवहारिकेण ⟨तात्त्विकेन⟩ वा प्रामाण्येन तदुपप(त्तौ गौणार्थत्वे उभयानुग्रहल)भ्योपपत्तिरिति भावः।

नैतत्सारम्। प्रमाणसामर्थ्यानुसारेण प्रमेये काचित् कल्पना स्यात्। प्रमाणे तु स्वरससिद्धं परित्यज्य कल्पनायां न निबन्धनमस्ति। तस्मात्प्रमाणानुसारेण विकल्पसमुच्चयव्यवस्थाः कल्प्यन्ते, नोभयानुग्रहात्। नोभयमनुगृहीतव्यमिति प्रमाणमस्ति। ते एव प्रमाणे इति चेत्– यदि मतम्, न प्रमाणस्य प्रमाणान्तरादनुग्राह्यत्वम्, अपि तु स्वत एव। प्रमाणत्वादेव हि तस्य तेनार्थव्यवस्थापना– यथा तर्हि ततो ऽर्थो ऽवगम्यते तथा व्यवस्थापनीयः। एवं तदनुगृहीतं भवति। अन्यथा बाधितं स्यात्। अप्रमाणिका चार्थव्यवस्था, ततः स्वरसेनाप्रतीतेः,

---

20.4 Taittirīyabrāhmaṇa II.1.5.2: आदित्यो यूपः।
20.4 Taittirīyabrāhmaṇa II.6.5: यजमानः प्रस्तरः।

होति’ इत्यत्राग्निहोत्रशब्दः प्रसिद्धाग्निहोत्रे मुख्यवृत्तिरप्युपसदादिधर्मवत्तया विधीयमाने कुण्डपायिनामयनगते कर्मणि मुख्यया वृत्त्या वर्तितुमशक्यत्वाद्वाक्यार्थप्रत्ययजननायासमर्थस्तन्निष्पत्तये तत्र गौणीं वृत्तिमवलम्बते; न तु मानान्तरविरोधात्तस्य तदयोग्यत्वात्, तथा ‘आदित्यो यूपः’ ‘यजमानः प्रस्तरः’ इत्यादिष्वपि ‘यूपे पशुं नियुञ्ज्यात्’ ‘प्रस्तरे जुहूं सादयति’ इत्यादिवाक्यार्थप्रमितिनिष्पत्तये गुणवादः, न मानान्तरविरोधादिति द्रष्टव्यमिति। द्वितीया वृत्तिर्गौणी, लाक्षणिकी वा। तथाभूताया द्वितीयस्या अपि वृत्तेर्हेतोः शब्दानामर्थेषु प्रवृत्तिदर्शनादिति योजना।

20.2 °पादितस्तदन्यत्वेन] *em.*; °पादिततदन्यत्वे MS • कर्मणि] *em.*; कर्माणि MS **20.3** °निष्पत्ताव°] MS^{pc}; °निष्पत्तात्र° MS^{ac} **20.4** यजमानः] *em.*; जयमानः MS **20.5** गौण्या लाक्षणि°] *em.*; गौण्या लक्षणिलाक्षणि° MS **20.6** ऽत्यन्तमप°] *em.*; ऽत्यन्तामप° MS

अन्यस्य चाभावात्, इतरेतराश्रयप्रसङ्गाच्च। प्रामाण्यात्सिद्धादर्थान्तरे प्रतीतिः प्रामाण्यान्यथानुपपत्त्या कल्पनीया, तत्प्रतीतेश्च प्रामाण्यम्। स्वरसलभ्ये त्वर्थे प्रतीतित एव प्रामाण्यमिति नेतरेतराश्रयता। तस्माद्विरोधे बाध एव पूर्वस्य प्रमाणानुसारी, तथा प्रतीतेः। नोत्तरस्य विषयान्तरकल्पना। न खलु रजतज्ञानानुग्रहाय शुक्तिशकलज्ञानस्य गोचरो ऽपरः कल्प्यते। न च प्रत्यक्षादीनामनन्यगतित्वादनवकाशत्वम्। या खलु रजतादिविभ्रमाणां गतिः, सा तेषामपि। यदि तेषामुपचरितः कल्पितो वा विषयः, प्रत्यक्षादीनामपि तथा। अथासत्त्वात्तस्याविषया अविद्यमानार्थाः प्रत्यक्षादयो ऽप्येवम्। ...

दूषयति– **नैतत्सारमिति**। सांव्यवहारिके वा तात्त्विके वा प्रामाण्ये न प्रमाणानां स्वमहिमसिद्धप्रमा[णा](भावात्स्वरसभङ्गः।)समभिव्याहृतानां तु पदानां पौर्वापर्यालोचनया मुख्यया वृत्त्या वाक्यार्थप्रतीतौ स्वरससिद्धायां मानान्तरानुरोधेन [द्वि](तीयवृत्तिकल्पने प्रामाण्यभ)ङ्गप्रसङ्गः। [न चास्ति संभवः]प्रमाणेषु यदेषां स्वभावतो ऽप्रसिद्धं तदन्यापेक्षेभ्यस्तेभ्य एव सिध्यतीति। अस्ति तु संभवः **प्रमेये** [**प्र**](**माणसामर्थ्यानुसारेण**) ⟨f.57v⟩ [दृष्टे ऽपि तदनुपपत्तौ कस्यचिददृष्टस्य **कल्पनेति**। **तस्मात्प्र**]**माणानुसारेण** यथासम्भवं **विकल्पसमुच्चयव्यवस्थाः कल्प्यन्ते**। यदि [कु](तश्चिद्गौणार्थत्वं स्वरस)

21.1–4 Cf. *Abhiprāyaprakāśikā* (161.19–22): नैतदिति॥ सांव्यवहारिके, तात्त्विके वा प्रामाण्ये प्रत्यक्षादीनां स्वार्थप्रमितिसिद्धप्रमाणाभावान्न स्वरसभङ्गः, समभिव्याहृतानां तु पदानां पौर्वापर्यालोचनया मुख्यया वृत्त्या वाक्यार्थप्रतीतौ स्वरससिद्धायां मानान्तरविरोधेन द्वितीयवृत्तिकल्पने तत्प्रामाण्यभङ्गप्रसङ्ग इत्यर्थः।

21.6–7 Cf. *Abhiprāyaprakāśikā* (161.23–25): प्रमाणसामर्थ्यानुसारेण प्रमेये काचित्कल्पना स्यादिति यदुक्तम्, तद्दर्शयन्नुपसंहरति– तस्मादिति॥

21.8–9 Cf. *Bhāvaśuddhi* (162.8–9): अद्वैतागमस्याप्रामाण्यान्यथानुपपत्तिरेव गौणार्थत्वे मानमिति, अत्राह– इतरेतराश्रयेति॥

21.3 ॰पर्यालोचनया] MS^{pc}; ॰पर्याचोलोचनया MS^{ac} **21.4** ॰ङ्गप्रसङ्गः] *em.*; ॰ङ्गाप्रसंगाः MS^{pc}; ॰ङ्गाः प्रसंगाः MS^{ac} **21.7** प्रमाणानु॰] MS^{pc}; प्रममाणानु॰ MS^{ac} **21.8** ॰व्यवस्थाः] MS^{pc}; ॰व्यवस्था MS^{ac}

सिद्धाप्रामाण्यान्यथानुपप[त्त्या कल्प्यते], ततः परस्पराश्रयप्रसङ्ग इत्याह– **इतरेतराश्रयप्रसङ्गाच्चेति**। **तस्माद्वेदान्तोत्थेनाद्वैत**(ज्ञानेन विरोधे प्रत्यक्षा दि)-जातस्येन्द्रियादिसमुत्थस्य विज्ञानस्य **बाध एव प्रमाणानुसारी**, तदपबाधात्मन एवोत्तरस्य समुदयात्। तदनपबाधे त[द्रू](पं नाद्वैतज्ञानं तदपबा)-धात्मकं जायते येन तदभावे तद्रूपं व्याहन्येत। न खलु यथा नेदं रजतमिति पूर्वविज्ञानप्रसञ्जितरजतनिषेधात्मकमवभा[स](ते, अपि तु वर्तमानमि)-दमित्यपि। सत्यपि विरुद्धविषयत्वे शुक्तिरियमित्यपि कदाचिदिति चेतरानुभूयमानार्थस्यापि नञो ऽप्रयोगादित्यवदातम्। **न च प्र**(**त्यक्षादीनामनन्यगति**)**त्वादिति** सांव्यवहारिकत्वेन तावदुक्तगतिर्गत्यन्तरमपि शक्यं वक्तुमिति मत्वोक्तम्– **अथा** [**सत्त्वात्**। तस्य रजतादे रजतविद्यावि](षया **अविद्यमानार्थाः**।)···

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

यदि तर्हि कार्यभेदादप्यपेक्षा, हन्त! अर्थक्रियाभेदादेव भावानां परस्परापेक्षो भेदः सेत्स्यति। किं चासत्यामपि दर्शनाद्भेदसिद्धौ विधिमात्रव्यापारत्वात्कार्यभेदादेव कारणभेदमनुमिमीमहे। नैकत्वे कार्यभेदः कल्पते, कारणस्वभावापेक्षत्वात्कार्यभेदस्य। तज्जननं चेदस्य स्वभावः, नान्यजननः। तस्मात्कार्यान्तरस्यान्यतो जन्मेति। तददिदं भेदेनैव भेदप्रसाधनं नातिचतुरश्रम्। अपि च–

अर्थक्रियाकृते भेदे रूपभेदो न लभ्यते॥ १०॥
दाहपाकविभागेन कृशानुर्न हि भेदवान्।

21.9 **॰प्रसङ्ग**] MS^{pc}; ॰प्रसं MS^{ac} 21.10 **॰प्रसङ्गाच्चेति**] MS^{pc}; ॰प्रसाङ्गाच्चति MS^{ac} • **वेदान्तोत्थे॰**] त्थे *ow.* MS 21.11 **॰नुसारी**] MS^{pc}; ॰नुसीरी MS^{ac} 21.12 **एवोत्तरस्य**] *em.*; एवोत्तर MS 21.13 **तदभावे**] वे *ow.* MS • **व्याहन्येत**] न्ये *ow.* MS 21.14 **॰प्रसञ्जित॰**] MS^{pc}; ॰संप्रसञ्जित॰ MS^{ac} 21.15 **शुक्ति॰**] क्ति *ow.* MS • **कदाचिदिति**] *em.*; कदाविदिति MS • **चेतरानु॰**] *em.*; चेतरनु॰ MS 21.16 **नञो**] ञो *ow.* MS • **॰वदातम्**] *em.*; ॰वदात MS 21.17 **॰हारिकत्वेन**] MS^{pc}; ॰हारिकेन MS^{ac} • **शक्यं**] *em.*; शक्य MS 21.18 **सत्त्वात्**] MS^{pc}; सात्त्वात् MS^{ac}

…(असमर्थोऽपि क्रमवत्सहकारिसंनिधानात्क्रमेण करोतीति। तदनुपपन्नम्। विकल्पासहत्वात्। किम)⟨f.74ʳ⟩स्य सहकारिणः कंचिदतिशयमादधति न वा? अनाधाने ऽकिंचित्करा नापेक्ष्येरन्, आदधानास्तु भिन्नमभिन्नं वादधीरन्? भिन्नत्वे भावरूप(त्वे ऽप्यलब्धजनन उत्प)त्तिमति तु नियमेन भवत्तत्कार्यमेव स्यान्न व्यभिचारिभावकार्यमित्यकिंचित्करो भावो ऽसन्नेव प्रसज्येत। अभिन्ने तु भाव एवा(भिधीयेत, तदोत्पादे विना)शे वा न किंचिदाहितं स्यात्। तस्मादुक्तेन क्रमेण न क्रमेणार्थक्रिया युज्यते भावानां

22.1–4 Cf. *Abhiprāyaprakāśikā* (207.25–208.7): स्वरूपेणासमर्थो (स्वरूपेण समर्थो *edn*) ऽपि क्रमवत्सहकारिसापेक्षः क्रमेण कार्याणि करोतीति चेत्, न; विकल्पासहत्वात्। किमस्य सहकारिणः कंचिदुपकारमादधाति, न वा। अनाधानेऽकिञ्चित्करत्वान्नापेक्ष्येरन्, आदधानास्तु भिन्नं वातिशयमादधीरन्।

Cf. *Nyāyakaṇikā* (500.14–501.4): असमर्थोऽपि क्रमवत्सहकारिसंनिधानात्क्रमेण करोतीति। तदनुपपन्नम्, विकल्पासहत्वात्। किमस्य सहकारिणः कंचिदुपकारमादधति न वा? आदधाना अपि भावाद्भिन्नमभिन्नं वा?

22.4–7 Cf. *Nyāyakaṇikā* (501.4–502.2): तत्र भिन्नोपकाराधाने भावरूपे सत्यप्यलब्धजन्मनः (॰जनने Goswami) सत्यप्यस्मिन्ननुपलब्धेरुत्पत्तिमत एवोपकारात्कार्यस्य निष्पत्तेर्न तत्कारी भावः स्यात्। न चोपकारसहकारिणः कार्यजननमिति साम्प्रतम्। उपकारस्योपकारान्तरजननेऽनवस्थानात्। …अभिन्नोपकाराधाने भाव एवाभिधीयेत, न च स प्राक् सिद्धः शक्य आधातुम्।

Cf. *Abhiprāyaprakāśikā* (208.7–9): भिन्नत्वे भावे सत्यन्यः (सत्वन्यः *edn*) जायमानातिशये तु सति जायमानं यत्कार्यं तस्यैवार्थक्रियेति भावः। अर्थक्रियाशून्यत्वेनासन्नेव स्यात्, अभिन्नत्वे तु भाव एव जात इति पूर्वस्य नाशात्क्षणिकस्यैव कार्यत्वं प्राप्तम्।

22.7–13 Cf. *Nyāyakaṇikā* (504.6–505.3): तदुक्तेन क्रमेण न क्रमेणार्थक्रियाकारिता सम्भवति भावस्य नापि यौगपद्येन युज्यते। यस्माद्यावत्कार्यं किमपि प्रथमे क्षणे तेनाक्षणिकेन स्वेनात्मना सम्पादितं तावत्सर्वं द्वितीयादिक्षणेषु सम्पादयेत्, तावत्कार्यसम्पादनयोग्यस्यात्मनो द्वितीयादिक्षणेषु सन्निधानात्।

Cf. *Nyāyavārttikatātparyaṭīkā* (513.20–514.5): तस्मान्न क्रमेणार्थक्रिया भावानां नापि यौगपद्येन। तस्माद्यावत्कार्यं तेनाक्षणिकेन प्रथमे क्षणे सम्पादितं तावत्सर्वं द्वितीयादिष्वपि क्षणेषु सम्पादयेत्, तावत्कार्यसम्पादनस्वरूपस्य द्वितीयादिष्वपि क्षणेषु भावात्। न च सम्पादितं शक्यसम्पादनमिति यद् द्वितीयादिषु क्षणेषु सम्पादयति तत्प्रथमक्षणे सम्पादि-

---

22.2 ॰दतिशय॰] *em.*; ॰दस्तिशय॰ MS • ॰मादधति] MS^{pc}; ॰माधदधति MS^{ac}
22.3 अनाधाने ऽकिं॰] MS^{pc}; अधाने किं॰ MS^{ac} • ॰रा नापेक्ष्येरन्] *em.*; ॰रो नापेक्ष्येरन्MS^{pc}; ॰रो नापेक्षेरन् MS^{ac} • भिन्नमभिन्नं वा] MS^{pc}; भिन्नम्वा MS^{ac}
22.4 ॰त्तिमति तु] *em.*; ॰त्तिमत्यति तु MS

नापि यौगपद्येन। यतो यावत्कार्यजातमक्ष[णि](केन प्रथमे क्षणे निर्वर्तनी)-यं तावत्कार्यजातनिर्वर्तनस्वरूपस्यात्मनो द्वितीयादिष्वपि क्षणेषु भावात्ता-वदेव तेष्वपि निर्वर्तयेत्। अनिर्वर्तयद्वा प्रथमे ऽपि क्षणे [न](निर्वर्तयेत्। न च संपादितं) पुनः शक्यसंपादनमिति यद् द्वितीयादिषु संपादयति तत्संपादि-तादन्यदिति क्रम एवावर्तते। स चाधस्तात्प्रत्यूढः, अकिंचित्कर](इति दोष उक्त ए)व। सर्वसामर्थ्यविरहरूपं हि निरुपाख्यम्। तदेवमक्षणिकात्क्रमाक्रमौ व्यावर्तमानौ व्यावर्तयतः सत्तामपि स्वव्याप्यां वृक्ष[ते](व शिंशपात्वं)⟨f.74^{v}⟩ समानादेकशिलामयादचलप्रदेशादिति प्रतिबन्धसिद्धिः।

स्यादेतत्। क्षणिको ऽपि भावो ऽर्थक्रियाजननस्वभावो ऽतत्स्वभावो वा? पू-र्व[स्मि](न् किमस्य सह)कारिभिः? उत्तरस्मिन्नसत्त्वं प्रथम एवास्य क्षण इति।

तादन्यदिति क्रम एवावर्तते। तथा चोक्तो दोषः।

Cf. *Abhiprāyaprakāśikā* (208.9–11): नापि यौगपद्येन, अक्षणिकस्य सर्वार्थक्रियाकारि-त्वात्। द्वितीयक्षणे ऽर्थक्रियाभावेनासत्त्वप्रसङ्गात्।

22.13–15 Cf. *Nyāyakaṇikā* (500.3–5): प्रकारान्तराभावाद्भावानामर्थक्रिया क्रमाक्रमाभ्यां व्याप्ता, तौ च स्थिराद्व्यावर्तमानावर्थक्रियामपि व्यावर्तयतो वृक्षतेव शिंशपात्वमेकशिला-मयादचलप्रदेशात्।

Cf. *Abhiprāyaprakāśikā* (208.11–12): तदेवं क्षणिकात्क्रमाक्रमौ व्यावर्तमानौ स्वव्याप्यां सत्तामपि व्यावर्तयतीति व्याप्तिसिद्धिः सत्त्वक्षणिकत्वयोः।

22.16–17 Cf. *Nyāyakaṇikā* (506.2–4): स्यादेतत्। क्षणिको ऽपि भावो ऽर्थक्रियाजनन-स्वभावो न वा? न चेदसन्नेव। जननस्वभावश्चेत् किमस्य सहकारिभिः? इत्युत्पन्नमात्रमेव बीजमङ्कुरं जनयेत्।

Cf. *Nyāyavārttikatātparyaṭīkā* (514.10–11): स्यादेतत्। क्षणिको भावो ऽर्थक्रियाज-नकस्वभावो न वा? न चेत्, असन्नेव। तज्जननस्वभावश्चेत्, किमस्य सहकारिभिः? उत्पन्नमात्रमेव बीजमङ्कुरं जनयेत्।

22.16–18 Cf. *Abhiprāyaprakāśikā* (208.13–15): स्यादेतत्– क्षणिकोऽपि भावो ऽर्थक्रि-याजनकस्वभावः, न वा। पूर्वस्मिन् किमस्य सहकारिभिः? उत्तरस्मिन्नेकक्षणेऽपि न तस्य सत्त्वमर्थक्रियाविरहादिति, न; समर्थस्यानपेक्षस्य कारणत्वोपगमात्।

22.8 नापि] MS^{pc}; न्नापि MS^{ac} • यावत्कार्यजात॰] MS^{pc}; यावत्कार्ययाजात॰ MS^{ac} **22.9** ॰निर्वर्तनस्वरूपस्या॰] *em.*; ॰निर्वर्तनस्या॰ MS • ॰वदेव] MS^{pc}; ॰वदिव MS^{ac} **22.10** अनिर्वर्तयद्वा] द्वा *ow.* MS **22.11** ॰संपादनमिति] *em.*; ॰संपादमिति MS **22.11–12**तत्संपादितादन्य॰] MS^{pc}; तत्संपादिति। दन्य॰ MS^{ac} **22.13** निरुपाख्यम्] *em.*; निरूपाख्यं MS **22.16** स्यादेतत्] MS^{pc}; स्यादेत MS^{ac} • भावो ऽर्थ॰] MS^{pc}; भा ऽर्थ॰ MS^{ac}

तन्नास्ति, समर्थस्यानपेक्षस्य कारणभावोपगमात्। न चैवं कुसूलस्थस्यापि [बी](जस्याङ्कुरजन)नप्रसङ्गः, तस्य क्षित्यादिसहभुवो बीजक्षणादन्यत्वात्, अस्य च तत्र सामर्थ्यात्। न चानपेक्षः क्षित्यादीनन्तरेण स्वस्मान्नाङ्कुरं क(रोतीति वाच्यम्, नान्तरेण)तदेकसामग्रीनियतस्याभावात्, तदेकसामग्रीजन्मनां च क्षित्यादीनां समर्थानामङ्कुरात्प्राग्भावनियतानां परस्परानपेक्षाणा[म](गृह्यमाणविशेष)तया सहकुर्वतामङ्कुरसहकारिभावाविरोधात्। न च कृतकरत्वम्, सहक्रियायां कृतमित्यभावात्। न चैत एकसामग्रीनियमेन (लब्धसन्निधयः प्रेक्षावि)रहिणः शक्यमिदमस्मासु कर्तुमेकेनापि समर्थेनानपेक्षेणेत्यालोच्य कार्ये किंचिदेकं नियुज्योदासते। न च सामग्रीभे[दा](त् कार्यभेदः। तस्मा)⟨f.75^{r}⟩न्नाक्षणिकादिव क्षणिकाद्व्यावृत्तिः सत्ताया इति क्षणि-

---

22.18–24 Cf. *Abhiprāyaprakāśikā* (208.16–21): न चैवं कुसूलस्थस्यापि बीजस्याङ्कुरजननप्रसङ्गः, तस्य क्षित्यादिसहभुवो बीजक्षणादङ्कुरजनकादन्यत्वात्। न चानपेक्षः क्षित्यादीनन्तरेण तस्मान्नाङ्कुरं करोतीति वाच्यम्; नान्तरेण तदेकसामग्रीनियतस्याभावात्, असतश्चाहेतुत्वात्, समर्थबीजक्षणसामग्रीजन्यानां च समर्थक्षित्यादिक्षणानामङ्कुरप्राग्भावनियतानां परस्परानपेक्षाणामगृह्यमाणविशेषतया सहकुर्वतामङ्कुरं प्रति सहकारित्वाविरोधात्। न च कृतकत्वम्; सहक्रियायां कृतमित्यभावात्।

22.24–26 Cf. *Nyāyakaṇikā* (508.5–509.3): न च स्वकारणबललब्धपरस्परसन्निधयोऽप्रेक्षावन्तः शक्यमिदमेकेनाप्यस्मासु कर्तुमिति कृतं नः सन्निधिनेति निवर्तितुमीशते।

Cf. *Nyāyavārttikatātparyaṭīkā* (514.22–23): न च स्वकारणबललब्धसन्निधयो भावा अप्रेक्षावन्तः (भावाः प्रेक्षा° *edn*) शक्यमिदमस्मास्वेकेनापि कर्तुं कृतं नः सर्वेषां सन्निधानेनेत्यालोच्य निवर्तितुमीशते।

22.26–29 Cf. *Abhiprāyaprakāśikā* (208.25–28): एकं कार्यमेकस्मादुत्पद्यत इति दुर्घटम्; कारणभेदस्य कार्यभेदहेतुत्वादिति चेत्, मैवम्; सामग्रीभेदाद्धि कार्यभेदः, न सहकारिभेदात्। एककार्यकारितैव सहकारिता। तस्मान्नाक्षणिकादिव क्षणिकाद् (तस्मान्न क्षणिकादिवत्क्ष°) व्यावृत्तिः सत्तायाः, इति सत्त्वहेतोः नासाधारणानैकान्तिकाक्षणिकत्वसाधने।

22.20 सामर्थ्यात्] त् *ow.* MS • क्षित्यादीन°] MS^{pc}; क्षित्यादिन° MS^{ac} • स्वस्मान्नाङ्कुरं] *em.*; वास्मान्नाङ्कुरं MS^{pc}; वास्मांकुरंस MS^{ac} **22.21** °नियतस्याभावात्] *em.*; °नियतस्यातस्याभावात् MS **22.22** °जन्मनां चक्षित्यादीनां समर्थाना°] MS^{pc}; °जन्मनां समर्थामंना° MS^{ac} • परस्परानपेक्षा°] *em.*; परस्परापेक्षा° MS **22.23** सहकुर्वता°] MS^{pc}; सकुर्वता° MS^{ac} **22.24** कृतकर°] र *ow.* MS • एक°] ए *ow.* MS **22.25** °मिदमस्मासु] MS^{pc}; °मिदमिस्मासु MS^{ac}; सु *ow.* MS • कर्तुं°] *em.*; कर्त्त° MS

कतया व्याप्ता सत्ता भावानां पूर्वापरभागविकलकालकलावस्थितिलक्षणां (क्षणिकतां साधयतीति) सिद्धम्। न च सर्वोपसंहारवद्व्याप्तिसाधनादेव प्रमाणात्सर्वमध्यपातिनां विवादास्पदानां शब्दादीनामपि क्षणिकत्वसिद्धे(रसाधनाङ्गं हेतुवचनमिति) सांप्रतम्। यथैव हि गगननलिनादीनामसतामसत्यपि क्षणिकत्वे न सर्वोपसंहारवतीं व्याप्तिं प्रसाधयतः प्रमाणस्य वि[रो](धः, तथैव विवादास्प)देषु शब्दादिषु कस्तस्य विरोधः, सत्त्वसिद्धौ तु स्यादिति तत्साधनाय हेतुरुपनेतव्यो वचनेन, संश्च विवादास्पदीभूतः शब्दादि[रि](ति स्वभावहेतुः।

स्वकारणा)दमी भावा विनश्वरा अविनश्वरा वा जायन्ते? विनश्वराश्चेदुद-

22.28–29 Cf. *Nyāyakaṇikā* (494.8–495.2): कथं पुनरिह सत्तामात्रानुबन्धसिद्धिः क्षणिकतायाः पूर्वापरभागविकलकालकलामात्रावस्थितिलक्षणायाः? इत्थम्। तथा हि सर्वोपाख्यारहितविपरीतरूपनिरूपणा सत्ता भावानां नार्थक्रियाकारितया अतिरिच्यते।
22.29–32 Cf. *Nyāyavārttikatātparyaṭīkā* (515.3–5), *Nyāyakaṇikā* (510.1–4): न च साध्यधर्मिणि दृश्यमाने शब्दादौ व्याप्तिसाधनादेव साध्यसिद्धेरसाधनाङ्गं हेतुवचनम्। न खलु सर्वोपसंहारवती व्याप्तिर्दृश्यमात्रविषया भवितुमर्हति।

Cf. *Nyāyavārttikatātparyaṭīkā* (515.11–13): एवं सत्यपि विवादास्पदीभूते शब्दादौ व्याप्तिसिद्धावपि न सिध्यति क्षणिकतेत्यवश्यं दर्शयितव्यमेतेषां क्षणिकत्वसाधनाय सत्त्वमिति नासाधनाङ्गता हेतुवचनस्येति।

Cf. *Nyāyakaṇikā* (511.6–9): एवमसत्यपि (एवं सत्यपि Goswami) विवादास्पदीभूते शब्दादौ व्याप्तिसिद्धावपि न सिध्यति क्षणिकतेत्यवश्यं दर्शयितव्यमेव तेषां क्षणिकत्वसाधनाय सत्त्वमिति नासाधनाङ्गता हेतुवचनस्येति।
22.34–35 Cf. *Nyāyakaṇikā* (494.7): संश्च विवादास्पदीभूतः शब्दादिरिति स्वभावहेतुः।
22.36–37 Cf. *Nyāyakaṇikā* (511.9–512.5): अपि च कृतका भावाः स्वहेतुभ्य उपजायमाना विनश्वरा जायन्ते अविनश्वरा वा? विनश्वराश्चेदुदयानन्तरमेवापवृज्येरन्निति सिद्धः क्षणभङ्गः। अथाविनश्वराः, न कदाचिदपि नश्येयुः। न खल्वविनश्वरो विनष्टुमर्हति। न जातु स्वकारणादुत्पन्नं नीलं पीतं भवति। न च हेत्वन्तराधीनजन्मा विनाश एषामिति साम्प्रतम्।

Cf. *Nyāyavārttikatātparyaṭīkā* (506.23–507.2): स्वकारणादयं भावो विनश्वरस्वभावो वा जायते ऽविनश्वरस्वभावो वा? विनश्वरश्चेद्, विनाशं प्रति न हेतुमपेक्षेत। न हि नीलं स्वकारणादुत्पन्नं नीलत्वे हेतुमपेक्षते तस्यैव तादूप्यात्। अविनश्वरश्चेत्, तथापि नास्य हेतुशतैरपि शक्यो विनाशः कर्तुम्। न हि नीलमुत्पन्नं पीतं शिल्पिशतेनापि शक्यं कर्तुम्।

22.28 °वृत्तिः सत्ताया इति क्षणिकतया] MS^{pc}; °वृत्ति सत्ताया इ क्षिकतया MS^{ac}
22.29 °वद्व्याप्ति°] *em.*; °वत्। व्याप्ति° MS **22.32** व्याप्तिं] MS^{pc}?; व्याप्तिंपिं MS^{ac}
22.34 °नेतव्यो वचनेन, संश्च] MS^{pc}; °नेयतव्यो वचनेन स्च MS^{ac}

यानन्तरमेवापवृज्येरन्निति सिद्धः क्षणभङ्गः। अविनश्वरा [हि क](दाचिदपि न नश्येयुः। न) हि स्वकारणान्नीलमुत्पन्नं सहस्रेणापि कारणैः शक्यं पीतं कर्तुम्। न चास्य सत्ताविच्छेदः शक्यसाधनः। [स हि भावा](द्भिन्नो ऽभिन्नो वा? न ता)⟨f.75^{v}⟩ वदभिन्नः कारणभेदात्तदुत्पत्तावपि भावस्यानुवृत्तिप्रसङ्गाच्च। अत एव च न भिन्नः। न ह्यन्यस्योत्पत्तिरन्यस्य निवृत्ति[र्भ](वतीत्यभावो भावस्य) न निवृत्तिर्वा तिरोधानं वेति सांप्रतम्। तयोर्भावाद्भेदे ताभ्यां च तिरोधान-निवृत्त्यन्तरोपजने ऽनवस्थानात्। अभेदे प्रागवदुप[ल](ब्ध्यादिप्रसङ्गः। केचित्तु त)स्मात्स्वकारणादेकक्षणस्थितिधर्मा भावो जातो न पुनरस्य द्वितीये क्षणे 'किंचिद्भवति न भवत्येव केवलम्' इति युक्तमुत्पा(दविनाशित्वम्। तथा हि

22.45 Cf. *Pramāṇavārttika* III.277: न तस्य किञ्चिद्भवति न भवत्येव केवलम्।

22.38 Cf. *Nyāyavārttikatātparyaṭīkā* (577.18–19): नो खलु नीलं स्वकारणादुपजातं जातु कारणसहस्रैरपि शक्यं पीतं कर्तुमिति ···

22.39–43 Cf. *Nyāyakaṇikā* (512.6–11): स हि हेत्वन्तरेण जन्यमानो विनाशो भावाद्भिन्नोऽभिन्नो वा। न तावदभिन्नः कारणभेदात्। भिन्नत्वे तु भावस्य तादवस्थ्यात् पूर्ववदुपलब्ध्यादिप्रसङ्गः। तेन भावस्तिरोधीयत इति चेत्। न। तिरोधानस्यापि भेदे भावतादवस्थ्यात् (°तादवस्थ्यम् Goswami)। अभेदे वा हेतुभेदानुपपत्तिः।

Cf. *Nyāyavārttikatātparyaṭīkā* (507.2–4, 7–9): अपि चायं विनाशो भावस्य कारणैराधीयमानो भावाद्भिन्नोऽभिन्नो वा जन्येत। अभिन्नत्वे भाव एवासाविति विनष्टोऽपि भावः प्रागवदुपलब्ध्यर्थक्रिये कुर्यात्। ···अभावेन भावस्तिरोधीयत इति चेत्? न, तिरोधानस्यापि भावादभेदे पूर्ववदुपलब्ध्यादिप्रसङ्गः। भेदे ऽपि तिरोधानस्यान्यस्योत्पादे ऽन्यस्य न किञ्चिदुत्पन्नं विनष्टं वेति भावतादवस्थ्यादुपलब्ध्यादिप्रसङ्गः।

22.43–45 Cf. *Nyāyakaṇikā* (513.5–7): तस्मात्स्वहेतोरयमेकक्षणस्थितिधर्मा भावो जात इति द्वितीयक्षणे स्वयमेव न भवति, न पुनरत्र हेतुमपेक्षते।

Cf. *Nyāyavārttikatātparyaṭīkā* (507.17–20): यथाह– न तस्य किञ्चिद्भवति न भवत्येव केवलम् इति। तस्माद्विनाशकारणादुत्पन्नमात्र एव भावो विनश्यतीति सिद्धः क्षणभङ्गः।

22.45–49 Cf. *Nyāyakaṇikā* (513.10–514.6): तथा हि यद्येषां ध्रुवभावि तत्र तेषां हेत्वन्तरापेक्षा नास्ति यथा कृपाणादीनां लोहमयत्वे। ध्रुवभावी च कृतकानां भावानां विनाश

22.37 °यानन्तरमेवा°] *em.*; °यान्तरमेवा° MS • °ज्येरन्निति सिद्धः] MS^{pc}; °ज्येरन्निति सिद्ध MS^{ac}; ज्ये *ow.* MS **22.38** स्वकारणा°] MS^{pc}; स्वकाराणा° MS^{ac} • कारणैः] णै *ow.* MS **22.40** कारणभेदात्] MS^{pc}; कारणाभेदाव MS^{ac} • °दुत्पत्तावपि] MS^{pc}; °दुत्पत्पत्तावपि MS^{ac} **22.41** च न भिन्नः] MS^{pc}; च भिन्नः MS^{ac} **22.42–43** तिरोधाननि°] *em.*; तिरोधानं नि° MS **22.44** भावो] वो *ow.* MS **22.45** भवत्येव केवलमिति] MS^{pc}; भावत्येव केवलकिंचिमिति MS^{ac}

यद्येषां) ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा यथा ज्ञानस्यात्मानात्मप्रकाशे। ध्रुवभावी च कृतकानां भावानां विनाश इति विरुद्धव्या(प्तोपलब्धिर्विनाशस्य हे)त्वन्तराधीनतां प्रतिक्षिपति। ध्रुवभाविता हि निषिध्यमानहेत्वन्तरापेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्तोपलब्धा हे(त्वन्तरानपेक्षत्वमुपस्थापयति।)···

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

नार्थक्रियाभेदाद्भावानां परस्परापेक्षो रूपभेदः प्रतीयते, नाप्यनुमातुं शक्यते। व्यपदेशभेदमात्रं तु स्यात्, एकस्मिन्नपि वह्नौ दाहपाकादिकार्यभेददृष्टेः। अथ मतम्– रूपादिसमूहो वह्निः। तत्र रूपात्प्रकाशः, स्पर्शाद्दाह इति। कामम्, दाहपाकौ तु स्पर्शादेव। तौ च लोके प्रतीतिभेदौ सत्यपि संयोगिद्रव्यविक्रियासामान्ये। कर्म चैकं संयोगविभागसंस्काराणां हेतुः, आत्मा चेच्छादीनाम्, सत्त्वादयश्च प्रत्येकमभेदाल्लाघवप्रकाशादीनाम्, रूपादयो ज्ञानविशेषाणां सजातीयक्षणानां चेत्युत्प्रेक्षितव्यम्। ननु नार्थक्रियाभेदमात्राद्भेदं ब्रूमः, अपि तु तत्रासंभाविन्या अदृष्टायाः। यथा चक्षुषि सत्यप्यदृष्टायाश्च बधिरे तत्रासंभाविन्याः शब्दबुद्धेरिन्द्रियभेदः। परस्परासंभविकार्याश्च

इति विरुद्धव्याप्तोपलब्धिर्विनाशस्य हेत्वन्तरायत्ततां प्रतिक्षिपति। ध्रुवभाविता हि निषिध्यमानहेत्वन्तरापेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्तोपलब्धा हेत्वन्तरानपेक्षत्वमुपस्थापयति।

Cf. *Nyāyavārttikatātparyaṭīkā* (507.10–13): अपि च यद्येषां ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा यथा कृपाणस्यायोमयत्वे। ध्रुवभावी च कृतकानां भावानां नाश इति विरुद्धव्याप्तोपलब्धिः। ध्रुवभाविता हि प्रतिषिध्यमानहेत्वन्तरापेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्तोपलब्धा, सेह प्रतीयमाना निरपेक्षत्वमुपस्थापयन्ती हेत्वन्तरापेक्षितां प्रतिक्षिपति।

Cf. *Abhiprāyaprakāśikā* (208.last–209.3): यद्येषां ध्रुवभाविनः? तत्र तेषां हेत्वन्तरापेक्षा, यथा शरकृपाणादीनां लौहमयत्वे, ध्रुवभावी च कृतकानां विनाश इत्यनुमानं हेत्वन्तराधीनतां वारयति।

22.46 °पेक्षा] MS^{pc}; °पेक्ष MS^{ac} **22.47** °भावी च] MS^{pc}; °भावी MS^{ac} • विरुद्ध°] MS^{pc}; विरुद्धो° MS^{ac} **22.48** °हेत्वन्तरा°] MS^{pc}; °हेत्वन्तारा° MS^{ac}

प्रायेण भावाः, अन्यकार्यस्यान्यत्रादर्शनात्। अथ कार्यासंभवः कथं प्रत्येतव्यः? ननूक्तं तत्रादर्शनात्। न तर्ह्यसंभवः। यस्य खल्वद्वयं जगत्तस्य कार्यजातमेकत्रैव दृश्यत इति कथमदर्शनम्? तत्र सिद्धे भेदे तत्रादर्शनम्, तत्रादर्शनाच्च भेदसिद्धिरितीतरेतराश्रयान्न भेदानुमानम्। अथ मतम्– अदृष्टस्य दर्शनादिति। तदसत्, एकस्मादपि क्रमवतां कार्याणां दर्शनात्। स्यादेतत्– एकान्ततो ऽभेदे कार्यदर्शनादर्शने न युक्ते, विशेषाभावात्। न तर्हि कार्यभेदो ऽभेदमपबाधते। तदनुपमर्देन विशेषमात्रानुमानं स्यात्। तच्च कल्पनाविषयं नैवावजानीमहे, वस्तुसतस्तस्यायोगात्, तत्त्वान्यत्वयोरसंभवात्। यस्तु क्षणिकवादी तत्त्वमेव विशेषस्य न मन्यते, तस्यासति कारणस्वभावाभेदे कथं तुल्यस्वभावकार्योत्पादः।

… (नन्वेवं सर्व एव पूर्वबीजक्षणा निरपेक्षाः स्वकार्योपजनन इति) ⟨f.77r⟩कृतं सहकारिभिः। ननूक्तं नैते प्रेक्षावन्तः किं तु स्वप्रत्ययाधीननियतसन्निधयो न व्यवधेरीशत इति। तत्किमयं कृषीबलो ऽपि न प्रे(क्षावान्? प्रेक्षावान्, यतः कुसूला)दवतार्य बीजमावपति भूमौ परिकर्मितायाम्। क्षित्यादिसहभुव

23.1–4 Cf. *Nyāyakaṇikā* (518.6–519.1): तत्किमिदानीं समर्थबीजक्षणजनको ऽपि तज्जनने बीजक्षणो ऽनपेक्ष एव? ओमिति चेत्, हन्तानेन पर्यायेण सर्व एव पूर्वे बीजक्षणा निरपेक्षा कार्यजनन इति कृतं सहकारिभिः। ननूक्तं नैते प्रेक्षावन्तः किं तु स्वप्रत्ययाधीननियतसन्निधयो न व्यवधेरीशत इति। किमयं कृषीबलो ऽपि न प्रेक्षावान् यः कुसूलादपनीय बीजमावपति भूमौ परिकर्मितायाम्।

Cf. *Nyāyavārttikatātparyaṭīkā* (516.1–4): नन्वेवं सर्व एव पूर्वबीजक्षणा निरपेक्षाः स्वकार्योपजनन इति कृतं सहकारिभिः। ननूक्तं नैते प्रेक्षावन्तः, किं तु स्वप्रत्ययाधीननियतसन्निधयो न व्यवधेरीशत इति। तत् किमयं कृषीबलो ऽपि न प्रेक्षावान्? प्रेक्षावान्, यतः प्रयत्नेन कुसूलादवतार्य बीजमावपति भूमौ परिकर्मितायाम्।

23.4–9 Cf. *Nyāyakaṇikā* (519.2–520.1): क्षित्यादिसहभाविन एवातिशयोत्पादपरम्पर-

---

23.2 ननूक्तं नैते] MS^{pc}; नैते MS^{ac} • प्रेक्षावन्तः] *em.*; पेक्षावन्तः MS **23.3** कृषीबलो] *em.*; कृबीबलो MS **23.4** °मावपति] *em.*; °मावति MS • °कर्मितायाम्] MS^{pc}; °कर्मितायं MS^{ac} • °भुव] *ow.* MS

एव बीजक्षणस्यातिशयोत्पादपरम्परयाङ्कुरजननसामर्थ्या(त्कुसूलस्थात्तु तस्य शतेनापि सं)वत्सरैरनुत्पादात्तत्रावपतीति चेत्। अथ किमयं न स्वसन्तानमात्रप्रभवः समर्थो बीजक्षणः? तथा चेत्कथं सन्तानान्तरं (नापेक्षेत स्वकार्ये। नन्वपेक्ष)त एव किं तु स्वोत्पादे न तु पुनः स्वकार्ये। तत्र चास्यानपेक्षत्वमुपेयते न तु स्वोत्पत्तौ। ननूत्पत्तावप्यस्य जागर्ति स्वसन्तान(वर्ती पूर्व एव निरपेक्षः क्षणः।)एवं तस्य तस्य पूर्वः पूर्वः क्षणः स्वसन्ततिपतित एवानपेक्षो जागर्ति जनन इति कुसूलनिहितबीज एव कृती कृषी(बलः स्यात्, कृतमस्य कृषि)कर्मणा दुःखाकरेण। तस्मात्परस्परापेक्षाणामेवान्त्यक्षणप्राप्तानां कार्यजनकत्व(मकामेनाप्यभ्युपेयम्।

याङ्कुरजननसामर्थ्यदर्शनाद्बीजस्य कुसूलस्थाद्वत्सरशतेनापि तददर्शनात् तत्रावपतीति चेत्। अथ किमयं न स्वसंतानमात्रप्रभवः समर्थो बीजक्षणः? तथा चेत्कथं सन्तानान्तरं सहकारि नापेक्षेत कार्यकरणे। नन्वपेक्षत एव स्वोत्पादे न स्वकार्ये तत्र चास्यानपेक्षत्वमुच्यते न तु स्वोत्पत्तौ।

Cf. *Nyāyavārttikatātparyaṭīkā* (516.4–8): क्षित्यादिसहभुव एव बीजक्षणस्यातिशयोत्पादपरम्पराया अङ्कुरप्रसवसामर्थ्यात्कुसूलस्थात्तु सहस्रेणापि वर्षैरङ्कुरानुत्पादात्तत्रावपतीति चेत्। अथ किमयं न स्वसन्तानमात्रप्रभवः समर्थो बीजक्षणः? तथा चेत्कथं सन्तानान्तरं नापेक्षेत स्वकार्ये। नन्वपेक्षत एव, किं तु स्वोत्पादे न पुनः स्वकार्ये। तत्र चास्यानपेक्षत्वमुपेयते, न तु स्वोत्पादे।

23.9–13 Cf. *Nyāyakaṇikā* (520.2–6): ननूत्पत्तावप्यस्य स्वसन्तानवर्ती जागर्ति पूर्व एव निरपेक्षः क्षणः। एवं तस्य पूर्वः पूर्वः स्वसन्ततिपतित एवानपेक्षो जागर्ति जनन इति कुसूलनिहितबीजे एव स्यात्कृती कृषिबलः, कृतमस्य प्रेक्षावतः कृषिकर्मणा दुःखाकरेणेति।

Cf. *Nyāyakaṇikā* (526.5–7): तथा च केवलानां व्यभिचारसम्भवादाद्यातिशयोत्पादमङ्कुरोत्पादं वा प्रति क्षित्यादीनां परस्परापेक्षाणामेवोत्पादकत्वमकामेनाप्यङ्गीकरणीयम्।

Cf. *Nyāyavārttikatātparyaṭīkā* (516.9–12): ननूत्पत्तावप्यस्य जागर्ति स्वसन्तानवर्ती निरपेक्षः क्षणः। एवं तस्य तस्य पूर्वः पूर्वः क्षणः स्वसन्ततिपतित (क्षणसन्तति° *edn*) एवानपेक्षो जागर्त्युपजनन इति कुसूलनिहितबीज एव स्यात्कृती कृषीबलः, कृतमस्य कृषिकर्मणा दुःखबहुलेन। तस्मात्परस्परापेक्षाणामेवान्त्यक्षणप्राप्तानां कार्यजनकत्वमकामेनाभ्युपेयम्।

23.5 बीजक्षण°] MS^{pc}; बीक्षण° MS^{ac} • °परम्परया°] MS^{pc}; °परम्परायाº MS^{ac} **23.6 सं(व)त्सरै°**] *em.*; ···म्वत्सरै° MS • किमयन्न] य *ow.* MS **23.7 सन्तानान्तर°**] MS^{pc}; सन्तानान्तन्नर° MS^{ac} **23.8 °त एव**] त *ow.* MS **23.9 स्वसन्तान°**] सन्ता *ow.* MS (an illegible akṣara between स and न्ता deleted) **23.10–11 °पतित एवानपेक्षो**] MS^{pc}; °पति एवनपेक्षो MS^{ac} **23.12 तस्मात्परस्परा°**] *em.*; तस्मात्परास्परा° MS^{pc}; तस्मात्परा° MS^{ac} **23.13 कार्यजनक°**] MS^{pc}; कार्येकजनक° MS^{ac}

अ)⟨f.77ᵛ⟩पि चान्त्यक्षणप्राप्तं बीजमनपेक्षमङ्कुरावनिपवनपाथस्तेजांसि जनयत् किं येनैव रूपेणाङ्कुरं जनयति [ते]नैव तदि](तराण्यपि? किं वा रूपान्तरे)ण? न तावत्तेनैव क्षित्यादीनामप्यङ्कुरस्वाभाव्यापत्तेः। न खलु भवतां कारणाभेदे भेदवत्कार्यं भवितुमर्हति, तद्भेदस्याक(स्मिकत्वप्रसङ्गात्। यदाह– 'अयमेव)हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च' इति। नाप्येवं सामग्रीभेदः, तस्या अप्येकत्वात्, अन्यथा सहभावनियमाभावा[त्]। स्वका](रणासादितः क)श्चिदेव स्वभावभेद एकस्तादृशो यस्मान्नानाकार्याणि जायन्ते। तन्नाकस्मिकत्वं कार्यनानात्वस्य। नाप्यति[प्रसङ्गः],(तस्यासा-

---

23.18 *Pramāṇavārttika –svavṛtti* I.35ab: अयमेव खलु भेदो भेदहेतुर्वा भावानां विरुद्धधर्माध्यासः कारणभेदश्च।

23.14–18 Cf. *Nyāyavārttikatātparyaṭīkā* (516.12–18): अपि चान्त्यक्षणप्राप्तं बीजमनपेक्षमङ्कुरावनिपवनपाथस्तेजांसि (॰पेक्ष्य अ॰ *edn*) जनयत् किं येनैव रूपेणाङ्कुरं जनयति तेनैव तदितराण्यपि? किं वा रूपान्तरेण? न तावत्तेनैव, क्षित्यादीनामङ्कुरस्वाभाव्यापत्तेः। न खलु भवतां कारणाभेदे भेदवत्कार्यं भवितुमर्हति, कार्यभेदस्याकस्मिकत्वप्रसङ्गात्। यथोक्तं भवद्भिरेव अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चेति।

Cf. *Nyāyakaṇikā* (526.7–527.2): अपि चान्त्यक्षणप्राप्तं बीजमनपेक्ष्याङ्कुरावनिपवनपाथस्तेजांसि जनयत्किं येनैव रूपेणाङ्कुरं जनयति तेनैव तदितराण्यपि किं वा रूपान्तरेण? न तावत्तेनैव। क्षित्यादीनामङ्कुरस्वाभाव्यापत्तेः। न खलु कारणाभेदे भेदवत्कार्यं भवितुमर्हति। कार्यभेदस्याकस्मिकत्वप्रसङ्गात्। यदाह 'अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चे'ति।

23.19–22 Cf. *Nyāyavārttikatātparyaṭīkā* (516.18–20): नापि सामग्रीभेदः, तस्या अप्यभेदात्। अन्यथा सहभावनियमाभावात्। स्वकारणादासादितः कश्चिदेव स्वभावभेद एकस्तादृशो यस्मान्नानाकार्याणि जायन्ते। तन्नाकस्मिकत्वं कार्यनानात्वस्य नाप्यतिप्रसङ्गः, तादृशस्य तस्यासार्वत्रिकत्वात्।

Cf. *Nyāyakaṇikā* (527.2–3): नापि सामग्रीभेदः, तस्या अप्येकत्वात्। अन्यथा सहभावनियमाभावात्।

23.14 चान्त्य॰] MS^{pc}; चान्त॰ MS^{ac} • ॰स्तेजांसि] *em.*; ॰स्तेजान्सि MS **23.15** येनैव] MS^{pc}; जेयेनैव MS^{ac} **23.16** तावत्तेनैव] MS^{pc}; तावतेनैव MS^{ac} **23.17** भेदवत्कार्यं] MS^{pc}; भेदकार्यं MS^{ac} **23.18** भेदहेतुर्वा] MS^{pc}; भेदतुर्व्वा MS^{ac} • यद्विरुद्धधर्मा॰] *em.*; यद्विरुद्धर्मा॰ MS • नाप्येवं] *em.*; नाप्ये MS **23.19** नाप्येवं] *em.*; नाप्ये MS **23.20** (क)श्चिदेव] *em.*; …चिदेव MS • स्वभावभेद] MS^{pc}; स्वभावदभेद MS^{ac} **23.21** ॰त्वस्य] MS^{pc}; ॰त्वस्या MS^{ac} • नाप्यति॰] *em.*; नाप्यस्ति॰ MS

र्वत्रिकत्वात्। न च का)र्यकारणयोरभेदो यतः कारणभेदाभेदावनुपतेतां कार्यभेदाभेदौ। तस्माद्यथा केभ्यश्चिदेव बहुभ्यः कार्यमेकं जायते तथैकस्मादेव कुतश्चि[द्बहूनि](जनिष्यन्ते कार्याणीति चेत् ,)मुधैव तर्हि नानादेशवृत्तिरेको ऽवयविसामान्यसंसर्गादिरर्थ[स्त](पस्वी भवतायासितः। न हि ना) ⟨f.78^{r}⟩नात्वे ऽपि देशानां तदाश्रितः सामान्यादिपदार्थो नाना भवितुमर्हति, तस्य तेभ्यो भिन्नत्वादिति।

रूपान्तरेण बीजमङ्[कु](रादितरेषां जनकम्, तथा हि)तदङ्कुरं कुर्वदुपादानम्, तद्विक्रियया तदुत्पत्तेः। तदितरेषु पुनरस्य सहकारिता। तेषां तु पूर्वे क्षित्यादयो यथास्वमुपादा(नानि तद्विक्रियया तदुत्पत्ते)रिति चेत्। अथ सहकारितोपादानते किमेकं तत्त्वं नाना वा? एकं चेत्कथं रूपान्तरेण

23.22–27 Cf. *Nyāyavārttikatātparyaṭīkā* (516.21–517.2): न च कार्यकारणयोरभेदो येन कारणभेदाभेदावनुपतेतां कार्यभेदाभेदौ। तस्माद्यथा केभ्यश्चिदेव बहुभ्यः कार्यमेकं जायते तथैकस्मादेव कुतश्चिद्बहूनि जनिष्यन्ते कार्याणीति चेत्? मुधैव तर्हि नानादेशवृत्तिरेको ऽवयविसामान्यसंयोगादिरर्थस्तपस्वी भवतायासितः। न हि नानात्वे ऽपि देशानां तदाश्रितः सामान्यादिरर्थो नाना भवितुमर्हति। तस्य तेभ्यो भिन्नत्वात् (J; ऽभिन्न° *edn*)।
23.28–34 Cf. *Nyāyakaṇikā* (527.4–13): रूपान्तरेण तदितरेषां जनकम्। तथा हि बीजमङ्कुरं जनयदुपादानं तद्विक्रियया तदुत्पत्तेः। तदितरेषु पुनरस्य सहकारिप्रत्ययता, तेषां तु पूर्वे पवनादयो यथास्वमुपादानानि, तद्विक्रियया तदुत्पादादिति चेत्? ननु सहकारितोपादानते किमेकं तत्त्वं नाना वा? एकं चेत्कथं रूपान्तरेण जनकम्? नानात्वे त्वनयोर्बीजाद्भेदोऽभेदो वा? भेदे कथं बीजस्य जनकत्वम्? ताभ्यामेवाङ्कुरादीनामुत्पत्तेः। अभेदे वा कथं बीजस्य नानात्वम्? भिन्नतादात्म्यात्। एतयोर्वैक्यमेकतादात्म्यात्।
Cf. *Nyāyavārttikatātparyaṭīkā* (517.2–8): रूपान्तरेण बीजमङ्कुरादितरेषां क्षित्यादीनां जनकम्। तथा हि बीजमङ्कुरस्योपादानं तत्सारभागविक्रिययाङ्कुरस्योत्पत्तेः (°भागाविक्रिया° *edn*)। क्षित्यादिषु तु जनयितव्येषु सहकारि, पूर्वे तु क्षित्यादयः क्षित्यादीनां यथास्वमुपादानानि तद्विक्रियया तदुत्पत्तेरिति चेत्? अथ सहकारितोपादानते किमेकं तत्त्वं नाना वा? एकं चेत्, कथं रूपान्तरेण जनकम्? नानात्वे त्वनयोर्बीजाद्भेदोऽभेदो वा? भेदे कथं बीजस्य जनकत्वम्? ताभ्यामेवाङ्कुरादीनामुत्पत्तेः। अभेदे वा कथं न भेदो बीजस्य भिन्नतादात्म्यात्। एतयोर्वा कथं नाभेदो भिन्नार्थतादात्म्यात्।

23.22–23कारणभेदाभेदावनुपतेतां कार्यभेदाभेदौ] *em.*; कारणभेदाभेदौ MS **23.23** तस्माद्यथा] MS^{pc}; तस्माद्यथ MS^{ac} **23.24** कुतश्चिद्बहूनि] MS^{pc}; कुश्चिद्बनि MS^{ac} • वृत्तिरेको ऽव°] *em.*; वृत्तिः एको अव° MS^{pc}; वृत्ति एको अव° MS^{ac} **23.26** तदाश्रितः] MS^{pc}; तदाश्रित MS^{ac} **23.28** रूपान्तरेण] MS^{pc}; रूपादन्तरेण MS^{ac}; न्त *ow.* MS **23.29** तदितरेषु] *em.*; तदिदरेषु MS **23.31** °पादानते] पा *ow.* MS **23.31** चेत्कथं] चेत्क *ow.* MS

जनकम्, नानात्वे त्वनयो[र्बीजाङ्क]रयो(दो ऽभेदो वा। भेदे कथं बीजस्य) जनकत्वम्, ताभ्यामेवाङ्कुरादीनामुत्पत्तेः। अभेदे वा कथं न बीजस्य भिन्नत्वं भिन्नतादात्म्यात्, एतयोर्वैकत्व[मे](कतादात्म्यात्। तस्मादङ्कुराज्जनयितव्ये क्षित्या)दौ तदुपादानं पूर्वमेव क्षित्यादिसमसमयभावि बीजेनापेक्ष्यते। नान्यथा कार्यभेदसिद्धिरित्यनिच्छता[प्यभ्युपगन्त](व्यम्। न चानुपकारकमपे)क्षागोचर इति च भवद्भिरेवोपपादितम्। न च क्षणस्योपकारसंभवो ऽन्यत्र जननात्तस्याभेद्यत्वा[त्।](न च समसमयभाविनोर्जन्यज) ⟨f.78ᵛ⟩ नकत्वमस्ति सव्येतरविषाणयोरिव। तस्मात्स्वसन्तानमात्रादेव कार्योत्पादप्रसङ्गात्कार्यभेदानुपपत्तेश्चानुपकारि(ण्यपेक्षाविरहाच्च क्षणि)कस्यापि न सापेक्षस्यानपेक्षस्य वार्थक्रिया संभविनीत्यसाधारणं सत्त्वं न क्षणभङ्गसिद्धावङ्गम्।

अथ मा भूदसाधारणता सत्त्व(स्येत्यनुपकारकेष्वपि) कार्यकरणापेक्षाभ्युपेये-

23.34–41 Cf. *Nyāyavārttikatātparyaṭīkā* (517.8–16): तस्मादङ्कुराद् भिन्ने क्षित्यादौ जनयितव्ये तदुपादानं पूर्वमेव क्षित्यादिसमसमयभावि बीजेनापेक्ष्यते। एवं बीजमपि समसमयभाव्येव सहकारिकारणं क्षित्यादिभिरपेक्ष्यते। नान्यथा कार्यभेदसिद्धिरित्यनिच्छताप्यभ्युपेतव्यम्। न चानुपकारकमपेक्षागोचर इति च भवद्भिरेवोपपादितम्। न च क्षणस्योपकारकत्वसंभवोऽन्यत्र जननात्तस्याभेद्यत्वात्। न च समसमयभाविनोर्जन्यजनकत्वमस्ति सव्येतरविषाणयोरिव। तस्मात्स्वसन्तानमात्रादेव कार्योत्पादप्रसङ्गात् कार्यभेदानुपपत्तेश्चानुपकारिण्यपेक्षाविरहाच्च क्षणिकस्यापि सापेक्षस्यानपेक्षस्य वा नार्थक्रिया संभविनीत्यसाधारणं सत्त्वं (°धारणसत्त्वं *edn*) न क्षणभङ्गसिद्धावङ्गम्।

Cf. *Abhiprāyaprakāśikā* (209.17–18): तदेवं क्षणिकस्यापि सापेक्षस्यानपेक्षस्य वार्थक्रियानुपपत्तेरसाधारणं सत्त्वं न क्षणभङ्गसाधनायालम्।

23.42–46 Cf. *Nyāyavārttikatātparyaṭīkā* (517.17–21): अथ मा भूदसाधारणता सत्त्वस्येत्यनुपकारकेष्वपि कार्यकरणायापेक्षाभ्युपेयते, तेषामपि कार्येणानुकृतान्वयव्यतिरेकत्वात्। न त्वनेन क्रमेणाक्षणिकोऽपि भावोऽनुपकारकानपि सहकारिणः क्रमवतः क्रमवतैव कार्येणानुकृतान्वयव्यतिरेकानपेक्षिष्यते। करिष्यते च क्रमवत्सहकारिवशः क्रमेण कार्याणि। समर्थस्यापि चापेक्षणीयासन्निधेः कार्यक्षेप उपपत्स्यते।

Cf. *Abhiprāyaprakāśikā* (209.19–23): अथ मा भूदसाधारणता सत्त्वस्येति, स्वरूपानुपकारसहकारिषु कार्यकरणायापेक्षाभ्युपेयते, तेषामपि कार्येणान्वयव्यतिरेकवत्ता, तर्ह्यनेन

23.35 पूर्वमेव] *em.*; पूर्वकमेव MS^{pc}; पूर्वकमिव MS^{ac} • °पेक्ष्यते] MS^{pc}; °पेक्षते MS^{ac} **23.37** °रेवोप°] *em.*; °रोवोप° MS • °कारसंभवो] सं *ow.* MS **23.39** °देव कार्यो°] MS^{pc}; °दि कार्यो° MS^{ac} • °त्कार्य°] *em.*; °त्। कार्या° MS **23.40** °नुपकारि°] MS^{pc}; °नुपकारिध° MS^{ac} **23.41** संभविनीत्य°] MS^{pc}; संभवीनीत्य° MS^{ac} **23.42** °करणा°] *em.*; °कारणा° MS **23.4243** °पेयेत] *em.*; °पेयेत् MS

त, तेषामपि कार्येणानुविहितभावाभावत्वात्। नन्वनेन क्रमेणाक्षणिको ऽपि भावो ऽनुपकारकानपि (सहकारिणः क्रमवतः क्र)मवतैव कार्येण वानुकृतान्वयव्यतिरेकानपेक्षिष्यते, करिष्यते च क्रमवत्सहकारिप्रत्ययवशात्क्रमेण कार्याणि, समर्थस्य चापेक्षणीयास[न्नि](धेः कार्यक्षेप उपपत्स्यते। न) चैतावता सहकारिसमवधानादेवोत्पत्तिमतः कार्यसिद्धेः कृतमेतेषां रूपेणेति सांप्रतम्। तत्सहितादेव ततस्तदु[त्पत्ति](दर्शनाद्रूपे सत्यप्यनुत्पादात्।) समवधाने सत्युत्पादादेव कार्यस्य समवधानमेव हेतुर्न पुना रूपमपीति चेत्, तत्किमिदानीं रासभादितुल्यता बीज[रूप](स्य? ओमिति चेदथ कस्मा)द्गर्दभादीनन्तरेणेव बीजरूपमन्तरेणापि नाङ्कुरो जायते? तत्समवधानस्य तत्कारणत्वादिति। तस्मिन्कारणे कथं तन्नि(वेशि रूपमपि न कारणम्? न चा)(f.79r)व्रर्जनीयतया

क्रमेण क्षणिकोऽपि भावोऽनुपकारकानपि सहकारिणः क्रमवतः क्रमवतैव कार्येणानुकृतान्वयव्यतिरेकानपेक्षिष्यते, करिष्यते च क्रमवत्सहकारिवशात् क्रमेण कार्याणि; समर्थस्याप्यपेक्षणीयासन्निधेः क्षेप उपपत्स्यते।

23.46–54 Cf. *Nyāyakaṇikā* (531.5–532.10): न चैतावता सहकारिसमवधानादेवोत्पत्तितः कार्यसिद्धिः (°वोत्पत्तिमतः कार्यसिद्धेः Goswami) कृतमेतेषां रूपेणेति साम्प्रतम्, तत्सहितादेव ततस्तदुत्पत्तिदर्शनात्, रूपे सत्यप्यनुत्पादात्। समवधाने तु सत्युत्पादादेव कार्यस्य तदेव हेतुर्न पुना रूपमपीति चेत्। नन्वेवमहेतुत्वे समानेऽपि बीजरूपस्य रासभादिभिः सह कस्माद्बीजरूपे सत्येवाङ्कुरोत्पादो न रासभादिषु ? सत्स्वेव बीजादिस्वरूपसमवधानस्यैव हेतुत्वादिति चेत्? तद्धेतुत्वे कथं तन्निवेशि स्वरूपमपि न हेतुः? अहेतुत्वे वा कथं न रासभादितुल्यता? न चावर्जनीयतया रूपनिवेशः। समवधानमात्रस्य तदन्तरेणापि भावात्। विशेषस्तु रूपमेव।

Cf. *Nyāyavārttikatātparyaṭīkā* (517.21–518.5): न चैतावता सहकारिसमवधानादेवोत्पत्तिमतः कार्यसिद्धिः कृतमेषां रूपेणेति वाच्यम्, तत्सहितादेव तत उत्पत्तिदर्शनात्, रूपे सत्यप्यनुत्पादात्। समवधाने तु सत्युत्पादादेव कार्यस्य समवधानमेव हेतुः, न पुना रूपमपीति चेत्? तत् किमिदानीं रासभादितुल्यता बीजरूपस्य? ओमिति चेत्? अथ कस्माद्गर्दभादीनन्तरेणेव बीजरूपं विनापि नाङ्कुरो जायते। तत्समवधानस्य तत्कारणत्वादिति चेत्? तत्समवधाने कारणे (C; °समवधानस्य च कारणत्वे *edn*) कथं तन्निवेशि रूपमपि न कारणम्। न चावर्जनीयतया तन्निवेशः समवधानमात्रस्य बीजादिरूपमन्तरेणापि तत्र तत्र भावात्। विशेषस्तु समवधानस्य रूपमेव बीजादीनाम्।

23.44 °मवतैव] MS^{pc}; °मवतै MS^{ac} • कार्येण वानु°] *em.*; कार्येणा वानु° MS^{pc}; कार्येणानु° MS^{ac} **23.45** °ष्यते। करिष्यते च] MS^{pc}; °ष्यते। MS^{ac} • °वशात्क्रमेण] MS^{pc}; °वशत्क्रमेण MS^{ac} **23.47** रूपेणे°] MS^{pc}; रूपेणो° MS^{ac} **23.49** °वधानमेव] MS^{pc}; °वाधानमेव MS^{ac} • तत्किमिदानीं] तत्कि *ow.* MS **23.50** रासभा°] MS^{pc}; रसभा° MS^{ac} **23.52** °तया] *em.*; °तया MS^{ac}

तन्निवेशः, समवधानमात्रस्य तदन्तरेणापि तत्र तत्र भावात्। विशेषस्तस्य रूपमेव बीजादीनाम्। (तस्माद्यथोभयाधीननिरूपणा)पि व्याप्तिरयोगव्यवच्छेदेन व्यापके निरूप्यते व्याप्ये भाव एव व्यापकस्य नाभाव इति, व्याप्ये पुनरन्ययोगव्यवच्छेदेन (व्यापक एव भावो व्याप्यस्य ना)न्यत्रेति। एवं कार्यकारणभावो ऽप्युभयाधीननिरूपणो ऽपि कारणे ऽयोगव्यवच्छेदेन वर्तते कार्यस्य पुरस्ताद्भाव एव [कार](णस्य) नाभाव इति, कार्यस्य (पुनरन्ययोगव्यवच्छे)देन कारण एव सति कार्यं नान्यस्मिन्नित्यनुभवानुसारान्निश्चीयते, तथैव लौकिकपरीक्षकाणां संप्रतिपत्तेः। न [च] (कारणतैव सत्ता किं तु स्व–

23.54–60 Cf. *Nyāyakaṇikā* (532.10–533.7): तस्माद्यथोभयाधीननिरूपणा व्याप्तिर्व्यापकस्य व्याप्ये भाव एव, नाभाव इति व्याप्यस्य तु व्यापक एव भावो नान्यत्रेति निरूप्यते तथा कार्यकारणभाव उभयाधीननिरूपणोऽपि कारणस्य कार्यात्प्राग्भाव एव नाभाव इति कार्यस्य कारणे सत्येव नासति भाव इति अनुभवानुसारान्निश्चीयते, तथैव लौकिकपरीक्षकाणां कार्यकारणभावावगतेः।

Cf. *Nyāyavārttikatātparyaṭīkā* (518.5–11): तस्माद्यथोभयाधीननिरूपणा व्याप्तिरयोगव्यवच्छेदेन व्यापके निरूप्यते व्याप्ये भाव एव व्यापकस्य नाभाव इति। व्याप्ये पुनरन्ययोगव्यवच्छेदेन व्यापक एव भावो व्याप्यस्य नान्यत्रेति। एवं कार्यकारणभावोऽप्युभयाधीननिरूपणोऽपि कारणे ऽयोगव्यवच्छेदेन निरूप्यते कार्योत्पादस्य पुरस्ताद्भाव एव कारणस्य नाभाव इति, कार्ये पुनरन्ययोगव्यवच्छेदेन (°रयोग° *edn*), कारण एव सति भावो नान्यस्मिन्नित्यनुभवानुसारान्निश्चीयते। तथैव लौकिकपरीक्षकाणां संप्रतिपत्तेः।

23.60–66 Cf. *Nyāyakaṇikā* (533.7–11,534.7–535.3): न च कारणतैव सत्ता किं तु स्वरूपं नीलादेरनुभूतावसितम्, तद्धि तेनैव स्वरूपेण सत्स्वाभावव्यवच्छिन्नं तासु तास्वर्थक्रियासूपयुज्यते, न पुनस्तत्कारितैवास्य रूपम्। मा भूदपर्यायेणानेकार्थक्रियाकारिणो रूपभेदः। …तथा च यद्यस्ति सर्वज्ञस्तथापि सिद्धं सद्रूप एव भावस्तद्विज्ञानालम्बनप्रत्ययत्वमनुभविष्यति। अथ नास्ति, तथापि स स्वहेतुतो लब्धस्वरूप एवापाततोऽकिंचित्करः समर्थोऽपि तत्तत्सहकारिसन्निधेस्तासु तास्वर्थक्रियासूपयोक्ष्यते।

Cf. *Nyāyavārttikatātparyaṭīkā* (518.11–16): न च कारणतैव सत्ता किं तु स्वरूपं नीलादेरनुभूतावसितम्, तद्धि तेनैव रूपेण स्वाभावव्यवच्छिन्नं तासु तास्वर्थक्रियासूपयुज्यते, न पुनरर्थक्रियाकारितैव स्वरूपम्। मा भूदनेकार्थक्रियाकारिणोऽपर्यायेण रूपभेदः। तस्माद्यद्यस्ति सर्वज्ञस्ततः स्वरूपेणैव सन् भावस्तज्ज्ञानस्यालम्बनप्रत्ययो भविष्यति। अथ

23.54 बीजादीनाम्] MS^{pc}; बीजादीनां तथा MS^{ac} **23.55** भाव] MS^{pc}; भव MS^{ac} **23.57** °कारणभावो] MS^{pc}; °कारणाभावो MS^{ac}; वो *ow.* MS • °भयाधीन°] MS^{pc}; °भयधीन° MS^{ac} **23.58** पुरस्ताद्भाव] MS^{pc}; पुरस्तद्भाव MS^{ac} • का(रणस्य) नाभाव इति, कार्यस्य] MS^{pc}; का(रणस्य) MS^{ac} **23.60** °परीक्षकाणां] MS^{pc}; °परीक्षणाकाणां MS^{ac}

रू)पं नीलादेरनुभूतावसितम्। तद्धि तेनैव रूपेण सत्स्वाभावव्यवच्छिन्नं तासु तास्वर्थक्रियासूपयुज्यते। न पुनरर्थ[क्रि](याकारितैव स्वरूपम्। मा भू)दपर्यायेणानेकार्थकारिणो रूपभेदः। तद्यद्यस्ति सर्वज्ञस्ततः स्वरूपेणैव सन् भावस्तज्ज्ञानस्यालम्बनप्रत्ययो भविष्यति।[अथ](नास्ति तथापि स) ⟨f.79^{v}⟩ सद्रूपो जनित्वापाततो ऽकिंचित्करो ऽपि पश्चात्कुतश्चिन्निमित्तादासाद्य सहकारिप्रत्ययान् तासु तास्वर्थक्रियासूपयोक्ष्य[ते](। तत्सिद्धमेतदक्षणिकस्यापि) क्रमाक्रमाभ्यामर्थक्रियोपपत्तेर्व्यापकानुपलब्धेरसिद्धेः सन्दिग्धव्यतिरेकमनैकान्तिकं सत्त्वं क्षणभङ्गुरत्वे भावानामिति।

य[च्च](विकल्पितं स्वकारणादमी)भावा विनश्वरा जायन्ते अविनश्वरा वेति। तत्र ब्रूमः– किं पुनरिदं विनश्वरत्वमभिमतमायुष्मतः, किं विनाशस्वभाव-

---

तु नास्ति तथापि सद्रूपो जनित्वापाततो ऽकिंचित्करोऽपि पश्चात्कुतश्चिन्निमित्तादासाद्य सहकारिप्रत्ययान् तासु तास्वर्थक्रियासूपयोक्ष्यते।

23.66–68 Cf. *Nyāyavārttikatātparyaṭīkā* (518.16–19): तत्सिद्धमेतदक्षणिकस्यापि (J; °मेतत्क्षणिक° *edn*) क्रमाक्रमाभ्यां यथायोगमर्थक्रियोपपत्तेर्व्यापकानुपलब्धेरसिद्धेः सन्दिग्धव्यतिरेकमनैकान्तिकं सत्त्वं शाक्यानां क्षणिकत्वे साध्ये भावानाम्।

Cf. *Abhiprāyaprakāśikā* (209.26–27): तत्सिद्धमक्षणिकस्यापि क्रमाक्रमाभ्यामर्थक्रियोपपत्तेः सन्दिग्धव्यतिरेकमनैकान्तिकं सत्त्वसाधनमिति॥

23.69–72 Cf. *Nyāyavārttikatātparyaṭīkā* (507.21–508.2): यत्तावद्विकल्पितं स्वहेतुभ्यो भावा विनश्वरा, अविनश्वरा वा जायन्त इति, तत्र ब्रूमः किं पुनरिदं विनश्वरत्वं भावानामभिमतमायुष्मतः, किं विनाशस्वभावत्वमाहो विनाशार्हत्वं नित्येभ्यो व्यावृत्तं रूपम्? न तावत्पूर्वः कल्पः परस्परपरिहारवतोर्भावतन्नाशयोस्तादात्म्यानुपपत्तेः।

Cf. *Abhiprāyaprakāśikā* (210.17–20): यत्पुनर्विकल्पितम्– किं विनश्वरस्वभावः, अतत्स्वभावो वेति। तत्र किमिदं विनश्वरस्वभावत्वमभिमतम्, किं विनाशरूपत्वम्, आहोस्विन्नित्येभ्यो व्यावृत्तं विनाशार्हत्वम्? नाद्यः; परस्परपरिहारवतोर्भावतन्नाशयोः तादात्म्यानुपपत्तेः।

23.61 °पन्नीलादेरनु°] MS^{pc}; °न्नीलादेरनु° MS^{ac} • सत्स्वाभावव्यवच्छिन्नं] MS^{pc}; सत्स्वाभाववच्छिन्नं MS^{ac}; त्स्वाभाव *ow.* MS **23.62** तास्वर्थ°] स्वर्थ *ow.* MS • °क्रियासूपयुज्यते] MS^{pc}; °क्रियासूपयुज्यते। सूपयुज्यते MS^{ac} **23.63** तद्यद्यस्ति सर्वज्ञः] MS^{pc}; तद्यद्यस्ति सर्वज्ञाः MS^{ac}; स्ति and ज्ञ *ow.* MS **23.63–65** सन् भावः] MS^{pc}; सन्भाव MS^{ac}; न्भा *ow.* MS **23.64** तज्ज्ञान°] *em.*; तज्ञान° MS^{ac} • °स्यालम्बनप्रत्ययो] MS^{pc}; °लम्बनप्रत्ययो MS^{ac} **23.65** पश्चात्कुतश्चिन्निमित्तादासाद्य] MS^{pc}; पश्चात्कुश्चिन्निमित्तासाद्य MS^{ac} **23.67** °ब्धेरसिद्धेः] MS^{pc}; °ब्धेसिद्धेः MS^{ac} **23.68** सत्त्वं] *em.*; सत्त्व MS **23.69** भावा] भा *ow.* MS • अविनश्वरा] MS^{pc}; अविनश्वरो MS^{ac} **23.70** °मभिमत°] त *ow.* MS

त्वम्,(आहोस्विन्नित्येभ्यो व्यावृत्तं) रूपं विनाशार्हत्वम्? न तावत्पूर्वः कल्पः, परस्परपरिहारवतोर्भावतन्नाशयोस्तादात्म्यानुपपत्तेः। द्वि[ती]यं त्व(नुमन्यामहे। नन्वेवं भावा उद)यानन्तरमपवृज्येरन्। नापवृज्यन्ते। विनश्वरा अपि हि पटादयस्तन्तुविनाशात्तन्तुविमोकाद्वा स्वप्रत्ययाधीनजन्म[नो](विनङ्क्षन्ति। न हि तण्डुलाः पचे)लिमा इति विना दहनसलिलसंयोगप्रचयभेदं विक्लिद्यन्ति काष्ठानि वा भिदेलि⟨f.80^{r}⟩मानीति कुठारादिकमन्तरेण दलन्ति। यो ऽपि मन्येत– त एव तण्डुलाः पचेलिमा ये समर्थदहनोदकपिठरसहभुवस्तद[न](न्तरं हि पुलाकाः प्रादुर्भवन्ति, न तु य)दनन्तरं प्रादुर्भवन्ति न नूनं ते पचेलिमा इति– अक्षणिकस्यार्थक्रियासमर्थनमस्मै भूयो व्याचक्षीत। स्यादेतत्– विनाशो नाम न कश्चि[द्भि](न्नो भावात्, येन हि स्वविनाशाय) विनश्वरो भावो हेत्वन्तरमपेक्षेत। ननु किमयमभिन्नो भावात्, अथ नास्त्येव। यदापि भावादभिन्नः पटस्य नाशस्तदापि किं पटात्मा, आहोस्वि(द्विनश्यत्पटक्षणात्मा। पूर्वस्मिन्कल्पे) पट एव क्षणस्थितिधर्मा द्वितीयादिषु क्षणेषु तस्य नाशो नार्थान्तरम्। हन्तायमस्ति प्रथमे क्षण इति, नाशो ऽपि तत्स्वभावस्तदा स्यात्। त[था](सत्ययं पटः सर्वथा नित्यो ऽ)नित्यो वा, द्वितीयादिक्षणवर्तितदभावाव्यतिरेकात्। न च प्रथमद्वितीयक्षणनियतौ भावतदभावौ परस्परात्मानौ भवितुमर्ह[तः],(अत एव विनाशो नाम) नव एवायं

23.72–79 Cf. *Nyāyavārttikatātparyaṭīkā* (508.6–13): द्वितीयं तु कल्पमनुमन्यामहे। नन्वेवं विनाशार्हाश्चेद्भावाः स्वकारणादुत्पन्नाः, हन्तोदयानन्तरमेवापवृज्येरन्। नापवृज्यन्ते। विनाशार्हा अपि पटादयस्तन्तुविनाशाद्वा तन्तुविमोक्षाद्वा स्वकारणाधीनजन्मनो विनङ्क्षन्ति। न हि तण्डुलाः पचेलिमा इति विनैव दहनसलिलसंयोगप्रचयभेदं विक्लिद्यन्ति, काष्ठानि वा भिदेलिमानीति कुठारादिकमन्तरेण दलन्ति। यो मन्यते त एव तण्डुलाः पचेलिमा ये समर्थदहनोदकपिठरसहभुवः, तदनन्तरं हि पुलाकाः प्रादुर्भवन्ति, यदनन्तरं तु न प्रादुर्भवन्ति न ते पचेलिमा इति। तस्योत्तरमक्षणिकार्थक्रियामुपपादयन्तो वक्ष्यामः।

23.71 तावत्पूर्वः] MS^{pc}; तावत्पूर्व्वः पक्षः MS^{ac} **23.74** पटादय॰] MS^{pc}; दय॰ MS^{ac} **23.75** ॰संयोग॰] MS^{pc}; ॰संयौग॰ MS^{ac} **23.76** वा] MS^{pc}; वावि MS^{ac} • कुठारादिक॰] कुठाराहिक॰ MS; क *ow.* MS^{ac} • दलन्ति] MS^{pc}; दलयन्ति MS^{ac} **23.79** इति– अक्षणिकस्यार्थ॰] *em.*; इक्षणिकस्योर्थ॰ MS; इ *ow.* MS^{ac} • व्याचक्षीत] *em.*; वाचक्षीत MS **23.80** नाम न] MS^{pc}; नाम MS^{ac} **23.82** पटात्मा, आहो॰] *conj.*; पटाहो॰ MS **23.83** द्वितीयादिषु] MS^{pc}; द्वितीयाषु MS^{ac} **23.84** प्रथमे] MS^{pc}; प्रमे MS^{ac} **23.86** प्रथम॰] MS^{pc}; प्रथ॰ MS^{ac} **23.87** परस्परात्मानौ] MS^{pc}; परस्परात्मनौ MS^{ac} • एवायं] एव। य MS^{pc}; एव ॱMS^{ac}

स्वभावः सभागक्षणान्तरोत्पादो वा। ननु विनश्यत्पटक्षणात्मा तन्नायं प्रसङ्ग इति चेत्? भवतु, न पुनरयमकारणः।[भ](वेतां भावाभावावेकस्यैव) ⟨f.80v⟩ आत्मनो ऽन्वयव्यतिरेकौ। तन्तुपरिस्पन्दजन्मा विभागः सभागक्षणोत्पादो ऽपि नाकारणः। न चायमसिद्धे क्षणभङ्गुरत्वे भावानां सिध्यतीति तत(ः क्षणभङ्गुरत्वं समर्थयमानो) दुरुत्तरमितरेतराश्रयमाविशति। अपि च भावान्तरं चेदभावो विनश्यतो भावस्य तादवस्थ्यं भवद्भिरेव प्रसञ्जितम्। न च भावान्तर[म](भावो ऽपि तु स्वरूपतो भाव एवे)त्यावेदयिष्यते। नन्वभावो नाम न कश्चिद्यो वस्तुधर्मौ भेदाभेदौ स्पृशेत्। केवलमनादिविकल्पवासनोपादानविकल्पोपदर्शित(शरीरो ऽयमभावः प्रतीयत) इति न पुनः परमार्थ एव यः कारकव्यापारगोचरो भवेत्। न तर्हि तत्त्वतो द्वितीयादिषु क्षणेषु वस्तुनो नास्तिता। तथा चान्वयि[नि](तस्मिन्न विधानं प्रतिषेधो वा वस्तु)नाम्।

निवृत्तिर्यदि तस्मिन्न हेतोर्वृत्तिः किमिष्यते।
सापि न प्रतिषेधो ऽयं निवृत्तिः किं निषिध्यते॥
विधानं प्रतिषेधं च मुक्त्वा शाब्दो ऽस्ति (नापरः।
व्यवहारः स चासत्सु) नेति प्राप्तात्र मूकता॥

इति द्वे किंकारणपठिते भवदभिमतमर्थं विधुरयतः।

23.99–102 *Pramāṇavārttika* IV.224–225: निवृत्तिर्यदि ··· ··· प्राप्तात्र मूकता॥

23.92–97 Cf. *Bhāmatī* ad *Adhyāsabhāṣya:* यद्युच्येत नाभावो नाम भावादन्यः कश्चिदस्ति, अपि तु भाव एव भावान्तरात्मनाभावः स्वरूपेण तु भावः। यथाहुः– 'भावान्तरमभावो हि कदाचित्तु व्यपेक्षया' इति। ततश्च भावात्मनोपाख्येयतयास्य युज्येतानुभवगोचरता।

23.88 स्वभावः सभागक्षणा॰] MS^{pc} (ग in the margin); -----क्षणा॰ MS^{ac} **23.90** ॰क्षणोत्पादो] *em.*; ॰क्षणोत्पदो MS^{pc}; ॰क्षाणोत्पदो MS^{ac} **23.92** दुरुत्तरमितरेतराश्रयमाविशति] *em.*; दुरुत्तरमितरेतराश्रयमाविनसति MS^{pc}; ------------नाविनसति MS^{ac} **23.93** तादवस्थ्यं] स्थ्यं *ow.* **23.94** ॰त्यावेदयिष्यते] *em.*; ॰त्यवेदयिष्यते MS **23.95** भेदाभेदौ] MS^{pc}; भेदोभेदौ MS^{ac} **23.95–96** ॰वासनोपादानविकल्पो॰] MS^{pc}; ॰वसेनोपादानविकल्पो॰ MS^{ac}; ल्पो *ow.* **23.97** एव यः] एव यः *ow.* • न तर्हि] MS^{pc}; न नर्हि MS^{ac} • द्वितीयादिषु] षु *ow.* **23.103–104** नेति प्राप्तात्र मूकता॥ इति] *em.*; मते प्राप्ताविवेकतेति MS^{pc}; --------कतेति MS^{ac} **23.104** किंकारण॰] MS^{ac}; किंचिद्धि कारण॰ MS^{pc}

निवृत्तिर्यदि नार्थस्य वृत्तिरस्य कि[मि](ष्यते।
तत्किं भवान् क्ष)⟨f.81r⟩णिकतां न साधयितुमिच्छति॥

भावानां नित्यतां चाक्षरं सम[र्प]यते। स्थितौ चानुयुक्तो ऽस्थितिमातिष्ठते ऽस्थितौ च स्थितिमि(ति भवान् कृतवाक्छलपरि)च्छदो व्यक्तं बत वैयात्यमाचरति। तस्माद्भिन्नो भावादभावः स्वभावविरोधात्कारणभेदाच्चेति सांप्रतम्। पटस्य हि त[न्तव](स्तन्तूनामन्योन्यस्य संयोगश्च)कारणम्, तदभावस्य तु पटतन्तूनामन्योन्यस्य विभागो वा तन्तुविनाशो वा कारणम्। कार्यात्प्रागभावश्च कारणे प[ट](स्य यथा तन्तुषु प्रागभावः। अ)स्ति चासौ पटस्यापीति सो ऽपि कारणं स्वविनाशे।

ननूत्पद्यतां नामाभावो भावाद्भिन्नः किमायातं भावस्य? न खलु क्रमेलको-[त्पा](दने पीलवो निवर्तन्ते। ना)भावोत्पादे भावस्यापरा निवृत्तिः, तस्यैव तत्त्वात्। कथमन्यस्योत्पादो ऽन्यस्य निवृत्तिः। अत्र स्वभावभेदैरुत्तरं वा-

23.114–116 Cf. *Nyāyavārttikatātparyaṭīkā* (507.6–7): भावाद् भिन्नत्वे (भावाभिन्नत्वे *edn*) तु जायतामभावो भावस्य किमायातम्? न हि क्रमेलकोत्पादने पीलवो निवर्तन्ते। Cf. *Nyāyavārttikatātparyaṭīkā* (509.5–7): भावाद्भिन्नश्चेदभावो जन्येत भावतादवस्थ्यमिति, तत्रोच्यते– नाभावस्योत्पादे भावस्यापरा निवृत्तिः किं त्वभावोत्पाद एव तन्निवृत्तिरिति।

Cf. *Nyāyakaṇikā* (537.4–5): नन्वस्मिन्नुत्पन्नेऽपि भिन्नमूर्तौ किमायातं भावस्य? न किञ्चिदायातम्।

23.116–123 Cf. *Nyāyavārttikatātparyaṭīkā* (509.7–13): कथमन्यस्योत्पादे ऽन्यस्य निवृत्तिः? अत्र स्वभावभेदैरुत्तरं वाच्यं ये परस्परपरिहारावस्थितयस्ते स्वहेतुभ्यो जायन्ते। न हि स्वतोऽन्यस्याङ्कुरस्य वह्निर्न कारणमित्यन्यत्वाविशेषाद् भस्मनो ऽपि न कारणमिति। स्वभावभेदेन तु कार्यकारणभावनियमसमर्थनं परस्परपरिहारनियमेऽपि तुल्यम्। यथा चोत्पादस्य पुरस्तादखिलसामर्थ्यरहितस्याङ्कुरप्रागभावस्योपकारं कंचिदकुर्वन्तोऽपि बीजादयोऽङ्कुरमारभन्ते तदुत्पादस्यैव तत्प्रागभावनिवृत्तिरूपत्वात्। एवं तदभावहेतवोऽपि भावरूपेऽकिंचित्करा अपि तदभावमादधति।

23.108 व्यक्तं बत] *em.*; व्यक्तम्बत MS^{pc}; वक्तव्यक्तम्बत MS^{ac} **23.109** वैयात्य°] MS^{pc}; वैयात्ये° MS^{ac} • भावादभावः] MS^{pc}; भावाभावः MS^{ac} • °भेदाच्चेति] *em.*; °भदाच्चेति MS^{pc}; °भ दाच्चेति MS^{ac} **23.110** पटस्य] प *ow.* MS **23.111** पटतन्तूना°] MS^{pc}; पटः। तन्तूना° MS^{ac} • **23.112** कार्यात्प्राग°] त्प्रा *ow.* MS • °भावश्च कारणे] *conj.*; °भावः च कारणस्ये MS^{pc}; °भाव स्वकारणस्य विभागो वा MS^{ac} **23.114** °तां नामाभावो] MS^{pc}; °तान्नाभावो MS^{ac} • न खलु] MS^{pc}; र न खलु MS^{ac} **23.115–116** तस्यैव] MS^{pc}; तस्यै MS^{ac} **23.116** अत्र] MS^{pc}; अत MS^{ac}

च्यम् – ये परस्प(रपरिहारावस्थितयस्ते) स्वहेतुभ्यो जायन्ते। न ह्यन्यस्याङ्कुरस्य न कारणं वह्निरित्यन्यत्वाविशेषाद्भस्मनो ऽपि न कारणम्। स्वभावभेदेन तु कार्यकार(णभावनियमसम)र्थनं परस्परपरिहारनियमे ऽपि तुल्यम्। यथा चोत्पादस्य पुर⟨स्तादखिलसामर्थ्यर⟩हितस्या⟨ङ्कुरप्रागभावस्यो⟩पकारं किंचिदकुर्वन्तो ऽपि बीजादयो ऽङ्कुरमार(भन्ते, तदुत्पाद)⟨f.81^v⟩स्यैव तदभावनिवृत्तिरूपत्वात्। एवं तदभावहेतवो ऽपि भावरूपे ऽकिंचित्करा अपि तदभावमादधते।

न चेद्भावरूपे किंचित्कृतं तदभा(वहेतुभिः, अथ भावः प्रागि)व स्वाभावसमये, कस्मान्न स्वानुरूपे उपलम्भार्थक्रिये करोति? अथोत्पादात्प्रागिवोत्पन्नो ऽप्यङ्कुरः, कस्मादुपलम्भार्थक्रिये करोति? [अ](थोत्पत्तेः प्रागङ्कुरो नासीत्ते)न नाकार्षीत्संप्रत्युत्पन्नस्त्वस्ति तस्मात्करोतीति चेत्, हन्त भावो ऽपि यदासीत्तदाकार्षीत्संप्रति तु नष्टो नास्ति तस्मान्न करोति। यथा [च](भावोत्पाद एव तत्प्रागभावस्य ना)स्तिता, एवमभावोत्पाद एव भावस्य नास्तिता। उपजनापायधर्मतया भावादभेदो ऽभावस्य ततो न सदसद्रूपतया द्वैराश्यं

23.124–134 Cf. *Nyāyavārttikatātparyaṭīkā* (509.14–510.3): न चेद्भावरूपे किंचित्कृतं तदभावहेतुभिरथ भावः प्रागिव स्वाभावसमये कस्मान्न स्वानुरूपे उपलम्भार्थक्रिये करोति? अथोत्पादात्प्रागिवोत्पन्नोऽप्यङ्कुरः कस्मादुपलम्भार्थक्रिये करोति? अथोत्पत्तेः प्रागङ्कुरो नासीत्तेन नाकार्षीदुत्पन्नस्त्वस्ति, तस्मात्करोतीति चेत्? हन्त भावोऽपि यदासीत्तदाकार्षीत्, इदानीं तु विनष्ट इति नास्ति, तेन न करोति। यथा च भावोत्पाद एव तत्प्रागभावस्य नास्तिता, एवमभावोत्पत्तिरेव भावस्य नास्तिता। उपजनापायधर्मतया भावादभेदो विनाशस्य ततो न सदसद्रूपतया द्वैराश्यं विश्वस्येति चेत्? कोऽयमुपजनः? यदि स्वकारणसमवायः सत्तासमवायो वा, सोऽभावे नास्ति। अथ स्वरूपप्रतिलम्भः, तथापि तावन्मात्रस्य साम्येऽप्यवान्तरभेदेन द्वैराश्योपपत्तेः। तस्माद्यथा सत्त्वेन (J: सत्त्वस्य) साम्येऽपि द्रव्यगुणकर्माणि तेन तेन तत्त्वेनान्योन्यस्य भिद्यन्ते, एवं प्रमेयत्वाभिधेयत्वकार्यत्वकारणवत्त्वेनाविशेषेऽपि सद्भिः सहासतां सत्तातद्विरहरूपभेदाद्भेद इति सिद्धम्।

23.118 ह्यन्यस्या°] MS^{pc}; ह्यस्या° MS^{ac} • °शेषाद्भस्मनो] MS^{pc}; शेषाद्भास्मनो MS^{ac} **23.119** °र्थनं] MS^{pc}; °र्थ MS^{ac} **23.120** °पकारं] *em.*; °परं MS **23.123** °करा अपि तद°] *em.*; °करा ऽपि तद° MS^{pc}; °करात ऽपि तिद° MS^{ac} **23.125** °रूपे उप°] *em.*; °रूपे ऽप° MS • °र्थक्रिये] MS^{pc}; °र्थक्रियो MS^{ac} **23.126** ऽप्यङ्कुरः] *em.*; ऽप्यकुरः MS^{pc}; पि ऽप्यकुर MS^{ac} **23.127** °त्संप्रत्युत्पन्न°] *em.*; °त्प्रत्पन्न° MS^{ac} • हन्त] MS^{pc}; हतु MS^{ac} **23.128** संप्रति तु] *em.*; संप्रति त्तु MS • तस्मान्न] त *ow.* MS **23.129** °वोत्पाद] MS^{pc}; °वोःत्पाद MS^{ac} **23.130** उपजनापाय°] MS^{pc}; उपजनापाप° MS^{ac} • ऽभावस्य] MS^{pc}; ऽभास्य MS^{ac}; अभा *ow.* MS

विश्व[स्ये](ति चेत्, न, तावन्मात्रस्य साम्येऽप्य)वान्तरभेदेन तदुपपत्तेः। तस्माद्यथा सत्त्वेन साम्ये ऽपि द्रव्यगुणकर्मसामान्यानि तेन तेन तत्त्वेनान्योन्यस्य भिद्यन्ते, एवं प्रमे[य](त्वाभिधेयत्वकार्यत्वकारणवत्त्वेना)विशेषे ऽपि सद्भिः सहासतां सत्तातद्विरहरूपभेदाद्भेद इति सिद्धम्। नापि ध्रुवभाविता नाशस्य हेत्वन्तरानपेक्षत्वमावहति, (असिद्धत्वादनैकान्तिकत्वाद्वा।) इदं हि तावद्भवान्निरूपयतु, किं घटसन्तानात्सभागाद्विसभागा कपालसन्ततिर्ध्रुवभाविनी न वा? न चेन्न वि⟨f.82r⟩नाशो ऽपि घटस्य ध्रुवभावी। न खलु विसभागक्षणोत्पादमन्तरेण घटविनाशमीक्षामहे पिशितचक्षुषः, तथा चासिद्धा ध्रुवभावि⟨ता विनाशस्य। अथ ध्रुवभावि⟩[नी],(तस्यामेव तर्हि विभागसन्ततौ) ध्रुवभाविन्यामपि मुद्गरादिहेत्वन्तरापेक्षेत्यनैकान्तिकं ध्रुवभावित्वं नानपेक्षत्वेन व्याप्तमिति न हेत्वन्तरापेक्षत्वं निषेद्धुमर्हति। तस्मा[द](बाधितैषा प्रत्यभिज्ञा वस्तू)नि स्थापयति। प्रत्यभिज्ञास्वरूपदूषणानि

23.135–141 Cf. *Nyāyavārttikatātparyaṭīkā* (510.3–11): यापि ध्रुवभाविता विनाशस्य तत्र ब्रूमः- ध्रुवभावित्वेन विनाशस्य हेत्वन्तरानपेक्षं ब्रुवाणो नाहेतुकत्वं वक्तुमर्हति। हेत्वन्तरनिराकरणेन हेतुना निराकरणात्। विशेषनिषेधस्य शेषाभ्यनुज्ञानहेतुत्वात्। अपि च ध्रुवभावित्वमसिद्धमनैकान्तिकत्वं वा। इदं भवान् पृष्टो व्याचष्टां किं घटसन्तानात्सभागात्कपालसन्ततिर्ध्रुवभाविनी न वा? न चेत्? न विनाशोऽपि घटस्य ध्रुवभावी। न खलु विसभागक्षणोत्पादमन्तरेण घटविनाशमीक्षामहे मांसचक्षुषः। तथा चासिद्धा ध्रुवभाविता विनाशस्य। अथ ध्रुवभाविनी, तस्यामेव तर्हि विभागसन्ततौ ध्रुवभाविन्यामपि मुद्गरादिहेत्वन्तरापेक्षेत्यनैकान्तिकं ध्रुवभावित्वं नानपेक्षत्वेन व्याप्तमिति न हेत्वन्तरापेक्षित्वं निषेद्धुमर्हति।

Cf. *Nyāyakaṇikā* (538.8–539.8): न च ध्रुवभाविता विनाशस्य हेत्वन्तरानपेक्षत्वमावहति, असिद्धत्वादनैकान्तिकत्वाद्वा। इदं हि भवान्निरूपयतु, किं घटसन्तानात्सभागाद्विसभागा कपालसन्ततिर्ध्रुवभाविनी न वा? न चेद्विनाशोऽपि घटस्याध्रुवभावी। न खलु विसभागक्षणोत्पादमन्तरेण घटविनाशमीक्षामहे पिशितचक्षुषः। तथा चासिद्धा ध्रुवभाविता विनाशस्य। अथ ध्रुवभाविनी, तस्यामेव विभागसंततौ ध्रुवभाविन्यामपि मुद्गरापेक्षिण्यामनैकान्तिकं ध्रुवभावित्वं नानपेक्षत्वेन व्याप्तमिति न हेत्वन्तरापेक्षत्वं निषेद्धुमर्हति।

23.142 Cf. *Nyāyakaṇikā* (539.8–10): तस्मात्क्षणिकत्वसाधनानुमानप्रतिक्षेपादबाधितं प्रत्यभिज्ञानं स्थापयति भावानिति सिद्धम्।

23.131 तदुपपत्तेः] त *ow.* MS **23.133** °न्योन्यस्य] MS^{pc}; °न्योस्य MS^{ac} • भिद्यन्ते] MS^{pc}; भिद्यन्तो MS^{ac} **23.134** सद्भिः] स *ow.* MS **23.135** °भाविता] MS^{pc}; °भावि MS^{ac} **23.138** विसभाग°] MS^{pc}; विभाग° MS^{ac} • °मीक्षामहे पिशि°] MS^{pc}; °मीक्षमहे पिशिर° MS^{ac} **23.142** चोद्धृतानि] चो MS • °कणिकायाम्] MS^{pc}; °कंणिकायां MS^{ac}

चोद्धृतानि न्यायकणिकायाम्।
तदनेन प्रबन्धेन यद्यपि शक्या प्रतिक्षेप्तुं क्षणिकता तथाप्य[भ्यु](पेत्याह– **तस्य क्षणिकवादि**)**नो ऽसति कारणस्वभावाभेद** इति। अयमर्थः– यथा हि धूमाङ्कुरादिरूपः कार्यभेदः कारणस्य वह्निबीजादेर्भेदं विना न कल्प(यितुं शक्यस्तथा हि सत्त्व)द्रव्यत्वादिरूपेण तस्यैव धूमाङ्कुरादेरभेदः कार्यस्य वह्निबीजादिकारणाभेदमन्तरेण। तस्मात्सत्प्रतिपक्षः कार्यभेदः, [न](कारणभेदः कार्यभेद)स्येष्ट इति।

अथ निरन्वयविनाशानामपि कल्पनाविषयादभेदात्कार्यस्य तुल्यता। हन्त! तर्हि भेदादेव कल्पनाविषयात्कार्यभेदसिद्धेर्मुधा कारणभेदकल्पना। अथ कार्याभेदे न कारणस्वभावाभेदो ऽपेक्ष्येत, भिन्नस्वभावेभ्यः सहकारिभ्य एककार्योत्पत्तेः, यथा चक्षुरादिभ्यो रूपविज्ञानस्य। यथा तर्हि कार्यस्वभावाभेदाय न कारणस्वभावाभेदो ऽपेक्ष्यते, तथा तद्भेदाय कारणभेदो ऽपि नापेक्षितव्यः।

शङ्कते– **अथ निरन्वयविनाशानामपि** कारणानां **कल्पनाविषयादभेदाद**वस्तुसत एवावस्तुसती **कार्यस्य तुल्यता**सा[ध्य]ते। अभेदो दत्तजलाञ्ज)लिरित्य-

---

24.3अथ कार्याभेदे न] अथ न कार्याभेदेन *edn* **24.5**रूपविज्ञानस्य] *em.*; रूपज्ञानस्य AC; रूपादिज्ञानस्य *edn*

23.144 Cf. *Nyāyavārttikatātparyaṭīkā* (510.3–11): तदनेन प्रबन्धेन यद्यपि शक्याः क्षपणकाः प्रतिक्षेप्तुम्; तथापि …
23.146–148 Cf. *Abhiprāyaprakāśikā* (200.27–28): यस्त्विति॥ कार्येषु दधितैलघटादिषु सत्त्वद्रव्यत्वादिरूपेणाभिन्नस्वभावतादर्शनात् कारणेष्वपि क्षीरमृत्तिलादिष्वभिन्नस्वभावतानुमातुं शक्येति न कार्यभेदात्कारणभेदानुमानं (॰नुमानप्रति॰ *edn*) सत्प्रतिपक्षत्वादित्यर्थः।

23.144 तदनेन] MS^{pc}; तदनिनेन MS^{ac} • तथाप्य॰] *em.*; तथाप्यु॰ MS **23.147** द्रव्यत्वादि॰] दि *ow.* MS • ॰ङ्कुरादे॰] ङ्कु *ow.* MS • कार्यस्य] MS^{pc}; कार्यस्या MS^{ac} **23.147–148**वह्निबीजादि॰] *em.*; वह्निबीजादि॰ MS^{ac} **23.148** तस्मात्सत्प्रति॰] *em.*; तस्मात्सप्रति॰ MS^{ac} **23.149** ॰स्येष्ट] MS^{pc}; ॰ष्टेस्येष्ट MS^{ac} **24.1** अथ] MS^{pc}; अथा MS^{ac} • निरन्वय॰] MS^{pc}; निन्वय॰ MS^{ac} **24.2** एवावस्तु॰] ए *ow.* MS

र्थः। तदेतदितरस्यापि तुल्यम्। तथा च कल्पनालाघवादभेद एव कारणानां न्याय्य इत्याह– **हन्तेति**। शङ्कते– **अथ कार्येति**। [सु](गततनयैः प्रति)- ⟨f.82^{v}⟩क्षिप्ते प्रत्यक्षे भेदग्राहिणि कुतस्त्य एष चक्षुर्विज्ञानस्वरूपाणामधिपति-समनन्तरालम्बनप्रत्ययानां भेदः, यतो रूपविज्ञान(स्य चक्षुरादिकारण)भेदे न भवेदनैकान्तिकत्वमिति। तत्पुनरिदमुक्तप्रायतयोपेक्ष्य दूषणान्तरमाह– **यथा तर्हीति**। न कारणधर्मं चेत्कार्यम[नु](पतति तर्हि क्वानु)पतति, न क्वचिदप्यनुपतेदित्यर्थः।

अपि चानेककारणजन्ये ऽप्येकस्मिन् कार्ये कारणव्यापारविषयभेदस्तेनैव वर्णितः, यथा रूपज्ञानस्य– चक्षुषो रूपग्रहणनियमः, समनन्तरज्ञानादुपलम्भात्मता, विषयात्तदाकारतेति। यदि च कार्यतुल्यत्वं न हेतुसाम्यकृतम्, न कार्याद्धेत्वनुमानं स्यात्, भिन्नजातीयादपि तुल्यजातीयोत्पत्तिसंभवात्। हेत्वभेदश्चेन्न कार्याभेद उपयुज्यते, कस्तुल्यजातीयाद्विजातीयस्य जन्म निवारयेत्? तत्र यथा व्यावहारिकादभेदात्कार्याभेदस्तथा व्यावहारिकाद्भेदात्कार्यभेद इति न विशेषः। स्यादेतत्– कल्पितश्चेद्भेदः कार्यभेदाय प्रभुः, न तर्हि कल्पितः। न ह्यन्यत्परमार्थसतो लक्षणमर्थक्रियासामर्थ्यात्। तुल्यमिदमभेदे ऽपि।

अपि च यत्रापि बहुभ्यः कारणेभ्यः परमार्थत एकमेव कार्यमुपजायते, तत्राप्यतद्रूपपरा[वृ](त्तं कार्यं तेषां तेषां कार)णानां विषय इति हि सुगततनयैरभ्युपगतम्। तत्सर्वत्र कार्यभेदे समानम्, सर्वस्यैव तद्भेदस्य समानोत्थापितत्वादित्याह– **अपि(चेति। यदि च कार्यतुल्यत्वं)न हेतुसाम्यकृतं**

24.3 °दितरस्यापि] MS^{pc}; °दितरास्यापि MS^{ac} **24.3–4**कारणानां न्याय्य] *conj.*; करणन्याय्य MS **24.5** एष] MS^{pc}; रेष MS^{ac} **24.6** °समनन्तरा°] MS^{pc}; °समन्तरा° MS^{ac} **24.7** °तयोपेक्ष्य] MS^{pc}; °तयोमोपेक्ष्यं MS^{ac} • दूषणान्तर°] MS^{pc}; दूषणन्तर° MS^{ac} **24.8** तर्हीति] त *ow.* MS **24.9** °पतेदि°] MS^{pc}; °पततेदि° MS^{ac} **25.1** बहुभ्यः कारणेभ्यः] MS^{pc}; बहुभ्यः MS^{ac} • परमार्थत एक°] *em.*; परमार्थन्तरेक° MS **25.2** तत्राप्यतद्रूप°] MS^{pc}; तत्राप्यद्रूप° MS^{ac} • सुगत°] MS^{pc}; भ्युपगत° MS^{ac} **25.3** सर्वस्यैव] स्यै *ow.* MS **25.3–4**समानोत्थापित°] *em.*; समानोपित° MS

ततो न वह्नित्वेन तुल्यानि वह्निस्वलक्षणानि धूमस्वलक्षणानि च न धूमत्वेन तुल्यानि स्युः। ततश्चानग्निजातीये[भ्यो](ऽपि धूमजातीयानि जायेर)न्निति **न कार्याद्धेत्वनुमानं स्यात्**। शेषं सुगमम्।

यो ऽपि मन्यते– युगपद्विरुद्धार्थक्रियादर्शनाद्भेदावगतिः। तथा हि– जननमरणवृद्धिक्षयस्थानगमनशोकहर्षादिविविधविरुद्धधर्मसमुपेतमेकदा विश्वमुपलभ्यते। तद्भेदवदिति गम्यते। तस्यापीदमेवोत्तरमावृत्त्या– दाहपाकविभागेनेति। कथम्? इदं तावदयं प्रष्टव्यः– को विरुद्धार्थः? यद्येकत्रासंभवः, सो ऽसिद्धः। अथ परस्परव्यवच्छिन्नात्मता, जननादयश्च परस्पररूपनिवृत्त्यात्मान इति। न तर्ह्यतो भेदसिद्धिः। एकस्मिन्नपि वह्नौ दग्धृत्वपक्तृत्वदर्शनात्। न हि परस्परव्यवच्छेदमन्तरेण नानात्वं धर्माणाम्। ततश्चेद्भेदः, नानेकधर्मकमेकं किंचित्स्यात्।

ननु मा भूत्कार्यभेदः कारणभेदावगतिहेतुः, विरुद्धधर्मसंसर्गा(त्तु भेदो ऽवसीयत इत्या)ह– **यो ऽपि मन्यते युगपदिति**। धर्मो जननादिर्धर्मिसमाश्रय इति तदर्थक्रियेत्युच्यते। ननु न दाहपाकौ ज(ननमरणादिवद्विरोधि)⟨f.83^{r}⟩नौ नापि कृशानोर्धर्मावपि तु दाह्यस्य पाक्यस्य वेत्याशयवानाह– **कथमिति**। **सो ऽसिद्ध** इति। अद्वैतवादिनां हि जननमरणा(दय एकस्मिन्वस्तुन्यक)-

26.1–4 Cf. *Abhiprāyaprakāśikā* (202.22–24): इदानीं विरुद्धधर्मसंसर्गाद्भेदो ऽवसीयत इति शङ्कते– तदुत्तरत्वेन पुनः श्लोकं योजयितुम्– यो ऽपीति॥ ननु जननमरणादिवन्न दाहपाकयोर्विरोध इति शङ्कते– कथमिति॥

26.5–6 Cf. *Abhiprāyaprakāśikā* (202.26–27): सो ऽसिद्ध इति॥ अद्वैतवादिभिः सर्वेषां जननादिधर्माणामेकस्मिन् वस्तुनि कल्पितत्वाङ्गीकारादित्यर्थः।

Cf. *Śaṅkhapāṇi* (149.17–19): इदमिति। यदि तावदेकत्र जननमरणादीनामसम्भवो विरोधशब्दस्यार्थः, सो ऽद्वैतिनामस्माकमसिद्धः; अस्माकं हि विरुद्धं च सर्वमेकत्रात्मनि समवेतम्।

25.5 तुल्यानि वह्निस्वलक्षणानि धूमस्वलक्षणानि च न] *em.*; तुल्यन वह्निस्वलक्षणानां धूमस्वलक्षणानि MS **25.6** स्युः] *em.*; भ्यु MS • °नग्नि°] ग्नि *ow.* MS **25.7** °मानं] *em.*; °मान MS **26.1** °भेदावगतिहेतुः] MS^{pc}; °भेदादवगतिभिहेतुः MS^{ac} **26.2** युगपदिति] MS^{pc}; युगवपदिति MS^{ac} • जननादि°] MS^{pc}; ऽजननादि° MS^{ac}

ल्पितावच्छेदे संभवन्ति काल्पनिकाः। द्वितीये तु कल्पे ऽनैकान्तिकत्वम्, परस्परासंकीर्णानामपि धर्माणां धर्मिण्येकत्र दर्शनात्। यथा ज[न्मा](दयः परस्परासंकीर्णा)त्मान एवं दग्धृत्वपक्तृत्वे अपि, ते चैकं धूमधर्मिणमध्यासाते इति। न केवलमनैकान्तिकत्वमतिप्रसङ्गश्च। सर्वेषामेव भा[वा](नां विरुद्धधर्मसंस)र्गोपलम्भात्समुत्सन्नसंकथमेकत्वं स्यात्। तथा च तत्समुच्चयो नानात्वमपीति सुव्यवदातं तत्त्वं वस्तूनामित्याह– **ततश्चेद्भेद**[स्त](तो **ऽनेकधर्मकं**) **न किंचित्तुच्छं स्यादिति**।

अथ परस्पराभावात्मतैव विरोधः– नैकस्मिन् स एव भवति, न च भवतीति। ततो भेदावसायः। तदसत्। न ह्येवं धर्मावेव, कुतस्तयोर्विरोधाद्भेदावगतिः। खपुष्पादिषु चोभयाभावादुभयप्रसङ्गः। अथ वध्यघातकभावो विरोधः– हर्षः शोकं हन्ति शोकश्च तम्, एवमितरेष्वपि। तत्रापि नाजात एको ऽन्यं नाशयति, नान्याधिकरणम्। तस्मादेकाधिकरणो भूत्वा नाशयतीति वाच्यम्। एवं च तयोरेकाधिकरणत्वदर्शनान्न तद्दर्शनेनाधिकरणभेदानुमानमव्यभिचारम्।

अथेति। परस्पराभावात्मानः खल्वमी जन्ममरणादयो नैकत्रैकदा संभवन्ति। तथा हि जाय[त](इति न म्रियत इति) म्रियत इति च न जायत इति। यदि तु जन्ममरणे युगपदेकत्र स्यातां ततस्तदेव तदैव जायेत न जायेत

27.4वध्यघातक॰] *Śaṅkhapāṇi*; वध्यघातुक॰ *edn*

26.9 Cf. *Abhiprāyaprakāśikā* (203.16–17): एवं च सति न केवलमनैकान्तिकत्वम्, अतिप्रसङ्गश्च स्यादित्याह– ततश्चेदिति॥

26.6 काल्पनिकाः] MS^{pc}; निकाः MS^{ac} **26.8** चैकं] चै *ow.* MS^{ac} • धूमधर्मि॰] *em.*; धूमधूमधर्मि॰ MS^{pc}; धूमधूमंधर्मि॰ MS^{ac} **26.8–9**॰साते इति] *em.*; ॰सते इतिMS **26.9** ॰कान्तिकत्वमति॰] MS^{pc}; ॰न्तिकत्वप्रमति॰ MS^{ac} • ॰प्रसङ्गश्च] *em.*; ॰प्रसंगंस्च MS **26.10** ॰र्गोपलम्भात्] ग्गों *ow.* MS • स्यात्। तथा च] MS^{pc}; स्यातथा च च MS^{ac} **26.11** ॰मपीति] MS^{pc}; ॰मं। ति MS^{ac} • ततश्चेद्भेद॰] MS^{pc}; ततश्चेद्भेतद॰ MS^{ac} **27.1** परस्परा॰] MS^{pc}; परस्पर॰ MS^{ac} • नैकत्रैकदा] *em.*; नैकत्रेकदा MS **27.2** जायत] MS^{pc}; जाययत MS^{ac} • च न जायत] MS^{pc}; च जायत MS^{ac} **27.3** जन्ममरणे] *em.*; जन्मरणे MS • ॰देकत्र] MS^{pc}; ॰देकर MS^{ac} • तदैव जायेत] MS^{pc}; दैव जायेते MS^{ac}

म्रियेत न म्रियेतेति [भे](दः स्यात्तदवसाय)⟨f.83v⟩[श्चे]त्यर्थः । दूषयति – **न ह्येवं परस्पराभावात्मानौ धर्मा**]वेव तावत्कुतस्तयोर्विरोधाद्धर्मिभेदमतिः । अयमभिप्रायः – यदि हि (जन्माभाव एव म)रणं न तु भावभेद एवं जन्मापि । ततो जन्माभावात्मनि मरणे परिच्छेत्तव्ये प्रतियोगि जन्मापि परिच्छेत्तव्यम्, तत्परिच्छेदनान्त[री](यकत्वात्तदभाव)स्य । जन्मापि चेत्तदभावः, ततस्तदपि प्रतियोगिमरणाधीननिरूपणमिति व्यक्तमन्योन्यसंश्रयम् । भावरूपत्वे त्वन्यानधीननि[रूप](णमुभयमपीत्यदोषः ।) खतत्पुष्पादिषु चात्यन्तसदसत्सूभ**याभावादुभयप्रसङ्गः** । न ह्यत्यन्तसद्व्योमाद्यत्यन्तासच्च तत्कुसुमादि जायत इति ध्वंसेत् । [न](च **हर्षः शोकं हन्ति शोकश्च तम्**), एवमितरेष्वपीति यथासम्भवम्, जन्ममरणयोस्तदसंभवात् । **तत्रापि नाजात एको ऽन्यं नाशयति**, अकारणस्य कार्यस्या(कस्मादसंभवादिति ।) दृष्टौ हि नानाधिकरणावपर्यायं तत्र तत्र हर्षविषादौ, **तस्मादेकाधिकरणो भूत्वा नाशयतीति वाच्यम्** । एवं च **तयोरेकस्या**[धि](करणत्वदर्शनान्न वध्यस्य) ⟨f.84r⟩ घातकेन सहैकदा **दर्शनेनाधिकरणभेदानुमानमव्यभिचारम्** । सव्यभिचारलिङ्गाभासलब्धजन्मापि विज्ञानं सव्यभिचारमेव । अधि[क](रणाभेदे)नेति तु विशेषणे दृष्टान्तासिद्धिः, तस्य विवादास्पदत्वादिति ।

अथ भावरूपतद्व्यवच्छेदात्मानो धर्मा विरोधिनो नित्यत्वानित्यत्वमूर्तत्वामूर्तत्वादयः, तत्संबन्धाद्भेदगतिः । तदपि न, यतो नावश्यं यो यत्र भवति स तं व्याप्नोति । न हि रथादयस्त-

---

27.15–17 Cf. *Śaṅkhapāṇi* (150.8–9): अथापि स्यात्, तथाप्येकाधिकरणत्वदर्शनान्नाधिकरणभेदानुमानमव्यभिचारम्, एकाधिकरणयोरपि वध्यघातकयोर्दर्शनादित्याह– अथेति॥

27.4 न म्रियेते°] न *ow.* MS **27.5** °रोधाद्धर्मि°] रो *ow.* MS **27.5** अयमभि°] म *ow.* MS **27.7** प्रतियोगि°] MS^{pc}; प्रति° MS^{ac} **27.9** °निरूपणमिति] *em.*; °निरूपमिति MS^{ac} **27.10** त्वन्यानधीन°] *em.?*; त्वन्यानथथधीन° MS^{ac} • °निरूप°] MS^{pc}; °रूप° MS^{ac} • खतत्पुष्पादिषु] *em.*; खतत्पुष्पादि MS **27.11** °सदसत्सू°] सू *ow.* MS • ह्यत्यन्त°] त्य *ow.* MS **27.12** °मितरेष्वपीति] MS^{pc}; °धर्मितरे ष्वतिपीतिMS^{ac} • यथासम्भवम् । जन्ममरण°] *em.*; यसासम्भव जन्मरण° MS **27.13** नाजात] ना *ow.* MS **27.15** पर्यायस्तत्र] *em.*; पर्यायं तत्र MS • हर्षविषादादौ] *em.*; हर्षविषादौ MS • भूत्वा] MS^{pc}; भूत्वा च MS^{ac} **27.16** सहैकदा] है *ow.* MS **27.17** °लिङ्गाभास°] MS^{pc}; °लिङ्गाभासा° MS^{ac} **27.19** °स्पदत्वादिति] स्प *ow.* MS

त्संयोगादयो वा नभो व्यश्नुवते, अन्यान् वा संयोगिनः पृथिव्यादीन्, अवच्छिन्नत्वात्। एवमवच्छिन्ना धर्मा अनवच्छिन्नमनन्तमर्थमाश्रयन्तो ऽपि न व्यश्नुवते। अतो नैकस्मिन्नपि भावाभावविरोधः।

मा भूवञ्जन्ममरणादयो भावरूपा धर्मा भेदसाधनम्। **अथ भावरूपतदभावा(त्मानो धर्मा विरोधि)नः** परस्परपरिहारस्थितितया **नित्यत्वानित्यत्वमूर्तत्वामूर्तत्वादयः, तत्सम्बन्धात्तद्भेदगतिरिति**। तत्र सर्वस्यैव विवाद एतया दृष्ट्(याव्याप्यवृत्तित्वादिति। दू)षणान्तरमाह– **तदपि न यत** इति। यथैवात्मविशेषगुणा बुद्ध्यादयः संयोगविभागौ चाव्याप्यवृत्तयस्तदैव तस्मिन्नेव स्वाश्रये स[न्ति](तथैवाव्याप्यवृत्तयो)ऽपि ब्रह्मणि नित्यत्वादयो व्यपेक्ष्यन्ते। न च व्याप्यवृत्तित्वे सतीति विशेषणीयम्। व्याप्यवृत्तीनामपि श्यामतादीनामेकस्मिन्मुखे युगपद्भा[वा](भावौ। अनेकम)⟨f.84v⟩णिकृपाणादर्शोपधानभेदकल्पितनानात्वस्य मुखस्य तत्त्वतो ऽभिन्नस्यापि तदुपपत्तिरिति चेत्? न, अनाद्यविद्योपधानपरिक[ल्पि](तव्यवस्थातो) ब्रह्मण्यप्यभिन्ने ऽपि परमार्थतो व्यापकानां भावाभावोपपत्तेः। विभ्रमस्तूभयत्र तुल्यः।

यस्तु मन्येत– अर्थक्रियाभेदो ऽर्थक्रियाव्यवस्था। ततो भेदाधिगमः। एकत्वे हि न व्यवस्था युज्यते। तथा च पयसो

28.3–4 Cf. *Abhiprāyaprakāśikā* (203.last–204.23): एकस्मिन्नपि धर्मिणि धर्माणां भावतदभावात्मकानामुपलम्भान्नैवमिति वक्तुं तेषामव्याप्यवृत्तितामाह– तदपि नेत्यादिना॥
28.7–9 Cf. *Abhiprāyaprakāśikā* (204.25–27): न च व्यापकेषु धर्मेषु त्वेतन्न सम्भवतीति शङ्कनीयम्; व्याप्यवृत्तीनामपि श्यामतादीनामेकस्मिन्नपि मुखे भावाभावयोर्मणिकृपाणाद्युपाधिभेदेषु चोपलम्भात्॥
28.10–11 Cf. *Abhiprāyaprakāśikā* (205.23–24): ब्रह्मण्यपि परमार्थतो ऽभिन्ने ऽनाद्यविद्योपाधिकार्थक्रियाव्यवस्थातो भेदं साधयितुं तद्व्यवस्थामाह– यस्तु मन्यत इत्यादिना॥

28.1 जन्ममरणा॰] *em.*; जन्मरणा॰ MS • भावरूपतदभावा॰] *em.*; भावरूपतदाभावा॰ MS^{pc}; भावं रूपं तदाभावा॰ MS^{ac} **28.3** तत्र] MS^{pc}; तत्रा MS^{ac} **28.5** ॰वृत्तय॰] वृ *ow.* MS **28.6** नित्यत्वा॰] त्य *ow.* MS • व्यपेक्ष्यन्ते] *em.*; प्यक्ष्यन्ते MS^{ac} **28.7–8**श्यामतादीनामेक॰] MS^{pc}; श्यामतामेक॰ MS^{ac} **28.8** ॰कृपाणादर्शोप॰] MS^{pc}; ॰कृपाणादर्शोदहोपह॰ MS^{ac} **28.9** ॰कल्पित॰] MS^{pc}; ॰कल्पिता॰ MS^{ac} • तत्त्वतो] त्व *ow.* MS **28.10** ॰द्यविद्योप॰] MS^{pc}; ॰द्यविद्याप॰ MS^{ac} • परमार्थतो] MS^{pc}; रपरमार्थतो MS^{ac}

ऽपि तैलं तिलेभ्यश्च दधि स्यात्। तथैकस्मिञ्जायमाने सर्वं जायेत, नश्यति च नश्येत्। अन्यथा भेद एव शब्दान्तरेणोक्तः स्यात्। तदुक्तम्– सहोत्पत्तिविनाशौ सर्वं च सर्वत्रोपयुज्येत इति। तस्यापीदमेवोत्तरम्– दाहपाकविभागेनेति।

यस्तु मन्येत इति। व्यवस्थिता हीमा अर्थ[क्रि](यास्तद्भेदमवगा)हन्ते। तद्यथा जायते पयसो दधि न दधि तिलेभ्यः, तिलेभ्यस्तैलं न तैलं पयसः। एवमुत्पत्तिविनाशव्यवस्थापि। सेयं **व्यवस्था ना**(र्थक्रियाणामेकत्वे युज्यते।) तथा सति हि **सर्वं सर्वत्रोपयुज्येत** विनश्यति कस्मिंश्चित्सर्वं विनश्येत्, **जायमाने च जायेते**ति।

यदि कार्यनानात्वं व्यवस्था, न तया तिलानां पयसश्च भेदं प्रतिपद्यते। अथ पयसो दध्नो जन्म, नान्यत इति व्यवस्था। नान्यत्वं सिद्ध्या व्यवस्थया प्रमित्सितं तल्लक्षणमनुप्रवेष्टुमर्हति, तस्या असिद्धिप्रसङ्गात्। तस्माद्दधिजननशक्तिस्तदभावश्च व्यवस्था। ततो भेदः। न ह्येकविषय एकस्य शक्त्यशक्ती युज्येते इति– स चायं विरोधिधर्मयोगो भेदहेतुरनन्तरमेव निरासि।

तदेतद्विकल्पं दूषयति– **यदी**[ति](। कार्यनानात्वनियमः प्रा)गेव दत्तोत्तरः, कारणनियमस्तु **दध्नः पयस एव जन्म नान्यत** इत्यसिद्धे तिलानां पयसो भेदे न सिद्ध्यति। ततस्तु तद्भेदमि[च्छ](त इतरेतराश्रयप्र)(f.85r)सङ्गः। शक्तिभावाभावावेकस्मिन् संयोगभावाभावाविव व्याख्यातौ। तदुक्तम्– **अनन्तरमेव निरासी**ति।

29.5 *Pramāṇavārttika-svavṛtti* I.35ab: अयमेव खलु भेदो भेदहेतुर्वा भावानां विरुद्धधर्माध्यासः कारणभेदश्च। तौ चेन्न भेदकौ तदा न कस्यचित्कुतश्चिद्भेद इत्येकं द्रव्यं विश्वं स्यात्। ततश्च सहोत्पत्तिविनाशौ सर्वस्य च सर्वत्रोपयोगः स्यात्।

29.4 °युज्येत] *em.*; °युज्येत् MS^{pc}; °युज्यत् MS^{ac} • कस्मिंश्चित्] *em.*; कश्चित् MS • विनश्येत्] MS^{pc}; विनश्ये MS^{ac} **30.1** °कल्पं] *em.*; °कल्प MS **30.2** °नियमस्तु] *em.*; °नियममस्तु MS **30.5** °वेकस्मिन्] *em.*; °वकयोकस्मिन् MS • °भावाभावाविव] *em.*; °भावाभाविव MS

यथा खलु दीर्घकालाः पदार्था मितकालैर्धर्मैः संबध्यमानास्तद्धर्माणो ऽतद्धर्माणश्च न विरोधपदभाजः, तथा परिमितदेशैर्विपुलदेशा अनन्ताश्च। कथमनन्तस्यान्तवान् धर्म इति चेत्, व्यतिरेके ऽनिवर्चनीयत्वे वा नास्त्यसंभावनावकाशः। अव्यतिरेके ऽपि च दीर्घकालस्येव मितकालः। यो ऽपि दीर्घकालमर्थं न प्रतिपद्यते तं प्रतीदं पुनः पठितव्यम्– दाहपाकविभागेनेति। एको ऽपि वह्निः किंचिदेव दहति पचति च। तथा च दाहकश्चादाहकश्च न भिद्यते। तथा न दाहान्तराणि पाकान्तराणि वा करोति तस्मिन्नेव दाह्ये पाक्ये च। तथा बीजादयः प्रत्येकं समर्था अपि नाङ्कुरान्तराणि जनयन्ति, नापि सामग्री। तथा च जनकत्वमजनकत्वमिति।

तन्निरासमुक्तानुक्त(निदर्शनाभ्यां स्पष्टयति)–**यथा खलु दीर्घकालाः** व्योमात्मादयो **मितकालैः** संयोगविभागबुद्ध्यादिभि**र्धर्मैः सम्बध्यमानास्तद्धर्माणो ऽतद्धर्माणश्च न** [**वि**](**रोधपदभाजस्तथा परि**)**मितदेशै** रथादिसंयोगैः सद्वितीयं संयोगिनमनुरुध्यमानै**र्विपुलदेशाः** पृथिव्यादयो **ऽनन्ता**स्त्वाकाशादयः। शङ्क[ते]- (**कथमनन्तस्यान्तवान्ध**)**र्म इति चेत्**। अयमभिसन्धिः। धर्मो हि संयोगबुद्ध्यादिर्धर्मिणो भिन्नो वा स्यादभिन्नो वा? भिन्नश्चेद्धर्मिण्यनेन वर्तितव्यमन्यथा न(तद्धर्मः स्यात्। अभिन्नश्चेद्ध)र्मी व्योमात्मादिः सर्वत्रैकरूप इति तद्वृत्तिस्तत्रास्त्येव। न तु तन्नास्तीति तस्यैव तदैव भावो ऽभावश्च न

31.4–5 अव्यतिरेके ऽपि च] अव्यतिरेके ऽपि *edn*

31.1 Cf. *Abhiprāyaprakāśikā* (206.21–22): पूर्वोक्तमेव निरासमुक्तानुक्तनिदर्शनाभ्यां स्पष्टयति– यथेति।

31.1 व्योमा॰] व्यो *ow.* MS **31.2** ॰स्तद्धर्माणो] MS^{pc}; ॰स्तधर्माणो MS^{ac} **31.3** ऽतद्धर्माणश्च] *em.*; अतधर्मणेश्च MS^{ac} **31.4** ॰योगिनमनु॰] MS^{pc}; ॰योगिनंमनु॰ MS^{ac} • ॰स्त्वाकाशा॰] स्त्वा *ow.* MS **31.4–5**शङ्कते] MS^{pc}; कशंकते MS^{ac} **31.5** धर्मो] MS^{pc}; धर्मा MS^{ac} • हि] MS^{pc}; सि MS^{ac} **31.6** ॰दिर्धर्मिणो] MS^{pc}; ॰दिधर्मिणो MS^{ac}; र्मि *ow.* MS • ॰द्धर्मिण्यनेन] *em.*; ॰द्धर्मण्यनेन MS; ने *ow.* MS **31.8** तद्वृत्तिस्तत्रा॰] *em.*; तद्वृत्तितत्रा॰ MS • तस्यैव] MS^{pc}; तस्यै MS^{ac}

संभवतः। संभवे वा न व्योमा[त्मा](दयो ऽनन्ताः स्युः, धर्माणां) तदन्तवत्त्वे धर्मिण आनन्त्यानुपपत्तेरिति। निराकरोति– **व्यतिरेके नास्त्यसंभवः।** इदमाकूतम्। सत्यं व्योमात्मादयः सर्वत्राभिन्न(प्रतीतिवन्तः। तस्मा)त्संयोग-बुद्ध्यादीनां स्वहेतुसमासोदितजन्मनां स तादृशः स्वभावभेदो यदेते उपल-म्भप्रत्ययान्तरसाकल्ये ऽपि तदुपल[ब्धौ](द्र)⟨f.85^{v}⟩व्याद्युपलब्धाविव रूपादयो न नियमेनोपल[भ्य]न्ते। किं तूपलभ्यन्ते ऽपि, इयमेवैषामव्याप्यवृत्तिताख्या-यते नैयायिकैः। ननूपलम्भ[प्र](त्ययान्तरसाकल्यशा)लिनः स्वभावभेदभाजो ऽनुपलम्भे निष्प्रत्यूहमभावबुद्धिः कारणमस्तीति ध्रुवमभावस्तस्य तत्र वक्त-व्यः। अद्धा, कैषा तर्हि वचन[व्य](क्तिरभ्युपेयते? कथं तदे)वास्ति नास्ति चेति। एषैषा वचनव्यक्तिः, यद्यथा प्रतीयते तत्तथाभ्युपेयत इति।

यस्तु शरीरात्माभिमानवान्न प्रतीतिमात्रेण परितु(ष्यति तं प्रत्याह– **अनि-र्व)चनीयत्वे वे**ति। तच्चोपपादितं प्रथमायामेव कारिकायाम्। अपि च भवन्तु विपुलदेशानामनन्तानां च परिमितदेशैः संयोगा(त्ते तद्धर्माणः, किं तु न व्यो)मवत्परिमितदेशानामपि सर्वगतत्वप्रसङ्गः, तद्व्यापित्वे ऽपि सर्वद्रव्य-संयोगविरहात्तल्लक्षणत्वाच्च विभुत्वस्य। तथापि दीर्घका[ला](दव्यतिरिक्ता मितकाला)दृष्टाः संयोगादयो ऽन्यथा ते ऽपि तद्वदेव दीर्घकालाः प्रस-ज्येरन्तेन तैर्व्यभिचारः, तदेतदाह– **अव्यतिरेके ऽपि च दीर्घकाल(स्येव**

31.9–10 Cf. *Śaṅkhapāṇi* (*206.15–16): कथमिति॥ धर्मस्य धर्मिणो ऽव्यतिरेकात्तस्या-प्यनन्तत्वमुचितमिति भावः।

31.19.–20 Cf. *Abhiprāyaprakāśikā* (206.last–207.13): यस्तु व्योमकार्यादिवदपि प्रती-तिसम्भवान्न प्रतीतिमात्रेण तुष्यति, तं प्रत्याह– अनिर्वचनीयत्वे वेति।

31.21–23 Cf. *Abhiprāyaprakāśikā* (207.12–13): न च व्यापित्वे ऽपि संयोगादेस्तद्वतां र-थादीनां सर्वगतत्वप्रसङ्गः; तेषां सर्वमूर्तद्रव्यसंयोगाभावात्, तल्लक्षणत्वाच्च सर्वगतत्वस्येति द्रष्टव्यम्।

31.9 संभवे वा] MS^{pc}; संभविना MS^{ac} **31.11** इदमा॰] MS^{pc}; इदिमा॰ MS^{ac} **31.12** स] MS^{pc}; सह MS^{ac} **31.14** ॰वैषामव्याप्य॰] MS^{pc}; ॰वैषाव्याप्य॰ MS^{ac} **31.16** ॰लम्भे] *em.*; ॰लंभो MS^{ac} **31.17** तर्हि] *em.*; तर्हित्व MS^{ac} • ॰वास्ति] MS^{pc}; ॰वासि MS^{ac} **31.19** प्रतीति॰] MS^{pc}; प्रति॰ MS^{ac} **31.20** ॰नीयत्वे वे-ति] *em.*; ॰नीयत्वेनेति MS **31.21** ॰मनन्तानां] नन्ता *ow.* MS • च परि॰] MS^{pc}; च ऽपरि॰ MS^{ac} **31.22** ॰मवत्परिमितदेशाना॰] MS^{pc}; ॰मत्परिमिदेशोना॰ MS^{ac} • ॰प्रसङ्गः] MS^{pc}; ॰प्रसङ्गाः MS^{ac} **31.23** ॰त्तल्लक्षण॰] MS^{pc}; ॰त्तक्षण॰ MS^{ac} **31.24** दृष्टाः सं॰] MS^{pc}; दृष्टा सं॰ MS^{ac} • ऽन्यथा] MS^{ac}; ऽन्यच्चा MS^{pc} **31.24–25**प्रसज्ये॰] *em.*; प्रज्ये॰ MS

मितकाल इति। **अव्यति)रेके ऽपि चेति** व्याप्तेरभ्युपगमः। यो ऽपि जनकत्वाजनकत्वलक्षणविरुद्धसंसर्गा**द्दीर्घकालमर्थं** क्रमेण कुर्वन्तं तां तामर्थक्रियां **न प्रति[प](द्यते** तं प्रत्याह– **यो ऽपीति**।) ⋯

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

अथैकस्मिन्नेव जनकशक्तिः, अन्यं प्रध्वस्तमागामिनं वैकं किं न जनयति। अथ तत्रैवैषां सामर्थ्यम्, नान्यत्र तुल्यजातीये ऽपि। कुतः? तस्यैवोत्पत्तेः, कार्यगम्यत्वाच्च सामर्थ्यस्य। तथा च न शक्तिरशक्तिश्चेति विरोधः। अभेदे ऽपि तर्हि पयसस्तिलानां दध्नो ऽनुत्पत्तौ न विरोधः। तथा हि– यस्य तावद्दध्नः पयसो जन्म न तस्य तिलेभ्यो ऽनुत्पत्तिः, येन शक्त्यशक्तिविरोधाद्भेदः स्यात्। कुतः? तिलानां पयसो ऽभेदात्। अथ दध्यन्तरस्यानुत्पत्तेर्विरोधः। तच्च न, अन्यत्राशक्तेस्तत्रैव शक्तेर्बीजादीनामिव। न हि समर्थमित्येव कारणं सर्वं तुल्यजातीयं जनयति, एकस्मादेव सर्वतुल्यजातीयकार्योत्पत्तिप्रसङ्गात्।

⋯ (**यस्य तावद्दध्नः पयसो जन्म न तस्य**) ⟨f.87r⟩ **तिलेभ्यो ऽनुत्पत्तिर्येन शक्त्यशक्तिविरोधाद्भेदः स्यात्**। ननु तिलेभ्यः प्रत्यक्षं तैलमुपलभ्यते न तु दधि, तत्कुतो [न](तयोर्विरोध इत्याक्षिपति–) **कुतः**? उत्तरमाह– **तिलानां पयसो ऽभेदात्**। पयसो जायमानो दधिभेदस्तिलेभ्यो जायत एव। **अथ** तदैव **दध्यन्तरस्या[नु](त्पत्तेर्विरोधः। तच्च न, अन्यत्रा)शक्तेः**। कार्यभेदमभ्युपेत्य वाद इति न स्मर्तव्यम्। शेषं सुगमम्।

32.2–3 Cf. *Abhiprāyaprakāśikā* (212.last–213.20): तिलेभ्यस्तैलमेव जायमानं दृश्यते, न तु दधि, तत्कथं न विरोध इत्याक्षिपति– कुत इति।

31.26–27जनकत्वाजनकत्वलक्षण°] MS^{pc}; जनकत्वलक्षण° MS^{ac} **31.27** °क्रियां न] MS^{pc}; °क्रियां MS^{ac} **32.2** °त्त्यशक्ति°] त्त्य *ow.* MS • °द्भेदः] MS^{pc}; °द्भेद MS^{ac} • तिलेभ्यः] MS^{pc}; तिलेभ्य MS^{ac} • तैलमुप°] MS^{pc}; तैलमुपलमुप° MS^{ac} **32.3** तिलानां] ति and नां *ow.* MS **32.4** ऽभेदात्] MS^{pc}; भेदात् MS^{ac} • अथ] MS^{pc}; अथा MS^{ac} **32.5** दध्यन्तर°] द *ow.* MS • °भ्युपेत्य] MS^{pc}; °भ्युपेपत्य MS^{ac}

अथ मतम्– अर्थक्रियासु भेदेन विनियोगाद्भेदमध्यवस्यामः। दध्ने हि पयो विनियुज्यते, न सिकतेति। तदप्यनैकान्तिकम्, एकत्वे ऽपि भेदेन विनियोगदर्शनात्। तदेवार्थवस्तु सहकारि-समेतं विनियुज्यते, न केवलम्। अथ मतम्– भिन्नमेव तत्, सहकारिसन्निधानोपाधिभेदात्। औपाधिकस्तर्हि प्रत्ययमात्रनि-वेशी भेदः, न परमार्थतः। तथाभूतश्च भावभेदो ह्यनुज्ञायत एव। यो ऽपि क्षणिकत्वेन भेदमाह, तस्यापि भेदस्य तुल्यत्वात्सर्वं सर्वत्र विनियुज्यते, न वा किंचित्क्वचित्, अदृष्टसामर्थ्यत्वात्। अथ कल्पनाविषयादभेदात्तत्सिद्धिः, परस्यापि तादृशाद्भेदा-दिति न विशेष इत्युक्तम्। यो ऽप्येकस्योभयं प्रतिजानीते– भेदमभेदं च, तेनैकत्रापि विरुद्धधर्मावेशमभ्युपयता दुर्लभ एव दध्नो जनकत्वाजनकत्वाभ्यां तिलपयसोर्विभाग इति।

अथैवं सति न तु कल्पनायामित्यर्थवस्तु धर्माणाम[नै](कान्तिकत्वाद्भिन्नमेवे-त्या)ह– **औपाधिकस्तर्हि प्रत्ययमात्रनिवेशी**ति। **यो ऽपि क्षणिकत्वेन** ता-त्त्विकमेव केवलाद्बीजात्सहकारिसहित[स्य बीज](स्य **भेदमाह, तस्यापि**) मते क्षणेभ्यस्तावत् कार्यकारणभावाविनिश्चयः। यश्च प्रत्यक्षानुपलम्भाद्दुर्लभ इति स्वलक्षणमात्रं स्वलक्षणमात्रस्य हे(तुमाह परिशेषा)त्, तथा च तस्यापि मते

33.1–2 Cf. *Śaṅkhapāṇi* (*213.11, 13): अथ सहकारिसन्निधानोपाधिभेदाद्भिन्नमेव वस्तु केवलात्। ···यदि सहकारिसन्निधानोपाधिभेदाद्भेद औपाधिकस्तर्हि ···

33.2–7 Cf. *Abhiprāyaprakāśikā* (214.15–19): यो ऽपीति॥ केवलाद्बीजात्सहकारिसहि-तस्य बीजस्य क्षणिकत्वेन भेदो ऽनुमन्यत इत्यर्थः–तस्यापीति॥ प्रथमं दृष्टधूमस्य वह्निं पश्यतो धूमोपलभ्ये वह्निदर्शनाभावे च धूमदर्शने सति वह्नि–धूमयोः कार्य–कारणभेदा-निश्चयो भवति, सुगतपक्षे क्षणमात्रवर्तिनि पुनस्तदसम्भवात्स्वलक्षणमात्रं स्वलक्षणमात्रस्य हेतुरिति परिशिष्यते। तथा चातिप्रसङ्ग इत्यर्थः।

33.1 अथैवं] *em.*; अथेव MS **33.2** औपाधिक°] *em.*; ओपाधिक° MS • यो ऽपि क्षणिकत्वेन] MS[pc]; सो ऽपि क्षणिणिकत्वन MS[ac] **33.2–3**तात्त्विक°] *em.*; त्तात्त्वि-क° MS **33.3** °द्बीजात्सहकरि°] MS[pc]; °द्बीजातासहवाकारि° MS **33.4** क्षणेभ्य°] भ्य *ow.* MS • यश्च] *em.*; यं च MS • °नुपलम्भाद्दुर्लभ] *em.*; °नुलम्भाद्दुर्लभ MS[pc]; °नुलम्भद्दुर्लभ MS[ac] **33.5** स्वलक्षणमात्रं] स्वल *ow.* MS

भेदस्य तुल्यत्वात्सर्वं सर्वत्र विनियुज्येत न वा किंचित्क्वचिददृष्टसामर्थ्यत्वात्। परमार्थतो भे[दो](ऽस्ति, स्वरू)⟨f.87v⟩पव्यावृत्तिमात्रकल्पितावान्तरबीजत्वाङ्कुरत्वादिजात्यापादितादभेदात्कल्पनाविषयात्तस्य सामर्थ्यस्य च विनियोगनियमस्य च (सिद्धिरिति चेत्परस्यापि तद्वि)धादेव कल्पनाविषयादेव भेदादिति न विशेष इत्युक्तम्। एवं यो ऽपि स्याद्वादी भेदैकान्तासिद्धिं मन्यमान एकस्यैव भेदम[भे](दं च प्रतिजानीते– तेनैकत्रा)पीति। सुगमम्॥ ⊗॥

तदेवम्–

एकस्यैवैष महिमा भेदसंपादनासहः॥ ११॥
वह्नेरिव यदा भावभेदकल्पस्तदा मुधा।

एकत्र क्रियाभेदोपलब्धेः, असंभवस्य चासिद्धेः, अदृष्टदर्शनस्य चाभेदबाधने सामर्थ्याभावात्, विशेषमात्रहेतुत्वात्तस्य च तत्त्वान्यत्वाभ्यामनिर्वाच्यस्य कल्पनास्पदत्वात्, अभेदादिव च तादृशात् कार्याभेदस्य भेदादपि तद्विधाद्भेदस्योपपत्तेः, विरोधस्य चानैकान्तिकत्वादसिद्धत्वाद्वा व्यवस्थायाश्च, विनियोगभेदस्य चानैकान्तिकत्वात्, अभेदादिव च कल्पिताद्भेदात्तत्सिद्धेः, भेदाभेदयोश्चैकत्र समवाये शक्त्यशक्त्योर्विनियोगाविनियोगयोश्चैकसमवायसंभवादेकस्यैवैष को ऽप्यचिन्त्यः सामर्थ्यातिशयो निखिलभेदप्रपञ्चसंपादनायै प्रभुः पावकस्येव पाकप्लोषा-

---

33.7–11 Cf. *Abhiprāyaprakāśikā* (214.19–23): काल्पनिकसन्धानोपाधौ सामर्थ्यग्रहः, विनियोगभेदश्च सिध्यतीति शङ्कते– अथेति॥ तर्हि सिद्धान्तिनो ऽपि कल्पितभेदाद्विनियोगभेदादिः सिध्यतीत्याह– परस्यापीति॥ भेदाभेदौ द्वावपि परमार्थौ इति यो मन्यते, तं प्रत्याह– यो ऽपीति॥

33.6 तुल्य॰] ल्य *ow.* MS • ॰युज्येत] *em.*; ॰युज्येत् MS • किंचित्क्व॰] किं *ow.* MS **33.7** ॰व्यावृत्ति॰] MS[pc]; ॰व्यवृत्ति॰ MS[ac] **33.8** ॰दभेदात्कल्पना॰] MS[pc]; ॰दभदात्कल्प॰ MS[ac] • सामर्थ्यस्य] *em.*; सामर्थस्य MS[ac] **33.10** भेदैकान्ता॰] भे *ow.* MS **33.11** भेदमभे॰] MS[pc]; भेदमभेदमभे॰ MS

दिप्रविभागनिमित्तं यदोपपद्यते तदा भेदकल्पनमकारणम्, एकस्मादपि तत्सिद्धेः– इति पूर्वोपसंहारः। तदेतदृचाभ्यनूक्तम्– 'एतावानस्य महिमा' इति। एतत्परिमाणमस्य सामर्थ्यम्– यदेको ऽपि 'सहस्रशीर्षा' इति 'यद्भूतं यच्च भव्यम्' इति। पूर्वग्रर्द्धयनिर्दिष्टविविधविरुद्धाभिमतधर्मकार्यव्यवहाराश्रयः कथमिति। 'अतः' प्रत्यक्षाभिमतात्, 'पुरुष एवेदं सर्वम्' इति वादृष्टनिर्दिष्टात्; 'उतामृतत्वस्य' इति वा देवमनुष्यलोकभेदेन प्रपञ्चादेकैकस्मात्समस्ताच्च वृद्धतरः पुरुषः। तेनास्मिन् परिमितानां विरुद्धाभिमतानामप्यनन्ते न समावेशो न युज्यते। तदेव ज्यायस्त्वं दर्शयति– 'पादो ऽस्य विश्वा' इति। कृत्स्नो ऽपि तावद्भूतप्रपञ्चो ऽस्य कनीयान् भाग इति, किं पुनः प्रत्येकम्। तथा हि– 'त्रिपात्' इवापरिमितमनन्तं मरणादिभूतप्रपञ्चधर्मशून्यं रूपं 'दिवि' प्रद्योतावस्थायां वर्तते, प्रमोदावस्थायां वा, सूर्यमण्डले, द्युस्थाने वा। तत्र हि तदुपास्यम्। तद्धि तस्योपलब्धिस्थानमिति तत्रेत्युच्यते। …

तदेतत्पूर्वोक्तं सहेतुकं संक्षिप्योपसंहरति– **तदेवमेकस्यैवैष महिमेति**। विरुद्धाविरुद्धाभिमता ये [ध](र्मादिविषया व्यवहारास्तदा)श्रयः पुरुषः। **अतः**

34.15–25 *Ṛgveda X.90.1–3:*
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। सभूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥
एतावानस्य महिमातो ज्यायांश्च पूरुषः। पादो ऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥

34.1 Cf. *Abhiprāyaprakāśikā* (214.24): पूर्वोक्तमर्थं सङ्क्षेपेण हेत्वनुवादपूर्वमुपसंहरति– तदेवमिति॥
34.2–4 Cf. *Abhiprāyaprakāśikā* (215.last–216.22,24–25, last): विरुद्धाः, अभिमता ये धर्मविषयाः कार्यविषयाश्च व्यवहाराः तदाश्रयः पुरुषः। …अभिमतादिति प्रत्यक्षत्वस्यावास्तवत्वं (प्रत्यक्षत्वमवा° *edn*) प्रपञ्चस्य दर्शयति। …वृद्धतर इति॥ परमो महाननन्त इति यावत्।

34.1 संक्षिप्यो°] क्षि *ow.* MS

प्रपञ्चात् **प्रत्यक्षाभिमतादिति** न वास्तवमस्य प्रत्यक्षत्वमपि त्वभिमानत इत्यर्थः। **वृद्धतरः** पर[मो](महाननन्त इति। **प्रपञ्चो ऽस्य भा**)**ग** इव तदपेक्षया ऽल्पकामत्वात्, न तु भागो निर्भागत्वात्पुरुषस्य। पुरुषपादस्य विनियुक्तत्वात् **त्रिपात्**। परिशिष्यते तस्या(परिमितत्वं धर्मशून्यत्वञ्च। अत) आह– **त्रिपादिवेति**। तच्च पादादधिकमनन्तमिवेत्याह– **अनन्तमिति**। **दिवीति**। तदुपासनायाः स्थानं निर्दिशति न तु (तदधिष्ठानम्।) ···

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

ये तु मन्यन्ते– सत्यमेतत्, न प्रत्यक्षं भेदाधिगमायालम्। इतरेतराभावांशो हि भावानां भेदः, न सो ऽक्षगोचरः। 'भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि'। तथा च न लिङ्गगम्यो ऽपि, अदृष्टसंगतित्वात्। अर्थापत्तिरपि कार्यव्यवस्थाहेतुका स्यात्। सा असिद्धे भेदे व्यवस्थाया एवानुपपत्तेस्तत्रायुक्ता। तस्मात्सदुपलम्भहेतुभ्यः प्रमाणान्तरमेवाभावायोपासनीयम्। विधायकाद्वा प्रमाणान्तरमेव व्यवच्छेदकमभावाख्यम्। तन्निबन्धना हि भावानामसंकीर्णता। यदवोचन्– 'वस्त्वसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रया।' इति। तान् प्रत्युच्यते–

अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधनः॥ १३॥
नास्मिन्नयं नायमयमिति भेदाद्विना न धीः।

35.5 व्यवस्थाया] C; कार्यव्यवस्थाया *edn* **35.8** °मसंकीर्णता] °मसंकीर्णस्वभावता *edn*

35.2–3 *Ślokavārttika* Abhāvapariccheda 18cd: भावांशेनैव ··· योग्यत्वादिन्द्रियस्य हि।
35.8–9 *Ślokavārttika* Abhāvapariccheda 2ab: वस्त्वसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रया।

34.3 °मानत] MS^{pc}; °मानतः MS^{ac} **34.4** तदपेक्षया] MS^{pc}; वदपेक्षया MS^{ac} **34.5** ऽल्पकाम°] MS^{pc}, ऽल्पकम° MS^{ac} **34.6** °त्वात् त्रि°] MS^{pc}; °त्वा त्रि° MS^{ac} **34.7** त्रिपादिवेति] *em.*; निपादितेति MS **34.8** निर्दिशति] *em.*; निर्दिशतु MS

… (विषयेषु संयुक्तसम) ⟨f.90r⟩ वेततदात्मत्वनिषेध्येषु तत्तच्छायामनुविधीयमानः [संयुक्त इव स]मवेत इव तदात्मेव तस्य तस्याभावो ऽवभासते। न त्वस्यास्ति कश्चिद्भा(वसंबन्ध इति तदात्म)त्वासिद्धेरस्तीन्द्रियाणामभावेन विषयविषयिभावः सम्बन्ध इति। चेतनप्रतियोगिनिषेधाधिकरणाधिगमदृश्यानुपलम्भमात्राद्[द्वि](दात्तस्य ज्ञानम्, विष)यभावकल्पनायोगाद्व्यभिचाराच्च। यथाहुः –

> स्वरूपमात्रं दृष्टं च वेश्माद्यर्थं स्मरन् बहिः।
> पृष्टो ऽभावं गृहस्थादेस्तदैव प्रति[पद्य](ते॥ इति।

को ऽपि प्रतिवे)शी वेश्ममात्रादेव तत्र चैत्राद्यभावमज्ञासीत पृष्टस्तु प्रणिधानप्रबोधितसंस्कारः स्मृत्वा कथयति भाव नासीत्तत्र चैत्र इति, सांप्रतं [प्र](तियोगिस्मरणस्या)भावज्ञानकारणत्वात्तदभावे तदनुत्पत्तेः। इतरथा सन्ति भूतले ऽनुभूयमाने सहस्रमभावा दृश्यानां प्रतियोगिसहस्राणामिति तत्त[द्गो](चरतया सर्वव्यव)हारा लौकिकानामप्रत्यूहं प्रवर्तेरन्। न च निशान्तावसानसमये तदन्यतामात्रेण सकलप्रतियोगिस्मरणादसिद्धं चैत्राद्यस्मरणमि[ति](चैत्राभावस्तत्प्रतियोगिस्म)रणासिद्धेः। अपि चान्यतापि साधारणी, तत्स्मरणे ऽन्यं नासीदिति स्यान्न तु चैत्रो नासीदिति। तस्मादसत्यपीन्द्रियव्यापारे यथोक्तल(ब्धलिङ्गस्मरणाद्भव) ⟨f.90v⟩ न्ती तदभावे सत्यपीन्द्रियव्यापारे वा भवन्ती नास्तीति धीरप्रत्यक्षमिति सिद्धम्। **तथा चाप्रत्यक्षत्वे सदातने**

35.6–7 *Ślokavārttika* Abhāvapariccheda 28:
स्वरूपमात्रं दृष्ट्वापि पश्चात्किञ्चित्स्मरन्नपि। तत्रान्यनास्तितां पृष्टस्तदैव प्रतिपद्यते॥

35.11–13 Cf. *Abhiprāyaprakāśikā* (222.25–223.20): न च चत्वरे निर्विकल्पेनानुभूतो गजाभावः स्मर्यते। सम्प्रतीति साम्प्रतं प्रतियोगिस्मरणस्याभावकारणत्वात्तदभावे तदनुपपत्तेः, अन्यथा युगपदनन्ताभावानुभवाभ्युपगमप्रसङ्गादिति भावः।

35.2 तदात्मेव] *em.*; तदात्मैव MS • तस्या°] MS[pc]; भीतस्या° MS[ac] • °वभासते] *em.*; °चभासते MS **35.5** °भिचाराच्च] MS[pc]; °भिचाच्चराच्च MS[ac] **35.7** दृष्टं च] *em.*; च दृष्टं च MS[ac] • °द्यर्थं] *em.*; °द्यथे MS • बहिः] MS[pc]; बाहिः MS[ac] **35.8** पृष्टो] MS[ac]; पृष्टा MS[pc] • °स्तदैव] स्त *ow.* MS **35.10** °नप्रबोधित°] MS[pc]; °नंप्रबोधित° MS[ac] **35.11** °भावे तदनु°] MS[pc]; °भावे त्तदनु° MS[ac] **35.12** सहस्र°] MS[pc]; सहस्रा° MS[ac] **35.16** नासीदिति] MS[pc]; नासीतिदिति MS[ac] • °सत्यपी°] त्य *ow.* MS **35.17** °व्यापारे यथोक्त°] MS[pc]; °व्यापार यथाक्त° MS[ac]

न लिङ्गगम्यो ऽप्यभावः, अदृष्टसंगतित्वात्। (अर्थापत्तिरपि यद्य)पि न सम्बन्धदर्शनमपेक्षते तथापि **कार्यव्यवस्थाहेतुका स्यात्। सा चासिद्धे भेदे व्यवस्थाया एवानुपपत्तेरसिद्धेस्तत्रायुक्ता**। स्वाभिमतमुपसंह[र]ति – मी[मां]सकैः सद्उपलम्भहेतुभ्यः) प्रमाणान्तरमेवाभावायोपासनीयम्। यदा संवेदनजनिका सामग्री प्रमाणम्, यथाहुः –

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते।
सात्मन[स्त्वि](ति।

तदात्मनो ऽपरिणामः) स्वभावसंवेदनं फलमिष्यते। संवेदनप्रामाण्यपक्षं पक्षीकृत्याह – **विधायकाद्वा प्रमाणान्तरमेव व्यवच्छेदकमभावाख्यम्**, यथाहुः – 'कार्यादीनामभावः कः' इति। किंस्वभाव इत्यर्थः। अथास्मिन्पक्षे किं फलमित्यत आह – **तन्निबन्धना हि भावानामसंकीर्णतेति**। अनेन संवेदनस्य प्र[मा]णस्य [फ](लं स्वभावसंवेदनं ज्ञाननि)बन्धनं वा व्यवहारं सूचयति न पुनरसंकरमर्थरूपम्, तस्य ज्ञाननिबन्धनायोगात्। **यदवोचन्** वृद्धाः –

वस्त्वसंकरसिद्धिश्च तत्प्रामाण्य(समाश्रया। इति।

तान् प्रत्युच्य)ते – अन्योन्यसंश्रयाद्भेद इति।

35.24–25 *Ślokavārttika* Abhāvapariccheda 11:
प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते। सात्मनो ऽपरिणामो वा विज्ञानं वान्यवस्तुनि॥
35.28 *Ślokavārttika* Abhāvapariccheda 8cd:
कार्यादीनामभावः को यो ऽभावः कारणादितः।
35.32 *Ślokavārttika* Abhāvapariccheda 2ab: वस्त्वसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रया।

35.26–31 Cf. *Abhiprāyaprakāśikā* (223.23–26): संवेदनप्रमाणमङ्गीकृत्याह – विधायकाद्वेति॥ अस्मिन्पक्षे किं फलमिति? अत आह – तन्निबन्धनेति॥ असङ्कीर्णस्वभावतेति = तादृग्व्यवहारो लक्ष्यते; वस्तुस्वभावस्य ज्ञाननिबन्धनत्वायोगादिति द्रष्टव्यम्॥

35.19 लिङ्गगम्यो] MS^{pc}; लिंगम्यो MS^{ac} • °संगतित्वात्] *em.*; °संगितत्वात् MS **35.20** स्यात्। सा चा°] MS^{pc}; स्यात्स चा° MS^{ac}; चा *ow.* MS **35.21** व्यवस्थाया] स्था *ow.* MS • एवानुपपत्ते°] *em.*; एवानुपत्ते° MS; ए *ow.* MS • °सिद्धेस्तत्रा°] MS^{pc}; °सिद्धेतत्रा° MS^{ac} • °संहरति] MS^{pc}; °संहति MS^{ac} **35.26** फलमिष्यते] *em.*; फलंमिष्यते MS **35.27** °कृत्याह] MS^{pc}; °कृतमित्याह MS^{ac} • विधायकाद्वा] धा *ow.* MS **35.29** °संकीर्णतेति] *em.*; °सीकीर्णतेति MS **35.31** °रसंकर°] *em.*; °रस्कार° MS • यदवोचन्] *em.*; यदचोवन MS

न खलु यद्व्यवच्छिद्यते, यतश्च व्यवच्छिद्यते, तयोरप्रतिपत्तौ व्यवच्छेदगतिः। नानपेक्षितविषयनिषेध्यो निषेधो ऽस्ति। सन् वा शून्यतामापादयेत्, न भेदमित्युक्तम्। तेषामपि वचः –

‘गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायते ऽक्षानपेक्षया॥’

तयोश्च प्रतिपत्तिर्यदि नासंकीर्णस्वभावयोः, अपि तु वस्तुमात्रत्वेन व्यवच्छेद्यव्यवच्छेदावधिविभागाभावात्। न निषेधसंभवो ऽर्थमात्रे ह्यविभागे। विषयत्वेनापेक्षिते न निषेध्यम्। निषेध्यत्वेनापेक्षिते न विषयविशेषः। तत्रात्यन्ताय निषेधः स्यात्। स च न सिद्धत्वेनासिद्धत्वेन वा युज्यत इत्युक्तम्। कस्यचित्तावत्कुतश्चिद्भेदप्रतिपत्तौ सर्वस्य सर्वतो भेदगतिः स्यात्, अविशेषात्। तस्मादनेनासंकीर्णस्वभावेन भिन्नावेव प्रतिपद्य विषयनिषेध्यौ ‘नेदमिह’ ‘नायमयम्’ इति व्यवच्छेदः प्रतिपत्तव्यः, संभवान्नियमाच्च। न चान्यथा प्रतियोगित्वम्, सामान्योपलब्धौ च स्थाणौ पुरुषस्याभावप्रतिपत्त्यभावात्। तथा च सिद्धविषयनिषेध्याङ्गीकरणेन व्यवच्छेदमात्रविधायिन्यभावप्रतिपत्तिः प्रत्यात्ममुपलक्ष्यते। तथा चेतरेतराश्रयत्वम्– असंकरपूर्वमभावज्ञानम्, ततश्चासंकरसिद्धिरिति।

ननु च भवतु प्रतियोगिस्मरणं निषेधाधिकरणग्रहणं रूपतः, प[श्चात्तु] तद्धेतुकः तयोर्भेदो [गृ](ह्येत। नेत्याह– **तयो**)⟨f.91^{r}⟩**श्चेति**। अवध्यवधिमद्भावग्रहो

36.10–11 कस्यचित्तावत्कुतश्चिद्] कस्यचित्कुतश्चिद् C; कस्यचित्कुतश्चिच्च *edn* **36.15** पुरुषस्याभाव॰] A; पुरुषाभाव॰ *edn*

36.6 *Ślokavārttika* Abhāvapariccheda 27: गृहीत्वा ··· जायते ऽक्षानपेक्षया॥

36.1 रूपतः] रू and तः *ow.* MS **36.2** ॰श्चेति] MS^{pc}; ॰श्चे MS^{ac}

हि भेदाधिगमाधीनोत्पत्तिर्न्नासति तस्मिन् भवितुमर्हति। तथा हि वस्तुमात्रं चेत्, निषेधविषयत्वेना[पे](क्षितत्वमेव तत्र नास्ती)ति कथं निषेधः? न हि स्वस्थस्वान्तो भूतलमेव भूतले निषेधति, **निषेध्यत्वेनापेक्षिते** ऽपि न निषेधः, न हि कश्चिद्घटं घटे निषेधति। तत्राह(– **तत्र** निषेध्यत्वेनापेक्षित)त्वे **सत्यत्यन्ताय निषेधः स्यात्**। भवतु का नो हानिरित्यत आह– **स च न सिद्धत्वेनासिद्धत्वेन वा युज्यत इत्युक्तम्**। न 'लब्धरूपे क्वचित्किंचि[द्' इत्य](त्र सिद्धे विषये प्रसक्तस्यैव नि)षेधः। प्रसक्तस्य प्रतिषेधः। अत्यन्तासतश्च न प्रसक्तिर्दैवनिषिद्धत्वादिति **सिद्धत्वेन** न कल्पते प्रतिषेधः। यस्तु मन्यते ज्ञातमपि हि [ज्ञे](यं परीक्षणीयं मन्यन्ते परीक्ष)का इति तं प्रत्युक्तम्– **असिद्धत्वेने**ति। निषेध्यविषयनिष्ठो निषेधस्तदभावे रूपतः प्रतीतितश्चासिद्ध इत्यर्थः।

यदि वागृहीतभेदं किं(वृत्तमात्रपरामृष्ट)मवध्यवधिमद्भावेन गृह्येत तत्रापि शक्यं वक्तुम्– किंवृत्तमपि हि नि[षे](ध्यत्वेन विषयः) कुतश्चित्कस्यचिदिति। तथा च तस्यापि भेदग्रहपुरस्सरत्वमिति। तथाप्येतदुक्तप्रायमित्युपेक्ष्यातिप्रसङ्गमापादयति– **कस्यचित्तावत्कुत(श्चिदिति** भा)⟨f.91^{v}⟩वान्तरादिव स्वभावादपि

36.8–9 *Brahmasiddhi* I.5:
लब्धरूपे क्वचित्किंचित्तादृगेव निषिध्यते। विधानमन्तरेणातो न निषेधस्य संभवः॥

36.8–10 Cf. *Abhiprāyaprakāśikā* (224.20–22): स चेति॥ 'लब्धरूप' इत्यत्र सिद्धे विषये प्रसक्तस्यैव निषेधः, अत्यन्तासतश्च न प्रसक्तिः; दैवनिषिद्धत्वात्, सिद्धत्वे च नात्यन्ताय प्रतिषेध इत्युक्तमित्यर्थः।

36.14–18 Cf. *Abhiprāyaprakāśikā* (224.22–25): यद्यगृहीतभेदं किमेतदित्यगृह्यमाणविशेषमवध्यवधिमद्भावेन गृह्येत, तत्रापि कस्यचित्कुतश्चिदिति भावान्तरादिव स्वभावादपि भिद्येतेत्यतिप्रसङ्गार्थः। ततो तदपक्ष एव परिशिष्यत इत्युपसंहारव्याजेनाह– तस्मादिति॥

36.3 हि भेदाधिगमाधीनो॰] MS^{pc}; हि दभेदाधिगमाधिीनो॰ MS^{ac} **36.8** हानि॰] MS^{pc}; हाति॰ MS^{ac} • आह] MS^{pc}; अह MS **36.8** ॰सिद्धत्वेन वा] MS^{pc}; ॰सिद्धेत्वेन वा MS^{ac} • क्वचित्किं॰] *em.*; क्षवित्किं॰ MS **36.9** प्रतिषेधः] *em.*; प्रतिषेध्यः MS **36.14** यदि वा] MS^{pc}; यदि वाभ MS^{ac} • ॰मवध्यवधि॰] *em.*; ॰मध्यवधि॰ MS • ॰गृहीतभेदं] ॰भगृहीतभेदं MS^{ac} • गृह्येत] MS^{pc}; गृह्येते MS^{ac} **36.15** किंवृत्तमपि हि] *em.*; किंवृत्तमात्रपरामृष्टमध्यवधिसद्भावेन गृह्येते तत्रापि सक्य वक्तुं किंवृत्तमपि हि MS (Ditto) **36.16** ॰दुक्तप्राय॰] *em.*; ॰दुक्तंप्राय॰ MS • ॰पेक्ष्यातिप्रसङ्ग॰] MS^{pc}; ॰पेक्षप्रसङ्ग॰ MS^{ac} **36.17** कस्यचित्तावत्कुत॰] MS^{pc}; कस्यचिताकुत॰ MS^{ac} • ॰न्तरादिव] *em.*; ॰न्तरादि MS

भिद्येतेत्यतिप्रसङ्गः। उपसंहरति– **तस्मादिति**। कुतः? **संभवात्**। अन्यथा त्वसम्भव इत्याह– **नियमाच्च**। तदे(तत्प्रतियोगित्वं नान्यथा सिध्य)ति। अपि चारोहपरीणाहवद्वस्तु सामान्यमात्रोपलब्धौ वस्तुतः **स्थाणौ पुरुषस्याभावप्रतिपत्त्यभावात्**। न केवलमुपपत्तितो (ऽपि तु व्यवहारो ऽपि लौकि)कानामेवमेवेत्याह– **तथा चेति**। प्रकृतं दूषणमुपसंहरति– **तथा चेति**। एवं तावद्भेदविज्ञानपरामर्शेनेतरेतराश्रयत्वं प्रसञ्जितं (स्यात्)।

अपि च न प्रमाणानुत्पादमात्रादभावज्ञानम्, सुषुप्तादावनुत्पत्तेः। तस्मात्सत्सु प्रमाणकारणेषु प्रमाणानुत्पादो ऽभावज्ञानहेतुरिष्टः। न च तस्य स्वरूपभेदः कश्चित्, येन सामर्थ्यातिशयाच्चक्षुरादिवद्बोधकः, किं तु नान्तरीयकत्वात्। नान्तरेण प्रमेयाभावं सत्सु प्रमाणहेतुषु प्रमाणानुत्पादः। असत्सु तु सत्यपि प्रमेये तदभावात्स्यादिति। तथा च लिङ्गवज्ज्ञानापेक्षः प्रतिपत्तेर्जनकः, स च यदि वस्त्वन्तरज्ञानम्, नासिद्धे वस्तुभेदे सिध्यति। ज्ञेयभेदानुमेयो हि ज्ञेयानुमेयानां ज्ञानानां भेदः। तथा च वस्तुभेदसिद्धिपूर्विकैवाभावाद्भेदावगतिरितीतरेतराश्रयत्वम्। अथात्मनो ऽपरिणामः। न स स्तिमितावस्था, सर्वाप्रतिपत्तौ कस्यचिदभावस्यानवगतेः। तस्मात्सत्यपि वस्त्वन्तरज्ञानरूपपरिणामे तज्ज्ञानरूपपरिणामाभावो ऽभावज्ञानहेतुः। न चैष विशेषः प्राग्वस्तुभेदसिद्धेः सिध्यतीति तदेवेतरेतराश्रयत्वम्। ये त्वाहुः– दर्शनादेव भावानां भेदः सिध्यति। तथा हि– निर्विकल्पस्य प्रत्यक्षस्य सामान्यविषयत्वमपाकुर्वतोक्तम्– ‘तदयुक्तं प्रतिद्रव्यं भिन्नरूपोपलम्भनाद्’ इति। यस्तु संयोगात्स-

---

36.15–16 *Ślokavārttika* Pratyakṣasūtra 117ab: तदयुक्तं प्रतिद्रव्यं भिन्नरूपोपलम्भनात्।

36.18 °संहरति] MS^{pc}; °संहरतिति MS^{ac} **36.21** °मुपपत्तितो] MS^{pc}; °मुपपत्तितुतो (तु without head-mark) MS^{ac} **36.22** °नामेव°] *em.*; °नांमेव° MS^{ac} • चेति] *em.*; वेति MS **36.23** °मर्शेनेतरेतरा°] MS^{pc}; °मर्शनेतरतरा° MS^{ac}

मवायाद्वा संकरः, सो ऽभावाख्येन प्रमाणेनापनीयत इति। ते प्रागेव प्रत्युक्ताः।

अथाभावज्ञानसा)मग्रीपरामर्शेनापि तमेव दोषं प्रसञ्जते– **अपि चेति**। न तावदविज्ञातः सत्तामात्रेण केवलः **प्रमाणानुत्पादो** लोचनादिव**दभाव**(**ज्ञान-हेतुरिष्टः**, सुषुप्ता)दौ व्यभिचारात्। न चोपालम्भकारणसमवधानं प्रमाणानुत्पादे कञ्चिदतिशयमाधत्ते। न च तद्वतः कार्योपलब्धेरितरथा तदभावाद(नुपलब्धिमात्रात्) प्रमाणानुत्पादे ज्ञानसामग्रीजन्यः कश्चिदुपकारः कल्पित इति सांप्रतम्। तस्य तादृशो दृष्टवस्त्वभावाविनाभावेनैव तद्बोधकत्वोप[दे](शः, अदृष्टसामर्थ्यक)ल्पनायोगात्। न खलु दृष्टया कृशानुनान्तरीयकतया कृशानुं बोधयन्धूमस्तत्रादृष्टसामर्थ्यकल्पनामर्हति। अत ए[व] ⟨f.92^{r}⟩ लौकिकाः कुतो नास्तीह चैत्र इत्यनुयुक्ताः प्रयत्नेनानुमानादनुपलब्धेरिति प्रत्याहुरनुमित इव धूमकेतने धूमादिति। न[नु](कुतो ज्ञायते लिङ्गमिति पृ)ष्टाः प्रत्याहुर्लोचनादिति। तदमी नूनमुक्तलक्षणप्रमाणानुत्पादज्ञानपुरस्सरमेव प्रतिपद्यन्ते प्रमेयाभावं धूमाधिगमपुर(स्सरमिव वह्निज्ञानमिती)दमुक्तम्– **तथा च लिङ्गवज्ज्ञानापेक्षः प्रतिपत्तेर्जनक** इति। **स च यदि वस्त्वन्तरस्य** गवादे**र्ज्ञानम**व्यवस्थाभियास्थीयेत, ततो **ऽसिद्धे व**[स्तु](**भेदे न** वस्त्वन्तरज्ञानं) **सिध्यति**। नन्वसिद्धे वस्तुभेदे मा भून्नाम वस्त्वन्तरज्ञानम्, ज्ञेयमेतदिति तु कस्मान्न सिध्यति? तेन चेह प्रयोजनं न वस्त्वन्तरेणेत्यत आह– **ज्ञे**[**य**]**-भेदानुमेय** इति।) भवत्वेतत्ततः किमित्याह– **तथा चेति**। **अथ न वस्त्वन्त-**

37.2 केवलः प्रमाणानुत्पादो] MS^{pc}; वेकलः प्रमाणानुत्पादि MS^{ac} **37.3** चोपालम्भ°] *em.*; चोलम्भ° MS **37.4** °रितरथा] *em.*; °रितथा MS **37.5** °नुत्पादे] नु *ow.* MS • कल्पित] MS^{ac}; कल्पि MS^{pc} **37.6** °विनाभावेनैव] MS^{pc}; °विनाभावेनेव MS^{ac} **37.7** खलु] MS^{pc}; खदृलु MS^{ac} **37.9** चैत्र] *conj.*; स्नेन MS • प्रयत्नेनानुमाना°] *conj.*; प्रयत्नेनानुसारा° MS **37.10** °नुमित] MS^{pc}; °नुमि MS^{ac} **37.12** प्रतिपद्यन्ते] MS^{pc}; प्रतिद्यन्ते MS^{ac} • °धिगमपुर°] *em.*; °धिगमः पुर° MS **37.13** °वज्ज्ञानापेक्षः] *em.*; °वज्ञानापेक्षः MS^{pc}; °वज्ञानापेक्षा MS^{ac}; वज्ञाना *ow.* MS **37.14** °व्यवस्थाभिया°] *em.*; °व्यस्थाभिया° MS; भि *ow.* MS **37.15** नन्वसिद्धे] न्व *ow.* MS • मा भून्नाम] *conj.*; मा नाम MS • °ज्ञानम्, ज्ञेयमेतदिति] *conj.*; °ज्ञानमेतदिति MS **37.17** भवत्वेतत्ततः] *em.*; भवत्वेत्वत्ततः MS; भ *ow.* MS • किमित्याह] MS^{pc}; किकिमित्याह MS^{ac} • अथ न वस्त्वन्त°] MS^{pc}; अथ न न वस्त्वन्त° MS^{ac}; स्त्व *ow.* MS

रज्ञानमपि **त्वात्मनो ऽपरिणामः**। धर्मी खलु धर्मरूपेण परिणमते, धर्माणां धर्मिभ्यो [ऽत्य](न्ताभेदो ऽपरिणामः।) ज्ञानं चात्मनो धर्मिणो धर्म इति तदुत्पाद आत्मनः परिणामस्तदभाव इत्यर्थः। स च सर्वविज्ञानोपसंहारो वा कस्यचिद्वा विज्ञानस्य? तत्र प्रथ[मं] (दूषयति– **न स**) ⟨f.92^{v}⟩ **स्तिमितेति**। कुतः? **सर्वेति**। न हि सुषुप्तः पुरुषः कस्यचिदप्यभावं विजानाति। तस्माद् द्वितीयः कल्पःपरिशिष्यत इत्याह– **तस्मादिति**। तत्र चोपलम्भाभावो ऽप्यभावरूपत्वादनुपलम्भान्तरेणाधिगन्तव्यः, सो ऽप्येवमित्यनवस्था जागर्ति। तामतिनिरूढतयोपेक्ष्य प्रकृतमितरेतराश्रयमिहापि प्र(सञ्जितमित्याह–) **ये तु वार्त्तिककारतनयेषु केचित्पश्यन्ति दर्शनादेव भावानां भेदः सिध्यति।** न खल्वभावो नाम भावाद्भावान्तरमिव व्यतिरिक्तश्च [व](स्तुनो ऽन्वयव्यति)रेकाभ्यां भावान्निकृष्यते। तथा हि कुम्भरूपमेवारुणिम्नो भवत्यभावः, तस्यारुणस्यापि कदाचिदुपलब्धेः, कुम्भरूपनिश्चये ऽप्य[त्रा](रुणाभावाज्ञानसं)देहविपर्यासदर्शनाच्च। एवं न भूभाग एव कुम्भाभावः, तस्य तत्सहितादेव कदाचिदुपलम्भात्, भूभागरूपावधारणे ऽपि म(णिकं दृष्टवतः कु)म्भाभावाज्ञानसंदेहविपर्यासदर्शनाच्च। नन्वयं परस्पराभावो भावानां शक्यो निर्धारयितुं भावरूपत्वात्। न जातु गन्धा(दयः पृथक्कदाचित्) ⟨f.93^{r}⟩ क्वचित्केनचिदुपलब्धाः। न चैषां रूपग्रहे तदन्यव्यावृत्तिः। न प्रतिपद्यन्ते तत्र,

37.20–26 Cf. *Abhiprāyaprakāśikā* (226.16–21): अथापीति॥ किं सर्वज्ञानपरिणामानामुपसंहारः? किं वा कस्यचित्? नाद्य इत्याह– न स स्तिमितेति॥ ततो द्वितीयः कल्पः परिशिष्यत इत्याह– तस्मादिति॥ तत्र यद्यपि ज्ञानाभावो ऽप्यभावरूपत्वादनुपलब्ध्यन्तरगम्यः, तदप्येवमित्यनवस्था जागर्ति; तथापि तामुपेक्ष्य (तावु° *edn*) प्रकृतमितरेतराश्रयत्वमित्याह– न चैष इति॥ भट्टमतानुसारिणः केचित्प्रत्यक्षेणैव भेदग्रहमिच्छन्ति, तान्निराकर्तुम्– ये त्विति॥

37.18 धर्मी खलु] MS^{pc}; धर्म्मी खखलु MS^{ac}; धर्म्मी *ow.* MS • परिणमते] MS^{pc}; मते MS^{ac} **37.19** इति] MS^{pc}; ति MS^{ac} **37.20** सर्वविज्ञानोप°] MS^{pc}; सर्वविज्ञोप° MS^{ac} **37.21** स्तिमितेति] स्ति *ow.* MS **37.22** कुतः? सर्वेति] MS^{pc}; कुर्व्वतः सर्वेत्रति MS^{ac} • विजानाति] MS^{pc}; विनाति MS^{ac} **37.24** °णाधिगन्तव्यः] MS^{pc}; °णाधिगं MS^{ac} **37.25** तामति°] MS^{pc}; तोमति° MS^{ac} • प्रकृतमितरे°] MS^{pc}; मितरे° MS^{ac} **37.26** भावानां भेदः] MS^{pc}; भावनां भेदइः MS^{ac} **37.27** खल्वभावो] ल्व *ow.* MS **37.30** कुम्भाभावः] MS^{pc}; कुम्भाभुवः MS^{ac} **37.31** °लम्भात्] म्भा *ow.* MS • °रणे ऽपि] पि *ow.* MS **37.32** °म्भाभावज्ञान°] MS^{pc}; °म्भावभावज्ञान° MS^{ac} • परस्पराभावो] *em.*; परस्पराभावा MS **37.34** °लब्धाः] ल *ow.* MS • °ग्रहे] हे *ow.* MS

संदिहते विपर्यन्ति वा लौकिकाः स्थाणुर्वा [पुरु](षो वेति। संदिग्धात्म)नोः स्थाणुपुरुषयोस्तादात्म्याभावे ऽपि विशेरते इति चेत्? न, तत्र द्वयोरनवधारणात्, अवधृतस्य च द्रव्यस्य तदाश्रयस्य तदात्म[त्वा](द्भिन्नरूपोपलम्भ)नात्। तदन्यव्यवच्छेदो न पुनस्तद्धर्मो न च भावरूपग्रहे तदन्यग्रहापेक्षा, तस्येन्द्रियसन्निहितविप्रबलेनोत्पत्तेः। तत्कुतो ऽ[स्य](सामान्यविषयत्वं) येन परस्पराश्रयत्वं प्रसज्येतेति भावः। अत्रैव वृद्धसम्मतिमाहुः– **तथा हि निर्विकल्पस्येति**। तत्किं नि(र्विषयमेव प्रमाण)मभावाख्यमित्यत आह– **यस्तु संयोगादिति**। वस्तुव्यतिरिक्ताभावविषयं यत्तन्न वस्तुविषयम्। अन्वयव्यतिरेकाभ्यां च तस्य भाव(स्य **संकरो ऽपनीय**)त इति भावः। अत्रोत्तरमाह– **ते प्रागेवेति**।

अयमभिसन्धिः। विभिन्नावभासा बुद्धिर्बोध्यानां भेदं व्यवस्थापयति। न त्वन्वय[व्य](तिरेकाभ्यां) नीलधिय इव पीतादिप्रत्ययात्पीतादिव्यवच्छेदधियो भिन्नः प्रतिभासः। तथा हि नानाव्यवच्छेद्याधिकरणो व्यवच्छेदक[इ](व) ⟨f.93^{v}⟩ प्रतिभासते। स चेद्व्यवच्छेद्ये नैकः स्यात्, तत्रोक्तमुत्तरम्–

न भेदो वस्तुनो रूपं तदभावप्रसङ्गतः। इति।

ये तु– विधायकप्रत्यक्षपुरःसरं प्रत्यक्षान्तरमेव वस्तुग्रहणप्रतियोगिस्मरणेतिकर्तव्यतानुगृहीताक्षप्रतिलब्धजन्म व्यवच्छेदकं मन्यन्ते। यथैव सविकल्पस्य वस्तुग्रहणस्य पश्चाज्जन्म, शब्द-

---

38.1 ये तु] ये ऽपि *edn*

37.49 *Brahmasiddhi* I.8ab: न भेदो वस्तुनो रूपं तदभावप्रसङ्गतः॥

37.40–42 Cf. *Abhiprāyaprakāśikā* (226.22–23): अत्रैव वृद्धसम्मतिमाह– तथा हीति॥ तर्हि निर्विषयमेवाभावप्रमाणमिति, अत आह– यस्त्विति॥

37.36 चेत्। न] MS^{pc}; चेत्। ना MS^{ac} **37.37** अवधृतस्य च द्रव्यस्य] MS^{pc}; अवधृतस्य MS^{ac} **37.38** भावरूपग्रहे तदन्य°] MS^{pc}; भावरूपोपाहितदन्य° MS^{ac} **37.39** °त्कुतो ऽस्य] *em.*; °त्कुतो अस्य MS **37.39–40** येन परस्पराश्रयत्वं] MS^{pc} (deleted akṣaras enclosed within braces); येन परस्पराश्रयत्वं येन परस्पराश्रयत्वं MS^{ac} **37.40** हि] *ow.* MS **37.41** °कल्पस्येति] MS^{pc}; °कल्पस्यति MS^{ac} **37.41** वस्तुव्यतिरिक्ता°] MS^{pc}; वस्तुव्यतिक्ता° MS^{ac}; स्तु *ow.* MS • °विषयं यत्तन्न] *conj.*; °विषयत्तन्न MS **37.46** °वच्छेदधियो] MS^{pc}; °वच्छेदधयो MS^{ac} **37.48** °मुत्तर°] र *ow.* MS^{ac} **37.49** °दभावप्रसङ्गत] MS^{pc}; °दभावप्रसङ्गत MS^{ac}

स्मरणव्यवधिश्च– न चानैन्द्रियकत्वम्, इतिकर्तव्यताविशेषानुगृहीतादिन्द्रियात्तदुत्पत्तेः– एवं नास्तीत्यपि ज्ञानस्येति ब्रुवन्तः। तान् प्रतीदमेव वक्तव्यम्– अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधनः। प्रत्यक्षान्तरसाधन इत्यर्थः। 'अयमसौ न भवति' इति ज्ञानं प्रत्यक्षं वा प्रमाणान्तरं वा। सर्वथा विषयनिषेध्यविभागादृते न निषेधसंभव इति।

ये तु विधायकनिर्विकल्पक**(प्रत्यक्षपुर)**स्सरं **प्रत्यक्षान्तरं** सविकल्पकमेव व**स्तुग्रहणप्रतियोगिस्मरणेतिकर्तव्यतानुगृहीताक्षप्रतिलब्धजन्म** व्य[वच्छेदकं] **(मन्यन्ते**, तेषामिन्द्रि)यव्यापारानन्तरमुपजायमानं प्रत्यक्षं प्रतियोगिस्मरणव्यवहितव्यापारं त्विन्द्रियसन्निकृष्टविशेषणमप्यभावमवग[मयि](तुं न क्षमते। सविकल्पे) तु जनयितव्ये यद्यप्यालोचनशब्दस्मृत्यादिकमन्तरं समस्ति तथापि न तदिन्द्रियव्यापारबाधकम्, अनुयोगितया [तस्य चैक](वस्तुविषयत्वेनाङ्गभूत)स्य व्यवधायकत्वायोगात्, अन्यथातिप्रसङ्गात्। अत एव युजिं प्रतिनोपसृजति– 'स्मृत्वा च प्रतियोगिनम्' इति। तं प्रत्या[ह]- **(शब्दस्मरणेति**। ते हि) स्वकार्योपजनप्रतिकूलेन प्रतियोगिना व्यवधीयन्ते, न च कुम्भाभावपरिच्छेदे कुम्भस्मरणस्य प्रतिकूलता। तथा[सन्निहित](प्रतियोगिस्मर)-⟨f.94^{r}⟩णं नापेक्षेत। न च तदभावे कुम्भाभावज्ञानमिति कल्पितमपि तद्वन्ध्यं

38.8 *Ślokavārttika* Abhāvapariccheda 27b: स्मृत्वा च प्रतियोगिनम्।

38.6–7 Cf. *Abhiprāyaprakāśikā* (227.24–25): न चेति॥ स्वाङ्गमव्यवधायकमिति न्यायादित्यर्थः॥

38.1 विधायक॰] MS^{pc}; विनायक॰ MS^{ac} • प्रत्यक्षान्तरं] MS^{pc}; प्रत्यक्षान्त MS^{ac} • सविकल्प॰] *em.*; संविकल्प॰ MS **38.2** ॰स्मरणेति॰] र *ow.* MS^{ac} • ॰प्रतिलब्धजन्म] MS^{pc}; ॰प्रतिलब्धजन्मजन्म MS^{ac} **38.3** ॰रानन्तर॰] MS^{pc}; ॰रान्तर॰ MS^{ac} **38.4** ॰व्यापारं त्विन्द्रिय॰] रं त्विं *ow.* MS^{ac} **38.5** ॰दिकमन्तरं] MS^{pc}; ॰दिमन्तर MS^{ac}; न्त *ow.* MS • तथापि] त *ow.* MS **38.6** तथापि] त *ow.* MS • ॰व्यापारबाधकम्] *em.*; ॰व्यापारबाधबाकम् MS^{pc}; ॰व्यापारबाधबाधकम् MS^{ac} **38.9** स्वकार्योपजन॰] MS^{pc}; स्वकार्योजनज॰ MS^{ac}; स्व *ow.* MS **38.9–10**कुम्भाभाव॰] MS^{pc}; कुम्भाव॰ MS^{ac} **38.10** ॰स्मरणस्य] MS^{pc}; ॰स्मरस्य MS^{ac} **38.11** ॰णं नापेक्षेत] MS^{pc}; ॰णेनापिक्षेत MS^{ac} • तदभावे कुम्भाभाव॰] MS^{pc}; तद्भावे कुंभाव॰ MS^{ac}

प्रसज्येत। न चास्येन्द्रियप्रतिकूलतापि तद्विषयभूतल[प्रति](योगिस्मरणावभा)सितकुम्भप्रतिकूलता। स्मरणानुभवविषयस्तु स्यात्, स चेन्द्रियव्यापारवन्मानान्तरव्यापारमपि व्यवच्छिन्द्यादित्युक्तम्। न (प्रत्यक्षान्तरमुत्पद्यत इति) भावः। तदेतत्पैलुकपैठराणां मतमुपन्यस्य निराकरोति– **तान् प्रतीदमेवेति**। सुगमम्॥ ॥

किं च

मीयमानैकरूपेषु न निषेधो ऽवकाशवान्॥ १४॥

अपि च सन्मात्ररूपे सर्वत्र प्रतीयमाने तत्स्वभावेषु वस्तुषु नेतराभिमत इतराभिमतप्रमाणानुत्पादः, सत्स्वभावत्वात्तयोः। 'सत्' इति च सर्वत्र प्रमाणसद्भावात्। प्रमाणाभावाच्चेतरेतराभावज्ञानमिति। ननु नार्थानां किंचिदभिन्नं रूपम्। प्रत्यभिज्ञानाद्धि तदवगम्येत। न चार्थमात्रं दृष्टवतो ऽर्थान्तरे स एवायमिति प्रत्यभिज्ञास्ति यथैकां गां दृष्टवतो गवान्तरे। सच्छब्दप्रत्ययानुवृत्तिस्तु पाचकादिवद्योगनिबन्धना। प्रमाणविषयो हि 'सन्' इत्युच्यते। नैतत्सारम्। न चेदभिन्नरूपप्रतिपत्तिः, निर्विषयत्वमेव प्रमाणस्यापद्येत। यतो न व्यवच्छेदमन्तरेण भेदप्रतीतिः। न व्यवच्छेदः केवलः, न विधिसहितः, न विधेः पश्चात्प्रमाणस्य व्यापारः। न विधिरेव व्यवच्छेद इति वर्णितम्। तत्र यद्येकमपि न गम्यते निर्विषयतैव स्यात्। अप्रत्यभिज्ञानं च यदि गोवैलक्षण्यादुच्येत सत्यपि सन्मात्ररूपानुगमे, गवान्तरे ऽपि तन्न स्यात्, देवदत्तवैलक्षण्यात्। न हि यादृशो देवदत्तस्य पुनर्दर्शने एकत्वप्रत्ययस्तादृशो गवान्तरे। …

39.7 तदवगम्येत] A; तद्गम्येत *edn*

38.12 प्रसज्येत] MS^{pc}; प्रसज्येत् MS^{ac} **38.13** °विषयस्तु] MS^{pc}; °विषयोस्तु MS^{ac} **38.15** °पैठराणां] *em.*; °पैठराणा MS • प्रतीद°] *em.*; प्रतीत° MS

एवं तावत्प्रत्यक्षानु[माना](र्थापत्तीनां वस्तु)भेदाविषयत्वान्नाम्नायस्याद्वैतविषयस्य तैर्विरोध इत्युपपादितम्, संप्रति तु प्रत्यक्षं न केवलं भेदेन प्रवर्तते प्रत्यु(ताभेदगोचरमिति पूर्वं प्रत्यु)क्तं तमभा(वधियमधिकृ)त्य आह– **किं च मीयमानेति**। सदिति विश्वेष्वेव भावेषु प्रत्यक्षं प्रवर्तमानं विश्वमेव गृह्णत्कथं नीलग्राहि न पीतं गृह्णी(याद् गृह्णद्वा नीला)त्कथं पीतं व्यवच्छिन्द्यात्। प्रमाणानुत्पादो हि व्यवच्छेदहेतुर्न पुनस्तदुत्पादः, मा भूवन् ⟨f.94^{v}⟩शून्यताविषयाणि सर्वाण्येव प्रमाणानीति। अत्र चोदयति– **ननु नार्थानां किंचित्सदित्यभिन्नं रूपं चकास्ति**। कस्मान्नेत्यत आ[ह]–**(प्रत्यभिज्ञानाद्धि) तदवगम्येत**। न चार्थमात्रं त्रसरेणुं वा रूपं वोत्क्षेपणं वा गोत्वं वा गृहीतवतामर्थान्तरे हिमवति वा गन्धे वा प्रसारणे वा [स](एवायमिति) प्रत्यभिज्ञा समस्ति लौ–

39.1–3 Cf. *Bhāvaśuddhi* (227.12–14, 16–17): एवं तावत्प्रत्यक्षानुमानार्थापत्तीनां वस्तुभेदाविषयत्वाद् नाम्नायस्य तैर्विरोध इत्युक्तम्, इदानीं प्रत्यक्षं न केवलं भेदे वर्तते, प्रत्युताभेदगोचरमित्याह– किं चेति॥ ···पूर्वं प्रमानुत्पादं स्वीकृत्य न तस्याभावधीहेतुत्वमित्युक्तम्, इदानीं स एव न सम्भवतीत्याह– अपि चेति॥

39.4–5 Cf. *Bhāvaśuddhi* (227.12–14): 'सत्' इति सर्ववस्तुषु वर्तमानं प्रत्यक्षं विश्वं गृह्णत्कथं नीलग्राहि (गृह्णन् (द्) कथं नीलग्राही (हि) *edn*) न पीतं गृह्णीयात्? गृह्णद्वा नीलात्कथं पीतं व्यवच्छिन्द्यादित्यर्थः॥

39.9–13 Cf. *Bhāvaśuddhi* (228.6–12): न चेति। तत्र (त (?) *edn*) त्रसरेणुं रूपं वा क्षेपणं वा गोत्वं वा गृहीतवतामर्थान्तरे हिमवति, गन्धे वा प्रसारणे वा, अश्वत्वे वा ऽयमिति विशेषे वा स एवायमिति न प्रत्यभिज्ञानमस्ति लौकिकानामित्यर्थः। व्यतिरेकमुदाहरति – यथेति॥ कालाक्षीमीक्षितवतो गवान्तरे स्वस्तिमत्यां तदेवेदं वस्त्विति प्रत्यभिज्ञास्तीत्यर्थः (°भिज्ञा (ना)स्तीत्यर्थः *edn*)। कथं तर्हि सद्द्रव्यम्, सन् गुणः, सत् कर्मेत्यादि बुद्धिव्यपदेशौ लौकिकानामिति? अत्राह– सच्छब्देति॥

Cf. *Nyāyakaṇikā* (330.11–14): यथा कालाक्षीमीक्षितवतः स्वस्तिमत्यां गवि तदवमर्शः, नैवं हिमशैलादिषु च त्रसरेण्वादिषु च रूपादिषु चोत्क्षेपणादिषु च गोत्वादिषु तदवमर्शः समस्ति।

39.1 प्रत्यक्षानुमाना°] MS^{pc}; प्रत्यक्षानुगमाना° MS^{ac}; क्षानु *ow.* MS **39.3** °त्य आह] MS^{pc}; °त्यत आह MS^{ac} **39.4** मीयमानेति। सदिति] MS^{pc}; मीयमाने किं चेदिति **39.5** नीलग्राहि] MS^{pc}; नीलग्राही MS^{ac} **39.6** व्यवच्छेदहेतु°] MS^{pc}; हेतु° MS^{ac} • मा भूवन्] मा भू *ow.* MS **39.7** प्रमाणानीति] MS^{pc}; प्रमाणानिति MS^{ac} • नार्थानां किंचित्] *em.*; न्नार्थानां किंचि MS^{ac} **39.8** तदवगम्येत] *em.*; तदवगम्यते MS **39.9** त्रसरेणुं] MS^{ac}; त्रिसरेणुं MS^{pc} • °त्क्षेपणं] MS^{pc}; °त्क्षेणं MS^{ac}; उत्क्षे *ow.* MS • गृहीत°] MS^{pc}; गृहीवत° MS^{ac} **39.10** प्रसारणे] *conj.*; प्ररसारणे MS; प्र *ow.* MS

किकानां यथा गां कालाक्षीमीक्षितवतो गवान्तरे स्वस्तिमत्यामस्ति। कथं तर्हि सन्ति द्रव्यगुणकर्मा(णीति बुद्धिव्यपदे)शौ लौकिकानामित्यत आह– **सच्छब्दप्रत्ययानुवृत्तिस्त्विति**। तदेतद्दूषयति– **नैतत्सारमिति**। भेदस्तावन्न प्रमाणगोच[र](इत्युपपादित)मधस्तात्। अभेदो ऽपि चेन्न तद्गोचरो हन्त हतानि निर्विषयतया बत प्रमाणानि भेदाभेदाभ्यां विचारान्तराभावात्। त[त्किं](प्रमाणानां विषय) इति पूर्वावमर्शमन्तरेणैवाभिन्नवस्तुविषयता⟨भ्युपेयता⟩मित्यत आह– **अप्रत्यभिज्ञानं चेति**। यदि हि यथा किल कालाक्षी(मीक्षितवतः स्वस्तिमत्यां गवि गौरित्येकनिर्भासावमर्शः, न तथा तामेव दृष्टवतो गामित्येतावता सत्यपि सदित्यनुगमे सत्त्वमेवानुभूयेत।) ...

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

भेदाभेदावभासे द्वे विज्ञाने चेत्परीक्ष्यताम्।

यदि मतम्– विद्येते तावदनुवृत्तव्यावृत्ताभे द्वे विज्ञाने। न हि तयोरभावे ऽनुवृत्तव्यावृत्तव्यवहार संभवः। न च विज्ञानरूपादन्यो ऽर्थव्यवस्थाहेतुः। तस्याहेतुत्वे ऽभेदो ऽपि न सिध्येत्। नैतत्सारम्। न हि विज्ञानमित्येवार्थं व्यवस्थापयति। तद-

---

40.5 ॰मित्येवार्थं] ॰मित्येवार्थतत्त्वं *edn*

39.12–13 Cf. *Abhiprāyaprakāśikā* (228.27–28): कथं तर्हि सन्ति द्रव्यगुणकर्माणीति बुद्धिव्यपदेशौ लौकिकानामिति? अत आह– सच्छब्देति॥
39.15–19 Cf. *Bhāvaśuddhi* (229.8–12): तत्किं प्रमाणानामस्ति विषय इति पूर्वावमर्शमन्तरेणैवाभिन्नवस्तुविषयताभ्युपेयतामित्यत आह– अप्रत्यभिज्ञानं चेति। यथा कालाक्षीमीक्षितवतः स्वस्तिमत्यां गवि गौरित्येकनिर्भासावमर्शः, न तथा तामेव दृष्टवतो गामित्येतावता सत्यपि सदित्यनुगमे सत्त्वमेवानुभूयेत।

39.11 ॰मीक्षितवतो] *em.*; ॰मीक्षितववः MS • स्वस्तिमत्या॰] MS^{pc}; स्वस्ति मत्या॰ MS^{ac}; स्व *ow.* MS **39.12** सन्ति द्रव्यगुणकर्म(णीति बुद्धिव्यपदे)शौ] *em.*; सन्ति गुणकर्मसा ···शौ MS; शौ *ow.* MS **39.13** ॰वृत्तिस्त्विति] स्त्वि *ow.* MS • नैतत्सार॰] त *ow.* MS^{ac} **39.14** प्रमाण॰] MS^{pc}; प्रमाणा॰ MS^{ac} • अभेदो] MS^{pc}; अभेदे MS^{ac} • हतानि] *em.*; हता MS **39.15** बत प्रमाणानि] MS^{pc}; बतः प्रमाणानि MS^{ac}; नि *ow.* MS • विचारान्तरा॰] *em.*; विचान्तरा॰ MS; विचान्त *ow.* MS **39.17** चेति। यदि॰] चेति य *ow.* MS • किल कालाक्षी॰] MS^{pc}; केल काक्षी॰ MS^{ac}

पि हि परीक्ष्यम्– युक्त्या विरुध्यते नेति, प्रमाणोत्थं नेति। न खल्वलातचक्रादिविज्ञानेभ्यो ऽर्थतत्त्वव्यवस्था। स्यादेतत्। न प्रत्यक्षं युक्त्यापबाध्यते। सत्यम्। प्रत्यक्षतैव भेदज्ञानस्य नेत्यावेदितम्, यथा क्षेपीयस्सर्वतोदिक्संयोगकारितस्यालातचक्रज्ञानस्य। तत् सदप्यप्रमाणोत्थं प्रत्यक्षसरूपं स्वप्नदृश्यालातचक्रादिज्ञानवन्न तत्त्वावगमनिमित्तम्। ननूक्तेन प्रकारेण प्रमाणादन्यतो ऽपि भेदज्ञानस्योदयो न संभवति। को वान्यथाह? न हि परमार्थतो भेदावगमो ऽस्ति। यदि स्यात्, कथं भेदो ऽपह्नूयेत? अपह्नवे वा कथं तदवगमः। नावगम्यमस्ति, अवगम्यते चेति दुर्घटम्। किं तर्हीदम्? अविद्या विभ्रमः। यथावभासं वेद्यसद्भावे च न विभ्रमः, किं तु सम्यग्ज्ञानम्। असति चावगमो ऽनुपपन्नः। तस्मान्न परमार्थतः सत्त्वेन निरुच्यते, नाप्यसत्त्वेन, लोके सिद्धत्वात्सर्वप्रवादेष्वित्युक्तम्।

… (न) ⟨f.96^{r}⟩†अतिविषयद †कार्यमपह्नोतुमुचितम्, चक्षुराद्यनुपलम्भेन रूपादिविज्ञप्तीनामप्यपह्नवप्रसङ्गादिति भावः।

तत्र परीक्षाप्रसङ्गानी(तं विज्ञानमाह– **न हि विज्ञा**)**नमित्येवार्थं व्यवस्थापयति, किं तु यद्विचारसहम्।** न खल्वनात्मनि शरीरेन्द्रियादावात्माभिमानः सर्वजनीन इत्येवं देहादीनामात्मभाव (उपपद्यते। न्यायविरुद्धत्वा)द्विभ्रमः स इति चेत्, इहापि कारणोत्थापितस्वरासहत्वमुपपादितमुपपादयिष्यते च

40.1–2 Cf. *Abhiprāyaprakāśikā* (231.15–19): सर्वजनीनौ तावदिमौ भेदाभेदनिर्भासप्रत्ययौ– सदिदं द्रव्यम्, न गुण इति, तयोः कारणं कल्प्यम्, न तु तदनुपपत्त्या कार्यं हेयम्, चक्षुराद्यनुपलब्ध्या रूपादिधियामपि तत्प्रसक्तेरित्यर्थः॥

40.5–6 Cf. *Bhāvaśuddhi* (232.14–15): देहात्मताज्ञानं न्यायविरुद्धत्वाद्विभ्रमत्वादसाधकम्, अत्राह– तदपीति॥

40.1 अतिविषयद] MS^{pc}; अतिविप्रषयद MS^{ac} • ॰नुपलम्भेन] *em.*; ॰नुलम्भेन MS^{pc}; ॰नुलम्भेना MS^{ac} **40.3** परीक्षाप्रसङ्गा॰] *em.*; परीक्षाप्रसगा॰ MS^{pc}; परीक्षांप्रसगा॰ MS^{ac} **40.5** इत्येवं] *em.*; इत्येवं MS • ॰दीनामात्म॰] MS^{pc}; ॰दीनांमात्म॰ MS^{ac} • ॰द्विभ्रमः] *em.*; ॰द्विन्रमः MS **40.6** कारणोत्थापित॰] *em.*; कारणापित॰ MS

रूपाद्युपलब्धिकार्यता। न चक्षुरादीनि न क्षमन्ते [विचा](रासहं ग्रहीतुं न वा चक्षुरादि)क्षममन्यथासिद्धं न बाध्यमिति दिङ्मोहालातचक्रादिविज्ञानमबाधनीयम्। न वा परमार्थमपि भेदविज्ञानं स्वरूपेणास्ति येनात्र कारणमन्विष्येत किं तु [स](दसद्भ्यामनिर्वाच्यम्) तच्चानिर्वचनीयानाद्यविद्याविजृम्भितमिति निपुणतरमुपपादितमित्यर्थः।

अपि च ज्ञानद्वये ऽस्मिंश्चतस्रः कल्पनाः संभवन्ति– ज्ञानभेदात्सामान्यव्यक्तिविभागेन वस्तुद्वयम्, यथाहुः संसर्गवादिनः। एकं वा सामान्यविशेषात्मकं वस्तु, यथाहुरनेकान्तवादिनः। विशेषा एव वा वस्तूनि। तेषामात्यन्तिकभेदनिश्चयासामर्थ्यात्तदुपादानस्तद्विषय एवाभेदः कल्पनाज्ञानगोचरः। दृष्टा हि भिन्नेष्वभेदकल्पना 'वनम्' इति, यथाहुरात्यन्तिकभेदवादिनः। अभेदो वा परमार्थः। तस्यानवच्छिन्नस्यानन्तस्य तथा निश्चेतुमशक्तेरनादित्वाच्चाविद्यायास्तदुपादानास्तद्विषया भेदपरिकल्पनाः। दृष्टा हि तरङ्गभेदादभिन्ने चन्द्रमसि भेदकल्पना। तन्नापरीक्ष्य तत्त्वनिश्चयः।

तदिदानीं विषयं परीक्षते– **अपि च ज्ञानद्वये ऽस्मिन्** भेदाभेदा(त्मके **चतस्रः कल्पनाः**) **संभवन्ति**। ता दर्शयति– **ज्ञानभेदा**दित्यादिना **भेदकल्पने**त्यन्तेन। अविशेषाणामात्यन्तिको भेदो व्यावृत्तिर्देशतः परमाणुत्वं कालतश्च क्षणि(क-

41.3–6 Cf. *Bhāvaśuddhi* (234.11–235.6): तेषामिति॥ आत्यन्तिको भेदः =व्यावृत्तिः =देशतः परमाणुत्वम्। कालतश्च क्षणिकत्वम्। तच्च नार्वाग्दृशां ज्ञानगोचर इति। विशेषोपादान इत्यर्थः। स्वलक्षणगोचरानुभवोपादानत्वात्कल्पनानां न कल्पनाविषयो भेदः स्वलक्षणोपादान इति, अत्राह– तद्विषय इति॥ कल्पनोपादानानुभवस्य स्वलक्षणो (णा) भेदात्तदुपादानत्वमित्यर्थः॥

40.8 °क्षममन्यथासिद्धं] MS^{pc}; °मन्यथासिद्ध MS^{ac} • दिङ्मोहालात°] MS^{pc}; दिङ्मोहात° MS^{ac} **40.10** तच्चा°] *conj.*; तव्या° MS • °नाद्यविद्या°] द्य *ow.* MS **40.11** °मुपपादित°] *em.*; °मुर्यपादित° MS **41.1** अपि च] *em.*; अपि MS **41.2** °कल्पनेत्यन्तेन] *em.*; °कल्पानित्यन्तेन MS^{pc}; नित्य *ow.* MS **41.3** देशतः] MS^{pc}; सदेसतः MS^{ac}

त्वम्। तच्च नार्वाग्दृशां)ज्ञानगोचरः। यद्यपि न साक्षाद्विशेषोपादानः कल्पनाविषयो ऽभेदस्तथापि स्वलक्षणगोचरानुभवोपादानत्वात्कल्पनायास्तदुपा[दा](नस्य च भेदाभावा)⟨f.96^v⟩दिति तदुपादान उक्तः। तद्विषयत्वमप्यध्यवसायतो न तु ग्रहणत इति प्रतिपत्तव्यम्। यतो विप्रतिपत्तिः प्रवादिनां साधकप्रमाणाभावे सति संशयात्, तदपरीक्ष्यो)पपद्यते नेत्थमिति तत्त्व**निश्चयः**॥ ⊗॥

तत्र परीक्षायाम्–

न तावद्द्वयमैकात्म्यप्रख्यानानवकल्पनात् ॥ १५ ॥
समवायकृतं तच्चेन्न भेदस्यापरिच्युतेः।

न तावद्द्वे वस्तुनी सामान्यविशेषौ, प्रख्याभेदात्। समानाधिकरणत्वेन हीमे प्रख्ये जायेते 'सन् घटः, गौः स्वस्तिमती' इति। न व्यधिकरणत्वेन यथा नीलपीतप्रख्ये, यथा वा 'दण्डो देवदत्तः' इति। नापि विशेषणविशेष्यभावेन यथा 'दण्डी' इति, संबन्धस्याप्रतिभासनात्।

Cf. *Abhiprāyaprakāśikā* (234.21–26): तेषामिति॥ तेषामात्यन्तिकं भेदः =व्यावृत्तिः, सा देशतः =परमाणुत्वम्; एकस्यानेकदेशवृत्तेरवयविनो ऽङ्गीकारात्, कालतश्च क्षणिकत्वम्। तच्च नापातदर्शिनां ज्ञानगोचरम्(:)। यद्यप्यभेदो विशेषोपादानकल्पनः (यद्यप्यभेदो (पादाना) विशेषोपादानकल्पना *edn*); ज्ञानमयत्वात्; तथापि स्वलक्षणविषयनिर्विकल्पकजन्यकल्पनाविषयत्वादभेदस्य, विषय–विषयिणोश्च भेदाभावान्न निर्विकल्पकरूपानुभवद्वारान्तर्विषयविशेषोपादानत्वमुक्तम्।

41.6–7 Cf. *Abhiprāyaprakāśikā* (234.26–28): तद्विषयत्वमप्यध्यवसायतः (अविषयत्वमप्यध्यवस्यतः *edn*), न तु ग्रहणानां सविकल्पकस्य बाह्यानालम्बनस्याप्यगृहीतप्रवर्तनाशक्तेरध्यवसायात्मिकायाः सुगतैः स्वीकृतत्वादिति मन्तव्यम्॥

41.7–9 Cf. *Bhāvaśuddhi* (235.14–15): यतो वादिविप्रतिपत्तौ सत्यां साधकबाधकयोरभावे सन्देहः (ऽसन् देहः *edn*), तस्मादपरीक्ष्य न तत्त्वनिर्णय इत्याह– तन्नेति॥

41.4 °शेषोपादानः] MS^{pc}; °शेषोदानः MS^{ac} **41.5** °विषयो ऽभेद°] *em.*; °विषयो अभेद° MS • °नुभवोपादानत्वात्कल्पना°] *em.*; °नुभवोपादानः कल्पना° MS; भवो *ow.* MS **41.7** °वसायतो] *em.*; °वसायते MS • प्रतिपत्तव्यम्] *em.*; पत्तव्यं MS • यतो] *em.*; ततो MS^{pc}; एतो MS^{ac} • प्रवादिनां] *em.*; प्रवादिना MS

तत्र प्रथमं कल्पं निराकरोति– **न तावद्द्वे वस्तुनी सामान्यविशेषौ।** कुतः? **प्रख्याभेदात्।** तदभेदमाह– **समा**(**नाधिकरणत्वेनेति**।)परापरसामान्यभेदेन निदर्शनद्वयं व्याप्तिप्रदर्शनार्थम्। **न तु व्यधिकरणत्वेन यथा** सम्बन्धरहितवस्तुद्वयग्राहिण्यौ नीलं पीतमिति प्र(ख्ये,**यथा वा** परस्परसम्ब)न्धव्यधिकरणवस्तुद्वयविषया **देवदत्तो दण्ड इति** प्रख्या। अथ मा भूतां स्वतन्त्राधिकरणभावौ, विशेषणत्वेन सत्ता भिन्नैव सती घटादिभिः (भिन्नैः संबध्यत इत्यत्राह– **नापि**) **विशेषणविशेष्यभावेन यथा दण्डीति** शाब्दी प्रख्या। अत्र हि यद्यपि न तद्धितः सम्बन्धाभिधायी किं तु स सन्निहितविशेषवचनः। [तथा](हि वार्त्तिककारमिश्राः– 'प्र)त्यययार्थं सह ब्रूतः' इति। नियतपूर्वप्रतीतिप्रकृत्यर्थानुरक्तं स्वार्थमाचक्षाणः सम्बन्धं विना तदनुरागानुपपत्तेः सम्बन्धमुपक्षि(पतीति दृष्टान्तमाह– **य**)**था**। कुतः? **सम्बन्धस्यात्र** मानान्तरेणा**प्यप्रतिभासनात्**।

42.9 *Tantravārtika* ad *Mīmāṃsāsūtra* II.1.1: प्रत्यययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा।

42.1–3 Cf. *Abhiprāyaprakāśikā* (236.2–3): प्रख्ययाभेदं साधयति– समानाधिकरणत्वेनेति। परापरसामान्याभेदे निदर्शनद्वयं व्याप्तिप्रदर्शनार्थम्।

Cf. *Abhiprāyaprakāśikā* (235:last–236.20): तत्र न प्रथमः कल्प इत्याह– न तावदिति॥ तदभेदमाह– समानाधिकरणत्वेनेति॥ परापरसामान्येन निदर्शनद्वयमाह– सन् घट इति॥

42.3–7 Cf. *Bhāvaśuddhi* (236.2–10): नीलं पीतमिति प्रख्ये परस्परसम्बन्धरहितवस्तुद्वयग्राहिण्यौ यथेत्यर्थः। परस्परसम्बन्धव्यधिकरणवस्तुद्वयविषयप्रख्यामुदाहरति– यथा वेति॥ अथ मा भूतां? स्वतन्त्रे व्यधिकरणभावेन, विशेषणभावेन तु सत्ता भिन्नैव सती घटादिभिर्भिन्नैः सम्बध्यत इत्यत्राह– नापीति॥

Cf. *Abhiprāyaprakāśikā* (236.17–21): सम्बन्धरहितवस्तुद्वयग्राहिण्यौ 'नीलम्, पीतम्' इति प्रसंख्ये। सम्बन्धव्यधिकरणवस्तुद्वयविषया 'देवदत्तो दण्ड' इति प्रख्या भिन्न इति सत्ताविशेषणत्वेन घटादिभिः सम्बध्यत इति, अत आह– नापीति॥ 'दण्डी देवदत्तः' इति-वत् 'सन् घट' इत्यत्र सम्बन्धस्याप्रतीतेरित्यर्थः॥

42.1 तावद्] *em.*; ताव MS **42.2** प्रख्या॰] MS^{pc}; पुख्य॰ MS^{ac} • तदभेद॰] MS^{pc}; तदभेद॰ MS^{ac} • परापरसामान्य॰] MS^{pc}; परापरस्परमान्य॰ MS^{ac} **42.4–5** ॰न्धयधिकरण॰] न्ध *ow.* MS **42.5** देवदत्तो] MS^{pc}; देवदन्त MS^{ac} • भूतां] *em.*; नतां MS^{ac} **42.6** भिन्नैव] *em.*; निन्नैव MS **42.7** दण्डीति] *em.*; दण्डीनि MS **42.8** सम्बन्धाभि॰] *conj.*; सम्बन्धाद्धि॰ MS • किं तु स] *em.*; कि तु स MS^{pc}; कि तु मस MS^{ac} **42.9** ब्रूत] त *ow.* MS **42.10** ॰प्रकृत्यर्था॰] त्य *ow.* MS • तदनुरागा॰] MS^{pc}; तदनुपरागा॰ MS^{ac} **42.11** सम्बन्धमुप॰] न्ध *ow.* MS • ॰स्यात्र] त्र *ow.* MS **42.12** मानान्तरेणाप्य॰] प्य *ow.* MS

न च वस्तुभेदविषयत्वे सामानाधिकरण्यमवकल्पते सत्यपि संबन्धे। संबन्धिद्वयं विशेषणविशेष्यत्वेन द्वाभ्यामेकया वा बुद्ध्या गृह्यते, न तु परस्परात्मत्वेन। परस्परात्मत्वेन चेह प्रतिपत्तिः प्रत्यात्मवेदनीया। विप्रतिपत्तेश्च सामान्यविशेषयोर्भेदे। नान्यथा विप्रतिपद्येरन्। सामान्यप्रत्यक्षे च विशेषप्रत्यक्षाभिमानात्। अन्यथा धूमदृष्टाविवाग्नौ परोक्षाभिमानः स्यात्।

अपि च सम्बन्धादपि दण्डदण्डिनोरिव वैयधिकरण्यमित्याह–[**न चे**](ति। तदेव स्फुटयति– **सम्ब**)⟨f.97r⟩**न्धीति**। **द्वाभ्याम**ित्यापाततः परमार्थतस्त्वे**कये**ति। एतच्चोपपादितं विधिविवेके। हेत्वन्तरमाह– **विप्रतिपत्तेश्च** भूयसां परीक्षकाणां [का](पालिककौमारिलादीनां केषांचि)द्धर्मब्रह्ममीमांसकानां **सामान्यविशेषयोर्भेदे** केचिदेव हि पैलुकाः पैठरा वा तद्भेदमात्यन्तिकमास्थिषत। **अन्यथा** तु भेदमेतयोः[सा](मान्यविशेषयोः प्रतिपद्य **न** भू)यांसः प्रत्यक्षे **वि-**

43.1–3 Cf. *Bhāvaśuddhi* (236.12–14): अपि च सम्बन्धादपि दण्डदण्डिनोरिव वैयधिकरण्यमेव स्यात्, न तु सामानाधिकरण्यमिति, अत्राह– न चेति॥ तदेव स्फोरयति– सम्बन्धीति॥ द्वाभ्यामित्यापाततः, परमार्थतस्त्वेकयेति।

Cf. *Abhiprāyaprakāśikā* (236.22–23): अपि च सम्बन्धादपि दण्डदण्डिनोरिव वैयधिकरण्यमेव स्यात्, न तु सामानाधिकरण्यमित्याह– न चेति॥ तदेव स्फुटयति– सम्बन्धीति॥
43.4–10 Cf. *Bhāvaśuddhi* (237.3–8): विप्रतिपत्तेश्चेति॥ कापालिककौमारिलादीनामिति शेषः। विशेषणविशेष्यभावेन प्रतीतयोरपि भेदे विप्रतिपत्तिः स्यात्, अत्राह– नान्यथेति॥ सामान्यबुद्धौ विशेषास्फुरणाच्च न तयोर्भेद इत्याह– सामान्येति॥ मुद्गमाषतिलादौ विशेषद्रव्ये प्रत्यक्षाभिमानादित्यर्थः। यदि सामान्याद्विशेषो भिन्नः, तत्राह– अन्यथेति॥ सामान्यदर्शनात्तन्नान्तरीयतयानुमेयः स्यात्, तथा च धूमदृष्टाविवाग्नौ परोक्षाभिमानः स्यात्।

Cf. *Abhiprāyaprakāśikā* (237.19–23): हेत्वन्तरमाह– विप्रतिपत्तेश्चेति॥ प्रत्यक्षतः सामान्यविशेषयोर्भेदविप्रतिपत्तौ साङ्ख्यादीनां वैशेषिकादिभिः सह न विप्रतिपत्तिः स्यादित्याह– नान्यथेति॥ युक्त्यन्तरमाह– सामान्येति॥ दूरान्मुद्गमाषतिलादिराशिदर्शने सामान्यं तावत्प्रत्यक्षम्; तथापि भेदानामग्रहणे तद्विशेषो दृष्ट इत्यभिमानो दृष्ट इत्यर्थः॥

43.1 अपि च सम्बन्धादपि] MS^{pc}; अपि स च सम्ब। न्धादपि MS • वैयधिकरण्यमित्याह] MS^{pc}; वेयधिकरण्यमिवत्याह MS^{ac} **43.2** °न्धीति] *em.*; न्धाद्धीति MS **43.5** तद्भेद°] MS^{pc}; ताद्भेद° MS^{ac} **43.6** प्रत्यक्षे] MS^{pc}; प्रत्यक्षक्षे MS^{ac} **43.6–7**विप्रति°] *em.*; विंप्रति° MS

प्रतिपद्येरन्। अपि च सामान्ये च प्रत्यक्षे दूरान्मुद्गमाषतिलादौ विशेषे द्रव्ये प्रत्यक्षाभिमानात्साक्षात्काराभि[मा]नः स्यात्। यदि भिन्नः सामान्या)द्विशेषः, ततः सामान्यदर्शनात्तन्नान्तरीयकतयानुमेयः स्यात्, तथा च **धूमदृष्टाविवाग्नौ परोक्षाभिमानः स्यात्**। पारोक्ष्यापारोक्ष्ये च [धू](माग्निज्ञानयोर्भेद)के।

स्यादेतत्– न संबन्धमात्रादभेदप्रतिपत्तिः, अपि तु संबन्धविशेषात्समवायात्। स हि वस्तुसंश्लेषात्मकः। तन्न, समवाये ऽपि ताभ्यां रूपभेदस्यानपायात्, अन्यथा भेदाभावादसंबन्धात्। तथा च नैकात्म्येन प्रख्या युज्येत। अस्ति चेयम्। अतस्तया विरुद्धः प्रख्याभेदो न वस्तुभेदव्यवस्थायै प्रभवति। स्वयं वा व्याहतत्वात्, एकाधिकरणत्वेनोत्पत्तेः।

स्यादेतत्– न सम्बन्धमात्रात्संयोगादेः दण्डपुरुषादिवर्तिनो भवत्यविप्रतिपत्तिरपि तु **सम्बन्धविशेषात्समवायात्**। **स** खल्वयुतसिद्ध[सं](बन्धिवर्तितया संबन्धा)न्तरेभ्यो ऽयुतसिद्धसंबन्धिवृत्तिभ्यो भिद्यते। युतसिद्ध्ययुतसिद्धी च दर्शिते अधस्तात्। ननु भवतु समवायः, सामानाधिकरण्यं तु कुतस्त्य[मि](त्यत आह– **स हीति**। वस्तू)नां सम्बन्धिनामवयवावयविनां गुणगुणिनां

44.4युज्येत] युज्यते *edn* **44.6**एकाधिकरणत्वेनोत्पत्तेः] *Abhiprāyaprakāśikā*; एकाधिकरणत्वेनोपपत्तेः *edn*

44.2–7 Cf. *Bhāvaśuddhi* (237.11–15): संयोगादिभ्यः समवायस्य को ऽतिशयः, येन भिन्नयोरभेदधीः? तत्राह– स हीति॥ स खल्वयुतसिद्धसम्बन्धिवर्तितया सम्बन्धान्तरेभ्यो भिद्यते, ततः समवायिनां सामान्यविशेषादीनां संश्लेषः परस्पराविभागः, तदात्मकः। तथा च सम्बन्धान्तर एव वैयधिकरण्यम्, न समवाये ऽपीत्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (237.25–27): भवतु समवायः, सामानाधिकरण्यं तु कुत इति? अत आह– स हीति॥ वस्तूनां गुणगुण्यादीनां यः संश्लेषः=परस्पराविभागः, तदात्मक इत्यर्थः॥

43.7 सामान्ये च] MS^{pc}; सामान्यमेव MS^{ac} • दूरान्मुद्गमाषतिलादौ] न्मुद्ग and ला *ow.* MS **43.8** °द्विशेषः] *em.*; °त विशेषः MS^{ac} **43.9** °दर्शनात्तन्नान्त°] MS^{pc}; °दर्शनातेन्नान्त° MS^{ac} **43.10** स्यात्] *em.*; स्यात MS **44.3** °सिद्धसंबन्धि°] MS^{pc}; °सिद्धिसंबन्धि° MS **44.4** अधस्तात्] *em.*; ऽधस्तात MS • भवतु] तु *ow.* MS • °करण्यं तु] MS^{pc}; °करण्यं MS

जातिजातिमतामविष्वग्भूतानां प्रत्यक्षाणां यः संश्लेषः परस्पराविभागस्त-दा⟨f.97^{v}⟩त्मकः। तथा च सम्बन्धान्तर इव न वैयधिकरण्यम्। न चैतावता-वयवादिभ्यो ऽवयव्यादीनामभेदः। अनानुभविको ऽप्ययमन्वयव्यतिरेका-[भ्या](मिहप्रत्ययाद्गम्यते।)तथा हि न विशेष एव सामान्यम्, तस्य तद्विशेष-प्रहितस्य विशेषान्तरे ऽपि दर्शनात्। एवमन्यत्रापि योजनीयम्। कथं तर्हीहप्रत्यया[त्स](मवायो गम्यते? त)स्य सिद्धत्वादन्यथा वैयधिकरण्यप्रसङ्गात्। नानुमेयः सः, बाधितविषयत्वात्तस्य। तत्र संयोगविभागाभ्यामनुमीयमाना गतिर्न ग[ति](गतिमतोस्तादात्म्येन)शक्यानुमातुम्, तादात्म्ये ऽनुमानानु-मेयभावाभावात्पारोक्ष्यापारोक्ष्यानुपपत्तेश्च। तत्राधाराधेयभावावस्थितयोरेव क्रिया[क्रि](यावतोः प्रमाणगो)चरत्वमिति युक्तमिहप्रत्ययानुमेयत्वम्। अत एव केचिदाहुः– यदेकद्रव्यपदार्थाभिप्रायं तन्न व्यत्त्यभिप्रायमिति। कर्म चैकद्र-व्यमभि(हितम्। अत्राह– **न, स)मवाये ऽपि ताभ्यां रूपभेदस्यानपायात्।** समवायो हि सम्बन्धभेदः। स चानुभविको वा भवत्वानुमानिको वा, सर्वथा न सामानाधिक[रण्य](निर्भासस्येहप्रत्य)यस्यालम्बनं वा निमित्तमात्रं वा स्यात्, न तु सामानाधिकरण्यनिर्भासं प्रत्ययमाधातुमर्हति। एष हि तादात्म्यमा-पादयन् स(म्बन्धं प्रतिक्षिपति,)⟨f.98^{r}⟩ द्व्यधिष्ठानस्य तस्यैकस्मिन्नसंभवात्। तदेतदाह– **अन्यथा भेदाभावादिति**। तथा च समवायरूपसंबन्धाभ्युपगमे **नैकात्म्येन प्रख्या युज्येत[।](अस्ति चेयम्, अतस्तया विरु)द्धः** सदाकारो

44.23–26 Cf. *Bhāvaśuddhi* (238.7–10): सदाकारो घटाकारश्च प्रख्याभेदो न वस्तुभेदव्यवस्थायै समर्थ इत्यर्थः। प्रख्याभेदविरोधात् भेदप्रख्यैव भेदं किं न साधयेदिति? अत्राह–

44.6 जातिजातिमता°] *em.*; जातिमता° MS **44.8** ऽप्यय°] MS^{pc}; ऽप्यसय° MS **44.10** °प्रहितस्य] *conj.*; °परहितस्य MS^{pc}; °प। रहितस्य MS^{ac} • विशेषान्तरे] MS^{pc}; शविशेषान्तरे MS^{ac} (श् without head-mark) **44.11** °हप्रत्यया°] ह *ow.* MS • °दन्यथा वैयधिकरण्य°] था and ण्य *ow.* MS **44.12** बाधित°] *em.*; बापि° MS • तस्य। तत्र] *conj.*; तस्यातद्य MS • °मीयमाना] मीय *ow.* MS **44.13** तादात्म्ये] त्म्ये *ow.* MS **44.14** पारोक्ष्या°] *em.*; पारोक्षा° MS • °नुपपत्तेश्च] पपत्ते *ow.* MS • तत्राधारा°] धा *ow.* MS **44.15** क्रिया°] MS^{pc}; क्रियाक्रिया° MS^{ac} **44.16** दाहुः] *ow.* MS • यदेक°] *conj.*; एक° MS^{pc}; द्रएक° MS^{ac} (द्र without head-mark) **44.17** °नपायात्] MS^{pc}; °नपाया MS^{ac} **44.18** सर्वथा] MS^{pc}; सर्व्वथा MS^{ac} **44.19** सामाना°] MS^{pc}; सानाना° MS^{ac} • °माधातु°] MS^{pc}; °मधान्त° MS^{ac} **44.21** पादयन् स°] MS (an akṣara deleted after स) **44.23** नैकात्म्येन] त्म्ये *ow.* MS **44.23** °द्धः सदाकारो] *em.*; °द्धस्सदाकरो MS^{pc}; °प्सदाकरो MS^{ac}

घटाकारश्च प्रख्याभेदो न वस्तुभेदव्यवस्थायै प्रभवति बुद्धिभेदपक्षे। बुद्ध्यभेद-पक्षं पक्षीकृत्याह– **व्याहतत्वात्**। न खलु सन्नसन् [घट] (इति प्रख्योपपद्यते किं) तु ⟨सन्⟩ घट इति। तदिदमाह– **एकाधिकरणत्वेनोत्पत्तेरिति**॥ ⊗॥

ननु भेदे ऽपि परस्परात्मत्वेन प्रतिपत्तेर्निमित्तं समवायः। तस्य खल्वेष सामर्थ्यातिशयः येन भेदवतामर्थानां भेदं तिरोदधाति। तथा च ते ऽभेदेन प्रकाशन्ते। अत्रोच्यते–

भेदान्तर्धानसामर्थ्यं तस्य भेदे ऽपि चेन्मतम्॥ १६॥
हन्तैकस्यैव तत्किं न यदेवमवभासते।

समवायसामर्थ्याच्चेद्भेदवतोरभेदवतोरभेदावभासः, हन्तैकस्यैव वस्तुनः सामर्थ्यविशेषान्नानावभासो ऽभ्युपेयताम्। व्यर्था वस्तुभेदकल्पना। न ह्यस्ति विशेषः– यतो भिन्नयोरभेदप्रकाशसंभवः, नैकस्य नानावभाससंभव इति।

चोदयति– **ननु भेदे ऽपीति**। सामान्यविशेषयोस्तादात्म्यं तावन्नास्ति, अ-(नुवृत्तिव्यावृत्तिरूपवि)रुद्धधर्मसंसर्गात्तच्छब्दयोः पर्यायत्वेन सहप्रयोगाभाव-

---

स्वयं चेति॥ भेदप्रख्यानस्य व्याहतत्वे हेतुमाह– एकेति॥ न खलु सन्नसन् घट इति प्रख्या किन्तु सन् घट इत्येवोपपद्यत इत्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (238.16–20): अतस्तथेति॥ सदाकारो घटाकारश्चेति प्रख्या-भेदस्तयैकात्मप्रख्यया विरुद्धो न वस्तुभेदव्यवस्थायै प्रभवति=बुद्धिभेदव्यवस्थायै प्रभवति बुद्धिभेदपक्षे। बुद्ध्यभेदपक्षं स्वीकृत्याह– स्वयं वेति॥ कुत इति? अत आह– ऐकाधिकर-ण्येनेति॥ अभेदेनोत्पत्तेरित्यर्थः॥

45.1–5 Cf. *Bhāvaśuddhi* (238.13–239.9): अनुवृत्तिव्यावृत्तिरूपविरुद्धधर्मसंसर्गात्तच्छ-ब्दयोरपर्यायत्वाच्च सामान्यविशेषयोर्भेदे कथमभेदधीनिदानं समवायः? अत्राह– तस्य खल्विति॥ क्षीरनीरादिषु भेदग्रहानिमित्तत्वं सम्बन्धस्य दृष्टमित्यर्थः। समवायिरूपयोर्विवे-कस्फुरणे ऽपि कथं सामानाधिकरण्यव्यवहारो लौकिकानाम्?

44.24 प्रभवति] भ *ow.* MS • बुद्ध्यभेद°] *em.*; बुद्ध्याभेद° MS **44.25** °पक्षं पक्षी°] *em.*; °पक्ष्यं कक्षी° MS • सन्नसन्] *em.*; सनसन MS **44.26** तदिदमाह] MS^{pc}; तदिदमाभू MS^{ac} • °नोत्पत्तेरिति] *em.*; °नोत्पत्तिरिति MS **45.2** तच्छब्दयोः] *em.*; तत् त्सब्दयोः MS^{pc}; तत्। त्सब्दयोः MS^{ac} **45.2–3** °भावप्रसङ्गाच्च] भा and च्च *ow.* MS

प्रसङ्गाच्च। न च भिन्नयोरसंश्लिष्टयोर्भेदेनाप्रकाशनं कल्पत इति तन्नि[मि](त्तं स-**मवायः। तस्य** बलोप)बृंहितस्य क्षीरसलिलादिषु भेदाग्रहनिमित्तत्वम्। तथा च सामानाधिकरण्यव्यवहारो लौकिकानामित्यर्थः। **अत्रोच्यते– भेदान्तर्धा-**[न](**सामर्थ्यमि**ति। भे)दाग्रहमात्रादभेदव्यवहार उपपद्यत इति नियोगकाण्ड उपपादयिष्यते। न चाभेदधीरिह नास्ति। केवलमियं समवायनिमि[त्तो](विभ्रम इति वक्तव्यम्।)तत्र किमभेदधीर्विभ्रमः, आहोस्विद्भेदोल्लेख इति। तत्र कल्पनालाघवाद्भेदो ⟨f.98ᵛ⟩ ल्लेख एवासमीचीनः। समीचीने हि तस्मिन् सामान्यविशेषाः समवायश्च कल्पितानि भवन्ति। अभेदधियस्तु समीचीनत्वे सामा[न्य](मेव विपरीतलक्षणोत्प्रे)क्षकोपेतानिर्वचनीयाविद्याविनिर्मितालीक-विशेषं कल्पनीयमिति लाघवम्। तदिदमाह– **व्यर्था वस्तुभेदकल्पने**ति। एवं हि कल्पना[गौर](वं भेदभ्रमासम्भवात्,)यद्यभिन्ने भेदकल्पना नोपपद्येत। न चैतदस्तीत्याह– **न ह्यस्ति विशेष** इति।

ननु ज्वलनायोगुडादिषु दृष्टमेवंविधं संसर्गस्य सामर्थ्यम्। तत्र दर्शनात्संभवी संसर्गाद्भेदवत्स्वभेदावभासः। नैकस्मिन्नानावभासः, अदर्शनात्। उच्यते –

दृष्टः संसर्गधर्मो ऽयं यद्येकमपि वै तथा॥ १७॥
नानावभासते चित्रं रूपमेकं तथा मतिः।

45.6–9 Cf. *Bhāvaśuddhi* (239.15–19): भेदाग्रहमात्रादभेदव्यवहारोपपत्तेर्न समवायाद्भिन्नयोरभेदबुद्ध्यभावात्प्रतिबन्दी युक्तेत्याशङ्क्य व्याचष्टे– समवायेति॥ संसृष्टव्यवहारस्य संसर्गधीपूर्वकत्वनियमात्समवायनिमित्तो विभ्रम इति वक्तव्यम्। तत्राभेदधीर्विभ्रमः, आहोस्विद्भेदोल्लेख इति। तत्र कल्पनालाघवाद्भेदोल्लेख एवासमीचीन इत्यर्थः।
45.12–14 Cf. *Bhāvaśuddhi* (239.19–20): अभिन्ने भेदभ्रमासम्भवात्कल्पनागौरवमभ्युपेयम्, अत्राह– न हीति॥

45.4 °बृंहितस्य] MS^{pc}; °हबृंहितस्य MS^{ac} • °सलिलादिषु] षु *ow.* MS • °निमित्तत्वं] MS^{pc}; °निमित्तंत्वं MS^{ac} **45.5** °धिकरण्यव्यवहारो] MS^{pc}; °धिण्यव्यवहाहारो MS^{ac} • °मित्यर्थः] त्यर्थः *ow.* MS **45.7** °धीरिह] *em.*; °धीरिहं MS^{pc}; °धीरितिहं MS^{ac} **45.8** आहोस्विद्भेदोल्लेख] MS^{pc}; आहास्विद्भदोल्लष MS^{ac} **45.10** सामान्य°] मान्य *ow.* MS • समवायश्च] श्च *ow.* MS • समीचीनत्वे] त्वे *ow.* MS **45.11** °क्षकोपेता°] MS^{pc}; °क्षिकोपेता° MS^{ac} • °तालीक°] *em.*; °तालीकंक° MS **45.13** नोपपद्येत] *em.*; नोपपद्येते MS **45.14** इति] इ *ow.* MS

दृष्टं खल्वेकमपि विविधावभासम्, यथा चित्रं रूपम्। तद्धि खलु न नीलादिसमाहारमात्रम्, तेषामवयवसमवाये रूपान्तरानभ्युपगमे चावयविनो नीरूपत्वप्रसङ्गात्। न च नीरूपत्वमेवावयविनः। रूपसंस्काराभावे हि न स चाक्षुषः स्यात्। न च रूपिसमवायात्संख्याकर्मादिवच्चाक्षुषत्वम्। एवं ह्युक्तम्– 'महत्यनेकद्रव्यसमवायाद्रूपाच्चोपलब्धिः' इति। सर्वश्चेत्थमवयवी नीरूपः स्यात्। अथ नारूपः प्रतीयत इति नायं प्रसङ्गः, चित्रोऽपि तथेति नारूपः। तच्चास्य रूपं नीलपीतादिनिर्भासः।

संप्रति चोदको ऽनुशयनिमित्तमुद्घाटयति– **ननु ज्वलने**ति। [प्रमा](णवददृष्टवस्तुकल्पनं न)दोषमावहति तत्त्वविषयत्वात्प्रमाणस्येति भावः॥ ⊗॥

अत्रोत्तरमाह– **दृष्ट** इति। तन्न नीलादिभ्यो भिन्नमस्ति चित्रं नाम, विवे(के)नाप्र(तिभासात्समाहारमात्रत्वा)च्च। यथाहुः–

'एकं च चित्रं चेत्येतत्तच्च चित्रतरं ततः।' इति।

46.10–11 *Vaiśeṣikasūtra* IV.1.6: महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः।
Nyāyabhāṣya III.1.38: अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः।
46.3 *Pramāṇavārttika* III.200cd: चित्रं तदेकमिति चेदिदं चित्रतरं महत्।

46.1–2 Cf. *Bhāvaśuddhi* (239.21–24): चोदको ऽनुशयनिमित्तमुद्घाटयति– नन्विति॥ ···तत्रेति॥ प्रमाणवददृष्टवस्तुकल्पनं न दोषमावहति; तत्त्वविषयत्वात्प्रमाणस्येति भावः।
46.3–4 Cf. *Bhāvaśuddhi* (240.3–4): नीलादिभ्यो न भिन्नमस्ति चित्रं नाम; विवेकेनाप्रतिभासनात्, अत्राह– तद्धीति॥

Cf. *Abhiprāyaprakāśikā* (240.15–16): नीलादिरूपसमाहारमात्रत्वाच्चित्रस्यैकत्वं न सम्प्रतिपन्नमिति, अत आह– तद्धीति॥
46.4–5 Cf. *Nyāyavārttikatātparyaṭīkā* (612.13–14): यदाहुः– चित्रं तदेकमिति चेदिदं चित्रतरं महत्। इति।
Also quoted in the *Nyāyakandalī* p.76: तथा च प्रावादुकप्रवादः – एकं च चित्रं चेत्येतत्तच्च चित्रतरं ततः। इति।

46.3–4विवेकेना॰] MS^{pc} (There is a sign indicating insertion, but the akṣara inserted in the margin has broken away.); विवेना॰ MS^{ac} **46.5** चित्रं चेत्येतत्तच्च चित्रतरं] *em.*; चित्रं चेत्येतच्चित्रतरं MS^{pc}; चित्रं नरं MS^{ac}

न च नीलादय एवाव्याप्यवृत्तयो बहवो ऽवयविसमवायिनश्चित्रपदास्पदमिति सांप्रतम्,(अवयवगतरूपाद्यतिरे)केणावयविगतानां तेषामनुपलम्भनात्। न च रूपादयः क्वचिदप्यव्याप्यवृत्तयो दृष्टाः, न चेह दर्शनमव्याप्यवृत्ति[व](शात्किं त्वेकद्रव्यपदार्थाविरु)द्धत्वात्। न चैते संयोगादिवदनेकद्रव्याः, एकद्रव्याणामेव तेषां तत्र तत्रोपलब्धेरित्यत आह– **तद्धि खलु न नीलादिस[मा](हारमात्र**मिति। अतो ऽवय)⟨f.99[r]⟩विसमवायि रूपमेकमुपेतव्यं चित्रमिदमित्यनुभवात्, अन्यथा नीलादीनि नानेति चित्राणीति स्यात्। अत एव न व्याघातो ऽपि। न च पै(लुकानामिव रूपान्तरानभ्युपगमः,) अवयविनो नीरूपत्वेनाप्रत्यक्षत्वप्रसङ्गादित्याह– **तेषां नीलादीनामवयवसमवाये रूपान्तरानभ्युपगमे ⟨चावयविनो नीरूपत्वप्रसङ्गात्। न च नीरूपत्वमे⟩वावयविनः।** रूपमेव सं(स्कारस्तेन खल्वयमाका)शादिभ्यो व्यावर्तमानश्चाक्षुषो भवत्यवयवी, तदभावे **न स चाक्षुषः स्यात्**। अथ यथा संख्याकर्मादयः स्व[य]मरूपा अपि रूपिद्रव्यसमवा(याच्चाक्षुषास्तथावयव्यपि किं) नेष्यत इत्यत आह– **न च रूपिसमवायादि**ति। पारमर्षसूत्रविरोधादित्याह– **एवं ह्युक्तं**

46.6–7 Cf. *Nyāyavārttikatātparyaṭīkā* (612.13–14): न च नीलपीतादयो बहवो ऽव्याप्यवृत्तयश्चित्रपदास्पदमिति साम्प्रतम्, रूपादीनां व्याप्यवृत्तित्वात्।
46.16–17 Cf. *Bhāvaśuddhi* (240.8–10): रूपमेव संस्कारः, तेन खल्वयमाकाशादिभ्यो व्यावर्तमानश्चाक्षुषो भवत्यवयवी, तदभावे न स चाक्षुषः स्यादित्यर्थः।
46.17–19 Cf. *Bhāvaśuddhi* (240.11–13): यथा सङ्ख्यादयः स्वयमरूपा अपि रूपिद्रव्यसमवायाच्चाक्षुषाः, तथावयव्यपि किं नेष्यते? तत्राह– न च रूपीति॥ तार्किकस्य स्वीयसूत्रविरोधादित्याह– एवं हीति॥

Cf. *Abhiprāyaprakāśikā* (240.20–22): यथा सङ्ख्याकर्मादयः स्वयमरूपा अपि रूपिद्रव्यसमवायाच्चाक्षुषाः, तथावयव्यपि किं न स्यादिति? अत आह– न च रूपीति॥ परमर्षिसूत्रविरोधादित्याह– एवं हीति॥

46.6 °समवायिनश्चित्र°] MS^{pc}; °समवायिनिश्चित्तत्र° MS^{ac} **46.8** क्वचिदप्यव्याप्य°] *em.*; क्वचिदप्यदव्याप्य° MS **46.10** °द्रव्याणामेव] व *ow.* MS **46.11** °रूपमेक°] रू *ow.* MS • चित्र°] त्र *ow.* MS **46.12** °भवात्, अन्यथा] *em.*; °भवादमन्यथा MS • नीलादीनि] नि *ow.* MS • चित्राणीति] णी *ow.* MS **46.13** एव न] MS^{pc}; एव MS^{ac} • न च] च *ow.* MS **46.14** °लादीना°] MS^{pc}; °लादौना° MS^{ac} • °समवाये] MS^{pc}; °समवायो MS^{ac} **46.15** °नभ्युपगमे] MS^{pc}; °वभ्युपगमे MS^{ac} **46.17** °कर्मादयः स्वय°] MS^{pc}; °कर्मादः स्वय° MS^{ac}; स्व *ow.* MS **46.18** °रूपा अपि] *em.*; °रूपा ऽपि MS • इत्यत] इ *ow.* MS **46.19** पारमर्षसूत्र°] र्षसू *ow.* MS • °त्याह] *em.*; °त्य आह MS^{pc}; °त्यत आह MS^{ac}

महत्यनेकद्रव्यसमवायाद्रूपा[च्चो](पलब्धिरिति। महत्यनेक)द्रव्येषु त्र्यणुकादिषु समवायाद् रूपाद् रूपविशेषादुद्भवसमाख्यातादुपलब्धिरित्येकं द्रव्यस्य चाक्षुषत्वलक्षणम्, ⟨अनेकद्रव्येषु घटादिषु रूपगुणस्य समवायाद् रूपाद् रूपत्वाख्यात्सामान्यविशेषादुपलब्धिरित्यपरं लक्षणम्⟩ अनेन हि द्वये[न](द्व्यणुकादीन्यणूनि परमाणवो ऽ)द्रव्याश्चानेकद्रव्यसमवायिनः पवनादयश्चारूपा अनुद्भुतरूपाश्च चक्षुरादयो ऽनेकद्रव्यसमवायिनो ऽपि व्यावर्तिता भवन्ति। (रूपादुद्भवसमाख्याताद्) रूपविशेषादिति तदनेन लक्षणद्वितयं सूत्रितम्। अनुपात्तविशेषत्वादलक्षणमेतदिति चेत्। न, सर्वसन्देहेष्विदमुपतिष्ठते 'व्या(ख्यानतो विशेषप्रति)⟨f.99^{v}⟩पत्तिर्न हि संदेहादलक्षणम्' इति। तत्पारमर्षसूत्राविरोधाय अवयविनश्चित्रं रूपमभ्युपेयम्। अपि चैवमिच्छतः **सर्वो ऽवयवी नीरूपः** (स्यात्, अङ्ग)तगौरत्वातिरेकेण देवदत्तवर्तिगौरत्वानि-

---

46.27–28 *Paribhāṣāpāṭha* 75: व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्।

46.20–25 Cf. *Bhāvaśuddhi* (241.2–4): अनेकद्रव्येषु त्र्यणुकादिषु समवायात् रूपाच्चोद्भवसहितादुपलब्धिरित्येव। चाक्षुषद्रव्यस्य लक्षणेन उद्भूतरूपविशेषणेन पवनादीनामरूपाणाम्, अनुद्भूतरूपचक्षुरादीनां च व्यवच्छेदः।

Cf. *Abhiprāyaprakāśikā* (240.20–22): महति रूपात्=रूपविशेषादुपलब्धिरित्येकं लक्षणम्, अनेकद्रव्यसमवायात्=अनेकद्रव्येषु=अनेकद्रव्यारब्धेषु द्व्यणुकादिष्विति यावत्, तेषु समवायाद् रूपात्=उद्भूताच्चोपलब्धिरित्यपरं द्रव्यस्य चाक्षुषत्वलक्षणम्॥ अनेन द्व्यणुकाद्यनेकद्रव्यासमवेतानि परमाणवः, अद्रव्याः, अनेकद्रव्यसमवायिनः, पवनादयो ऽरूपा अनुद्भूताश्चक्षुरादयो ऽनेकद्रव्यसमवायिनो ऽपि व्यावर्तिता भवन्ति।

46.26 Cf. *Bhāvaśuddhi* (241.5–6): लक्षणान्तरम्– महति रूपविशेषादिति।

46.28–29 Cf. *Abhiprāyaprakāśikā* (240:last): अतः सूत्रविरोधप्रसङ्गादवयविनश्चित्रं रूपमभ्युपेयमिति भावः।

46.20–21त्र्यणुकादिषु समवायाद् रूपाद् रूप॰] *em.*; स्यडकादिषु समवायाता रूपाद्रूप॰ MS **46.21** ॰दुद्भव॰] व *ow.* MS • ॰समाख्यातादुप॰] *conj.*; ॰समाख्यान्तादुप॰ MS • द्रव्यस्य] MS^{pc}; द्रव्य MS^{ac} **46.22** चाक्षुषत्व॰] *em.*; चाक्षुषस्य॰ MS **46.24** ॰द्रव्याश्चानेकद्रव्यसमवायिनः] *em.*; ॰द्रव्यास्वाद्रव्यद्रव्यसमवायितः MS^{pc}; ॰नद्रव्यास्वाद्रव्यद्रव्यसमवायितः MS^{ac} • पवनादय॰] MS^{pc}; पवनापदय॰ MS **46.25** अनुद्भुतरूपाश्च] *em.*; ऽनुद्भुतरूपाश्च MS^{pc}; ऽत्रद्भुतरूपश्च MS^{ac} • चक्षुरादयो] *em.*; चक्षुदयो MS **46.26–27**अनुपात्त॰] MS^{pc}; अत्र॰ MS^{ac} **46.27** ॰ष्विदमुप॰] MS^{pc}; ॰ष्विवदमुप॰ MS^{ac} **46.28** ॰दलक्षणमिति] *em.*; ॰दयदक्षणमिति MS **46.30** नीरूपः] MS^{pc}; निरूपः MS^{ac} • ॰गौरत्वातिरेकेण] *em.*; ॰गौरत्वानिरेकेण MS; र *ow.* MS • देववदत्तवर्ति॰] MS^{pc}; देवदत्तवर्त्तिः॰ MS^{ac}

रूपणात्, एवं प्रत्यङ्गवर्तिवर्णातिरेकेणाङ्गानामपि वर्णान्तरानिरूपणात्। तद(नेन क्रमेण परमा)णुषु वर्णः परिशिष्येत। ते च तद्वर्ती च वर्णो नेन्द्रियगोचर इति सर्वाग्रहणमवयविनो वर्णासिद्धेरित्याशयवानाह– सर्वस्येत्थ(मिति। तदेतदथ) नेति निराकरोति। तेनैकमपि नानात्वेनावभासत इति सिद्धम्।

तथा नगरत्रैलोक्यादिबुद्धयो विविधविषयाकारा निर्भासन्ते भेदाभावे ऽपीति विषयाकारज्ञानवादिनो मन्यन्ते। न चैकबुद्धितत्त्वाव्यतिरेकाद्विषयाकाराः परस्परतो ऽपि व्यावर्तन्ते, प्रागेव बुद्धेः। स्यादेतत्– चित्रमपि रूपं संसर्गादेवैकार्थसमवेतसमवायलक्षणात्तथावभासते। तदसत्। यतः–

न च संबन्धिसंबन्धः संसर्गो व्यवधानतः॥ १८॥

संश्लेषो हि संसर्गः। ततश्च परस्पररूपावभासः। स चाव्यवधाने युज्यते, न तु स्वाश्रयाभ्यां व्यवधाने। अवयवावयविरूपयोरेकव्यवधाने ऽप्यसंश्लेषः, किमु द्वयव्यवधाने।

तथा ज्ञानाकारवादिनामेकैव बुद्धिर्नगरमिति वा त्रैलोक्यमिति वा ना(नाकारा प्रतीयते।) न चैते नानात्वेनावभासमाना अप्याकाराः परस्परतो ऽपि भिद्यन्ते किमङ्ग पुनर्यतो बुद्धेर्विविक्ता नाभासन्ते तत इत्याह– [तथे](ति।

46.31–34 Cf. *Bhāvaśuddhi* (241.8–11): तदनेन क्रमेण परमाणुषु वर्णाः परिशिष्यन्ते चेत्, तद्वर्ती वर्णो नेन्द्रियगोचरः, इति सर्वाग्रहणप्रसङ्ग इत्याशयः। पटादे रूपवत एव चाक्षुषत्वम्, नारूपस्य; तेनैकमपि नानात्वेनावभासत इति सिद्धमित्याह– तच्चेति॥ **47.1–2** Cf. *Bhāvaśuddhi* (241.11–13): ज्ञानातिरिक्तचित्राभावान्नेदमुदाहरणमित्याशङ्क्य, तान् प्रत्युदाहरणान्तरमाह– तथेति॥ एकैव बुद्धिर्नगरमिति वा, त्रैलोक्यमिति वा नानाकारा प्रतीयत इत्यर्थः।

46.31 °वर्णाति°] व *ow.* MS • °णाङ्गानामपि] MS^{pc}; °णाङ्गानामिपि MS^{ac}; ङ्गा *ow.* MS **46.32** °णुषु] *em.*; °णषु MS • परिशिष्येत] MS^{pc}; परिसष्येत MS^{ac}; त *ow.* MS **46.33** °मवयविनो] *em.*; °मवयविधा MS **46.34** नेति] *em.*; तेवि MS • तेनैकमपि नाना°] MS^{pc}; तेनैकमितिपि माना° MS^{ac} **47.1** ज्ञानाकार°] *em.*; ज्ञाकार° MS • °गरमिति वा त्रैलोक्यमिति] ग and त्रै *ow.* MS **47.2** अप्याकाराः] *em.*; आप्याकाराः MS • परस्परतो] MS^{pc}; परस्परेतो MS^{ac} **47.3** °विक्ता] *em.*; °विक्त MS

चोदयति – स्यादेतदि)ति। नीलादिसंसर्गादेव चित्रमेकमपि नाना नीलाद्यात्मना प्रकाशमानं नानेव भासत इति संसर्गस्यैव सर्वत्र तादात्म्यप्रकाश(नसामर्थ्यम्, तेन न व्यभि)⟨f.100r⟩चारः। एकार्थसमवेतसमवायश्च येष्ववयवेषु नीलादयः समवेताः, तेष्ववयवी समवेतः, अवयविनि च चित्रं रूपं समवेतमि(त्यर्थः। तदेतन्निराकरो)ति – **तदसदिति**। सुगमम्॥ ⊗॥

किं च

व्यवहारे परोपाधौ सर्वा धीर्व्यावहारिकी।
अयथार्था यदा भावभेदकल्पस्तदा मुधा॥ १९॥

यस्य खलु 'शुक्लो गौः' इत्यादिबुद्धयो व्यवहाराङ्गभूता द्रव्येषु गुणजात्युपाधिनिबन्धनास्तस्यैता न यथावस्तु, जातिगुणद्रव्याणामन्योन्यमर्थान्तरत्वात्। तथा च न वस्तुनिबन्धनो व्यवहारः, बुद्ध्यानुपदर्शितस्याव्यवहाराङ्गत्वाद्बुद्ध्युपदर्शितस्य च तथाभावात्। एवं च प्रत्ययविरचितेनैवायमर्थेन व्यावृत्तो व्यवहारो ऽनुवृत्तश्चेति व्यर्था वस्तुभेदकल्पना, कल्पितस्यापि तस्य व्यवहारे ऽनुपयोगादितरस्य चोपयोगात्। यथार्थत्वाय हि व्यावहारिकीणां बुद्धीनां वस्तुभेदः कल्प्यते। कल्पिते च तस्मिन् परोपाधित्वात्तासां नायथार्थत्वपरिहारः।

47.4–8 Cf. *Bhāvaśuddhi* (241.15–18): येष्ववयवेषु नीलादयः समवेताः, तेष्ववयवी समवेतः, अवयविनि च चित्रं रूपं समवेतमित्येकार्थसमवेतसमवायाच्चित्रमेकमपि नानार्थनीलाद्यात्मना प्रकाशमानं नानेवावभासत इति संसर्गस्यैव सर्वत्र तादात्म्यप्रकाशनसामर्थ्यमिति शङ्कते – स्यादेतदिति॥

Cf. *Abhiprāyaprakāśikā* (241.last–242.22): शङ्कते – स्यादेतदिति॥ येष्ववयवेषु नीलादयः समवेताः, तेष्ववयवी समवेतः, अवयविनि च चित्रं रूपमित्येकार्थसमवेतसमवायलक्षणसंसर्गादेव चित्रमेकमपि नाना नीलाद्यात्मना प्रकाशत इति संसर्गस्यैव सर्वत्र तादात्म्यप्रकाशनसामर्थ्यम्, तेन न क्वचिद्व्यभिचार इत्यर्थः॥

47.4 °संसर्गादेव] र्गा *ow.* MS **47.7** समवेतः, अवयविनि] MS[pc]; समवेतोनवयविनि MS[ac]

अपि च **व्यावहारिकीणां बुद्धीनां यथार्थत्वाय वस्तुभेदः कल्प्यते**। न च **कल्पिते** ऽस्मिन्नमूषां यथार्थत्वम्, स[मा](नाधिकरणत्वस्यैवानु)पपत्तेस्त-न्निर्भासतया च तासामुत्पत्तेः। अतो **व्यर्था वस्तुभेदकल्पनेत्याह**– **किं च व्यवहारेति**। सुगमम्॥ ⊗॥

स्यादेतत्– असति वस्तुभेदे ऽयथार्थमप्यनुवृत्तव्यावृत्तावग्रहं व्यावहारिकं विज्ञानं नोदेतुमर्हति, बीजाभावात्। न खलु स्थाणुशुक्तिशकलादिषु पुरुषरजतादिविभ्रान्तयो निर्बीजाः, सामान्यनिबन्धनत्वात्। उच्यते–

अयथार्थधियो बीजमवश्यं बाह्यमेव न।
दृष्टस्तिमिरकामादिरान्तरो ऽपि ह्युपप्लवः॥ २०॥

न विषयदोषादेव सादृश्यादेरयथार्थज्ञानम्, आध्यात्मिकेभ्यो ऽपि तु दोषेभ्यस्तिमिरकामशोकादिभ्यः। तत्रासति वस्तुभेद आध्यात्मिको दोषो ऽविद्यालक्षणो व्यावहारिकज्ञानबीजमिति नार्थो वस्तुभेदेन।

रजतालातचक्रगन्ध(र्वनगरादिविभ्र)माणां बाह्यनिमित्तत्वदर्शनाद्बाह्यनिमित्ता एव सर्वभ्रान्तयः, न च सामान्यविशेषाभे बाह्यनिमित्तमस्ति विभ्रम इति मन्वान[श्चो](दयति– **स्यादेतदि**)ति। परिहरति– **अयथार्थधिय** इति। आन्तरस्यापि तिमिरकामादेः केशोण्डुककामिन्यादिनिर्भासविभ्रमहेतोर्दर्श-

---

48.1–4 Cf. *Abhiprāyaprakāśikā* (243.19–21): व्यावहारिकबुद्धिनां यथार्थत्वाय वस्तुभेदः कल्प्यते, न च कल्पिते ऽस्मिन्नमूषां यथार्थत्वं स्यात्; सामानाधिकरण्यस्यैवानुपपत्तेः, अतो व्यर्था वस्तुभेदकल्पनेत्याह– किं चेत्यादिना॥
49.4–5 Cf. *Abhiprāyaprakāśikā* (244.25–29): तिमिरकामादेरान्तरादपि दोषात्केशोण्ड्रककामिन्यादिनिर्भासविभ्रमदर्शनान्न बाह्यसादृश्यादेरेव विभ्रम इति परिहरति– उच्यत

48.2 कल्पिते ऽस्मि॰] *em.*; कल्पते ऽप्सि॰ MS • ॰पपत्तेस्त॰] MS^{pc}; ॰पपत्तेत॰ MS^{ac} 48.3 ॰न्निर्भास॰] र्भा *ow.* MS • तासामुत्प॰] MS^{pc}; तासामुत्पत्पद्य॰ MS^{ac} 48.4 सुगमम्] *em.*; सुगम् MS^{ac} 49.2 सर्वभ्रान्तयो] MS^{pc}; सर्वभ्रन्तयो MS^{ac} • ॰निमित्तमस्ति] two illegible akṣaras after बाह्यनिमित्त deleted 49.4 आन्तरस्यापि] MS^{pc}; अन्तरस्यापि MS^{ac} • तिमिर॰] *em.*; पिमिर॰ MS • केशोण्डुककामिन्या॰] शो and न्या *ow.* MS

नात्प्रकृते (च जीवाधिष्ठानाना)द्यविद्यारूपबीजसंभवान्नावधारणेत्यर्थः॥ ⊗॥

अस्तु तर्ह्येकं द्व्यात्मकम्। एवं हि परस्परात्मप्रतिपत्तिश्च सामान्यविशेषयोः कल्पते। वस्तुविपरीतश्च नार्थसामर्थ्यातिशयः कल्पयितव्यः। वस्तुनिबन्धनो व्यवहारः, न व्यावहारिकज्ञानानामयथार्था वृत्तिः।

संप्रत्यनेकान्तवादिनमुत्थापयति– **अस्तु तर्हि** प्रतिपत्त्यनुसारत **एकं द्व्यात्म(कम्। तर्हि** चक्षुषी) ⟨f.100^{v}⟩ निमील्य वैतालिकपक्षपातं परित्यज्य समाहितमना आलोचयत्वायुष्मान्– गौरयं शाबलेयः शुक्लो ऽयं पट इत्यादयः सामानाधि(करण्येन बु)द्धयो व्यपदेशाश्च किमेकमवगाहन्ते वस्त्वाहोस्विद्भिन्नमुत किं द्व्यात्मकमिति। तौ हि किलैकवस्तुगोचरौ बुद्धिव्यपदेशौ यथा गगनमिति (सामानाधिकर)ण्यं प्रथते तथेहापि स्यात्। तौ हि किल भिन्नवस्तुगोचरौ बुद्धिव्यपदेशौ यथा चैत्रो मैत्र इति, यथा वा कुण्डे दधीति। न चेह सामानाधि{करण्यं प्रथते तथेहा}पि स्यात्। तस्मात्सामानाधिकरण्यप्रथानुरोधान्नैकान्तिको भेदो नाप्यभेद ऐकान्तिकः, किं त्वेकमुभयात्मकम्। तथा हि 'सन् घटः' इति च 'गौः स्वस्तिमती' इति च प्रख्यैकमुभयात्मकमु-

---

इत्यादिना॥ प्रकृते च जीवाधिष्ठानानाद्यविद्यादोषसम्भवान्नार्थो वस्तुभेदेनेत्याह– तत्रासतीति॥

50.1 Cf. *Abhiprāyaprakāśikā* (244.20): संप्रत्यनेकान्तवादिनमुत्थापयति– अस्तु तर्हीति॥

50.8–11 Cf. *Bhāvaśuddhi* (245.2–4): भिन्नयोरभिन्नयोश्च समानाधिकरण्यासंभवात्सामान्यविशेषयोश्च 'सन् घट' इति प्रख्यैकमुभयात्मकमुल्लिखन्ती प्रत्यात्ममनुभूयत इत्यर्थः।

50.9–10 Cf. *Bhāvaśuddhi* (244.20–21): नैकान्तिको भेदः, नाप्यभेद ऐकान्तिकः, किं त्वेकमुभयात्मकमित्यर्थः।

50.2 निमील्य] ल्य *ow.* MS • वैतालिक°] *em.*; वैतलिका° MS **50.3** त्वायुष्मान्।] MS^{pc}; त्वायुष्माना MS^{ac} **50.4** व्यपदेशाश्च] व्य *ow.* MS **50.5** तौ हि] *conj.*; स्तो हि MS^{pc}; स्ता हि MS^{ac} **50.6** प्रथते] ते *ow.* MS • तौ] तौ *ow.* MS **50.7** दधीति] *em.*; दधीवि MS **50.8** चेह] ह *ow.* MS • °धिकरण्यप्रथा°] *em.*; °धिकरण्यऽप्रथा° MS; था *ow.* MS **50.9** °भेद ऐकान्तिकः] MS^{pc}; °भेदे ऐकान्तिकः MS^{ac}; ऐ *ow.* MS • भयात्मकम्। तथा] MS^{pc} (deleted akṣaras enclosed within braces); °भयात्मकं तथा हि सन घट इ ···स्तीति (deleted) तीति च प्रख्यैकमुभयात्मकं तथा MS^{ac} **50.10** °मतीति च] च *om.* MS

ल्लिखन्ती प्रत्यात्ममनुभूयते।(तदेतदाह– **एवं हि परस्प**)**रात्मप्रतिपत्तिरिति**। एवं च यौगैरिव **वस्तुविपरीतश्च नार्थस्य** समवायस्य सामर्थ्यातिशयो भेदान्तर्धानगोचरः **कल्पयितव्य**(इति। **वस्तुनिबन्धनो व्यवहा**)⟨f.101^r⟩**र एवं सति स्यात्**, ज्ञानप्रतिभासिन एव वस्तुत्वात्। **न त्वैकान्तिके भेद इव व्यावहारिकज्ञानानां** सामानाधिकरण्यनिर्भासानामयथा[र्था] (वृत्तिः।

स्यादेतत्– एकस्य द्व्यात्मकता विरोधवती। एकं च द्व्यात्मकं चेति विप्रतिषिद्धम्। अपि च सामान्यं भेदान्तरानुयायि, ततो व्यावृत्तस्वभावो भेदः। तयोरेकत्वं हि विरोधादशक्यावहम्। नैतत्सारम्। विरुद्धमिति नः क्व संप्रत्ययः? यत्प्रमाणविपर्ययेण वर्तते। यत्तु यथा प्रमाणेनावगम्यते तस्य तथाभावे विरुद्धत्वाभिधाने कं बतायमाश्रित्य हेतुं विरुद्धत्वाविरुद्धत्वे व्यवस्थापयेत्? प्रमाणं चैकस्य सामान्यविशेषात्मकतामवगमयति, व्यावृत्त्यनुवृत्तिभ्यां प्रख्यारूपभेदात्सामानाधिकरण्यावगमाच्च।

चोदयति– **स्या**)**देतदिति**। द्वित्वस्य भेदाधिष्ठाननियमेनैकस्मिन्नभिन्ने ऽसंभ-

---

51 .8सामानाधिकरण्यावगमाच्च] *Bhāvaśuddhi*; ऐकाधिकरण्यावगमाच्च *edn* ; *Abhiprāyaprakāśikā*

50.12–13 Cf. *Bhāvaśuddhi* (245.5–6): वस्तुविपरीतश्च नार्थस्य सामर्थ्यातिशयो भेदान्तर्धानलक्षणः कल्पयितव्य इत्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (245.18–19): वस्तुविपरीतश्चेति॥ अर्थस्य=समवायस्य सामर्थ्यातिशयो भेदान्तर्धानविषयो न कल्पनीय इत्यर्थः।

50.13–15 Cf. *Bhāvaśuddhi* (245.7–9): अभेदव्यवहारो ऽपि ज्ञानप्रतिभासितवस्तुविषय एव स्यात्; व्यावहारिकज्ञानानां सामानाधिकण्यनिर्भासानां च नायथार्थवृत्तिरित्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (245.19–22): ज्ञानप्रतिभासिन एव वस्तुत्वाद्व्यवहारस्य वस्तुविषयत्वमपि सिध्यतीत्याह– वस्त्विति। लाभान्तरमाह– न व्यावहारिकेति॥ आत्यन्तिकभेद इव सामानाधिकरण्यप्रत्ययानां नायथार्थत्वप्रसक्तिरित्यर्थः॥

51.1–2 Cf. *Bhāvaśuddhi* (245.9–12): चोदयति– स्यादेतदिति॥ विरोधं साधयति– एकमिति॥ द्वित्वस्य भेदाधिष्ठाननियमेनैकस्मिन्नभिन्ने ऽसंभवाद्विरोध इत्यर्थः। किं च स्वरूपतो

50.12 ॰तिशयो] MS^{pc}; ॰दितिशयो MS^{ac} **50.14** ॰भासिन] MS^{pc}; ॰भासित MS^{ac} **50.15** ॰ज्ञानानां सामानाधिकरण्य॰] *em.*; ॰ज्ञानानाधिकरण्य॰ MS^{ac} • अयथा॰] MS^{pc}; अथ यथा॰ MS^{ac} **51.1–2**॰स्मिन्नभिन्ने ऽसंभवाद्विरोध] *em.*; ॰स्मिवभिन्ने असंभवाद्विरोधाध MS

वाद्विरोध इत्यर्थः। किं च स्वरूपतो ऽपि विरोध इत्याह– ⟨**अपि चेति**।⟩ परिहरति–(**विरुद्धमिति नः क्व**)**संप्रत्ययः**? **यत्प्रमाणविपर्ययेण वर्तते यथोष्णशीते यथा वा छायातपौ**। न हि तयोस्तादात्म्यं क्वचित्कदाचित्केनचिदप्युपलब्धम्। [आ](तपं परिच्छिन्द)त्प्रमाणं छायाविपर्ययेण वर्तते, एवं शीतमपि परिच्छिन्ददुष्णविपर्ययेणेति युक्तमनयोर्विरुद्ध(त्वाभिधानम्। प्र)– माणविपर्ययाभावे तु विरोधाभिधाने सर्वत्रैव विरोधात्क्वेदंभाविकत्वमवतिष्ठतामित्याह– **यत्त्विति**। न च सामान्यविशे(षयोरवगमः प्रमा)णविपर्ययेणेत्याह– **प्रमाणं चेति**। नन्वस्तु तर्हि तयोरेकत्वमेव, प्रमाणविपर्ययाभावात्। कुतस्त्यं तु द्व्यात्मकत्वमित्यत [आ](ह– **व्यावृत्त्य**)⟨f.101^{v}⟩**नुवृत्तिभ्यामिति**। अस्तु तर्हि भेद एवेत्यत आह– **सामानाधिकरण्यावगमाच्च**।

तदिदमसांप्रतम्, यतो नेदृशां विप्रतिषिद्धार्थज्ञानानां प्रामाण्यमेव युज्यते संशयज्ञानवत्। अन्यथा संशयविषयो ऽपि द्व्यात्मा

ऽपि विरोध इत्याह– अपि चेति॥

Cf. *Abhiprāyaprakāśikā* (245.19–22): शङ्कते– स्यादेतदिति॥ द्वित्वस्य भेदाधिष्ठाननियमेनैकस्मिन्नभिन्ने ऽसंभवाद्विरोध इत्यर्थः।

51.6–9 Cf. *Bhāvaśuddhi* (246.5–8): प्रमाणविपर्ययाभावे ऽपि विरोधाभिधाने सर्वत्रैव विरोधात् क्वेदंभाविकमेकत्वमवतिष्ठतामित्यर्थः। न च सामान्यविशेषयोरस्ति प्रमाणविपर्यय इत्याह– प्रमाणं चेति॥

Cf. *Abhiprāyaprakāśikā* (245:last–246.22): न च सामान्यविशेषयोः प्रमाणविपर्ययो ऽस्तीत्याह– प्रमाणं चेति। अस्तु तर्हि तयोरेकत्वमेव, प्रमाणविपर्ययाभावादिति, अत्राह– व्यावृत्त्यनुवृत्तिभ्यामिति।

51.9–11 Cf. *Bhāvaśuddhi* (246.8–10): अस्तु तर्हि तयोरेकत्वमेव; प्रमाणविपर्ययाभावात्, कुतस्त्यं द्व्यात्मकत्वम्? अत्राह– व्यावृत्तीति॥ अस्तु तर्हि भेद एवेति, अत्राह– सामानाधिकरण्येति॥

Cf. *Abhiprāyaprakāśikā* (246.22–24): अस्तु तर्हि भेद एवेति, अत आह– ऐकाधिकरण्येति॥

51.2 स्वरूपतो] *conj.*; रूपतो MS **51.3–4**यथोष्णशीते] थोष्ण *ow.* MS **51.5** [आ](तपं परिच्छिन्द)त्प्रमाणं] *em.*; आ ···त्प्रमाणं MS^{pc} (deleted akṣaras enclosed within braces); आ ···त्प्रमाण्यप्रसङ्ग इत्याह। प्रमाणं MS^{ac} **51.6** परिच्छिन्ददुष्णवि॰] MS^{pc}; परिच्छिन्दङ्गावि॰ MS^{ac} • ॰पर्ययेणेति] MS^{pc}; ॰पर्ययेणति MS^{ac}; ति *ow.* MS **51.7** क्वेदंभावि॰] *em.*; क्वेवंभावि॰ MS **51.9–10**॰विपर्ययाभावात्] प and या *ow.* MS **51.10–11**॰नुवृत्तिभ्यामिति] MS^{pc}; ॰त्रव्यक्तिभ्यामिति MS^{ac} **51.11** ॰वगमाच्च] *em.*; ॰वगमच्च MS

स्यात्, द्व्याभासत्वात्तस्य सामानाधिकरण्याच्च तदवभासयोः। अथ मतम्– न संशयिते रूपसमुच्चयावगमः, यथा सामान्यविशेषवति, 'अयं वा, अयं वा' इति प्रतीतेः। मा भूत्समुच्चयः, विकल्पः स्यात्। सो ऽपि न, वस्तुनो विकल्पानुपपत्तेः। एकमपि तर्हि न द्व्यात्मकम्, एकस्य द्व्यात्मकताविरोधात्। तत्र यथा संशयज्ञानं विप्रतिषेधादप्रमाणं तथा सामान्यविशेषप्रतिपत्तिरपि, ऐकाधिकरण्यात्।

तदेतद्दूषयति– **तदिदमसांप्रतम्, यतो नेदृशां वि(प्रतिषिद्धार्थज्ञाना)नामिति।** सत्यं यत्प्रमाणविपर्ययेण वर्तते तद्विरुद्धम्,स एव तु विपर्ययः प्रमाणानाम्, न तावत्स्वरूपतः। न खलु विषयाधीननि[रू](पणा विपर्ययाः क्षमा) विरुद्धान्यविरुद्धानि वावधारयितुम्। विरुद्धविषयोत्थापनेन तु भवेयुः। अस्ति च सामान्यविशेषोद्ग्राहिणो ऽपि (ज्ञानस्य विरुद्धवि)षयोत्थापनमुक्तादेव क्रमात्संशयविज्ञानस्येवेत्यर्थः। विप्रतिषिद्धार्थानां ज्ञानानां प्रामाण्यमिच्छतः संशयज्ञानस्यापि प्रामाण्य(प्रसङ्ग इत्याह– **अन्य**)थेति। अथ 'सन् घटः' इति सामान्यविशेषौ स्वरूपभिन्नावपि तादात्म्येन समुच्चयेन विगाहमानं विज्ञानं न विरुद्धार्थम्। संशय[स्तु](न तादात्म्येन स)मुच्चिनोति, अपि तु विकल्पयत्ययं

52.1–7 Cf. *Bhāvaśuddhi* (246.11–16): तदेतद् दूषयति– तदिदमिति॥ हेतुमाह– यत इति॥ सत्यं, यत्प्रमाणविपर्ययेण वर्तते, तद्विपर्यय एव प्रमाणम्, न स्वरूपतः, विषयाधीननिरूपणत्वात्, विरुद्धविषयोत्थापनेन तु स्यात्, अस्ति च सामान्यविशेषोद्ग्राहिणो ऽपि ज्ञानस्य विरुद्धविषयोत्थापनमुक्तादेव क्रमात्संशयविज्ञानस्येवेत्यर्थः॥ विप्रतिषिद्धार्थज्ञानानां प्रामाण्ये ऽनिष्टमाह– अन्यथेति॥

52.7–10 Cf. *Bhāvaśuddhi* (246.21–247.3): अथ 'सन् घटः' इति सामान्येन(न्य) विशेषरूपौ स्वरूपभिन्नावपि तादात्म्येन, समुच्चयेन विगाहनं विरुद्धार्थमित्यर्थः। हेतुमाह– अयं वेति॥ विकल्पनेन विरुद्धार्थोपसंहारादप्रमाणं संशय इत्यर्थः॥

52.1 तदेतद्दूष॰] MS^{pc}; तदेद्दूष॰ MS^{ac} **52.2** तद्विरुद्धम्] MS^{pc}; तद्विराद्धं MS^{ac} **52.4** विरुद्धान्य॰] *em.*; विरुद्धाण्य॰ MS; वि *ow.* MS • वावधारयितुम्] *conj.*; वावधारयितुमीत्माह MS • ॰त्थापनेन] *em.*; ॰त्थानेन MS **52.5** ॰षोद्ग्राहिणो ऽपि] MS^{pc}; ॰षोद्ग्राहिणोवि ऽपि MS^{ac} • ॰मुक्तादेव] MS^{pc}; ॰युक्तादेव MS^{ac} **52.6** क्रमात्सं॰] MS^{pc}; क्षमा सं॰ MS^{ac} • ॰र्थानां ज्ञानानां] MS^{pc}; ॰र्थानां नां MS^{ac} **52.7** संशय॰] *em.*; संस॰ MS • सन्] *em.*; सन MS **52.8** स्वरूप॰] MS^{pc}; रूप॰ MS^{ac}

वायं वेति तद्विरुद्धार्थोपसंहारादप्रमाणम्। प्रमाणं तु सामान्यविशेषनिर्भासम्, वि(ज्ञानोपदर्शित)⟨f.102^{r}⟩तया विकल्पाभावेन विरोधानुपपत्तेरित्याह– **अथेति**। परिहरति– **मा भूत्समुच्चय** इति। यदि यथावभासयति विज्ञानं तथैव (विकल्पयत्यपि), हन्त भो समुच्चितवद्विकल्पितो ऽपि विषयो ऽभ्युपेतव्यः स्यात्। अथ व्यवस्थितस्य **वस्तुनो विकल्पानुपपत्तेर्विज्ञानोपदर्शितो** ऽप्यनुप(पन्नो विषय इति शङ्)क्ते– **सो ऽपि नेति**। उत्तरमाह– **एकमपीति**। प्रकृतदोषमुपसंहरति– **तत्र यथेति**।

स्यादेतत्– न संशयज्ञानं विप्रतिषेधादप्रमाणम्, निर्णयज्ञानेन तु बाधनात्। यत्र तर्हि न निर्णयस्तत्र विकल्पात्मता स्यात्। अपि च यथा बाधायामेकस्याप्रामाण्यं निराकरणात्, एवं विरोधे ऽपि द्वयोरेकस्य वा ज्ञानस्य विरुद्धरूपोपग्रहे तद्रूपाधिगत्योरन्योन्यनिराकरणात्। तत्रैकनिराकरण इतरस्मान्निश्चयः। परस्परनिराकृतौ तुल्यबलत्वे सन्देह इति न संशयज्ञानादेकस्य सामान्यविशेषप्रतिपत्तिर्विशिष्यते। तस्मादिहानैकान्तिकं वस्त्वित्येवं ज्ञानं सुनिश्चितमिति स्वपक्षोपवर्णनम्।

चोदयति– **स्यादेतदिति**। न संशयस्य विकल्पितरूपाव(गाहित्वेन विप्रति)षेधादप्रामाण्यमपि तु **निर्णयज्ञानेन बाधनात्**। 'सन् घटः' इति तु धियः सर्वेषां सर्वदोत्पादाद्व्यवहाराविसंवादाच्चासति बाधके ना(प्रामाण्यमिति) भा-

52.11–16 Cf. *Bhāvaśuddhi* (247.4–9): यथाज्ञानं ज्ञेयसत्त्वस्वीकारे समुच्चितवद्विकल्पितो ऽपि विषयो ऽभ्युपेयः स्यादिति परिहरति– मा भूदिति। व्यवस्थितस्य वस्तुनो नानाविकल्पानुपपत्तेर्विज्ञानोपदर्शितो ऽप्यनुपपन्नो विषय इति शङ्कते– सो ऽपीति॥ उत्तरमाह– एकमपीति॥ ···प्रकृतदोषमुपसंहरति– तत्रेति॥
53.1–4 Cf. *Bhāvaśuddhi* (247.10–12): संशयस्य विकल्पितरूपावगाहित्वेन विप्रतिषेधादप्रामाण्यमिति शङ्कते– स्यादेतदिति॥ कुतस्तर्हीति? अत्राह– निर्णयेति॥ 'सन् घटः' इति धियः सर्वेषां सर्वदोत्पादादसति बाधने नाप्रामाण्यमिति भावः॥

52.10 °यं वेति] म्वे *ow.* MS • प्रमाणं] *em.*; प्रामाणं MS **52.10** विकल्पा°] वि *ow.* MS **52.12** भूत्समु°] भू *ow.* MS **52.13** समुच्चित°] च्चि *ow.* MS **52.16** °दोषमुप°] MS^{pc}; °दोषउमुप° MS^{ac} **53.1** चोदयति– स्यादेतदिति] MS^{pc}; स्यादेतदिति MS^{ac} **53.2** सन् घट] *em.*; सन घट MS^{pc}; सन घटा MS^{ac} **53.3** बाधके ना°] MS^{pc}; बाधके वा° MS^{ac}

वः। दूषयति– **यत्र तर्हि** चन्द्रमसः परभागस्य हरिणसदसद्भावयोरनिर्ण-**यस्तत्र विकल्पात्मता स्यात्**। अपि च निर्णये ऽ[न्य](तरबाधान्) नेदं रजत-मित्यनेन च कस्माद्रजतज्ञानमपोद्यते? भविष्यति हि तद्विषयो व्यवस्थित-श्च, रजतं च तद्भावश्च। वस्तुनस्तस्य भावा[भा](वाभ्यां संशये) ⟨f.102^{v}⟩ नेदं रजतमित्यस्य च विरुद्धविषयोपस्थापकस्य बलीयस्त्वाद्बाधकत्वम्। यत्र तर्हि न बाधकमस्ति तस्य संशयस्य वा सामान्यविशेष[त](द्ग्राहिणो ज्ञानस्यै-कस्य) भिन्नस्य वा परस्परविरुद्धार्थग्राहित्वेन व्याघातान्न प्रामाण्यमित्याह– **अपि च यथा बाधायामि**ति। उपसंहरति– **तस्मादि**ति। (स्वपक्षोपवर्णन)-मात्रमप्रामाणिकम्।

अपि च

एकत्वमविरोधेन भेदसामान्ययोर्यदि।
न द्व्यात्मता भवेदेकतरनिर्भक्तभागवत्॥ २१॥

अवश्यमनेन पदार्थानां भेदाभेदौ व्यवस्थापयता– यथा ताव-त्सामान्यमभिन्नं विशेषा भिद्यन्त इति– भेदाभेदयोर्लक्षणं वा-च्यम्। तत्र रूपविरोधो ऽन्योन्याभावो भेदलक्षणम्। विपर्ययो ऽभेदलक्षणम्। रूपविरोधाद्ध्यन्योन्याभावपर्यायाद्विशेषा भिद्य-न्ते। भिद्यमानेष्वपि तेषु सामान्यमभिन्नम्, विपर्ययात्। तत्र सामान्यविशेषयोर्यदि स्वरूपविरोधो ऽन्योन्याभावः, नैकत्वं

53.4–6 Cf. *Abhiprāyaprakāśikā* (247.22–24): 'यत्र तर्हि' इति परिहारस्यायमर्थः। चन्द्रपरभागवर्तिहरिणसदसद्भावयोः सदा निर्णयाभावाद्विकल्पात्मतैव स्यात्, इति सा-मान्यविशेषावगत्योः परस्परविरुद्धार्थत्वादन्यतरबाधादप्रामाण्यमन्यतरस्य स्यादित्याह– अपि चेति॥

53.9–11 Cf. *Bhāvaśuddhi* (247.17–248.6): संशयस्य वा, सामान्यविशेषग्राहिणो वा ज्ञानस्यैकस्य, भिन्नस्य वा प्रामाण्यम्, अत्र हेतुमाह– विरुद्धरूपेति॥

53.4 परभागस्य] *em.*; परं भागस्य MS^{ac} • हरिण°] ह *ow.* MS **53.5** °र्णयस्तत्र] MS^{pc}; °र्णयोः तत्र MS^{ac} • विकल्पात्मता] *em.*; विकल्पितात्मा MS **53.6** °म-पोद्यते] MS^{pc}; °मनपोद्यते MS^{ac} **53.7** वस्तुनस्तस्य] MS^{pc}; वस्तुतस्तस्य MS^{ac} **53.8** °त्वाद्बाधकत्वम्] MS^{pc}; °त्वाद्बाधकत्वे MS^{ac} **53.10** व्याघातान्न] MS^{pc}; व्या-ख्याघातान्न MS^{ac}

भेदानामिव परस्परम्। अथ सामान्यविशेषबुद्ध्योरैकाधिकरण्येनोत्पत्तेः स्वरूपविरोधो ऽभ्युपेयते, न तर्ह्येकं द्व्यात्मकम्, सामान्यविशेषयोः स्वरूपविरोधाभावादसति भेदे द्वित्वानुपपत्तेः। यथा न सामान्यांशो द्विरूपो विशेषांशो वा रूपविरोधाभावात्– तत्रैकस्मिन्निर्भक्ते द्वित्वाभावात्– तथा सामान्यविशेषयोरपि सामानाधिकरण्यबुद्धेर्यदि न रूपविरोधः, न परस्परात्माभावः। द्वित्वं न युज्यते। अथ रूपविरोधः, नैकत्वमिति।

तदेवं ज्ञानविचारद्वारा द्व्यात्मकत्वं प्रतिषिध्य प्रमेयविचारेणापि प्रतिषेधति– **एकत्वमविरोधेनेति**। **अवश्यमने**[न](**भेदाभेदौ व्यवस्था**)**पयतेति**। **स्वरूपविरोधश्चे**त्परस्पराभावलक्षणो विशेषाणामिव परस्परभेदहेतुः, **सामान्यविशेषयोरपि परस्परं** ततो **भे**[दा](**नामिव नैकत्वम्**। भेद)एव न मनागप्यभेदः। अथ 'सन् घटः' इति सामानाधिकरण्यान्न सामान्यविशेषयोरन्योन्याभावरूपाद्विरोधाद्भेदः, तदभा[वे](च द्वित्वमनुपपन्न)मिति कथं द्व्यात्मकमेकमित्यर्थः ॥ ⊗ ॥

यदि मतम्– न स्वरूपविरोधान्नानात्वम्, तदभावाच्चैकत्वम्, येन सामान्यविशेषयोः स्वरूपविरोधाभावाद्द्वित्वं न स्यादन्यतरस्येव भागस्य, किं तु बुद्धे रूपभेदाभेदाभ्याम्। सामान्यविशेषयोश्च परस्परात्मत्वेन प्रतिपत्तेरसत्यप्यन्योन्याभावलक्षणे स्वरूपविरोधे बुद्धे रूपभेदाद्द्वित्वम्। अंशे तु रूपाभेदादेकत्वम्। अतो वस्तुनो द्विरूपबुद्धिग्राह्यत्वाद् द्व्यात्मतेति। तत्रोच्यते–

54.15–16 परस्परात्माभावः] B; परस्पराभावः *edn*

54.1 Cf. *Bhāvaśuddhi* (248.10–11): तदेवं ज्ञानविचारद्वारास्य द्व्यात्मकत्वं (द्वयात्मकत्वं *edn*) प्रतिषेध्य, मेयविचारद्वारापि प्रतिषेधति– अपि चेति॥
Cf. *Abhiprāyaprakāśikā* (248.24–25): एवं ज्ञानविचारानुसारेण वस्तुनो द्व्यात्मकतां (द्वयात्मकत्वं *edn*) प्रतिषिध्य, ज्ञेयविचारेणापि प्रतिषेधति– अपि चेति॥

54.1 द्व्यात्मकत्वं] MS^{pc}; त्मकत्वं MS^{ac} **54.2** एकत्वमवि°] *em.*; एकत्वपि° MS **54.3** °श्चेत्परस्परा°] *em.*; °श्चेत्परास्परा° MS **54.5** सन्] *em.*; सन MS **54.6** तदभावे] MS^{pc}; तदभावेवे MS^{ac}

ऐकात्म्यबुद्धेर्भागे चेदेवं वस्तुनि तर्ह्यसौ।
न चेत्कुतस्त्यमेकत्वमस्ति चेद् द्व्यात्मता कथम्॥ २२॥

यदि तर्हि बुद्धेरेकरूपोपग्राहित्वादभेदों ऽशस्य, वस्तु विचार्यम्– तत्रापि बुद्धिः किमेकरूपोपग्राहिणी न वेति। तत्र यदि नैकरूपोपग्राहिणी वस्तुनि बुद्धिः– सामान्यविशेषात्मकं हि वस्तु, तद्द्विरूपबुद्ध्युपग्राह्यम्– कथमेकत्वं वस्तुनः? बुद्धिरूपाभेदस्याभेदलक्षणस्याभावात्, रूपभेदस्य च भेदलक्षणस्य भावात्। अथैकरूपोपग्राहिण्येव वस्तुनि बुद्धिः, न द्व्यात्मकत्वमंशवदेव। अथ मतम्– बुद्धिरूपभेदः परस्परात्माभावश्च भेदलक्षणम्। तत्र गवादयो भेदा भिन्नरूपबुद्ध्युपग्राह्याः परस्परानात्मानश्च, न तु सामान्यविशेषौ, बुद्धिरूपभेदे ऽपि परस्परात्मत्वेन प्रतिपत्तेः। एवमपि सामान्यविशेषयोर्भेदलक्षणेन विरहान्न द्व्यात्मता, अंशवदित्युक्तम्।

परस्पराभावान्न द्व्यात्मता भवेदित्यनन्तरोक्तमसहमानः प्रत्यवतिष्ठते– **यदि** [म](**तम्– न स्वरूपविरोधा**)⟨f.103r⟩**दिति**। संविन्निष्ठा हि वस्तुव्यवस्थितयः, तदिमा भेदाभेदनिर्भासा वस्तुनो भेदाभेदौ व्यवस्थापयन्ति। अस्ति च सामान्यविशेषयोरनुवृत्तव्यावृत्तनि[र्भास](संविदाकारो भेदः,)तयोर्भेदादुपपन्नं

55.7 परस्परात्माभावश्च] AB; परस्परात्मताभावश्च *edn*

55.1 Cf. *Bhāvaśuddhi* (249.17–18): परस्पराभावान्न द्व्यात्मकतेत्युक्तममृष्यमाणश्चोदयति– यदीति॥ *Abhiprāyaprakāśikā* (249.27–28): पूर्वोक्तमसहमानः पूर्ववादी लक्षणान्तराभिधानेन प्रत्यवतिष्ठते– यदीति॥
55.2–3 Cf. *Bhāvaśuddhi* (250.5–7): बुद्धेराकारभेदो भेदलक्षणम्, बुद्धेराकाराभेदो ऽप्यभेदलक्षणम्, अतस्ताभ्यां भेदाभेदौ व्यवस्थाप्येते; सन्निकृष्टत्वाद्वस्तुव्यवस्थितेरित्यर्थः॥
55.4–5 Cf. *Bhāvaśuddhi* (250.9–10): अनुवृत्तव्यावृत्तनिर्भाससंविदाकारभेदात् सामान्यविशेषयोर्द्वित्वमित्यर्थः।

55.1 °न्न द्व्यात्मता] MS^{pc}; °नुध्यात्मता MS^{ac} • °त्यनन्तरोक्तमसह°] MS^{pc}; °त्यनुन्तरोक्तमसह° MS^{ac}; म *ow.* MS **55.4** °निर्भासा] MS^{pc}; °निर्भास MS^{ac} • भेदाभेदौ व्यव°] *em.*; भेदाभौ व्यव° MS^{ac}; व्य *ow.* MS • अस्ति च] MS^{pc}; अस्ति MS^{ac}
55.4 °नुवृत्तव्यावृत्तनि°] MS^{pc}; °नुवृत्तनि° MS^{ac}

द्वित्वमित्यर्थः। तथा सामान्यविशेषयोर्द्वित्वमुपपद्यते न पुनस्तादात्म्यमिति नोभयात्मकं वस्तु प्रसिध्यतीति परि[ह](रति– **ऐकात्म्यबुद्धेरि**)ति। ऐकात्म्यं समाधित्सुश्चोदयति– **अथ मतं बुद्धिरूपभेदः परस्परात्माभावश्च** मिलितं **भेदलक्षणम्**। तदुभयसंपन्नाश्च गवाश्वादयो (भेदा इत्याह– **तत्र गवा**)**दय इ**ति। भिन्नरूपबुद्ध्युपग्राह्ययोरपि सामान्यविशेषयोः सामानाधिकरण्यप्रतीतेः परस्पराभावविरहिणोरनुभयसम्प[न्न](योस्तयोर्न भेदस्तल्लक्षणा)भावादित्यर्थः। सिध्यत्येवमैकात्म्यं न तु द्वित्वं न द्व्यात्मकत्वमिति दूषयति– **एवमपीति**।

यदि मन्येत– बुद्धिरूपाभेदः परस्परात्मप्रतिपत्तिश्च द्वे अभेदलक्षणे। तत्रांशस्य रूपाभेदादेकत्वम्, उभयोस्तु परस्परात्मत्वप्रतीतेः। विशेषाणां तु न बुद्धे रूपाविभागः, न परस्परात्मप्रतिपत्तिरिति भिन्ना इति। एवमप्यभेदलक्षणे सति परस्परात्मप्रतिपत्तावुभयाभावे च भेदलक्षणे ऽविद्यमाने न द्व्यात्मता। न चैकस्याभेदस्य द्वे लक्षणे युज्येते। लक्षणाभेदो ह्यभेदं व्यवस्थापयति तद्भेदश्च भेदम्। लक्षणभेदे ऽपि चेत्तत्त्वम्, अन्यत्वं च लक्षणाभेदे ऽपि यदि, व्यर्थतैव लक्षणस्य स्यादिति।

56.1 बुद्धिरूपा॰] B; बुद्धेः रूपा॰ *edn*

55.5–6 Cf. *Abhiprāyaprakāśikā* (250.13–14): अत्रापि सामान्यविशेषयोर्भेद एवात्यन्तिकः स्यात्, अभेदो वा, नोभयमिति परिहरति– तत्रेति॥
55.6–11 Cf. *Bhāvaśuddhi* (251.7–14): तादात्म्यसमाधिं चोदयति– अथ मतमिति॥ मिलितं तूभयं भेदलक्षणमुक्त्वा तदुदाहरणमाह– तत्रेति॥ गौः स्वस्तिमतीति (गौः, अस्वस्तिमिती *edn*) भिन्नबुद्धिगोचरत्वात्सामान्यविशेषावपि भिन्नाविति, नेत्याह– सामान्येति॥ हेतुमाह– बुद्धिरूपेति॥ सामानाधिकरण्यप्रतीतेः परस्पराभावविरहिणोर्न (॰विरहिणो न *edn*) भेदः, तल्लक्षणाभावादित्यर्थः॥ सिध्यत्वेवमैकात्म्यम्, न तु द्व्यात्मकत्वमिति दूषयति– एवमपीति॥

55.5 द्वित्वमित्यर्थः] MS[pc]; द्वित्वमिमित्यर्थः MS[ac] • तथा] था *ow.* MS • ॰विशेषयोर्द्वित्व॰] MS[pc]; ॰विशेषयोद्वित्व॰ MS[ac] **55.7** समाधित्सु॰] *em.*; समाधेत्स॰ MS • परस्परात्माभाव॰] MS[pc]; परस्परात्म॰ MS[ac] • मिलितं] MS[pc]; मिलित MS[ac] **55.9** ॰बुद्ध्युपग्राह्ययोरपि] *em.*; ॰बिद्ध्युपग्राहयोरपि तु MS • ॰प्रतीतेः] *em.*; ॰प्रतीतिः MS[pc]; ॰प्रतीतितिः MS[ac] **55.10** ॰रनुभय॰] *em.*; ॰रनुभव॰ MS **55.11** सिध्यत्येव॰] MS[pc]; सिद्ध्यात्यव॰ MS[ac]

पुनश्चोदयति– **यदि मन्येतेति**। द्वे हि किला(भेदल)⟨f.103^{v}⟩**क्षणे बुद्धिरूपाभेदश्च परस्परात्मप्रतिपत्तिश्च**। तत्र पूर्वमंशस्य स्वात्मन्यभेदमापादयति, उत्तरं तु सामान्यविशेषयोः। न चैतावता तयोर्न द्वित्वमि[मे](कस्याप्यभेदल)क्षणस्याभावेन भेदात्तदुपपत्तेः। गवाश्वमहिषमातङ्गास्त्वत्यन्तभिन्ना एवाभेदलक्षणद्वयविरहादित्यर्थः। तदेतद्दूषयति– **एवमप्यभेदेति**। न ह्ये(कैकादभेदलक्षणविर)हाद्भेदो भवितुमर्हति। न खल्वभिन्न आत्मनि सामानाधिकरण्यप्रतीतिरस्तीति सामान्यविशेषयोरिव तस्यापि स्वात्मनो भेदः प्रसज्ये(त। तस्मादुभयाभावो) भेदलक्षणम्, तथा च सामान्यविशेषयोः परस्परात्मप्रतीतिगोचरयोरुभयाभावसंपन्नयोर्न भेद इति तन्निष्ठं द्वित्वमपि निवर्तते। अ[भ्यु](च्चिनोति– **न चै)कस्येति**॥ ⊗॥

अपि च सामान्यविशेषयोरभेदे,
बुद्ध्यन्तरस्य वैयर्थ्यमेकांश इव चापतेत्।
नानात्वादर्थवत्ता चेदेकत्वाद्व्यर्थता न किम्॥ २३॥

बुद्ध्यन्तरप्रवृत्तिरेव सामान्यविशेषयोरेकवस्त्वात्मतामपाकरोति। सा हि नानात्मत्वे भेदेष्विवार्थवती, अनधिगताधिगमात्। एकत्वे तु यथा सामान्यविशेषविभागयोः स्वबुद्धिसमधिगतयोर्न विलक्षणं बुद्ध्यन्तरमर्थ्यते, तथा सामान्यबुद्धेर्न बुद्ध्यन्तरं विलक्षणं विशेषाधिगमाय प्रार्थ्येत, तथा विशेषबुद्धेर्न सामा-

---

56.5–10 Cf. *Abhiprāyaprakāśikā* (251.last–252.22:) दूषयति– एवमप्यभेदेति॥ न ह्येकैकादभेदलक्षणविरहाद्भेदः, तथा सत्यंशस्यापि परस्परात्मत्वप्रतीत्यभावात्स्वात्मनो ऽपि भेदप्रसङ्गात्। तस्मादुभयविधाभेदलक्षणाभावाद्भेदो ऽभ्युपेयः; तथा सति सामान्यविशेषयोः परस्परात्मत्वप्रतीतेरुभयविधाभेदलक्षणाभावात्मकभेदाभावान्न द्व्यात्मतेत्यर्थः। दूषणान्तरमत्राभ्युच्चिनोति– न चेति॥

56.1 °क्षणे] MS^{pc}; °क्षणो MS^{ac} **56.2** °मंशस्य] *em.*; °मङ्शस्य MS • उत्तरं तु] *em.*; उत्तरत्र MS **56.4** °महिषमातङ्गास्त्व°] MS^{pc}; °महिमातङ्गास्त्व° MS^{ac}; स्त्व *ow.* MS **56.5** न ह्ये°] नन्नवे° MS **56.6** खल्वभिन्न आत्मनि] *em.*; खल्वभिन्नेङ्गो आत्मनि MS **56.8** °गोचरयोरुभया°] *em.*; °गोचयोभयानुभया° MS **56.9** °योर्न भेद इति तन्निष्ठं] *em.*; °योर्न्नेभ इति तन्नियं MS • निवर्तते] *em.*; निवर्त्तेति MS

न्याधिगमाय। अथ नात्यन्तमव्यतिरेकः सामान्यविशेषयोः, व्यतिरेको ऽपि तु। तत्र व्यतिरेकादर्थवत्तेति। तदसत्। एवमपि कुत एतत्– व्यतिरेकादर्थवत्त्वं भेदवत्, न पुनरव्यतिरेकादेकांशवद्वैयर्थ्यम्? तुल्ययोर्हि भेदाभेदयोः कुत एतत्– भेदादेकया बुद्ध्या न ग्रहणम्, न पुनरभेदाद्ग्रहणमिति बुद्ध्यन्तरवैयर्थ्यम्? औत्सर्गिकश्च हेत्वभावे फलाभावः स्वभावसिद्धः। तस्य हेतुभावे फलभावो ऽपवादः। तत्राभेदे हेतुभावादेकयैव बुद्ध्योभयाधिगमो युक्तः। नैकत्वे ऽन्यतराधिगमहेतुर्नास्तीति शक्यं वक्तुम्। अथापि कथंचिन्नास्तीत्युच्यते। तथाप्यस्ति तावत्, एकत्वात्। तत्र हेतुभावात्फलभावः स्यात्, तस्य कारणत्वात्। न त्वभावो ऽभावस्य कारणम्। स्वभावसिद्धस्त्वभावः फलस्य। तस्य हेतुनिबन्धनः फलभावो निवर्तकः। स च हेतुरुभयत्रास्ति तावत्। असत्त्वं त्वनुपयोगम्, अकारणत्वादिति।

अपि च दूराद्वारण इति गृहीते ऽपि सामान्यतः कतमो नु खल्वयं मन्दभद्रमृगेष्विति जिज्ञासवः प्रत्यासीदन्ति, [प](श्चाच्च विशेषम)न्यतममधिगम्य निवृण्वन्ति। दाक्षिणात्याश्च कंचिदेव विशेषमतिकुत्सितावय(वसन्निवेशं) ⟨f.104^{r}⟩ पूर्वमधिगम्य किंजातीयो नु खल्वयमिति साद्भुतं बुभुत्सन्ते, करभजातीयो ऽयमिति चोदीच्येभ्यो विनिश्चित्य निवृण्वन्ति। तदेतत्**सामान्यविशेषयो**(रेकवस्त्वात्मतामपाकरो)ति, सामान्ये वा विशेषे वा विमर्शजिज्ञासयोरयोगात्,

57.17 °स्तीत्युच्यते] °स्तीत्युच्येत *edn*

57.3–6 Cf. *Nyāyavārttikatātparyaṭīkā* (163.19–21): ननु यदोदीच्येन क्रमेलकं निन्दतोक्तम्, धिक्करभमतिदीर्घवक्रग्रीवं प्रलम्बोष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयवसन्निवेशमपसदं पशूनामिति, तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य नूनमसौ करभ इति प्रत्येति।

57.1 अपि च] *em.*; अपि चा MS • नु खल्वयं मन्दभद्र°] *em.*; न खल्वयं मन्दभुद्र° MS **57.2** प्रत्यासीदन्ति] MS^{pc}; प्रसत्यासीदन्ति MS^{ac} **57.4** किंजातीयो नु] MS^{pc}; किंचातीयो न्न MS^{ac} • साद्भुतं] द्भु *ow.* MS **57.6** सामान्ये वा विशेषे वा] MS^{pc} (deleted akṣaras enclosed within braces); सामान्ये वा विशेषे वा विशेषे वा सामान्ये वा MS^{ac}

योगे वा तद्व्यापाराविरामप्रसङ्गात्। तदेवममी संदिहाना बुभुत्समानाश्च (प्र-वर्तन्ते ऽविनिश्चि)त्य लौकिकाः। अथवा क्वचिदस्ति भेदो ऽपीति निश्चिते ऽप्येकस्मिन्नितरस्मिन्संदिहते जिज्ञासन्ते वा। तथा च न वैयर्थ्यं बुद्ध्यन्तरस्य। नन्वभेदे (सति बुद्ध्यन्तरस्य वैय)र्थ्यम्, तदेतदाह– [बुद्ध्य]न्तरस्येति। एवमपि विनिगमनायां को हेतुरित्यत आह– **औत्सर्गिकश्चेति**। अपवादरहिते हि विषय उत्सर्गो ऽभिनिविशते न तु सत्यपि [त](स्मि)न्, तथा सत्यपवादस्य तदविरोधेन तत्त्वानुपपत्तेरित्यर्थः। तत्र फलभावस्तत्प्रागभावस्यापवादः। स च हेतुसद्भावे सति सिध्यति। न चेह हेतुभाव ऐकान्तिकः, तदभावस्यापि (कथंचित्संभवेन फला)भावस्यापि संभवादित्याह– **अथापि कथंचिन्नास्तीत्युच्यते**। दूषयति– **तथाप्यस्ति तावदेकत्वात्**। तथापि कुतो विनिगमनेत्यत आह– **तत्र हे(तुभावादि**ति। हेतुभावो) हि फलभावस्य हेतुः, न तु हेत्वभावः

57.8–10 Cf. *Bhāvaśuddhi* (253.22–23): भेदो ऽप्यस्तीति निश्चिते ऽप्येकस्मिन्, इतर-स्मिन् सन्दिहते, जिज्ञासते च, अतो न बुद्ध्यन्तरवैयर्थ्यमित्यर्थः॥
57.10–11 Cf. *Bhāvaśuddhi* (253.last–254.2): एवमपि विनिगमनायां को हेतुः? अत्राह– औत्सर्गिकश्चेति॥ *Abhiprāyaprakāśikā* (254.20–21): एवमपि विनिगमनायां को हेतुरिति? अत आह– औत्सर्गिकश्चेति॥
57.11–12 Cf. *Mahābhāṣya* III.1.3: प्रकल्प्य चापवादविषयं तत उत्सर्गो ऽभिनिविशते।
57.11–19 Cf. *Bhāvaśuddhi* (254.5–14): अपवादरहिते ऽपि हि विषय उत्सर्गो निविशते, न तु सत्यपि तस्मिन्, तथा सत्यपवादस्य तदविरोधिनस्तत्त्वानुपपत्तेरित्यर्थः (°विरोधि-नः सत्त्वा° *edn*)। फलभावः=तत्प्रागभावस्यापवादो हेतुसद्भावे भवति। न चेह हेतुभाव ऐकान्तिकः; तदभावस्यापि कथंचित् संभवेन फलाभावस्यापि संभवादित्याह– अथापी-ति॥ दूषयति– तथापीति॥ कथंचिदस्त्यपीत्यर्थः॥ तथापि कुतो विनिगमनेति? अत्राह– तत्रेति॥ कथंचिद् हेत्वभावात् फलभावो ऽपीत्युक्तम्, अत्राह– न त्विति॥ कारणाभावस्य कार्याभावहेतुत्वे हेतुमाह– स्वभावेति॥ कार्यप्रागभावो ऽनादिरित्यर्थः। अनादित्वादेव न तस्य निवृत्तिः, तत्राह– तस्येति॥

57.7 तद्व्यापाराविराम°] *em.*; तव्याराविराम° MS^{pc}; तव्यारविराम° MS^{ac} **57.8** °त्य लौकिकाः] *conj.*; °न्य लौकिकाः MS • क्वचिदस्ति] MS^{pc}; क्वच्छिदस्ति MS^{ac} **57.9** ऽप्येकस्मिन्नितरस्मिन्] *em.*; प्येकस्मिन्नितरस्मिन MS^{pc}; ऽप्येकएकस्मि-न्नितरस्मिन MS^{ac} • जिज्ञासन्ते] जिज्ञांसते MS; ज्ञां *ow.* MS **57.10–13** तदेतदाह-[बुद्ध्य]न्तरस्येति। एवमपि विनिगमनायां को हेतुरित्यत आह– औत्सर्गिकश्चेति। अप-वादरहिते हि विषय उत्सर्गो ऽभिनिविशते न तु सत्यपि तस्मिन्। तथा सत्यपवादस्य तदविरोधेन तत्त्वानुपपत्तेरित्यर्थः] MS^{pc}; तदेतदाह रित्यर्थः MS^{ac} **57.14** हेतुसद्भावे] *em.*; हेतुसभावे MS • चेह] ह *ow.* MS

फलप्रागभावस्य, तस्यानादित्वेनाकार्यत्वात्। कारणाकारणसन्निपाते च का[र](णमेवार्थ)⟨f.104^{v}⟩क्रियासूपयुज्यते नाकारणम्, †मता हि हन्त्य्† अकिंचित्करं हि तदिति॥ ⊗॥

अपि च

सामान्यं न हि वस्त्वात्मा न भेदश्चित्र एव सः।
तस्यानन्वयतो भेदवादः शब्दान्तरादयम्॥ २४॥

यस्यैकमुभयात्मकं वस्तु न तस्य सामान्यमात्रं वस्तुन आत्मा न विशेषमात्रम्, तन्मात्रत्वे वस्तुभेदप्रसङ्गात्। तस्मात्संभिन्नोभयरूपः शबलो वस्त्वात्मा। न च शबलस्यान्यत्रानुगमः। यस्य त्वनुगमः स वस्तुरूपं न भवति। तथा च शब्दान्तरमवलम्ब्य भेदा एव सत्या इत्येतत्प्रतिपाद्यते, शब्दान्तरेण वा हेतुना द्व्यात्मकमेकमिति, अनुगन्तुरवस्तुस्वभावत्वे कल्पनाविषयत्वात्।

अपि च सामान्यं विशेषश्च न तावत्प्रत्येकं वस्तु, तथा सति द्वित्वेनैकत्व[व्या](हतेः। न हि वस्तु प्रत्ये)कं स्यात्किं तु मिलितम्। तत्र मिलितस्य वस्तुत्वे विशेषान्तरे विशेषान्तरस्याननुगतिः। अन्यथा विशेषस्य तत्त्वच्यु-

---

57.18–20 Cf. *Bhāvaśuddhi* (254.16–17): कारणाकारणसन्निपाते कारणमर्थक्रियासूपयुज्यते, नाकारणमित्यर्थः॥ *Abhiprāyaprakāśikā* (254.30–31): कारणाकारणसन्निपाते कारणमर्थक्रियासूपयुज्यते, नाकारणम्, अकिञ्चित्करत्वादित्यर्थः॥
58.1–2 Cf. *Bhāvaśuddhi* (255.5–6): किं च सामान्यविशेषयोः प्रत्येकं वस्तुत्वम्? विशिष्टस्य, उभयोर्वा? नाद्य इत्याह– अपि चेति॥ भिन्नत्वेनैकत्वव्याहतेरित्यर्थः॥
58.3–5 Cf. *Bhāvaśuddhi* (255.9–11): तस्येति॥ विशेषस्य विशेषान्तरे ऽन्वयाभावेन विशिष्टस्यानन्वयाच्चित्रं वस्त्विति शब्दान्तरेण भेदवाद आश्रितः स्यादित्यर्थः॥
Cf. *Abhiprāyaprakāśikā* (255.24–25): द्व्यात्मकं वस्त्विति च प्रतिजानता भेदवाद एव समर्थितः स्यादित्याह– अपि चेति॥

57.18 °भावस्य, तस्यानादित्वेना°] MS^{pc} (deleted akṣaras enclosed within braces); °भावस्यापि वादः स च हेतुतस्यानादित्वे ना° MS • कारणाकारण°] *em.*; कारणाकरण° MS **57.19** °क्रियासूपयुज्यते] MS^{pc}; °क्रियासूपयूज्यते MS^{ac} • नाकारणम्] *em.*; नाकारणा MS^{pc}; नाकारणा। MS^{ac} **58.1** अपि] पि *ow.* MS **58.3** °ननुगतिः। अन्यथा] *conj.*; °ननुगतेरन्यथा MS^{pc}; °चनुगतेरन्यथा MS^{ac} • तत्त्वच्यु°] MS^{pc}; तत्त्वश्च्यु° MS^{ac}

तेरेकापाये मेलकाभावे (ऽनन्वयाच्चित्रं वस्त्विति) **शब्दान्तरेण** भेदमात्रमङ्गीकृतं स्यादित्याह– **सामान्यं न हीति**। शब्दान्तरादिति ल्यब्लोपे वा पञ्चमी हेतौ वेति दर्शयति– **तथा चेति**। शब्दा[न्त](रस्वरूपमाह– **द्व्यात्म**)**कमेकमिति**। ननु सामान्यांशस्यानुवृत्तत्वात्कस्मान्न वस्तुनो ऽनुगम इत्यत आह– **अनुगन्तुरिति**।

स्यादेतत्– मा भूद्वस्तु तदंशत्वं तु न वार्यते, अन्यथा निर्बीजा कल्पनापि न भवेत्। कः पुनरयमंशो नाम। न तावद्वस्त्वेव। तन्मात्ररूपत्वे वस्तुनो भेदप्रसङ्ग इत्युक्तम्। नापि वस्तुनो ऽन्यत् स्वयं वस्तु, सामान्यविशेषतद्वतां त्रयाणां वस्तूनां प्रसङ्गात्। अथ न वस्त्वेव नान्यत्स्वयं वस्तु। परिशेषात्कल्पनाविषयस्तत्त्वान्यत्वाभ्यामनिर्वचनीयः। ननु नांशों ऽशिनो ऽर्थान्तरं नापि स एव, उभयथानंशत्वात्। नाप्यवस्तु, अत एव। न हि खपुष्पं कस्यचिदंशो भवति, तत्रांशानुगमे वस्त्वेवानुगतं भवति तस्य तदव्यतिरेकात्। नैतत्सारम्। अननुगमादंशान्तरस्य किं न वस्तुनो ऽननुगमः। अपि त्वननुगम एव, तस्य समुदायात्मकत्वादेकाभावे ऽप्यभावात्। तथा हि– इतरेतरापेक्षौ वा सामान्यविशेषौ वस्तु तत्समाहारो वा। उभयथार्थान्तरे

59.10 अपि त्वननु°] अपि चाननु° *edn*

58.5–8 Cf. *Bhāvaśuddhi* (255.18–22): शब्दान्तरादिति शब्दाल्ल्यब्लोपे पञ्चमीत्युक्त्वा हेतौ वेत्याह– शब्दान्तरेणेति॥ तत्स्वरूपमाह– द्व्यात्मकमेकमिति॥ भेदा एवेति कुतः? अनुगन्तुः सामान्यांशस्यापि सत्त्वात्, अत्राह– अनुगन्तुरिति॥ यद्वा सामान्यांशस्यानुगमाद्वस्तुन एवानुगतिरित्याशङ्क्योक्तम्– अनुगन्तुरिति॥

Cf. *Abhiprāyaprakāśikā* (255.25–27): 'शब्दान्तरादयम्' इति ल्यब्लोपे पञ्चमी, हेतौ वेति दर्शयति– तथा चेति॥ शब्दान्तरस्वरूपमाह– द्व्यात्मकमिति॥ सामान्यांशस्यानुगमात् कथं न (नु *edn*) वस्तुनो ऽनुगम इति? अत आह– अनुगन्तुरिति॥

58.4 मेलका°] MS^{pc}; मेकलका° MS^{ac} **58.5** ल्यब्लोपे] *em.*; ल्यप्लोपे MS; पे *ow.* MS • हेतौ] *em.*; हेतो MS^{pc}; हंतो MS^{ac} **58.7** सामान्यांश°] *em.*; सामान्याङ्श° MS **58.7** °नुवृत्तत्वा°] MS^{pc}; °नुमतत्वा° MS^{ac} • अनु°] नु *ow.* MS

विशेषस्याभावान्न वस्त्वन्वयः। प्रत्येकमनपेक्षयोर्वस्तुत्वे नोभयात्मकमेकं वस्तु स्यादिति सुष्ठूच्यते–

तस्यानन्वयतो भेदवादः शब्दान्तरादयमिति।

चोदयति– **स्यादेतदिति**। **मा भूद्वस्तु तदं(शत्वं तु न वार्यते, अन्य)थेति**। कल्पनाया अपि निर्बीजाया अनुपपत्तेरित्यर्थः। तदेतद्विकल्प्य दूषयति– **कः पुनरयमिति**। **न तावद्वस्त्वेवेति**। परस्परानपेक्षयोः सा[मा](न्यविशेषयोर्वस्तु)त्वम्, न तु तदतिरिक्तमस्ति वस्त्वित्येवकारार्थः। तथानिष्टापत्तिरुक्तेत्याह– **तन्मात्ररूपत्व इति**। अथ वस्तुनो ऽन्य⟨f.105^{r}⟩**त् स्वयं वस्तु**, तथा चेदनुगमान्न भेदवादाश्रयणमित्यत आह– **नापि वस्तुन इति**। कुतः? **सामान्येति**। अथोक्तप्रसङ्गभिया न वस्तुनो भिन्नम[भि](न्नं वा सामान्यमिष्येत, एवं स)त्यनिर्वचनीयतयानाद्यविद्याविनिर्मितं स्यात्। न चानादौ निर्बीजतोपालम्भस्य पदमित्याह– **अथ न वस्त्वेवेति**।

ननु मा भूद्भेदाभेदाभ्यां नि[रू](पणमंशांशिनोः, उभयथा)भावितत्वानुपपत्तेः। अंशत्वेन तु निर्वक्ष्यते। **न चैतावता गगनकमलिनीकल्पः**। **न ह्यसौ कस्यचिदंशः**। तथा च तदनुगमे सिद्धो वस्त्वनु[ग](मस्तदव्यतिरेकादित्याह)– **ननु नांश इति**। दूषयति– **नैतत्सारमिति**। **आः प्रमादो यदंशाभ्यामभि**-

59.2–3 Cf. *Abhiprāyaprakāśikā* (256.20): तदेव विकल्प्य दूषयति– कः पुनरयमिति॥
59.3–4 Cf. *Bhāvaśuddhi* (256.5–7): सामान्यविशेषयोरन्योन्यानपेक्षयोर्वस्तुत्वाद् न तदतिरिक्तमस्ति वस्त्वित्येवकारार्थः। तथा चानिष्टापत्तिरुक्तेत्याह– तन्मात्रेति॥
59.7–8 Cf. *Bhāvaśuddhi* (256.5–7): उक्तप्रसङ्गभिया यदि न वस्तुनो भिन्नमभिन्नं वा सामान्यमिष्येत, एवं सत्यनिर्वचनीयता स्यादित्याह– अथेति॥
59.10–13 Cf. *Bhāvaśuddhi* (256.11–15): भेदाभेदाभ्यामौत्सर्ग्यपदार्थनिरुक्त्यभावे ऽप्यंशत्वेन निरुच्यत इति चोदयति– नन्विति॥ अंशत्वादेव न तुच्छत्वमिति शङ्कनीयमित्याह– नाप्यवस्त्विति॥ हेतुं साधयति– न हीति॥ तथा च तदनुगमे सिद्धो वस्त्वनुगम इत्याह– तत्रेति॥

59.1–2 °थेति। कल्पनाया] *em.*; °थे कल्पना MS^{ac} **59.2** °रित्यर्थः] त्य *ow.* MS **59.5** °त्स्वयं] *em.*; °त्स्वयत्वं MS **59.6** चेदनुगमान्न] *em.*; चदनुगमान्न MS; न्न *ow.* MS **59.9** निर्बीजतोपालम्भस्य] MS^{pc}; निर्बिजतोपालम्भवस्य MS^{ac} **59.11** अंशत्वेन] *em.*; अंसत्वे MS • °कमलिनी°] MS^{pc}; °कश्चिमलिनी° MS^{ac} **59.12** °चिदंशः] *em.*; °चिदङ्शः MS^{ac} **59.13** नैतत्सार°] MS^{pc}; नेतत्सार° MS^{ac} • यदंशाभ्यामभि°] MS^{pc}; यदङ्शाभ्यामभि° MS^{ac}; भि *ow.* MS

तः कृष्यमाणो बतार्थतपस्वी व्यावृत्त्यनुवृत्त्योरेकत्रापि प्रतिष्ठा[म](लभमानो न कस्मिंश्चिदं)शे निवेशितो ऽतिपण्डितैरित्यर्थः। अथ चावहतमंशत्वं व्यावृत्तावेवास्य लब्धप्रतिष्ठत्वादित्याह– **अपि त्वननुगम एवेति**। इतरेतरा(पेक्षयोर्द्वयोर्वा सामा)न्यविशेषयोस्तत्समाहारस्य वा वस्तुत्वे नांशानामस्ति वस्तुता। न चैते शशविषाणायमाना अपि त्वनिर्वचनीयतयानाद्यविद्या[नु](बन्धाः प्रजाये)रन्। न च भेदाभेदाभ्यां व्याप्तं वस्तुत्वं तदभावें ऽशेष्वंशतया निर्वाच्येष्वपि भवितुमर्हति। ⟨f.105ᵛ⟩ तस्मादेकांशानुगमे ऽपि न वस्तुनो ऽनुगमः। प्रत्येकमस्तु वस्तुत्वं न द्व्यात्मकमेकमिति॥ ⊗॥

यदि वाखिलभावानामभेदात्तदतत्त्वतः।
अभेदवादाश्रयणं स्यादन्यविधया गिरा॥ २५॥

अंशानुवृत्त्या वा वस्त्वनुगमे ऽद्वैतवादः। तथा हि– गौः स्वतस्तावद्गौः, सद्द्रव्यादिरूपानुगमादश्ववस्तुनो ऽनुगमादश्वः। तदेवं गौर्गौश्चाश्वश्च। अश्वो ऽपि तावदश्वः सद्द्रव्यादिरूपानुगमेन गोवस्तुनो ऽन्वयाद्गौः। तदेवमश्वो ऽप्यश्वो गौश्च। तदेवं सर्वभावानां तद्भावान्यभावाभ्यामभेद इत्यद्वैतं जगदित्युक्तमन्यप्रकारया वाचा। सत्यम्, द्वैतमप्यस्ति, यतस्तद्भावान्यभावाभ्यामभेदः। नैतत्सारम्। गौरपि चेदश्वो गौश्चाश्वश्च, तत्कुतो ऽन्यत्वम्? गौरश्व इत्यपि भेदाभिधानमनिबन्धनमेव। सिद्धे हि गवाश्वभेद एतदुपपद्यते। गवाश्वस्य तु प्रत्येकं गवाश्वत्वे भेदाभावादनिबन्धनमेव तत्।

60.10 गौरश्व इत्यपि] गौश्चाश्वश्चेत्यपि *edn*

59.14 बतार्थतपस्वी] MS^{pc}; बतार्थः तपस्वी MS^{ac} **59.15** चावहतमंशत्वं] *em.*; वावहतमङ्गलं MS **59.16** °वेवास्य] *em.*; °वेवास्या MS; वा *ow.* MS **59.17** °योस्तत्समा°] MS^{pc}; °योस्तत्सहामा° MS^{ac} • °नांशानामस्ति] *em.*; °नाङ्शाना° MS **59.18** त्वनिर्वचनीयतयानाद्य°] *em.*; त्यनिर्वचनीयतयानद्य° MS^{ac} **59.19** व्याप्तं] *em.*; व्याप्त MS • वस्तुत्वं] MS^{pc}; वस्तु MS^{ac} • तदभावें ऽशेष्वंश°] *em.*; तदभावें ऽङ्शेष्वङ्श° MS

तदेवमंशानुगमे ऽपि न वस्तुनो ऽनुगम इत्युक्तम्।(संप्रत्यभ्युपेत्यातिप्रस-ङ्गा)न्तरमाह– **यदि वेति**। **अंशानुवृत्त्या वा वस्त्वनुगमे ऽद्वैतवादः**। तमेव स्मारयति– **तथा हि गौः स्वतस्तावद्गौरश्ववस्त्वंशभूतसद्द्रव्यादिरूपा(नुग-माद्गव्यश्ववस्तुनो ऽ)नुगमादश्वः** स एव गौः। तदेवं गो(रश्वत्वमापाद्याश्वस्यापि गो)त्वमापादयति– **तथाश्वो ऽपि तावत्स्वतो ऽश्वो** गोवस्त्वंशभूत**सद्द्रव्या-दिरूपानुगमेन गोवस्तुनो ऽन्वयाद्गौः**।[त](**देवमश्वो ऽप्यश्वो गौ**)**श्च**। तस्माद्गवाश्वस्येव सिद्धं त्रैलोक्यस्यैक्यं स्वतः परतश्चेत्युपसंहरति– **तदेवमिति**। चोदयति– **सत्यमिति**। **तद्भावान्यभावाभ्यामभेदो ना**[त्य](न्तिकः, यतो **द्वैत**-

---

60.1–2 Cf. *Bhāvaśuddhi* (257.8–9): तदेवमंशानुगमे ऽपि न वस्तुनो ऽनुगम इत्युक्तम्। सम्प्रत्यतिप्रसङ्गान्तरमाह– यदि वेति।

Cf. *Abhiprāyaprakāśikā* (257.21–22): तदेवमंशा(न)नुगमे ऽपि न वस्तुनो ऽनुगम इत्यु-क्तम्, सम्प्रत्यभ्युपेत्यातिप्रसङ्गान्तरमाह– यदि वेति।

60.3–4 Cf. *Bhāvaśuddhi* (257.14–15): गौः स्वतस्तावद्गौरश्ववद्वस्त्वंशभूतसद्द्रव्यादिरूपा-नुगमात्, गव्यश्ववस्तुनो ऽन्वयादश्वस्स एव गौः।

Cf. *Abhiprāyaprakāśikā* (257.23–24): सद्द्रव्यादिरूपानुगमादिति॥ अश्ववस्तुनों ऽशभूतस-द्द्रव्यरूपानुगमादश्वश्च भवति, स एव गौरित्यर्थः।

60.4–6 Cf. *Bhāvaśuddhi* (258.2–4): तदेवं गोरश्वत्वमापाद्य, अश्वस्यापि गोत्वमापाद-यति– अश्वो ऽपीति॥ गौः, वस्त्वंशभूतसद्द्रव्यादिरूपानुगमादश्वः, गोवस्तुनो ऽन्वयात्; गौरिवेत्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (257.24–25): तदेवं गोरश्वत्वमापाद्याश्वस्यापि गोत्वमापादयति– अश्वो ऽपीति॥

60.6–7 Cf. *Bhāvaśuddhi* (258.6–7): गवाश्वस्येव त्रैलोक्यस्यैक्यं स्वतः परतश्चेत्युपसंहर-ति– तदेवं सर्वेति॥

Cf. *Abhiprāyaprakāśikā* (257.25–26): तस्माद्गवाश्वस्येव रूपस्वरूपाभ्यां सर्वस्य सर्वात्म-त्वत्वं? (सर्वात्मत्वत्व(पर)त् *edn*) सिद्धमद्वैतमित्युपसंहरति– तदेवं सर्वेति॥

60.8–9 Cf. *Bhāvaśuddhi* (258.8–9): स्वरूपपररूपाभ्यामभेदो नैकान्तिकः; अन्यथा त-

---

60.1 तदेवमंशा°] *em.*; तदेवमङ्शा° MS **60.2** वेति] MS^{pc}; रेति MS^{ac} • ऽद्वैत-वादः] MS^{pc}; द्वैतवादः MS^{ac} **60.3** स्मारयति] MS^{pc}; स्मारति MS^{ac}; स्मा *ow.* MS • °भूतसद्द्रव्यादि°] *em.*; °भूतस्तद्द्रव्यादि° MS **60.4** °गमादश्वः] MS^{pc}; °ग-माश्वः MS^{ac} • तदेवं गो°] *em.*; तदेव गौर्गौ° MS • °त्वमापा°] *em.*; °नत्वमापा° MS **60.5** तथाश्वो ऽपि] MS^{pc}; तथापि MS^{ac} • गोवस्त्वंश°] *em.*; गोवस्त्वङ्श° MS **60.6** °गमेन] *em.*; °गमेनु MS • °नो ऽन्वयाद्गौः] MS^{pc}; °नोयाद्गौः MS^{ac} **60.7** °द्गवाश्वस्येव] द्ग *ow.* MS • सिद्धं] MS^{pc}; सिद्धिं MS^{ac} • °स्यैक्यं] MS^{pc}; °स्यै-कयं MS^{ac} • °त्युपसंहरति] *em.*; °त्युपंसंहरति MS^{ac} **60.8** °भावाभ्यामभेदो] *em.*; °भवाभ्यां ऽभेदो MS

मप्य)स्ति। तथा सति तदतद्भावानुपपत्तेरित्यर्थः। दूषयति– **नैतदिति**। अद्वैतं कथयतो ऽन्यथाभिधानं तद्भावान्यभावाभ्यामिति तदुपायतया [भे](दो ऽभ्युपेयः, अन्यथा तदनु)पपत्तेः। न तु तात्त्विकं तदिति भावः। ननु च गौरिति चाश्व इति च व्यपदेशभेद एव गवाश्वस्य भेदं साधयिष्यतीत्यत आह– **गौरश्व इत्य(पि भेदाभिधानमनि)बन्धनमेव** भेदसिद्धौ। न खलु व्यपदेशभेदो वस्तुभेदहेतुः। ⟨f.106^{r}⟩ प्रमाणपथप्राप्तबुद्धिनिबन्धनो हि व्यपदेशस्ततस्तु बुद्धिमर्थयमानो दुरुत्तरमितरेतराश्रयमाविशति। तदिदमाह– **सिद्धे हीति**। अ(भेद एव)वा, गवाश्वस्येव तद्व्यपदेशयोरपि भेदापाकरणादित्यर्थः। बहुव्रीहिपक्षे **सिद्धे हि गवाश्वभेदे** तेनैव न्यायेन भेदाभिधानं गौरिति चाश्व [इ](ति **चैतदुपपद्यत** इति)व्याख्येयम्। सो ऽयमनाद्यविद्याविनिर्मितभेदसमाश्रयो व्यपदेशभेद इति मन्तव्यम्।

ननु विशेषांशानां व्यावृत्तेरन्यत्वसिद्धिः। तथा च द्वैताद्वैतात्मकं जगदिति। अथ विशेषव्यावृत्तेरन्यत्वसिद्धिः। किमुभयरूपत्वाद्वस्तुनो वस्त्वन्तरे ऽनुगमो नास्ति? अश्ववस्तु गोवस्तु न भवति। अथास्त्यनुगमः, अश्वो ऽपि गौर्भवति? तत्र पूर्वस्मिन्कल्पे वस्तुनो ऽनन्वयादनुयतश्चावस्तुत्वाद्भेदवाद इत्युक्तम्। अथ विशेषव्यावृत्तावपि तद्वस्त्वनुगतम्, भवत्यश्वो गौः। कुतो

दनुपपत्तेरिति चोदयति– सत्यमिति॥

Cf. *Abhiprāyaprakāśikā* (258.21): स्वरूपपररूपाभ्यामभेदाभिधानान्नात्यन्ताभेद इति शङ्कते– सत्यमिति॥

60.9–11 Cf. *Abhiprāyaprakāśikā* (258.22–23): अद्वैतमापादयता तद्बुद्ध्यवतारोपायत्वात्कल्पनाविषयो भेदो ऽभ्युपेयः, न तु वास्तव इति परिहरति– नैतदिति॥

60.11–13 Cf. *Bhāvaśuddhi* (258.11–12): गौरिति चाश्व इति च व्यपदेशभेद एव गवाश्वस्य भेदसाधक इति, अत्राह– गौरपीति॥ अनिबन्धनं भेदसिद्धाविति शेषः।

60.9 °स्ति] *em.*; °न्ति MS **60.10** °धानं तद्भावा°] MS^{pc}; °धानन्तद्भवा° MS^{ac} **60.11** तात्त्विकं तदिति] MS^{pc}; तात्त्विकतुदिति MS^{ac} **60.12** चाश्व] श्व *ow.* MS **60.13** व्यपदेशभे°] MS^{pc}; व्यपदेशदेभे° MS^{ac} **60.14** °बुद्धिनिबन्धनो] *em.*; °बुद्धिबन्धनो MS **60.15** °र्थयमानो दुरु°] र्थ and दु *ow.* MS • सिद्धे] MS^{pc}; सिछे MS^{ac} **60.16** बेदापाकरणा°] *conj.*; बेदपाकरणा° MS **60.17** गवाश्वभेदे तेनैव] MS^{pc}; गवाभेदे नेनैव MS^{ac}

ऽन्यत्वसिद्धिः? यदि मतम्– अनुगतं चाननुगतं चाश्वे गोवस्तु। भवति चाश्वो गौः। गौस्तु गौरेव। भवत्येव हि तत्र गोवस्तु। ततो ऽन्यत्वसिद्धिरिति।

पुनश्चोदयति– **ननु विशेषांशानामिति**। यथा हि वस्त्वंश[भू](तसामान्यानुगमाद्वस्तु)नो ऽनुगमः, एवं वस्त्वंश**विशेषव्यावृत्ते**र्व्यावृत्तिरपि। तस्मादुभयात्मकं **जगदि**त्यर्थः। तदेतन्निराचिकीर्षुर्विकल्पयति– अपि नाम स्तां वस्तुनोः [सा](मान्यविशेषयो)रनुवृत्तिव्यावृत्ती। **अथ विशेषव्यावृत्तेः** कारणात्, **किमुभयरूपत्वाद्वस्तुनो वस्त्वन्तर** उभयरूपाभावाद**नुगमो नास्ति**? तथा **चाश्ववस्तु [गो](वस्तु न भवति**। द्विती)यविकल्पमाह– **अथास्त्यनुगमः**, तथा **चाश्वो ऽपि गौर्भवति**। विकल्प्य निराकरोति– **तत्र पूर्वस्मिन् कल्पे वस्तुनों ऽशद्वयसम्पन्नस्यैकांशाभावे (ऽनन्वयादन्वीयमान)स्यैकस्यांशस्यावस्तुत्वाद्भेदवाद इत्युक्तम्**। द्वितीयविकल्पं स्मारयति– **अथेति**। निराकरोति– तथा

61.6 भवत्यश्वो] भवत्यश्वो ऽपि *edn*

61.1–3 Cf. *Abhiprāyaprakāśikā* (258.25–27): वस्त्वंशभूतसामान्यानुगमादभेदो यथा, तथा तदंशभूतविशेषानुगमाद्भेदो ऽप्यस्तीति पुनः शङ्कते– नन्विति॥ तदेतन्निराचिकीर्षुर्विकल्पयति– अथेति॥
61.3–6 Cf. *Bhāvaśuddhi* (258.19–259.4): एतन्निराचिकीर्षुर्विकल्पयति– अथेति॥ व्यावृत्तेः कारणादन्यत्वसिद्धिरिति वदतः को ऽभिप्राय इति शेषः। विकल्पमेव विशदयति– किमिति॥ वस्त्वन्तर उभयरूपाभावादिति हेतुर्द्रष्टव्यः। अनुगमाभावमेवाह– अश्वेति॥
61.7–10 Cf. *Abhiprāyaprakāśikā* (259.15–19): आद्यकल्पं दूषयति– तत्रेति॥ 'अनुयत' ('अनु(मी?)यत' *edn*) इति शत्रन्तपदम्। तेनान्वीयमानसामान्यांशस्यांशद्वयसम्पन्नवस्तु(स्व)रूपत्वाभावाद्भेद इत्युक्तमित्यर्थः। द्वितीयं कल्पं स्मारयति– अथेति॥ निराकरोति– भवत्यश्व इति॥ अनुगतत्वमेव वा दर्शयति– भवत्यश्व इति॥ एवं सति सिद्धमद्वैतमित्याह– कुतो ऽन्यत्वसिद्धिरिति॥

61.1 विशेषांशानामिति] *em.*; विशेषाङ्शानामिति MS^{pc}; विशेषाङ्शावनामिति MS^{ac} • वस्त्वंश°] *em.*; वस्त्वङ्श° MS^{pc}; वत्स्त्वङ्श° MS^{ac} **61.3** तदेतन्निरा°] MS^{pc}; तदेन्निवा° MS^{ac} • स्तां] *em.*; स्ताम MS **61.4** कारणात्] *em.*; करणात् MS **61.5** °रूपत्वाद्वस्तुनो] MS^{pc}; °रूपत्वाद्यस्तुनो MS^{ac} • उभयरूपा°] MS^{pc}; उभयाभरूपा° MS^{ac} **61.7** चाश्वो] चा *ow.* MS • विकल्प्य] MS^{pc}; विकल्प MS^{ac}; वि *ow.* MS **61.7-8** वस्तुनो ऽंशद्वय°] *em.*; वस्तुनो ऽङ्शद्वय° MS^{pc}; वस्तुनो ऽङ्गंद्वय° MS^{ac}; ङ्शं *ow.* MS **61.8** °स्यैकांशा°] *em.*; °स्यैकाङ्शा° MS • °स्यैकस्यांशस्या°] *em.*; °स्वैकस्याङ्शस्या° MS^{pc}; °स्वैकस्याङ्गंस्या° MS^{ac}; ङ्श *ow.* MS **61.9** °विकल्पं] MS^{pc}; °विकल्प MS^{ac}

सति⟨f.106^{v}⟩ **भवत्यश्वो गौः**। एवं चाद्वैतमेवेत्याह– **कुतो ऽन्यत्वसिद्धिरिति**। **यदि मतम्**। सामान्यविशेषांशानुगमा(ननुगमाभ्यां वस्तुनो ऽनुगम)व्यावृत्ती इत्यर्थः। ततो ऽयोगात्यन्तायोगव्यव[च्छे](दाभ्यां सिद्धो गवाश्व)स्य भेद इत्याह– **ततो ऽन्यत्वसिद्धिरिति**।

अथ गोवस्तु कथं वक्तव्यम्? किं यद्गौर्भवत्येव, अथ यन्न भवत्यपि? तत्र पूर्वस्यां कल्पनायां न वस्तुनो ऽनुगम इत्यनन्वितानि वस्तूनि। द्वितीयस्यां वस्तुनो वस्त्वन्तरे ऽन्वयादद्वैतम्। सर्वथा येन विशेषेणायमश्वाद्गोवस्तु व्यवस्थापयत्यन्यत्, तद्विशेषयुजस्तु तस्यानन्वयाद्भेदवादः। अथानन्वयदोषान्न विशेषमाश्रयति, अभेदवाद इति न द्वैताद्वैतकल्पनोपपद्यत इति।

तदेतद्दूषयितुं विकल्पयति– **अथेति**। अयोगव्यवच्छेदेन वा गोवस्तूच्येतात्यन्तायोगव्यवच्छेदे[न](वेत्यर्थः। नोभयव्य)वच्छेदेन समस्तव्यस्तेन शक्यमेकमुपाख्यातुम्, समासस्य क्वचिदप्यसंभवाद्व्यासस्य चावस्थारूपभेदात्। एकायोगे शब्दमात्रसाम्यं वा (स्यादिति भा)वः। अयोगव्यवच्छेदे दोषमाह–

61.11–12 Cf. *Abhiprāyaprakāśikā* (259.19–21): चोदयति– यदि मतमिति॥ सामान्यविशेषांशानुगमाननुगमाभ्यामनुगताननुगतरूपत्वं वस्तुनो ऽभ्युपगम्यत इत्यर्थः।
61.12–13 Cf. *Bhāvaśuddhi* (259.12): ततोऽयोगान्ययोगाभ्यां सिद्धो गवाश्वस्य भेद इत्याह– तत इति॥

Cf. *Abhiprāyaprakāśikā* (259.25–26): तेनाश्वे गोवस्तुनो ऽत्यन्तायोगव्यवच्छेदादस्मिंश्चायोगव्यवच्छेदादस्ति तयोर्भेद इत्युपसंहरति– ततो ऽन्यत्वसिद्धिरिति॥
62.1–6 Cf. *Bhāvaśuddhi* (259.13–260.5, 7–9): तदेतद्दूषयितुं विकल्पयति– अथेति॥ अयोगव्यवच्छेदेन गोवस्तूपेयते, अत्यन्तायोगव्यवच्छेदेन वेत्यर्थः। आद्यं दूषयति– तत्रेति॥ …द्वितीयमपवदति– द्वितीयस्यामिति॥ …उक्तमर्थं सङ्क्षिपति– सर्वथेति॥

61.10 चाद्वैत°] चा *ow.* MS **61.11** मतम्] म *ow.* MS • सामान्य°] MS^{pc}; समान्य° MS^{ac} • °नुगमाननुगमाभ्यां वस्तुनो ऽनुवृत्तिव्यावृत्ती इत्यर्थः] *em.*; °नुगमव्यावृत्ति तीत्यर्थः MS **61.12** ऽयोगात्यन्तायोग°] MS^{pc}; ऽयोगात्यन्तायोगा° MS^{ac} **62.1** वा गोवस्तूच्येता°] MS^{pc}; गोवोवस्तूच्येता° MS^{ac} **62.3** °द्व्यासस्य] MS^{pc}; °द्व्यासंसस्य MS^{ac} • चावस्था°] *em.*; चावस्ता° MS **62.3-4**°भेदात्। एकायोगे] *em.*; °भेदात् दकतयागो MS^{pc}; °भेदात्। दकतयागो MS^{ac}

तत्र पूर्वस्यामिति। अत्यन्तायोगव्यवच्छेदे दोषमाह– **द्वितीयस्यामिति।** उक्तमर्थं संक्षिपति– **सर्वथेति**॥(⊗॥

द्रव्यपर्यायार्थकानां नय एतेन वारितः।
तेषामपि द्रव्यनयः पर्यायनय एव वा॥ २६॥

उक्तं दूषणं)दिगम्बरनये ऽपि योजयति– **द्रव्यपर्यायार्थकानामिति।** ते हि स्याद्द्रव्यं स्यात्पर्यायः स्याद्द्रव्यपर्यायौ स्यादवक्तव्यं स्याद्द्रव्यमवक्तव्यं स्यात्पर्या[यो] (ऽवक्तव्यः स्यादुभयम)वक्तव्यमिति ब्रुवन्तो न द्रव्यमात्रमैकान्तिकं नापि पर्यायमात्रं नापि द्रव्यपर्याययोरैकान्तिकमैक्यं नाप्यैकान्तिको भेदः किंतु [कथं](चिदनेकान्तः। स्याच्छ)(f.107r)ब्दः खल्वयं निपातस्तिङन्तप्रतिरूपको ऽनेकान्तद्योतनः। यथाहुः–

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्।
स्यान्निपातो ऽर्थयोगित्वात्ति[ङ](न्तप्रतिरूपकः॥

63.7–8 *Āptamīmāṃsā* 103

62.5–6 Cf. *Abhiprāyaprakāśikā* (260.26–27): अत्यन्तायोगव्यवच्छेदपक्षं दूषयति– द्वितीयस्यामिति॥ उक्तमर्थं सङ्क्षिप्याह– सर्वथेति॥
63.1 Cf. *Bhāvaśuddhi* (260.14): उक्तं दूषणं दिगम्बरमते योजयति–द्रव्येति॥
Cf. *Abhiprāyaprakāśikā* (260.28): उक्तं दूषणं दिगम्बरमते ऽप्यतिदिशति–द्रव्येति॥
63.5–15 Cf. *bhāmatī* (561.5–11): स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपको ऽनेकान्तद्योती। यथाहुः– 'वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्। स्यान्निपातो ऽर्थयोगित्वात्तिङन्तप्रतिरूपकः॥' यदि पुनरयमनेकान्तद्योतकः स्याच्छब्दो न भवेत्, स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात्। तदिदमुक्तम्– 'अर्थयोगित्वात्' इति। अनेकान्तद्योतकत्वे तु स्यादस्ति कथंचिदस्तीति स्यात्पदात्कथंचिदर्थो ऽस्तीत्यनेनानुक्तः प्रतीयत इति नानर्थकम्। तथा च– 'स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधिः। सप्तभङ्गनयापेक्षो हेयादेयविशेषकृत्॥' किंवृत्ते खल्वयं प्रत्यये चिन्निपातविधिना सर्वत्रैकान्तत्यागात्सप्तस्वेकान्तेषु यो भङ्गस्तत्र यो नयस्तदनपेक्षः सन् हेयोपादेयभेदाय स्याद्वादः कल्पते।

62.5 अत्यन्ता°] *em.*; अन्त्यन्ता° MS **62.6** सर्वथेति] *em.*; सर्वसेति MS **63.1** दिगम्बरनये ऽपि] गम्ब and येपि *ow.* MS • °पर्यायार्थकाना°] *em.*; °पर्यार्थिकाना° MS **63.2** स्यात्पर्यायः] त्प *ow.* MS • स्याद्द्रव्य°] MS[pc]; स्याद्रव्य° MS[ac] • °पर्यायौ] *em.*; °पर्यायो MS • स्याद्द्रव्यमवक्तव्यं] *em.*; स्याद्द्रव्यं। वक्तव्यं MS **63.3** ब्रुवन्तो] ब्रुव *ow.* MS **63.5** °प्रतिरूपको] MS[pc]; °पुतिरूपको MS[ac] **63.6** °द्योतनः] द्यो *ow.* MS **63.7** °नेकान्तद्योती] MS[pc]; °नेकान्तयोद्योती MS[ac] **63.8** स्यान्निपातो ऽर्थ°] *em.*; स्यान्निपाति। अर्थ° MS

यदि) पुनरयमनेकान्तद्योती न निपातः स्यात्, स्यादस्ति वेति वाक्ये स्यात्पदमनर्थकं स्यात्। तदिदमुक्तमर्थयोगित्वादिति। अनेकान्तद्योतकत्वे (तु स्यादस्ति कथंचिद)स्तीति गम्यते इति नानर्थकमिति। तथा च –

स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधिः।
सप्तभङ्गनयापेक्षो हेयादेयविशेषकृत्॥

[किं](वृत्ते प्रत्यये चिन्नि)पातविधिना खल्वयं सर्वत्रैकान्तत्यागात्सप्तस्वेकान्तेषु यो भङ्गस्तत्र यो नयस्तदपेक्षः। स न हेयोपादेयभेदाय स्याद्वादः कल्पते। (द्रव्यं वस्तु सामान्य)मन्वयो विधिरुत्सर्ग इत्यनर्थान्तरम्। पर्यायो विशेषो व्यावृत्तिरभावो व्यतिरेको ऽपवादो ऽवस्त्वित्यनर्थान्तरम्। तयोर्द्रव्यपर्याययोः व्य(तिरेकानुपलम्भात्क्रि)याक्रियावत्सामान्यविशेषरूपयोः साकारतत्त्वज्ञानविषययोः कथंचिदैक्यम्, देशकालस्वभावाभेदात्। यथाहुः –

द्रव्यपर्याययोरै(क्यं तयोरव्यति)⟨f.107v⟩रेकतः।
परिणामविशेषाच्च शक्तिमच्छक्तिभावतः॥ इति ।

एवं भेदो ऽपि कथंचिदेतयोः, यदाहुः –

संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः।

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषकः। स्यान्निपातो ऽर्थयोगित्वात्तव केवलिनामपि॥
63.12–13 *Āptamīmāṃsā* 104
स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधिः। सप्तभङ्गनयापेक्षो हेयादेयविशेषकः॥
63.20–21, 23–24 *Āptamīmāṃsā* 71–72
द्रव्यपर्याययोरैक्यं तयोरव्यतिरेकतः। परिणामविशेषाच्च शक्तिमच्छक्तिभावतः॥
संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः। प्रयोजनादिभेदाच्च तन्नानात्वं न सर्वथा॥

63.9 ॰रयमनेकान्त॰] MS^{pc}; ॰रयन्तनेकान्त॰ MS^{ac} • निपातः स्यात्] *em.*; निपात स्यात MS • स्यादस्ति] MS^{pc}; स्यादस्ते MS^{ac} **63.10** स्यात्] *em.*; स्यात MS • ॰योगित्वादिति] MS^{pc}; ॰योगादिति MS^{ac} **63.11** गम्यत इति] MS^{pc}; गम्यते MS • नानर्थकमिति] MS^{pc}; नानर्थमिति MS^{ac} **63.12** सर्वथैकान्त॰] MS^{pc}; सर्वथैकन्त॰ MS **63.13** ॰भङ्गनयापेक्षो] ङ्ग and पेक्षो *ow.* MS • हेयादेय॰] *em.*; हेमादेय॰ MS **63.14** खल्वयं] MS^{pc}; खल्वय MS^{ac} • ॰त्यागात्सप्त॰] *em.*; ॰योगात्सप्त॰ MS; त्स *ow.* MS **63.15** भङ्गस्तत्र] ङ्ग *ow.* MS **63.16** ॰मन्वयो] MS^{pc}; ॰न्वयो MS^{ac} • व्यावृ॰] MS^{pc}; व्यवृ॰ MS^{ac} **63.17** व्यतिरेको] *conj.*; व्यतोएको MS • वस्त्वित्यनर्थान्तरम्] *conj.*; वस्त्वेयेनर्थान्तदे MS^{pc}; वस्त्वेवयेनर्थान्तदे MS^{ac} **63.19** ॰विषययोः] *em.*; ॰विषयोः MS **63.20** द्रव्य॰] MS^{pc}; द्रष्टव्य॰ MS^{ac}

[प्र](योजनादिभेदा)च्च तन्नानात्वं न सर्वथा॥ इति।

अपर्यायशब्दाभिधेये हि न जातु लोके मृन्मणिकमल्लकादयः शब्दा अनर्थान्तरतया निरूढवृत्तयः, किं तु य[था](विषयं भिन्नवृत्तय ए)व। अपि च सामान्यमेकं पर्यायास्तु बहवः। अन्वयो द्रव्यस्य स्वलक्षणं व्यावृत्तिश्च पर्यायाणाम्। उपयोगश्च भिन्नः, मृदो हि घटायोपयुञ्ज[ति ज](लमध्वाद्याहर)णाय तु घटा न मृन्मात्रम्। ते ऽमी संज्ञादिभेदा नैकान्तिक एकत्वे द्रव्यत्वे द्रव्यपर्याययोः कल्पन्त इति कथंचिद्भेदो ऽभ्युपगन्तव्यः। [द्र](व्यमात्रस्य पर्या)यमात्रस्य वा कदाचिदनालोचनात्कथंचिदपि नाभेदो ऽनयोरिति चेत्? न, आलोचनस्य व्यवहारानङ्गतया प्रमाणभावाभावात्। तत्त्व[ग्र](हणाय ह्यनुत्तर)कर्माणमातिष्ठन्त आर्हताः। सप्तापि च तत्त्वानि जीवास्रवादीनि द्रव्यपर्यायौ तत्त्वं साकारमित्यालोचनं निवर्तयन्ति। ⟨f.108ʳ⟩ आकारो हि विकल्पः। इदं किल सकलदेशभेदभिन्ने द्विविधे धीन्द्रियपथातिवर्तिनि प्रत्यक्षे साक्षाज्जीवपरिणामभेदे परोक्षे चेन्द्रि(यागोचर एकान्ते)नाजीवस्य परिणामे ज्ञाने समानम्। तच्च द्रव्यपर्यायौ विशेषणविशेष्यतया सामानाधिकरण्येन समाकलयदनयोरात्यन्तिकं भेदम(भ्युपगच्छत्)स्वं स्याद्वादोपगृहीतमनुभूयते। इतरथा तु वस्तुनः सत्त्व ऐकान्तिके सर्वथा सर्वदा सर्वत्र सर्वात्मना सदिति न तदीप्साजिहा(साभ्यां कथंचित्क्व)चित्कश्चित्कुतश्चित्प्रवर्तेत निवर्तेत वा,

---

63.39–42 Cf. *Bhāmatī* (561.11–13): यदि वस्त्वेवेत्येवैकान्ततस्तत्सर्वथा सर्वदा सर्वत्र सर्वात्मनास्त्येवेति न तदीप्साजिहासाभ्यां क्वचित्कदाचित्कथंचित्कश्चित्प्रवर्तेत निवर्तेत वा प्राप्तप्रापणीयत्वात्, हेयहानानुपपत्तेश्च। अनैकान्तपक्षे तु क्वचित्कदाचित्कस्यचित्सत्त्वे हानोपादाने कल्पेते इति।

63.24 तन्नानात्वं न सर्वथा॥ इति] *em.*; तत्रान्यत्वम्। न सर्व्वेति MS*pc*; तन्नान्यत्वम्। न सर्व्वेति MS*ac* **63.25** अपर्यायशब्दाभिधेये] *conj.*; अपर्यायशब्दाभिधेयौ MS • न] MS*pc*; र MS*ac* • मृन्मणिक°] न्म *ow.* MS • शब्दा अन°] *em.*; शब्दा ऽन° MS **63.27** पर्यायास्तु] स्तु *ow.* MS **63.27–28**पर्यायाणाम्] MS*pc*; पर्याणां MS **63.28** मृदो] *em.*; मृदा MS **63.29** तु घटा] *em.*; त्व घटा MS **63.30** °पर्याययोः] MS*pc*; °पर्यायत्वयोः MS • °चिद्भेदो] द्भे *ow.* MS **63.31** °दनालोचनात्] *em.*; °दालोचनात् MS **63.32** व्यवहारा°] *em.*; द्यवहारा° MS; हा *ow.* MS **63.33** °मातिष्ठन्त] *em.*; °मतिष्ठन्त MS **63.34** °मित्यालोचनं निवर्तयन्ति] MS*pc*; °मालोचनं निवर्तयति MS*ac* **63.36** चेन्द्रि°] MS*pc*; चेंद्रद्रि° MS*ac* (द्र without head mark) **63.39** इतरथा] था *ow.* MS • सत्त्व ऐकान्तिके] MS*pc*; सत्त्वरैकान्तिकेन MS*ac* **63.40** °श्चित्प्रवर्तेत] MS*pc*; °श्चित्प्रवर्तेन MS*ac*

प्राप्तप्रापणीयत्वाद्धेयहानानुपपत्तेश्च। कथंचित्क्वचित्कदाचित्कस्यचित्केनचित्पुनः [स](त्त्वे हानोपादाने) प्रेक्षावतां कल्पेते इति।

ये च– द्रव्यं नित्यं मृत्सुवर्णादि, तस्य घटरुचकादयः पर्याया विशेषाख्या उपायिन अपायिनश्चाव्यतिरेकाः। न च ते द्रव्यमेव, तस्य स्थितिमत्त्वात्। न च ततो ऽत्यन्तं व्यावर्तन्ते, भेदेनानुपलब्धेः। द्रव्यस्यैव रुचकादिरूपेण प्रत्ययात्। एवं द्रव्यपर्यायरूपं वस्तु। अथ तु द्रव्यमेव स्यात्, वर्धमानकभङ्गेन रुचकक्रियायां न किंचिदुत्पन्नं नष्टं वेति प्रीतिशोकौ तदर्थिनोर्न स्याताम्। अथ तु पर्यायमात्रम्, हेमार्थिनो मध्यस्थता न स्यात्। पर्यायमात्रे हि हेम्नि हेम्नो विनाशात्पर्यायविनाशे कथं मध्यस्थता, उत्पादे वा? तस्माद्द्रव्यपर्यायरूपत्वाद्वस्तुन उत्पत्तिस्थितिभङ्गानामेकत्र संभवाद्द्रव्यरूपस्थितेर्माध्यस्थ्यम्, पर्याययोरुत्पत्तिविनाशाभ्यां प्रीतिशोकाववकल्पेते इति– मन्यन्ते।

तदेतदाह– **ये च द्रव्यं मृत्सुवर्णादि, तस्य घटरुचकादयः पर्यायाः।** पर्यायस्वरूपं विवृणोति– **विशेषा(ख्या** इति। विशद)यति– द्रव्यस्यानुपजनापाये ऽप्युपायिनो ऽपायिनश्च। चेनानुक्तसंज्ञादिभेदं समुच्चिनोति। अभेदबीजं नि-

---

64.1 ये च] ये ऽपि *edn* • तस्य] तस्य तु A; तस्य च *edn* 64.5 अथ तु] B; *Bhāvaśuddhi*; अथ *edn*

64.1–3 Cf. *Bhāvaśuddhi* (260.22–261.3): निराकार्यस्वरूपं (राकर्यं) विवृणोति– ये ऽपीति॥ ···शब्दान्तरेण तत्स्वरूपं विशदयति– विशेषेति॥ व्यवस्थितस्वरूपे द्रव्य उपजनापजनवन्तः।
64.3–5 Cf. *Bhāvaśuddhi* (261.3–5): चशब्दादनुगतसंज्ञादिभेदं समुच्चिनोति। तर्हि विरुद्धधर्मवत्त्वाद्द्रव्यपर्यायभेदाद् नैकं द्व्यात्मकम्, अत्राह– अव्यतिरेका (व्यतिरेका *edn*) इति॥ देशतः, कालतः, स्वरूपतश्च व्यतिरेकरहिता इत्यर्थः।

63.41 °प्रापणीय°] *em.*; °प्राणीय° MS^{pc}; °प्राणनीय° MS^{ac} **63.42** प्रेक्षा°] MS^{pc}; प्रेख्या° MS^{ac} **64.1** मृत्सुवर्णादि] मृत्सु *ow.* MS • घट°] MS^{pc}; पट° MS^{ac} **64.2** °नुपजनापाये] MS^{pc}; °नुपजनापोये MS^{ac} **64.3** चेनानुक्त°] MS^{pc}; चेनानु° MS^{ac}

क्षिपति– **अव्यतिरेका** देशतः (कालतः स्वरूप)तश्च। क्षिप्तं संस्करोति– **न च ते द्रव्यमेव**। न द्रव्यादत्यन्तमभिन्ना इत्यर्थः। न च ततो ऽत्यन्तं ⟨f.108^{v}⟩ व्यावर्तन्ते। हेयादेयविशेषकृदिति सूचितम्। हेत्वन्तरमाह– **अथ तु द्रव्यमेव** पर्यायस्ततो न तस्माद्भिद्येत, ततो **वर्धमानकभङ्गेन** [रु](**चकक्रियायां** सत्यां) तेभ्यो द्रव्यस्याभिद्यमानत्वात्तदात्मकत्वाच्च पर्याययोर्वर्धमानकरुचकयोर्न **किंचिदुत्पन्नं न नष्टं वेति प्रीतिशोकौ तदर्थिनोर्न स्या**(ताम्। **अथ तु पर्याय**)**मात्रम्**, न पुना रुचकवर्धमानकाभ्यां कथंचिदप्यतिरिच्येत द्रव्यम्, ततो **हेमार्थिनो मध्यस्थता न स्यात्**। कुतः? **पर्यायमात्रे हि हेम्नि प**(**र्यायविनाशे** नष्टं) हेमेति तन्नाशात्**कथं मध्यस्थता**। वर्धमानकार्थी च तन्नाशादयं तप्येत **रुचकोत्पादे वा** हेमोत्पन्नमिति हृष्येत्। स्याद्वादाभ्युपगमे तु स-(र्वमुपपादनीयमित्या)ह– **तस्माद्द्रव्यपर्यायरूपत्वादिति**। **ये ऽपि मन्यन्त** इत्याद्यन्तयोरन्वयः।

तन्नीतिरप्यनेनैव निराकृता प्रकारेण। तथा हि– तेषामपि वस्तुनो वस्त्वन्तरान्वये ऽपि भागाभावाद्द्रव्यमात्रं स्यात्। अथ न वस्त्वन्वेति द्रव्यपर्यायरूपत्वाद्वस्तुनः, पर्यायान्तरे च पर्याया-

---

64.5 Cf. *Bhāvaśuddhi* (261.6–7): न चेति॥ न द्रव्यादत्यन्तमभिन्ना इत्यर्थः।
64.6–9 Cf. *Bhāvaśuddhi* (261.12–15): द्रव्यमात्रं तर्हि स्यात्, अत्राह– अथ त्विति॥ वर्धमानकभङ्गेन रुचकक्रियायां सत्यां द्रव्यस्य विद्यमानत्वात्तदात्मकत्वाच्च पर्याययोः शरावरुचकयोर्न किञ्चिदुत्पन्नम्, नष्टं वेति प्रीतिशोकौ तदर्थिनोर्न स्यातामित्यर्थः।
64.9–11 Cf. *Śaṅkhapāṇi* (177.6–7): पर्यायमात्रे च वस्तुनि तदुत्पादे विनाशे च हेम्नो ऽप्युत्पत्तिविनाशान्मध्यस्थता न स्यात्।
64.12–14 Cf. *Bhāvaśuddhi* (261.17–262.4): नष्टवर्धमानकाभेदमुत्पद्यते हेमेति मध्यस्थता स्यात्, अत्राह– उत्पादे वेति॥ हृष्येदिति शेषः। यस्मादात्यन्तिके भेदे, अभेदे वानुपपत्तिः, तस्मात्स्याद्वादोपगमेन (तस्माद्वादोप॰ *edn*) सर्वमुपपादनीयमित्याह– तस्मादिति॥

64.4 क्षिप्तं] *em.*; क्षिप्त MS • संस्करोति] MS^{pc}; संकरोति MS^{ac} **64.5** द्रव्यमेव] *em.*; द्रव्यमेव। न च ते द्रव्यमेव MS **64.5** हेयादेय॰] *em.*; तेयादेय॰ MS **64.7** न तस्माद्] *em.*; न स्माद् MS **64.8** ॰स्याभिद्यमान॰] *conj.*; ॰स्य भिद्यमान॰ MS^{pc}; ॰स्य विद्यमान॰ MS^{ac} **64.8-9** ॰रुचकयोर्न] *em.*; ॰रुचकर्योर्न MS^{pc}; ॰रुचर्योर्न MS^{ac} **64.9** नष्टं] *em.*; मृष्टं MS **64.10** ॰दप्यतिरिच्येत] *em.*; ॰दप्यितिरिच्येत् MS **64.12** तन्नाशाद॰] MS^{pc}; तन्नाशद॰ MS^{ac} **64.13** स्याद्वादाभ्युप॰] *em.*; स्याद्रदभ्युप॰ MS **64.14** तस्माद्द्रव्य॰] MS^{pc}; तस्माद्व्य॰ MS^{ac}

न्तरस्याननुगमादनन्वितानि तर्हि व्यावृत्तस्वभावानि वस्तूनि। यस्यानुगमः कल्प्यते तन्मात्ररूपस्यावस्तुत्वात् पर्यायमात्रम्। अवस्थितं हि द्रव्यमुच्यते। न चैवमवस्थितं किंचिदेकं वस्त्वस्ति। वस्तुनस्त्वपोद्धृतस्यांशस्यावस्थानकल्पना कल्पनैव, वस्तुनश्चित्रत्वात्, तस्य चातथाभावादिति।

तदेतद्दिगम्बरमतं निराकर्तुमुपक्रमते– **तन्नीतिरपीति**। ता[मे](व प्रपञ्चयति– **त)था हीति**। यत्तदन्वेति यच्च व्यावर्तते ते चेद्वस्तुनी न तर्हि द्व्यात्मकमेकम्। यथाहुस्त एव–

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायवि(द्विषाम्। इति।

तस्मा)दनुयतोर्वा वस्तुत्वं परस्परापेक्षयोर्वा द्रव्यपर्याययोरेषितव्यम्, तत्र चैतद्दूषणमिति। ⟨f.109^{r}⟩ यद्युच्येत– प्रतीयते तावदुभयात्मकमेकम्। न चैष प्रत्ययो निराकार आलोचनवत्, नापि संदिग्धः, न चास्य देशान्तरादिष्वस्ति बाधो [लो](पो वा। एष) तस्मात्प्रमाणम्। न च प्रमाणसिद्धः स्याद्वादो निर्भेदमर्हत्यतिप्रसङ्गात्। तस्माद्वस्तुनों ऽशावपोद्धृत्य कथंचिदनुगमव्यावृत्ती समर्थनीये। (एवं ह्याहुरप)त्रपाः–

द्रव्यपर्याययोरैक्यमभेदप्रतिपत्तितः।
तथा कथंचिन्नानात्वं भेददृष्टेर्वशादपि॥

65.4 *Āptamīmāṃsā* 74ab: विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम्।

65.1 Cf. *Bhāvaśuddhi* (262.4–5): तन्मतं निराकर्तुमुपक्रमते– तन्नीतिरपीति॥
65.1–2 Cf. *Śaṅkhapāṇi* (177.10–11): एतदेव प्रपञ्चयति– तथा हीति॥

65.2 यत्तदन्वेति] MS^{pc}; यत्तन्वेति MS^{ac}; त्तदन्वे *ow.* MS • व्यावर्तते ते] MS^{pc}; व्यावर्तते MS^{ac} **65.4** विरोधान्नोभयैकात्म्यं] *em.*; विरोधान्नोभयेकात्म्यां MS^{pc}; विरोधान्येभयेकात्म्यां MS^{ac} • स्याद्वाद०] MS^{pc}; स्याद्वादा० MS^{ac} **65.5** ०दनुयतोर्वा] *em.*; ०दनुयतोवा MS • ०पर्याययोरेषितव्यं] *em.*; ०पर्यायोरेषितव्यं MS^{pc}; ०पर्यायोरिषितव्यं MS^{ac} **65.6** चैतद्दूषण०] MS^{pc}; चैयतद्दूषण० MS • ०मेकम्] *em.*; ०मोकं MS **65.7** आलोचन०] *em.*; अलोचन० MS **65.8** ०ष्वस्ति] *em.*; ०ष्टस्ति MS **65.9** ०सिद्धः] *conj.*; ०सिद्ध MS • ०नों ऽशावपो०] *em.*; ०नो ऽङ्शावपो० MS **65.11** ०पर्याय०] MS^{pc}; ०पर्या० MS^{ac} • ०योरैक्य०] *em.*; ०योःचैक्य० MS **65.12** ०चिन्नानात्वं] *em.*; ०चिन्नानात्व MS

अन्यथोपगमे न स्याद्वस्तुतत्त्वव्यवस्थितिः॥ इति।

[न](नु वस्तु सामान्यादि)रूपं परिस्फुटमिति। तत्राह– **वस्तुनस्त्वपोद्धृतस्यांशस्यावस्थानकल्पना** द्रव्यत्वकल्पना **कल्पनैव**। न खलु काल्पनिकं भवितुमर्हति। न [चा](त्र प्रमाणं चित्रप्र)त्ययः, उक्तया नीत्या बाधितत्वात्। न चान्यथासिद्धो ऽनुभवो नीत्या न बाध्यते। देहात्माभिमानस्य च ज्वालाद्येकत्वस्य चानुभवोपस्थापि(तस्यापि नीत्या व्यव)धिदर्शनात्, अन्यथा तस्यापि तात्त्विकत्वप्रसङ्गादिति भावः॥ ⊗॥

अपि च

उत्पादस्थितिभङ्गानामेकत्र समवायतः।
प्रीतिमध्यस्थताशोकाः स्युर्न स्युरिति दुर्घटम्॥ २७॥

यस्य खलु द्रव्यात्पर्याया भिद्यन्ते तस्य– द्रव्यमात्रार्थिनो द्रव्यस्य स्थितेर्विनाशाभावादपूर्वस्यानुत्पादान्मध्यस्थता, रुचकार्थिनस्तस्यापूर्वस्योत्पत्तेः प्रीतिः, वर्धमानकार्थिनस्तस्य विनाशाच्छोकः– इति व्यवस्था कल्पते। यस्य तु न पर्यायेभ्यो ऽन्यद्द्रव्यं न द्रव्यादन्ये पर्यायाः, तस्य उत्पत्तिस्थितिभङ्गानामेकत्र समवाये द्रव्यार्थिनो मध्यस्थता भवेत्, न भवेच्च। प्रीतिशोकौ स्याताम्, न स्याताम्।

66.7–8 यस्य तु न पर्यायेभ्यो ऽन्यद्द्रव्यं] A; यस्य तु पर्यायेभ्यो ऽनन्यद्द्रव्यं *edn*

65.11–13 Source unknown:
द्रव्यपर्याययोश्चैक्यमभेदप्रतिपत्तितः। तथा कथंचिन्नानात्वं भेददृष्टेर्वशादपि॥
अन्यथोपगमे न स्याद्वस्तुतत्त्वव्यवस्थितिः।

65.14 Cf. *Abhiprāyaprakāśikā* (262.25–26): ननु सामान्यादिरूपं वस्त्ववस्थितमस्तीति, तत्राह– वस्तुनस्त्विति॥

65.14 °स्फुटमिति] *em.*; °स्फुटामिति MS **65.15** °स्यांशस्या°] °स्याक्षेस्या° MS^{pc}; °स्याक्षेपस्या° MS^{ac} • °कल्पनैव] *em.*; °कल्पनैवः MS **65.17** ऽनुभवो नीत्या] *em.*; नुभे। नीत्या MS **65.18** °लाद्येकत्वस्य] *em.*; °लादेकत्वस्य MS • चानुभवो°] MS^{pc}; चनुभवो° MS **65.19** तात्त्विक°] *em.*; तात्तिक° MS

अभेदैकान्तासिद्धौ प्रसञ्जितमव्यवस्थानमनेकान्तपक्षे ऽप्यापादयति– (अपि चे)⟨f.109^{v}⟩ति। स्याद्वादे व्यवस्थाभावमापादयितुं तत्प्रतिपक्षे व्यवस्थां दर्शयति– **यस्य खल्विति**। अनेकान्तवादे तु न व्यवस्थेत्याह– **यस्य तु न पर्यायेभ्यो ऽत्य**]**(न्तमन्यद्द्रव्यमपि)** त्वनन्यदपि। नात्यन्तं द्रव्यादन्ये पर्याया अपि त्वभिन्ना अपि। **तस्य** वादिनो मत **उत्पत्तिस्थितिभङ्गानामेकत्र समवाये सत्यभेदाद्द्रव्यार्थिनो [म](ध्यस्थता भवेद्)** द्रव्यं वर्धमानकरूचकोपजनापाये ऽपि ताभ्यां कथंचिद्भिन्नतयावस्थितमिति, **न वा भवेन्मध्यस्थता**। तस्मादेव वर्धमानकादभिन्नं हि तत्, तच्च वि(नष्टमिति शोकः) स्यात्। रुचकाच्चाभिन्नं तत्, तच्च प्रागसदुत्पन्नमिति हर्षो ऽप्यस्य स्यादिति।

न हि तद्द्रव्यमवतिष्ठत एव, विनश्यत्यपूर्वं चोत्पद्यते। तत्र विनाशादपूर्वोत्पत्तेश्च प्रीतिशोकौ स्याताम्, न मध्यस्थता। मध्यस्थता च स्थितेः स्यात्– इति दुर्घटमापद्येत। तथा वर्धमानकार्थिनस्तन्नाशाच्छोकः स्यात्। न च स्यात्, स्थितेः। प्रीतिश्च तस्यापूर्वस्योत्पादात्स्यात्। न च भवेत्, पूर्वस्यैव स्थितेः। विनाशाच्च शोकः स्यादिति। अथ भेदो ऽप्यस्तीति नायं दोषः। अभेदो ऽप्यस्तीति किं न भवति? अथ नात्यन्तमभेदः, तेन न संकरः। नात्यन्तमभेद इति व्यवस्थापि न युज्यते। न

66.1–4 Cf. *Bhāvaśuddhi* (263.5–8): अभेदैकान्तासिद्धौ प्रसञ्जितमप्यव्यवस्थानमनैकान्तिकपक्षे ऽप्यापादयति– अपि चेति॥ स्याद्वादे व्यवस्थाभावमापादयितुं तत्प्रतिपक्षे व्यवस्थां दर्शयति– यस्येति। अनेकान्तवादे तदनुपपत्तिरित्याह– यस्य त्विति॥

Cf. *Abhiprāyaprakāśikā* (263.19–21): अभेदैकान्ते प्रसञ्जितमव्यवस्थानमनेकान्तपक्षे ऽप्यापादयति– अपि चेति॥ स्याद्वादे व्यवस्थाभावमापादयितुं भेदपक्षे व्यवस्थामाह– यस्य खल्विति। अनेकान्तवादे तु न व्यवस्थेत्याह– यस्य त्विति॥

66.1 °सिद्धौ] *em.*; °सिद्धै MS • °पक्षे ऽप्यापादयति] *em.*; °पत्त्यप्योपाद्‌यति MS **66.2** °मापादयितुं] MS^{pc}; °मोपादयितुं MS^{ac} **66.4** पर्यायेभ्यो] *em.*; र्यायेभ्यो MS • त्वनन्यदपि] MS^{pc}; त्वदपि MS^{ac} • पर्याया] *em.*; पर्याय MS **66.6** सत्यभेदा°] *em.*; सति त्र्यभेदा° MS **66.7** °तया°] या *ow.* MS • तस्मादेव] *conj.*; तस्यैवा MS **66.8** रुचकाच्चा°] MS^{pc}; रुच्चचकाच्चा° MS^{ac} **66.8-9** °भिन्नं तत्, तच्च] MS^{ac}; °भिन्नत्तच्च MS^{pc} **66.9** °सदुत्पन्न°] दुत्प *ow.* MS

चास्य किंचित्क्वचिदेकान्ततः सर्वत्रानेकान्तमभ्युपयतः, येनायं विशेष उच्यते– नात्यन्तमभेद इत्यसंकर इति।

नन्ववस्थितमेव द्रव्यमुच्यत इति कुतो ऽस्य विनाशोपजनावित्यत (आह– **न हि तद्द्रव्यम)वतिष्ठत एव किं तु विनश्यत्युत्पद्यते च**, पर्यायाभ्यामभेदात्। नियमे स्थित्यादीनामात्यन्तिको भेदः स्यात्, **न च** भेदाभेदयोः [सं](**कर** इत्युभावपि) स्वोचितं कार्यं वर्तयेताम्। न खल्वनयोरस्ति विशेषो यदन्यतरोपमर्देनान्यतरो बलीयान्वर्तयेदात्मोचितं कार्यमित्याह–(**तत्र विनाशादिति**।) ⟨f.110ʳ⟩ द्रव्यार्थिनं प्रति दुर्घटमापाद्य वर्धमानकरुचकार्थिनावपि प्रत्यापादयति– **तथेति**। अपि चायमनेकान्तमैकान्तिकमभ्युपगच्छेद (नैकान्तिकं वा। पूर्वस्मि)न्कल्पे स्याद्वादः सर्वथैकान्तत्यागादिति व्याहन्येत। अ⟨न्यस्मिन्न⟩नेकान्तस्यैवानैकान्तिकत्वम्, तस्मादनैकान्तो ऽप्यनैकान्तिकः। तथा च भेदो ऽप्यैका(न्तिको न भवतीति संकर)एवेत्याह– **न चेति**।

तथा च

67.6–7 Cf. *Abhiprāyaprakāśikā* (263.26–27): द्रव्यार्थिनं प्रति दुर्घटमापाद्य, वर्धमानकरुचकार्थिनावपि प्रत्यापादयति– तथेति॥

67.7–10 Cf. *Bhāvaśuddhi* (264.13–16): किञ्चायमनेकान्तमैकान्तिकमिच्छेत्? अनैकान्तिकं वा? आद्ये न स्यात् स्याद्वादः; अन्त्ये अनेकान्तस्यैवानैकान्तिकत्वात्। अन्यस्मिन्ननैकान्तो ऽप्यनैकान्तिकः। तथा च भेदो ऽप्यनैकान्तिक इत्याह– न चास्येति॥

Cf. *Abhiprāyaprakāśikā* (264.26–28): अपि चानैकान्तिकत्व मपि तवैकान्तिकम्? अनैकान्तिकं वा? आद्ये स्याद्वादो व्याहन्यते; क्वचिदनैकान्तिकत्वानभ्युपगमात्। द्वितीये ऽपि भेदो ऽप्यनैकान्तिक इति सङ्करप्रसङ्ग इत्याह– न चास्येति॥

67.2 °तिष्ठत] MS^{pc}; °तिष्ठत इ MS^{ac} • विनश्यत्युत्पद्यते] MS^{pc}; विनस्यत्युद्मत्पते MS^{ac} (द्म without head mark) **67.3** °नामात्यन्तिको] नामा *ow.* MS (an illegible akṣara erased after मा) • स्यात्, न च] MS^{pc}; स्यति तत्र MS^{ac}; च्च *ow.* MS **67.4** स्वोचितं] MS^{pc}; सोचितं MS^{ac} **67.5** °तरोपमर्दे°] तरो *ow.* MS • बलीयान्वर्तयेदात्मोचितं] MS^{pc}; बत्तलीयान्वर्तयेदात्मोदितं MS^{ac} **67.6** °मापाद्य] द्य *ow.* MS • वर्धमानक°] MS^{pc}; वत्तर्धमानक° MS^{ac} (त्त without head mark) **67.7** चायमनेकान्तमैका°] *em.*; चयमनेकान्तनैका° MS **67.8** °न्कल्पे] MS^{pc}; °न्काल्पे MS^{ac} • °त्यागादिति] *em.*; °त्यासादिति MS **67.8–9**व्याहन्येत। अ ⟨न्यस्मिन्न⟩नेका°] *em.*; व्याहन्येतारनका° MS **67.9** °न्तस्यैवानैकान्तिकत्वम्] *em.*; °न्तत्यैकग्रेकान्तिकत्वत्य MS • ऽप्यनैकान्तिकः] MS^{pc}; वात्मैकान्तिकः MS^{ac} (वा without head mark) **67.10** भेदो] भे *ow.* MS

नैकान्तः सर्वभावानां यदि सर्वविधानतः।
अप्रवृत्तिनिवृत्तीदं प्राप्तं सर्वत्र ही जगत्॥ २८॥

यदा हि सर्वप्रकारेष्वनैकान्तिकत्वं भावानाम्, तथा सति– नायं लोकः क्वचिदभिमतसाधनताप्रकारमवधार्य प्रवर्तेत, यतो नासौ तथैव। नापि निवर्तेत, यतो नासावतथैव। तथा दुःखहेतोर्न निवर्तेत, नासौ तथैव। नापि न निवर्तेत, यतो नासावतथैव– इति कष्टां बत दशामापद्येत।

अपि च पशवो ऽपि तावत् †पावकादिधरिण्या† पिपासवः पाथसि प्रवर्तमानाः सांव्यवहारिकेण प्रमाणेन नू[न]मभि(मते प्रवर्तन्ते निवर्तन्ते) पावकादिभ्यः। अयं तु स्याद्वादकेशरी पशोरपि पशुः सर्वं सर्वात्मकमभिमन्यमानः क्व प्रवर्ततां कुतो वा निवर्ततामिति **कष्टां ब(त दशामापद्येतेतीम)**मर्थमुपजीव्याह– **तथा च नैकान्तः सर्वभावानामिति।**

अथ वा यदुक्तम्– प्रीतिमध्यस्थताशोकाः स्युर्न स्युरिति दुर्घटमिति, तत्र ब्रूयुः– सर्ववस्तुषु सर्वप्रकाराणामनैकान्तिकत्वात्का दुर्घटता? तथा हि– प्रीतिमध्यस्थताशोका नैकान्ततः सन्ति, नैकान्ततो न सन्तीति। अत्रोच्यते– नैकान्तः सर्वभावानामिति। यदि खलु प्रीत्यादीनां सदसत्त्वे नैकान्तिके– न प्रीत्यर्थी प्रीतिसाधनेषु प्रवर्तेत, प्रीतेर्विद्यमानत्वात्। नापि न प्रवर्तेत, तस्या अभावात्। तथा दुःखनिवृत्त्यर्थी न दुःखसाधनसंपर्कं परिहरेत्, तस्यासत्त्वात्। नापि न परिहरेत्, तस्य सत्त्वात्– इत्यप्रवृत्तिनिवृत्तिकं बत विश्वमापन्नमिति।

69.5 सदसत्त्वे नैकान्तिके] *em.*; सदसत्त्वे ऽनैकान्तिके *edn*

68.2 नूनमभि॰] *em.*; नूमभि॰ MS 68.3 अयं तु] MS^{pc}; अयत्र MS^{ac} 68.4 कष्टां ब॰] कष्टा ब॰ MS^{pc}; कष्टा नूद॰ MS^{ac} 68.5 च नैकान्तः] MS^{pc}; चे नैकान्तः MS^{ac}

आशङ्क्योत्तरश्चेत्याह– **अथवेति**। तस्मात्स्याद्वादिनां गाथा परिशोध्य पठित-[व्या]–

(स्याद्वादः सर्वथैकान्त)त्यागात्किंवृत्तचिद्विधिः।
सप्तभङ्गनयापेतो हेयादेयविशेषकृत्॥ इति।

तत्र सांव्यवहारिकसिद्धौ साधनं संज्ञादिभेदं मृषामाह, न पुनरभे(दग्रहणापे-क्षं) देशकालस्वभावभेदम्। को नु खलु द्रव्यपर्याययोर्देशो ऽभिमतो यदभेदादैक्यम्? ⟨f.110ᵛ⟩ आधारो वा स्वरूपं वा? यदि तावत्पर्यायाणां च द्रव्यस्य च व्यक्तिरेकाधार उच्येत तर्हि रूपरसगन्धस्पर्शानां पर्यायाणामेकद्रव्यवर्त्तिना(मैक्यम्, देशाभेदा)त्। ततश्चात्यन्तिकमैक्यं स्यादिति स्याद्वादो दत्तजलाञ्जलिः प्रसज्येत। भेदे वा कथमनैकान्तिको न हेतुर्देशाभेदादिति। कथंचिदभेदः [क](थंचिच्च भेदः सिध्यती)ति नः पक्षे नैव व्यभिचार इति चेत्। न, कथंचित्पदार्थानवधारणात्। द्रव्यरूपतत्पर्यायभेदे किल कथंचित्पदार्थः पर्यायरूपतयो[प](स्थित इत्यस्ति भेदग्रह)णे ऽपि चेदभेदो हन्त हतस्तर्हि कथंचिदर्थः। न चास्य संज्ञादिभेदो ऽप्यात्यन्तिक इति कुतस्ततो ऽपि भेदमतिः? स्वरूपस्य तु देशत्वे तदे(तत्तयोः स्वभावः)स्यात्। अनर्थान्तरं खल्वेतद्द्रव्यपर्याययोरैक्यमिति च तयोः स्वभाव इति। एवं सो ऽयं सामीभूतानेकान्तः स्याद्वादकेशरी साधयेदोदनमे(वेति सांप्रतम्।) न च स्वभावभेदादिनेन्द्रियजः परोक्षो विकल्पो द्रव्यपर्याययोर्भेदाभेदावगाही हेम वर्धमानकं नीलमुत्पलः शङ्खः श्वे(त इत्यादिः सामाना)⟨f.111ʳ⟩धिकरण्यनि-

---

69.1 Cf. *Bhāvaśuddhi* (265.10): शङ्क्योत्तरं वायं श्लोक इत्याह– अथवेति॥
Cf. *Abhiprāyaprakāśikā* (265.25–26): आशङ्क्योत्तरं वायं श्लोक इत्याह– अथवेति॥

69.4 हेयादेयविशेषकृत्॥ इति] *em.*; हेदेयविशेषतदिति MS^{pc}; हेदेविशेषतदिति MS **69.5** तत्र] त्र *ow.* MS; मृषा॰] *em.*; मृष्या॰ MS **69.7** तावत्पर्यायाणां] MS^{pc}; तात्पर्याणां MS^{ac} • द्रव्यस्य च] MS^{pc}; द्रव्यस्य MS^{ac} **69.8** तर्हि] MS^{pc}; कृतर्हि MS^{ac} • पर्यायाणा॰] या *ow.* MS **69.9** ततश्चा॰] श्चा *ow.* MS **69.10** प्रसज्येत] ज्ये *ow.* MS **69.11** कथंचिद॰] MS^{pc}; कथंचिर्द॰ MS^{ac} • नः पक्षे नैव] *conj.*; न पेक्षे णैव MS^{pc}; न पक्षे णैव MS^{ac} **69.12** ॰तत्पर्यायभेदे] *em.*; ॰तत्पत्पभेदे MS **69.13** पर्यायरूपतयो॰] MS^{pc}; पर्यायरूपतयेयो॰ MS^{ac} **69.16** ॰पर्याययोरैक्य॰] *em.*; ॰पर्यायोरैक्य॰ MS • एवं] *conj.*; वं MS **69.17** सामीभूता॰] *em.*; सासीभूता॰ MS • ॰दोदन॰] *em.*; ॰दौदन॰ MS **69.18** हेम] MS^{pc}; हेमं MS^{ac} **69.19** वर्धमानकं] MS^{pc}; वर्त्तवर्धमानकं MS^{ac}

र्भासः प्रत्ययः स्याद्वादेन सूच्यत इति चतुरस्रम्। नो खलु साकारज्ञानमात्रं प्रमाणमभ्युपेयते किं तु समीचीनं (यद्विचारसहम्। प्रद)र्शिता त्वस्य विचारासहत्वेनासमीचीनता। न च कालाभेदो ऽप्यभेदसाधनम्। मा भूत्पर्यायाणां वारणवाराहवानरनरनीरदादीना(मेककालानां परिणतिः प)रस्परमपीति। न च यथाश्रुतगृहीतः परिणामविशेषो ऽभेदेन सह दृष्टपूर्वो येन द्रव्यपर्याययोरैक्यं साधयेत्। सर्वत्रैवास्य विवा[दा](ध्यासितस्य ताव)दैकान्तिके परिणते ऽभेदे कथं तस्य भेद इति चेत्, उत कथंचिद्भिन्नो ऽपि कथं तस्य स्वभावादेव तस्य धर्म इति चेत्? न, भेदे ऽपि तद्भावस्य दर्शि(तपूर्वत्वात्। एका)न्तभिन्नानां करिकरभतुरङ्गमादीनां न परस्परपरिणतिरुपलब्धचरीति चेत्? न, तत्रापि सदादिरूपेणाभेदाद्भेदैकान्तासिद्धेः। ए[त](न्न दृष्टपूर्वं कथंचि)दिति यथाश्रुतमपास्तं वेदितव्यं तदिदं सप्तभङ्गनयापेतत्वम्। नन्वसति स्याद्वादे हेयोपादेयभेदो न कल्पते। तथा हि यदि भाव एकान्ततो ऽ[स्त्ये](व तर्हि स स्वभावपर)⟨f.111^{v}⟩भावाभ्यामिति प्राप्तप्रापणीयतयायं लोकः किमुपाददीत किं वा जह्यात्? न खल्वस्य स्वभावपरभावाभ्यां विश्वात्मकस्य किमपि प्रापणीयं [सं](भाव्यते, प्राप्तपूर्वत्वात्।)असत्त्वे त्वैकान्तिके तदपि स्वरूपपररूपाभ्यामिति शून्यमेव विश्वमिति कः केन कथं किमुपाददीत परित्यजेद्वा। तस्मात्स्वभावपरभावाभ्यां सद[स](देकान्तव्यवहारो न व)हति लोकयात्रामित्यनैकान्तिकमेव विश्वमेषितव्यम्।

अस्तु तावत्, स्वरूपेण सदिति तु व्याकरणीयम्, यदि नीलं तदितराभाववदिति। अनुज्ञया वर्ता[म](हे– स्वभावः स्वरूपेण सत्त्व)मेकं स च भवति, तदाश्रयस्तु भवेद्धर्मधर्मिणोश्चात्यन्तिकमुपहितं नानात्वमधस्तात्। अथ नीलं तदितराभावात्मकम्, सिध्यत्येवमनेकान्तः किं [त्वे](कत्वं नैव, इतरप्रति)-

---

69.20 स्याद्वादेन] *em.*; स्याद्वाधनं MS • चतुरस्रम्] तु *ow.* MS^{ac} • नो खलु] MS^{pc}; मो नो खलु MS^{ac} **69.24** ऽभेदेन] MS^{pc}; ऽभेदे MS^{ac} **69.25** °रैक्यं] MS^{pc}; °नैक्यं MS^{ac} **69.26** परिणते ऽभेदे] *em.*; परिणते भेदे MS • तस्य भेद इति] *em.*; तस्य भे ति MS • उत] *em.*; द्रुत MS • °चिद्भिन्नो ऽपि] *em.*; °चिद्भिन्नापि MS **69.28** करिकरभ°] *em.*; करिकरिभ° MS **69.30** सप्तभङ्गनया°] *em.*; सप्तभङ्गतया° MS **69.31** हेयोपादेयभेदो] *em.*; हेयाभेदो MS **69.33** वा जह्यात्] MS^{pc}; वाय जह्यात् MS^{ac}; वा *ow.* MS • स्वभावा°] MS^{pc}; स्वभाव° MS^{ac} **69.37** लोकयात्रा°] त्रा *ow.* MS **69.40** °पहितं] MS^{pc}; °पदितं MS^{ac} **69.41** तदितराभावा°] *em.*; तदितभावा° MS

षेधाकारबुद्धिलक्षणतया च स्वपरापेक्षनिरूपणतया च विरुद्धधर्मसंसर्गेण नानात्वोपपत्तावेकत्वगन्धस्याप्यसंभवात्। इतरथैक(त्वे ऽभ्युपगते ऽ)द्वैतस्यैव वचोभङ्ग्यन्तरेणाङ्गीकारात्। तस्मात्स्वतः सन्तो ऽपि भावा भावान्तरे तादात्म्यस्य संसर्गस्य वा सांव्यवहारिकादभावादसन्तो न पुनरमी स(म्भवेयु)⟨f.112^{r}⟩रिति स्वाभाववत्यपि विरोधिपदे तथा भवितुमुत्सहन्ते।

एवं तावन्न द्वे वस्तुनी, नैकं द्व्यात्मकम्। तत्र द्वयमवशिष्यते– भेदः सत्यः, तदुपादानाभेदकल्पना। अभेदो वा सत्यः, तदुपादाना भेदकल्पनेति।

एवं चैकान्तिकत्वे देशकालादिभेदे नियमवति हेयोपादेयभेदः कल्पत इ(ति विकल्पयति– एवं) **तावन्न द्वे वस्तुनी** सामान्यविशेषौ, नाप्येकं **द्व्यात्मकम्**। **तत्र** चतसृषु कल्पनासु **द्वयमवशिष्यते– भेदो** वा **सत्यस्तदुपादाना** तदनुभूयमानाधिष्ठाना मानसीयम**भेदकल्पना, अभेदो वा सत्यस्तदुपादाना भेद(कल्पनेति। तत्राह– आ)पेक्षिकत्वादिति।**

तत्र– आपेक्षिकत्वाद्भेदो हि भेदग्रहपुरस्सरः।
नैकज्ञानं समीक्ष्यैकं न भेदं तत्त्वहानतः॥ २९॥

न भेदमुपादायाभेदकल्पना। कुतः? आपेक्षिको हि भेदो नान्यमनपेक्ष्य शक्यते ग्रहीतुम्। न चागृहीतो भेदो ऽभेदकल्पनाया

70.2 Cf. *Bhāvaśuddhi* (265.18–19): एवं तावदिति॥ सामान्यविशेषौ न द्वे वस्तुनी, नाप्येकं द्व्यात्मकमिति निश्चितमित्यर्थः।

Cf. *Śaṅkhapāṇi* (178.21–22): एवं सामान्यविशेषौ द्वे वस्तुनी द्व्यात्मकं चैकं वस्त्विति पक्षद्वये दूषिते।

69.42 °निरूपणतया च] MS^{pc}; °निरूपतणतया न MS^{ac} **69.44** भङ्ग्यन्तरेणा°] *em.*; भर्ङ्ग्यवन्तरेणा° MS^{pc}; भर्ङ्ग्यन्तरेणा° MS^{ac} **69.45** संसर्गस्य वा] MS^{pc}; वा MS^{ac} **69.46** °रिति] *em.*; इति MS • तथा] MS^{pc}; तथा च MS^{ac} **70.1** °कालादिभेदे] *conj.*; °कालादिचे MS **70.2** द्व्यात्म°] द्व्या *ow.* MS **70.3** चतसृषु] *em.*; वतसृषु MS • भेदो] MS^{pc}; अभेदो MS^{ac} **70.3–4** तदनुभूयमानाधिष्ठाना मानसीयमभेदकल्पना] *em.*; तदनुभू[य]···मभेदकल्पना MS^{pc} (deleted akṣaras enclosed within braces); तदनुभू[य]···मभेदकल्पना। अभेदो वा सत्यस्तदुपादाना भेदाना तदनुभूयमानाधिष्ठाना मानसीयमभेदकल्पना। MS^{ac}

उपादानं भवति। परापेक्षत्वे चास्य ग्रहणमनुपपन्नम्। यतो नागृहीते भेदे परात्मानौ व्यवतिष्ठेते। न च परात्मव्यवस्थामन्तरेण भेदग्रहो ऽस्तीति प्राक्प्रपञ्चितम्। न त्वेवमभेदग्रहणमभेदग्रहणापेक्षम्। नापि भेदग्रहणापेक्षम्, अभेदहानप्रसङ्गात्। न हि भेदे गृहीते ऽभेदस्यावकाशो ऽस्ति। तत्राभेदं गृहीत्वा तमुपादाय तस्य यथावन्निश्चयाशक्तौ व्यवच्छेदकल्पनोपपद्यते, यथैकबुद्धिनिर्ग्राह्येषु घटादिष्ववयवविभागकल्पना। न तत्र भेदोपादानाभेदकल्पना। भेदो हि परमाणुषु व्यवतिष्ठते। ते चातीन्द्रियाः। ननु चैकत्वमप्यनुसन्धानप्रत्ययावसेयम्। स च न भेदमन्तरेण। भेदास्पर्शे हि किं केनानुसन्धीयतामिति।

न निरधिष्ठानविभ्रमसंभवो न चागृह्यमाणमधिष्ठानं भवति। न खलु शुक्लभास्वरस्य द्रव्यस्य मानवाः शङ्खं वा निजरू[पं] (वा गृह्णन्ति। अधिष्ठानस्यान्यव्या)वृत्तस्य तत्तयानवगृहीतस्याग्रहे रजतमिति वा, विकल्पिका वा अविकल्पिका वा, पीत इति पितायं ममेति वा, वर्तमानावभासा स्मृतिर्भ्रान्ता प[रि](कल्पिततत्वादिति सांप्रतम्।) भवतु तर्हि परापेक्षमेव निरूपणं भेदस्येत्यत आह– **परापेक्षत्वे चेति।** विपञ्चितमेतद् **'अन्योन्यसंश्रयाद्भेदो न**

71.7 न त्वेवमभेद॰] A; न चैवमभेद॰ *edn* **71.14** भेदास्पर्शे] भेदासंस्पर्शे *edn*

71.6–7 *Brahmasiddhi* I.13cd: अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधनः॥

71.1 Cf. *Bhāvaśuddhi* (265.27–28): न चागृहीत इति॥ न निरधिष्ठानकल्पना, न चागृह्यमाणमधिष्ठानं भवतीत्यर्थः।
71.5–6 Cf. *Bhāvaśuddhi* (266.17–18,21): भवतु तर्हि परापेक्षमेव निरूपणं भेदस्येति, अत्राह– परापेक्षत्वे चेति॥ …'अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधन' इत्यत्र प्रपञ्चितमित्यर्थः॥

71.2 द्रव्यस्य मानवाः शङ्खं] *em.*; द्रव्य मानवा शङ्खं MS **71.3–4** विकल्पिका वा अविकल्पिका] MS^{pc}; विकल्पेका वा अविकाMS^{ac} **71.4** पितायं ममेति] MS^{pc}; पीतायम्ममेति MS^{ac} • स्मृतिर्भ्रान्ता] स्मृतिभ्रान्ता MS **71.5** भवतु] MS^{pc}; भावतु MS^{ac} **71.6** ॰संश्रयाद्भेदो] MS^{pc}; ॰संश्रयाद्भेदोदो MS^{ac}

प्रमान्तरसाधनः' (इत्यत्र। अभेद)⟨f.112^{v}⟩स्तु निरपेक्षग्रह इत्याह– **न त्वेवमभेदग्रहणमभेदग्रहणापेक्षमिति**। न चैकबुद्धिनिर्ग्राह्येष्वपि घटादिषु बुध्नग्रीवाद्यवयवभेदपुरस्सरमवयवि(ज्ञानमिति वैषम्याद् दृष्टान्त)दार्ष्टान्तिकतेत्यत आह– **न तत्र भेदोपादानेति**। न खल्ववयवग्रहणाधीनमवयविविज्ञानं सर्वाग्रहणप्रसङ्गात्। बुध्नादयो ऽपि हि घटावय[वा](स्तदवयवग्रहणाधीना एवं तद)वयवास्तदवयवा इति सर्व एव स्वावयवग्रहणाधीननिरूपणाः प्रसज्येरन्। **ते च** सूक्ष्मा **अतीन्द्रिया** अणवः। परमाणवो हि स्वयमनिरूपि[ता](न कथंचित्सावयविनो) द्व्यणुकस्य वा त्र्यणुकस्य वा निरूपणाय विभवन्तीति तत्तदनिरूपणे प्रसक्तं सर्वाग्रहणम्। तन्न भेदग्रहणपूर्वकमभेदग्रहणमपि त्व(भेदग्रहणपूर्वकं भेदग्रहणम्। **ननु**) च प्रकृतस्य सामान्य**स्यैकत्वमप्यनुसन्धानप्रत्ययावसेयम्। स च न भेदमन्तरेणे**त्यत आह–**भेदास्पर्शे हीति**। अनुसन्धानमिति हि वि(भिन्नेष्वभिन्ननिर्भासविज्ञा)नमाचक्षते, न चेदं भेदावभासमन्तरेणेत्यर्थः।

प्रत्युक्तमेतत्– नेदानीमभिन्नदेशकालो ऽर्थ एकः स्यात्। असति चैकस्मिन् किमाश्रया भेदाशङ्का स्यात्, यस्यानुसंधानादेकत्वमुच्यत इति।

71.7–12 Cf. *Bhāvaśuddhi* (267.5–10): एकनिर्भासेष्वपि घटादिषु मूर्धग्रीवाद्यवयवभेदग्रहणपुरस्सरमवयवविज्ञानमिति वैषम्यान्न दृष्टान्तदार्ष्टान्तिकतेति, तत्राह– न तत्रेति॥ हेतुमाह– भेदो हीति॥ अवयविग्रहणस्यावयवग्रहणाधीनत्वे घटावयवानां मूर्धादीनां सावयवानां ग्रहणमवयवग्रहाधीनम्, एवं तदवयवानामपीति सर्व एव स्वावयवग्रहणाधीननिरूपणा, अवयवावयविविभागश्च परमाणुपर्यन्तस्तत्रावतिष्ठत इत्यर्थः।
71.13–18 Cf. *Bhāvaśuddhi* (267.11–17): ते चेति॥ परमाणवः स्वयमनिरूपिता न सावयविनः – द्व्यणुकस्य, त्र्यणुकस्य वा निरूपणाय भवति(न्ति,) इति। तदनिरूपणे प्रसक्तं सर्वाग्रहणमित्यर्थः॥ तन्न भेदग्रहणपूर्वकमभेदग्रहणम्, अपि त्वभेदग्रहणपूर्वकमेव भेदग्रहणमिति स्थिते चोदयति– नन्विति॥ भिन्नेष्वभिन्ननिर्भासविज्ञानमनुसन्धानम्, किमतः? अत्राह– स चेति॥ कस्मात्पुनर्न भेदग्रहणमन्तरेणेतीति, अत्राह– भेदासंस्पर्शे हीति॥

71.7 °भेदग्रहणमभेदग्रहणापेक्षमिति] MS^{pc}; °भेदमभेदग्रहणमिति MS^{ac} • न चैक°] चैक° *ow.* MS **71.9–10**°दार्ष्टान्तिकतेत्यत] *conj.*; °दार्ष्टान्तिकेनेत्यत MS **71.10** °मवयविविज्ञानं] MS^{pc}; °मवयवीविज्ञानं MS^{ac} **71.11** सर्वाग्रहण°] MS^{pc}; सर्व्वाग्रहणं° MS^{ac} • बुध्ना°] *em.*; दध्ना° MS **71.12–13**प्रसज्येरन्। ते च] *em.*; प्रसज्येरन्न च MS **71.13** परमाणवो हि स्वयमनि°] *em.*; परमाणवो स्वयपनि° MS **71.15** सर्वा°] र्वा *ow.* MS **71.16** °स्यैकत्व°] MS^{pc}; °स्यैकत्वत्व° MS^{ac} **71.18** °रेणेत्यर्थः] MS^{pc}; °रेणेत्यतर्थः MS^{ac}

परिहरति– **प्रत्युक्तमेतन्नेदानीमिति**। नायमभेदग्रहमात्रस्य धर्मो य⟨f.113ʳ⟩–द्भेदग्रहापेक्षत्वम्, अभिन्नदेशकालस्यार्थस्य तदभावप्रसङ्गात्, किं त्वनुसन्धानस्य। तच्च सत्तादीनां सामान्यभावमात्रस्य निबन्धनं न पुनरैक्यस्य। (तत्त्वेकनिर्भासादेव प्रका)शात्सिध्यति, न चास्य भेददर्शनापेक्षा। तस्य पुनरनुसन्धानात्मकत्वं तदुपदेशभेदेनौपाधिकम्। सामान्यभावस्तु सत्ताया भाक्तो न तात्त्विक इत्युक्तं ‘सं(हृताखिलभेदो ऽतः सा)मान्यात्मा’ इत्यत्रेति सर्वमवदातम्। यस्तु वैयात्यादभिन्नदेशकालस्यार्थस्यैक्यं न मनुते तं प्रत्याह– **असति चैकस्मिन्** क्षणे वा परमाणौ [वा](**किमाश्रया** भेदवादि)नो **भेदाशङ्का यस्यानुसन्धानादेकत्वमुच्यते**। भेदवादिनो हि भेदानामेवातद्रूपपरावृत्तिमात्रेणानुसन्धानादेकत्वमास्थिषत। तदेतद(सत्येकस्मिन्न स्यादि)त्यर्थः॥ ⊗॥

अपि च सर्वप्रत्यात्मवेदनीयमेतदभेदोपादानो भेद इति। तथा हि –

आलोच्यते वस्तुमात्रं ज्ञानेनापातजन्मना।
अचेत्यमानो भेदो ऽपि चकास्तीत्यतिसाहसम्॥ ३०॥

वस्तुमात्रविषयं प्रथममविकल्पकं प्रत्यक्षम्। तत्पूर्वास्तु विकल्पबुद्धयो विशेषानवगाहन्त इति सर्वप्रत्यात्मवेदनीयम्। स्या-

72.6 *Brahmasiddhi* I.3ab: संहृताखिलभेदो ऽतः सामान्यात्मा स वर्णितः।

72.1–4 Cf. *Bhāvaśuddhi* (267.17–268.6): परिहरति– प्रत्युक्तमिति॥ नायमभेदग्रहणमात्रस्य धर्मः, यद्भेदग्रहापेक्षत्वम्, अभिन्नदेशकालस्यार्थस्य तदभावप्रसङ्गात् (तद्भाव° *edn*), किन्त्वनुसन्धानस्य। तच्च सत्तादीनां सामान्यभावमात्रस्य, न पुनरैक्यस्य; तत्त्वेकनिर्भासादेव प्रकाशात्सिध्यतीत्यर्थः।
72.8–10 Cf. *Bhāvaśuddhi* (268.7–9): असति चेति॥ एकस्मिन् क्षणे, परमाणौ वा भेदवादिनो हि भेदानामेवातद्रूपपरावृत्तिमात्रेणानुसन्धानादेकत्वेनास्थिषत, तदेकस्मिन्नसति न स्यादित्यर्थः॥

72.2 °क्षत्वम्] *conj.*; °क्षत्वमिति MS • अभिन्नदेशकाल°] MS^{pc}; अभिन्नभेदेकाल° MS^{ac} **72.3** °न्धानस्य।] *em.*; °न्धानस्या MS • निबन्धनं] *em.*; बन्धनं MS; नं *ow.* MS • °रैक्यस्य] MS^{pc}; °रैकस्य MS^{ac} **72.4** भेददर्शना°] MS^{pc}; भेदर्शना° MS^{ac} **72.5** °दुपदेशभेदेनौपा°] *em.*; °दुपादेसम्भेदेनोपा° MS^{pc}; °दुपादेसम्भेनोपा° MS^{ac} • °भावस्तु] *em.*; °भावन्त्य MS **72.7** वैयात्या°] MS^{pc}; वैजात्या° MS^{ac} **72.8** भेदाशङ्का] *em.*; भेदाशंक MS **72.10** °त्वमास्थिषत] *em.*; °त्वमास्थिषत् MS^{pc}; °त्वसास्थिषत् MS^{ac}

देतत्– विशिष्टरूपोपग्राह्येव प्रत्यक्षम्। स तु भेदः शब्देनासंस्पर्शान्न तथोपलक्ष्यते, यथा विकल्पबुद्धौ। तदयुक्तम्, विप्रतिषेधात्। न चोपलक्ष्यते प्रत्यक्षबुद्धौ विशेषः प्रकाशते चेति विप्रतिषिद्धम्। अतो ऽतिसाहसमुच्यते। यस्तु संवित्तावेव विप्रतिपद्यते सर्वानात्मव्यावृत्तस्पष्टप्रतिभासं प्रत्यक्षमिति वदन्, तस्योत्तरम्– 'आहुर्विधातृप्रत्यक्षम्' इत्याद्युक्तमेवेति।

तदेतदुपपत्त्या व्यवस्थाप्य सत्त्वमात्रानुभवेनाप्यवस्थापयति– **अपि च सर्वप्रत्यात्मवेदनीयमेतदिति। तथा ह्या**[लो](**च्यत** इति। विशेषण)⟨f.113^{v}⟩विशेष्यभावरहितरूपमात्रगोचरमालोचनमिति चाविकल्पमिति च प्रसिद्धं प्रथमभाविविज्ञानं जन्तुमात्रस्य। **तत्पूर्वास्तु** [वि](**कल्पबुद्धयो** विशेष)णविशेष्यभावावगाहिन्य उदयन्त इति हि सर्वजनीनम्। न चास्यां रूपमात्रावगाहिन्यां बुद्धावस्ति भेदस्य प्रथा। भेदकं हि विशेषणं भे(दाभावे न संभवतीति त)द्विदः। सेयमविकल्पिका धीस्तद्भावानवगाहिनी च भेदनिर्भासा चेति चित्रम्। **न चोपलक्ष्यते** प्रथते चेति सुभाषितमित्यर्थः।

किं च

प्रतिष्ठितं च विज्ञानमर्थमात्रावलम्बनम्।
भेदेषु त्वप्रतिष्ठत्वमस्तीन्द्रियधियामपि॥ ३१॥

वस्तुद्वयानुपपत्तेरेकस्य च द्व्यात्मतायोगादवश्यकल्पनीये ऽन्य-

73.1–2 Cf. *Bhāvaśuddhi* (268.10–11): तदेतदुपपत्त्या व्यवस्थाप्य सत्त्वमात्रानुभवेन व्यवस्थापयति– अपि चेति॥
73.2–5 Cf. *Bhāvaśuddhi* (268.18–20): विशेषणविशेष्यभावरहितरूपमात्रगोचरमालोचनमविकल्पं प्रसिद्धम्, तत्पूर्वास्तु विकल्पबुद्धयो विशेषणविशेष्यभावावगाहिन्य उदयन्त इति सर्वजनीनमित्यर्थः॥

73.1 तदेतदुपपत्त्या] *em.*; तदेतदुपत्त्या MS **73.2–3** विशेष्यभाव॰] MS^{pc}; विष्यशेष्यभाव॰ MS^{ac} **73.3** ॰मालोचनमिति चाविकल्प॰] *em.*; ॰मालोचननमिति वविकल्प॰ MS^{pc}; ॰मोचलोचननमिति वविकल्प॰ MS^{ac} **73.4** तत्पूर्वास्तु] MS^{pc}; तत्रत्पूर्व्वास्तु MS^{ac} **73.5** उदयन्त] *em.*; उदन्त MS • चास्यां रूप॰] *conj.*; चायायां रूपं॰ MS **73.7** ॰द्भावानव॰] MS^{pc}; ॰द्भावानंच॰ MS^{ac} **73.8** प्रथते चेति] MS^{pc}; प्रथ चेति MS^{ac}

तरस्य मिथ्यात्वे युक्तं विशेषावभासस्य मिथ्यात्वम्, रजतादिविभ्रान्तिषु दर्शनात्। न च वस्तुमात्रावभासस्य। न हि वस्तुमात्रव्यभिचारः क्वचिज्ज्ञाने दृष्टो ऽस्ति, अन्ततस्तस्यैव वस्तुनः प्रतिभासनात्। दृष्टतद्भावस्यैव तत्कल्पना लघ्वी, क्लृप्तत्वाद्योग्यतायाः, इतरत्र तु कल्प्यत्वात्।

स्यादेतत्– मानस्य एव बुद्धयः क्लृप्तयोग्यभावा मिथ्यात्वं प्रति, नेन्द्रियजन्मानः। इन्द्रियबुद्धिसमधिगम्याश्च भेदा इति। एतच्च वार्तम्। इन्द्रियदोषानुविधायित्वाद्भ्रान्तीनामिति।

स्या[दि](**तन्मानस्य एव बुद्धयः** पी)तशङ्खादिविभ्रमाः किल नेन्द्रियजाः पीतादिभिरसन्निकर्षादिन्द्रियाणाम्, अपि तु मनोमात्रयोनयो विषयनियमाभावात्।(**इन्द्रियबुद्धिसमधिगम्या**) विशेषबुद्धयस्त्विन्द्रियजास्तस्मान्न भ्रान्तय इति भावः। दूषयति– **एतच्च वार्तम्**। कुतः? **इन्द्रियदोषानुविधायित्वाद्भ्रान्तीनाम्**। न खलु [पी](तशङ्खादिविभ्रमा मनो)⟨f.114^{r}⟩मात्रयोनय इन्द्रियं च तद्दोषं च खल्वनुविदधते। एतेन हि जाग्रदन्धः क्षदाद्युपहतमानसो ऽपि पीतं शङ्खमवस्यति। चक्षुष्मतो ⟨ऽन्धस्य च पीतशङ्खा⟩ [दि](विभ्रमदर्शना)दि-

---

74.12°दोषानुविधायि°] °दोषविशेषानुविधायि° *edn*

74.1–3 Cf. *Abhiprāyaprakāśikā* (270.21–23): पीतशङ्खादिविभ्रमाणां नैन्द्रियकत्वम्; इन्द्रियाणां पीतादिभिरसन्निकर्षात्, अपि तु मनोमात्रयोनयः; मनसो विषयनियमाभावात्स्वप्नवदिति भावः॥

74.3–5 Cf. *Bhāvaśuddhi* (270.14–16): विशेषबुद्धयस्त्विन्द्रियजाः, तस्मान्न भ्रान्तय इत्याह– इन्द्रियबुद्धीति॥ दूषयति– एतच्चेति॥

74.5–6 Cf. *Bhāvaśuddhi* (270.17–271.5): न खलु पीतशङ्खादिविभ्रमा मनोमात्रयोनयः, दुष्टेन्द्रियव्यतिकरतया तत्कार्यत्वावधारणात्, अतस्तत्र व्यभिचार इत्यर्थः।

74.7–8 Cf. *Abhiprāyaprakāśikā* (270.23–25): अन्धस्य पित्ताद्यनुपहतस्य, चक्षुष्मतः पित्ताद्युपहतस्य पीतशङ्खादिविभ्रमदर्शनादिन्द्रियतद्दोषान्वयव्यतिरेकानुविधायित्वात्तज्जन्यत्वं निश्चीयत इत्यर्थः॥

74.1 °तशङ्खादि°] *em.*; °तसंखाद° MS^{pc}; °तसंख्याविदि° MS^{ac} **74.2** °योनयो] MS^{pc}; °योमनयो MS^{ac} **74.5** इन्द्रियं] द्रि *ow.* MS **74.6** एतेन] MS^{pc}; एते MS^{ac} **74.7** चक्षुष्मतो] *em.*; चक्षुष्मात्वा MS

न्द्रियतद्दोषानुविधायित्वा(त्तज्जन्यत्वमित्यर्थः॥ ⊗॥

अपि च यस्य मतम्– व्यावृत्तस्वलक्षणा भावाः। तेन ते ऽन्योन्याभावस्वभावा व्याकर्तव्याः, तद्विशेषणा वा। नान्यथा व्यावृत्तशब्दो ऽर्थवान् भवति, तस्येतरेतराभावनिमित्तत्वात्। तत्र

अन्योन्याभावरूपत्वं सर्वेषां न प्रकल्पते।
तत्रोपाधौ प्रतीयन्तां तथा भिन्ना न रूपतः॥ ३२॥

एकस्मिन्ननपेक्षे स्थिते तदभावरूपो ऽन्यो व्यवतिष्ठते। सर्वे तु नान्योन्याभावरूपाः कल्पन्ते, परस्पराश्रयस्थितित्वात्। अथ विशेषणमन्योन्याभावः। कामम्, अतदात्मानो ऽपि विशेषणानुरागात्तथावगम्यन्ताम्। न तु स्वभावभेदः स्यात्। ननु नान्योन्याभावो नाम कश्चित्, यो भावानां तत्त्वं विशेषणं वा स्यात् अर्थसिद्धिरेवैषा। न चेदन्योन्याभावो कश्चित्, सिद्धस्तर्ह्यभेद इति।

व्यावृत्तस्वलक्षणा भावा)**यस्य** न तस्यानुवृत्तस्वलक्षणा भावाः, **तेन ते ऽन्योन्याभा**(**वस्वभावा व्याकर्तव्याः**। व्या)वृत्तं व्यावृत्तिः स्वमसाधारणं (लक्षणं)स्वभावो येषामिति हि प्रथमं व्याकरणम्। द्वितीयमाह– **तद्विशेषणा वा**। व्यावृत्तेः परस्पराभावस्य [ये] (विशेषणास्त इत्यर्थः। आद्य)व्याकरणं

75.2–4 Cf. *Abhiprāyaprakāśikā* (270.26–29): अन्योन्याभावसम्भवादपि भेदासम्भवमाह– अपि चेति॥ व्यावृत्तम्=व्यावृत्तिः, स्वम्=असाधारणम्, लक्षणम्=स्वभावो येषां ते, तथा व्याकरणीयाः। व्याकरणान्तरमाह– तद्विशेषणा वेति॥ व्यावृत्तः=परस्परायोगः स्यात्, अतस्तद्विशेषणा इत्युक्तम्।
75.4–10 Cf. *Bhāvaśuddhi* (271.13–272.3): आद्यव्याकरणं दूषयति–अन्योन्येति॥ अन्यतरस्यान्यतो ऽनपेक्षस्याप्रसिद्धेरन्योन्याश्रयप्रसङ्गात्। द्वितीयव्याकरणं दूषयति– तत्रेति॥ तस्मिन्नन्योन्याभाव उपाधौ विशेषणे प्रतीयन्तां नाम भावाः, तथापि रूपतो भिन्ना भवितुं नार्हन्ति, व्यावृत्तेरवस्तुत्वादित्यर्थः॥

74.8 75.1 °विधायित्वात्तज्जन्यत्वमित्यर्थः॥ ⊗॥ व्यावृत्तस्वलक्षणा भावा] *em.*; °विधायिना ------------------- MS

विकल्प्य दूषयति–

अन्योन्याभावरूपत्वं सर्वेषां न प्रकल्पते।

अन्यतरस्यान्यतो ऽनपेक्षस्याप्रसिद्धेरन्योन्यसंश्रयप्रसङ्गात्(। द्वितीयव्याकरणं दू)षयति– **तत्र** परस्पराभावे भावव्यतिरेके उपाधौ विशेषणे प्रतीयन्तां नाम भावास्तथा व्यावृत्ताः, न पुना रूपतो भिन्ना भवितु[म](र्हन्ति, व्यावृत्तेरवस्तुत्वात्।) चैत्रो यथा दण्डयोगाद्दण्डी, यथा श्वैत्यानात्मापि तत्समवायात्प्रासादः श्वेतः, तथा व्यावृत्तियोगाद्भावाः परमार्थतो व्यावृ(त्ता भवन्तीति) ⟨f.114v⟩सांप्रतम्। अभावस्य भावेन सम्बन्धान्तरानभ्युपगमाद्विशेष्यविशेषणभावस्य च तत्र तत्र सम्बन्धान्तरपूर्वकत्वेनोपलब्धेस्तद्व्याप्त[त्वे]न त(न्निवृत्तौ निवृत्ते)र्व्यवहारमात्रस्य कल्पनयाप्युपपत्तेः। न च दण्डी चैत्रः श्वेतः प्रासाद इत्यादयो ऽपि प्रत्ययाः परमार्थसन्तमर्थमवगाहन्ते। न [ख](लु दण्डश्वैत्ये) चैत्रस्य वा प्रासादस्य वा स्वभावेनासम्बद्धे तदुपलक्षणाय तदुपरागाय वा कल्प्येते। स्त एवैतयोः संयोगश्च समवायश्च सम्बन्धा[वि](त्यपेक्ष्यते) तयोरपि सम्बन्धान्तरम्, एवं तत्सम्बन्धस्यापीत्येकत्रैव सम्बन्धानां च तद्बुद्धीनां चानन्त्याद्दुरवगमो विशेषणभाव इति बताय[मि](ष्यते पुन)रतदात्मनस्तत्स्वभावस्य। सतोर्दण्डश्वैत्ययोः कथं चैत्रप्रासादोपलक्षणविशेषणत्वे? तस्मादविचारितरमणीय एवैष विशे(षणभाव इत्युपप)त्त्यास्तु यथातथेति युक्तमुत्पश्यामः। तदिदमाह– **काममतदात्मानो ऽपि विशेषणरूपाभावानु-**

75.10–12 Cf. *Bhāvaśuddhi* (272.11–12): यथा श्वैत्यानात्मापि तत्समवायात् प्रासादः श्वेतः, तथा व्यावृत्तियोगाद्भावाः परमार्थतो व्यावृत्ता इति शङ्कते– अथेति॥
75.12–14 Cf. *Bhāvaśuddhi* (272.12–15): अभावस्य भावेन सम्बन्धान्तरानभ्युपगमाद्विशेषणविशेष्यभावस्य सम्बन्धान्तरपूर्वकत्वेनोपलब्धेस्तद्व्याप्तत्वेन तन्निवृत्तौ निवृत्तेर्व्यवहारमात्रस्य कल्पनयाप्युपपत्तिरिति॥

75.5 विकल्प्य] *em.*; विकल्प MS **75.7** °संश्रय°] *em.*; °संस्र° MS **75.8** प्रतीयन्तां] *em.*; प्रतीयतां MS **75.11** श्वेतः] MS^{pc}; स्वेदतः MS^{ac} **75.13** °पूर्वकत्वेनोपलब्धेस्तद्व्याप्तत्वेन] MS^{pc}; °पूरकत्वेनोपलब्धेस्तव्यापद्व्याप्तेन MS^{ac} **75.14** °कल्पनया°] MS^{pc}; °कल्पनाया° MS^{ac} • न च] न *ow.* MS **75.19** चानन्त्याद्दुरवगमो] MS^{pc}; चानन्त्यातदुरगमो MS^{ac} **75.20** °त्मनस्तत्स्वभावस्य] *conj.*; °त्मानोस्तत्स्वभावस्य MS^{pc}; °त्मानोसत्स्वभावस्य MS^{ac} • सतोर्दण्डश्वैत्ययोः] MS^{pc}; सनोर्द्दंडस्वैत्यसयोः MS^{ac} • प्रासादोप°] *em.*; °प्रसादोप° MS^{ac} **75.22** °मुत्पश्यामः] MS^{pc}; °नुत्पश्यामः MS^{ac} • °रूपाभावा°] MS^{pc}; °रूपानुभावा° MS^{ac}

रागात्संवृत्त्या तथावगम्य(ताम्। न तु) ⟨f.115^{r}⟩ **स्वभावभेदः स्याद्भाविकः**। प्रसज्यप्रतिषेधे वल्लभः सर्वोपाख्याविरहमभावमभिमन्यमानश्चोदयति– **ननु नान्योन्याभा**[वो] (नामेति। अर्थस्य वस्तु)नो भवितुरिति यावत्, सिद्धिर्भावस्तत्त्वं विशेषणत्वं वा, न पुनरभावे ऽनर्थे कल्पनामात्रोपदर्शितशरीरे समस्तीति दूषयति– **न चेदि**[ति](॥ ⊗॥

अपि च भेदत्वादेव विश्वस्य भेदो ऽभेदोपादान इति शक्यते ऽनुमातुम्। दृष्टो हि मणिकृपाणदर्पणादिष्वभिन्नमुखोपादानस्तद्भेदः। न च तत्र भावान्तरोत्पत्तिः, विरुद्धपरिणामत्वात्। स्यादेतत्– अभेदो ऽपि शक्यो भेदोपादानो ऽनुमातुम्, वनाभेदस्य तरुभेदोपादानत्वात्। न, भेदाभावप्रसङ्गात्। एवं हि न कश्चिदेको ऽभिन्नः परमाणुरपि। तदभेदो ऽपि हि भेदोपादानः स्याद्वनादिवत्। तथा तदंशाभेदो ऽपीत्यनवस्थायामेकस्याभावात्तत्समुच्चयरूपो ऽभेदो न स्यात्। अथ क्वचिदवतिष्ठते स एकः। तदभेदो न भेदोपादान इति व्यभिचारः। तदिदमुच्यते–

दपर्णादौ मुखस्येव भेदो ऽभेदावलम्बनः।
भेदावलम्बनो ऽभेदो न तथा तदभावतः॥ ३३॥

इ)तश्चाभेदोपादाना भेदकल्पनेत्याह– **अपि च भेदत्वादेव विश्वस्येति**। विवादाध्यासितो भेदो ऽभेदोपादानः कल्पनामात्रनि[र्मि](तः, भेदत्वात्। यो यो)भेदः स सर्व ईदृशः, यथा बिम्बाभेदोपादानः प्रतिबिम्बानां भेद इति।

75.24 Cf. *Bhāvaśuddhi* (272.17): सर्वोपाख्याविरहस्वभावमभावं मन्यमानश्चोदयति– नन्विति॥
76.1–3 Cf. *Bhāvaśuddhi* (272.20–23): इतश्चाभेदोपादाना भेदकल्पनेत्याह– अपि चेति॥ व्याप्तिमाह– दृष्टो हीति॥ विवादाध्यासितो भेदः, कल्पनामात्रनिर्मितः, भेदत्वात्, भेदः सर्व ईदृशः, यथा बिम्बाभेदोपादानः प्रतिबिम्बानां भेद इत्यर्थः।

75.23 स्वभाव॰] MS^{pc}; भाव॰ MS^{ac} **75.25** नान्योन्या॰] MS^{pc}; नान्योन्यो॰ MS^{ac} **75.26** ॰र्भावस्तत्त्वं] स्त *ow.* MS **75.27** समस्तीति दूषयति] MS^{pc}; समस्तीति MS^{ac} **76.2** ॰पादानः] MS^{pc}; ॰पान MS^{ac} **76.3** ईदृशः] MS^{pc}; इदृशः MS^{ac}

न च भेदो ऽपि स्यात्कश्चिन्न चाभेदोपादान इति शङ्क[न् प](रिहरति– नेति। एकैक)विषयतन्त्रतया हि विषयी भेदो व्याप्तस्तद्विरुद्धोपलब्ध्या विपक्षादभेदोपादानत्वाभावाद्व्यावर्तमानो ऽभेदोपादानत्वे न (न व्यावर्तत इति न संदि)ग्धो व्यतिरेकः। सत्प्रतिपक्षतामनुमानदोषमुत्थापयति– स्यादेतदिति। दूषयति– **न भेदाभावप्रसङ्गादिति**। नैतदनुमानं पू[र्वा](नुमानस्य प्रतिकूलतामाच)रति, सव्यभिचारतया तदाभासत्वादित्यर्थः॥ ⊗॥

अपि च

प्रत्येकमनुविद्धत्वादभेदेन मृषा मतः।
भेदो यथा तरङ्गाणां भेदाद्भेदः कलावतः॥ ३४॥

अभेदानुविद्धत्वात्प्रत्येकं विश्वस्य भेदो मृषा। यथा जलतरङ्गेषु चन्द्रमसः। तत्र हि प्रत्येकं चन्द्रमा इत्यभेदान्वयः, तथा विश्वस्य भेदे ऽपि प्रत्येकम् ‘इदम्’ ‘तत्’ ‘अर्थः’ ‘वस्तु’ इत्यभेदान्वयः। तरुभेदस्तु यद्यपि न मृषा, वनमित्यभेदानुगमश्च न प्रत्येकम्। न हि प्रत्येकं तरुषु वनमिति बुद्धिः। अतो न तेन व्यभिचारः। एतदर्थं च प्रत्येकमित्युक्तम्।

अपरमपि भेदस्य काल्पनिकत्वे ऽनुमानमुपन्यस्यति– **अपि च प्रत्येकम[नु](विद्धत्वादिति।)** ⟨f.115v⟩ प्रपञ्चभेदो विवादाध्यासितो मिथ्या, प्रत्येकमभेदद-

---

76.5–7 Cf. *Bhāvaśuddhi* (273.16–20): विद्यमानैकैकविषयतन्त्रतया विषयभेदो व्याप्तस्तद्विरुद्धोपलब्ध्या विपक्षादभेदोपादानत्वाभावाद्व्यावर्तमानोऽभेदोपादानत्वान्न (ऽभेदो भेदोपादानवत्वान्न *edn*) व्यावर्तते, इति न सन्दिग्धो (सिद्धो *edn*) व्यतिरेक इति द्रष्टव्यम्॥
76.7–9 Cf. *Bhāvaśuddhi* (273.5–8): सत्प्रतिपक्षतामुत्थापयति– स्यादेतदिति॥ ···दूषयति– नेति॥ नैतदनुमानं पूर्वानुमानस्य प्रतिकूलतामाचरति, तदुपपादयति– एवं हीति॥
77.1–4 Cf. *Bhāvaśuddhi* (274.5–6, 9–11): अपरमपि भेदस्य काल्पनिकत्वे ऽनुमानमुपन्यस्यति– अपि चेति॥ विमतो भेदः, मिथ्या, प्रत्येकमभेददर्शनानुविद्धत्वात्; यो य ईदृशः, स स भेदो मिथ्या, यथा जलतरङ्गचन्द्रप्रतिबिम्बभेदाः प्रत्येकमेकचन्द्रमोबिम्बानुविद्धा इत्यर्थः।

76.5 °तन्त्रतया] *em.*; °तन्त्र,तदा MS • विपक्षाद°] MS[pc]; विपक्षत्वाद° MS[ac] **76.6** °पादानत्वा°] MS[pc]; °पादानात्वा° MS[ac] • °मानो ऽभेदो] *em.*; °मानो अभेदो MS **76.8** नैतदनुमानं] *em.*; नैदनुमानं MS[ac] **76.9** तदाभास°] MS[pc]; सदाभास° MS[ac]

र्शनानुविद्धत्वात्। यो य ईदृशः स सर्वो भेदो मिथ्या, यथा जलतरङ्गचन्द्र-प्रतिबि[म्ब](भेदाः प्रत्येक)मेकचन्द्रमोबिम्बानुविद्धा इति। अभेदप्रत्येकानुव्याधो हि स्वसाध्यविरुद्धायाः सत्यताया विरुद्धोपलब्ध्या व्यावर्तमानस्तन्मिथ्या-(त्वे न व्यावर्तत इति न सं)दिग्धो व्यतिरेकः। न खल्वस्ति संभवो यदभेदा-नुव्याधश्च प्रत्येकं भेदश्च समीचीन इति। अभेदानुव्याध एव हि तदा [स्या](त्। समीचीनो ऽभेदानुव्या)ध एव, असमीचीनस्तु भेद इति सांप्रतम्। उपपादितं खल्वभेदस्यानपेक्षत्वं प्रतिष्ठितत्वमाभासनगोचरत्वम्। अभेदस्य तु स(मी-चीनत्वे **प्रत्येकमिति** वि)शेषणस्य व्यवच्छेद्यमाह– **तरुभेदस्त्विति**॥ ⊗॥

अपि च –

एकस्यैवास्तु महिमा यन्नानेव प्रकाशते।
लाघवान्न तु भिन्नानां यच्चकासत्यभिन्नवत्॥ ३५॥

इदं तावदयं भेदवादी प्रष्टव्यः– कथमयं व्यावृत्तस्वलक्षणेष्व-भेदावभासो ऽनुवृत्तव्यवहारश्च? यदि सादृश्यात्, तदत्यन्त-मनन्वितेष्वनुपपन्नम्। अथ व्यावृत्तेरग्रहात्– को हि गुञ्जा-प्रवालादीनां रागव्यावृत्तिमवग्रहीतुं क्षमते– इति। तदसत्। व्यावृत्तिस्वभावस्य तदग्रहे ग्रहणमेव हि न स्यात्।

अपि च विरोधादेकस्य तात्त्विकत्वे कल्पनालाघवादप्यभेदस्यैव ता(त्त्विकत्वं

78.8 व्यावृत्तिस्वभावस्य] व्यावृत्तस्वभावस्य *edn*

77.4–6 Cf. *Bhāvaśuddhi* (274.16–19): प्रत्येकमभेदानुबन्धो हि स्वसाध्यविरुद्धतायाः सत्यताया विरुद्धोपलब्ध्या व्यावर्तमानस्तन्मिथ्यात्वे न (॰त्वेन *edn*) व्यावर्तते, इति न संदिग्धो व्यभिचार इति चशब्दार्थः॥
77.10 Cf. *Abhiprāyaprakāśikā* (274.23): प्रत्येकमिति विशेषणस्य व्यवच्छेदमाह– त-रुभेदस्त्विति॥
78.1–2 Cf. *Bhāvaśuddhi* (274.20–21): विरोधादेकस्यातात्त्विकत्वे कल्पनालाघवादप्यभे-दस्यैव तात्त्विकत्वं युक्तम्, न तु भेदस्य; गौरवप्रसङ्गादित्याह– अपि चेति॥

77.3 ॰नुविद्ध॰] नु *ow.* MS^{ac} • ईदृशः स] *em.*; ईदृश स MS **77.4** ॰नुविद्धा] MS^{pc}; ॰नुविद्धा MS^{ac} • ॰प्रत्येका॰] MS^{pc}; ॰प्रेत्येका॰ MS^{ac} **77.6** व्यतिरेकः] MS^{pc}; व्य-तिरेकाः MS^{ac} **77.9** ॰माभासन॰] *conj.*; ॰मासाचन॰ MS **78.1** ॰लाघवादप्य॰] MS^{pc}; ॰लाघवादस्यप्य॰ MS

युक्तं न तु भे)दस्य, तद्गौरवप्रसङ्गादित्याह– **अपि च**,

एकस्यैवास्तु महिमा यन्नानेव प्रकाशते।
लाघवान्न तु भिन्नानां यच्चकासत्यभि(न्नवत्।

इदं तावदयं)भेदवादी प्रष्टव्यः– कथं व्यावृत्तस्वलक्षणेषु गौर्गौरित्यभेदाव**भासः स्वानुवृत्तव्यवहारश्च** पादस्पर्शादि[दृश्य](त इति तत्रोपपत्तिः) ⟨f.116^{r}⟩ प्रष्टव्येति शङ्कते– **यदि सादृश्यात्**। दृष्टौ हि सादृश्यनिबन्धनावभेदबुद्धिव्यवहारौ तिरश्चामपि। बिभर्ति हि वायसी स्वसुत(सारूप्यमुग्धबुद्धिः स्ने)हार्द्रहृदया सदैव कोकिलापत्यानि। कलिङ्गसंस्थानभेदं च प्रतिगजमभिमन्यमानः सादृश्यात्कुपितः कुञ्जरेन्द्रो गण्डमुखवे(धविह्वलो धूलिधूस)रो ऽपताकः सावष्टम्भमभ्यटति। निराचष्टे– **तदत्यन्तमनन्वितेष्वनुपपन्नम्**। भूयःसामान्ययोगमेव हि जात्यन्तरसादृश्यमाचक्षते त(द्विदः। तदेतदत्य)न्तव्यावृत्तेषु मात्रयाप्यनुवृत्तिरहितेषु स्वलक्षणेष्वनुपपन्नमित्यर्थः। शङ्कते– **अथात्यन्तव्यावृत्तानामपि व्यावृत्तेरग्रहात्**, सपदि (**को हि** सूक्ष्माणां) गुञ्जाप्रवालादीनां रागस्य व्यावृत्तस्यापि **व्यावृत्तिमवग्रहीतुं** क्षम इति। निराकरोति– **अस्व-**

78.7–9 Cf. *Bhāvaśuddhi* (275.12–14): यदीति॥ दृष्टौ हि सादृश्यनिबन्धनावभेदबुद्धिव्यवहारौ। बिभर्ति हि वायसी स्वसुतसारूप्यमुग्धबुद्धिः स्नेहार्द्रहृदया सदैव कोकिलापत्यानीत्यर्थः॥

78.11–13 Cf. *Bhāvaśuddhi* (275.14–16): दूषयति– तदत्यन्तमिति॥ भूयःसामान्ययोगो हि सादृश्यम्, तन्मात्रयाप्यनुवृत्तिरहितेषु स्वलक्षणेष्वयुक्तमित्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (274.last–275.23): भूयःसाधारणधर्मयोगो हि सादृश्यम्, तदत्यन्तमनन्वितेषु मात्रयाप्यनुवृत्तिरहितेषु स्वलक्षणेष्वयुक्तमिति परिहरति– तदत्यन्तमिति॥

78.15–16 Cf. *Bhāvaśuddhi* (275.16–17): व्यावृत्तेरस्वभावत्वे तत्त्वतो भावा न व्यावृत्ताः स्युः, इति स्वाभाविकी व्यावृत्तिरेषितव्या॥

78.2 च,] *em.*; चा MS **78.4** यच्चकासत्यभि॰] *em.*; यच्चकासभि॰ MS **78.5** प्रष्टव्यः] MS^{pc}; प्रष्टष्टव्यः MS^{ac} • ॰स्वलक्षणेषु] MS^{pc}; ॰स्वलक्षणे MS^{ac} **78.6** ॰भासः] *em.*; ॰भास MS • पाद॰] *em.*; पादा॰ MS **78.8** ॰व्यवहारौ] MS^{pc}; ॰व्यवहारो MS^{ac} • स्वसुत॰] स्वसु *ow.* MS **78.9** ॰हार्द्रहृदया] *em.*; ॰हाद्रहृदया MS^{ac}; हृ *ow.* MS • कोकिला॰] MS^{pc}; लोकिकोकिला॰ MS^{ac} • कलिङ्गसंस्थान॰] *em.*; किलिंगसंस्थान॰ MS^{pc}; किलिंगसंस्थन॰ MS^{ac}; सं *ow.* MS **78.11** सावष्टम्भ॰] *em.*; सावप्तम्भ॰ MS^{ac} • निराचष्टे– तदत्यन्तमनन्विते॰] MS^{pc}; निराचष्टो तदत्यन्तमन्विते॰ MS^{ac} **78.12** ॰योगमेव] MS^{pc}; ॰योगमेवं MS^{ac} **78.13** शङ्कते] *em.*; सङ्कति MS **78.13-14**अथात्यन्तव्यावृत्तानामपि] MS^{pc}; अथात्य - - - - - MS^{ac}

भावेन तावद्व्यावृत्त्या न भावास्त(त्त्वतो व्यावृत्ताः स्यु)⟨f.116ᵛ⟩रित्युपपादितम्। तत्र तत्स्वभावा व्यावृत्तिरेषितव्या। तथा च **व्यावृत्तिस्वभावस्य** तद्व्यावृत्त्यग्रहे ऽग्रहणमेव **हि स्यात्**। न ह्यस्ति संभवस्त(देव केनचित्कदाचिद्) गृह्यते न गृह्यते चेति। तयोरनुमानात्संभूतामेव परमार्थसद्गोचरे ग्रहणाग्रहणे प्रत्यक्षवर्तिनी, तद्विनिर्भागवस्तुविषयं सद्ग्र(हणम्। यथाहुर्बाह्याः–

ए)कस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्।
को ऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते॥ इति।

अनादिवासनासध्रीचीनानु[भ](वभुवस्तु विकल्पा निर्भा)गमपि सभागमिव कल्पयन्त एकैकभागावगाहिनस्तदात्मतानुभवविषयमध्यवस्यन्तः तमेव केनचिद्भागेनावगाहन्ते नाव{गा}(हन्ते च केनचिदिति) संभवत एकस्यैवावसायानवसायौ कल्पितभागभेदगोचरौ निमित्तभेदात्। यथाह–

प्रत्यक्षेण गृहीते ऽपि विशे[षें ऽश](विवर्जिते।
यद्विशे)षानुसाये ऽस्ति प्रत्ययः स प्रतीयते॥ इति।

तदिह प्रत्यक्षेण व्यावृत्त(स्वभावेष्वपि गृ)⟨f.117ʳ⟩हीतेषु नामीषामवसीयते परस्परव्यावृत्तिर्विकल्पेन प्रत्यक्षो भिन्नात्मनेति भेदानवसायादभेदावभासश्च तद्व्यवहारश्चेति।

78.21–22 *Pramāṇavārttika* III.43: एकस्यार्थस्वभावस्य ⋯ ⋯ प्रमाणैः परीक्ष्यते॥
78.27–28 *Pramāṇavārttika* III.58: प्रत्यक्षेण गृहीते ऽपि ⋯ ⋯ प्रत्ययः स प्रतीयते॥

78.18–26 Cf. *Bhāvaśuddhi* (275.21–276.6): निश्चयः=विकल्पः, प्रत्यक्षम्, अविकल्पकं वा परमार्थगोचरम् प्रत्यक्षवर्तिनी यद्यप्ययुक्ते ग्रहणाग्रहणे; तथाप्यनादिवासनासध्रीचीनानुभवभुवस्तु विकल्पा निर्भागमपि सभागमिव कल्पयन्त एकैकभागावगाहिनस्तदात्मानुभवमध्यवस्यन्तः तमेव क्वचित्केनचिद्भागेनावगाहन्ते, नावगाहन्ते च केनचित्, इति संभवत एकस्यैवावसायानवसायौ कल्पितभागभेदगोचरौ।
78.29–31 Cf. *Bhāvaśuddhi* (276.6–9): तदिह प्रत्यक्षेण व्यावृत्तस्वभावेष्वपि गृहीतेषु नामीषामवसीयते व्यावृत्तिर्विकल्पेन, इति भेदानवसायादभेदावभासः, तद्व्यवहारश्चेत्यर्थः। चोदयति– तदसदिति॥

78.18 ऽग्रहणमेव] *em.*; अग्रहणमेव MS **78.19** चेति तयोरनुमानात्] *em.*; चेति। रनुमानाम MS **78.21** स्वयम्] *em.*; स्वये MS **78.22** भागः] *em.*; भगः MS • परीक्ष्य॰] *em.*; परोक्ष्य॰ MS **78.24** कल्पयन्त एकैक॰] *em.*; कल्पन्त। एकैक॰ MS; ए *ow.* MS • ॰मध्यवस्यन्तः] *em.*; ॰मस्यन्तः MS **78.26** ॰यानवसायौ] MS[pc] (deleted akṣaras enclosed within braces); ॰यानवसायानवसायौ MS[ac]; ए *ow.* MS **78.27** विशेषें ऽश॰] *em.*; विशेषे अङ्श॰ MS

अथ निश्चयप्रत्यक्षयोरात्मभेदादनिश्चयात्। तदसत्, उभयरूपव्यवहारदर्शनात्। तथा हि– कालाक्ष्यां गोसामान्यनिबन्धनश्च व्यवहारो गवान्तरव्यावृत्तश्च दृश्यते। न च गवान्तरव्यावृत्त्यनिश्चये स युज्यते।

चो[द](यति– **अथ निश्चयप्रत्यक्षयो**)**रात्मभेदा**द्धेतोर्व्यावृत्तस्वभावेषु प्रत्यक्षेष्वपि व्यावृत्तेः कल्पितभेदाया **अनिश्चयाद**भेदबुद्धिव्यवहारावविति निश्चयो (व्यवहारश्च। प्रस्तुतं) विकल्पं दूषयति– **तदसत्, उभयरूपव्यवहारदर्शनात्**सामान्यविशेषव्यवहारदर्शनात्। यथाहुर्वार्त्तिककारमिश्राः –

वत्सो मा[त](रमन्विच्छन्महिष्या)दिगणान्बहून्।
परित्यज्य स्वसामान्याद्गोगणानुपसर्पति॥
तत्रापि चात्मगत्वेन गोष्ठान्तरनिवासिनः।
परित्यज्यैव गोवर्गान् (स्ववर्गमुपसर्पति॥)
तत्रापि चेतरा व्यक्तीस्त्यक्त्वा स्वामेव मातरम्।
असाधारणरूपेण प्राग्दृष्टेनोपसर्पति॥ इति।

तदिदमाह– **तथा हि काला**[**क्ष्यां**](**गोसामान्यनिबन्धनश्च**)**व्यवहारो गवान्तरव्यावृत्तश्च दृश्यते।** दृश्यतां किमेतावतापीत्यत आह– **न च ग-**

79.3 ॰व्यावृत्तश्च] A; *Bhāvaśuddhi*; ॰व्यावृत्तिश्च *edn* **79.3–4** ॰व्यावृत्त्यनिश्चये] ॰व्यावृत्तेरनिश्चये *edn*

79.5–10*Bṛhaṭṭīkā (?):* वत्सो मातरमन्विच्छन् ··· ··· प्राग्दृष्टेनोपसर्पति॥

79.5–12 Cf. *Bhāvaśuddhi* (276.9–11): उक्तमर्थमुपपादयति– तथा हीति॥ वत्सो मातरमन्विच्छन्महिष्यादिगणमपहाय गोगणं गतस्तत्रापि गवान्तरं परिहाय स्वमातरमुपसर्पति, यस्मादित्यर्थः।

Cf. *Śaṅkhapāṇi* (162.18–19): अस्ति चासौ; तथा हि– वत्सो मातरमन्विच्छन् सामान्यबुद्ध्या गोगणमभिधावति, विशेषबुद्ध्या च स्वमातरम्।

79.1 ॰र्व्यावृत्त॰] MS^{pc}; ॰र्व्यावृत्त॰ MS^{ac} • प्रत्यक्षे॰] MS^{pc}; प्रत्यक्षो॰ MS^{ac} **79.2** अनिश्चयात्] MS^{pc}; अनित्यश्चयात् MS^{ac} • ॰व्यवहारावविति] MS^{pc}; ॰व्यवहारादिति MS^{ac} **79.4** ॰हुर्वार्त्तिक॰] *em.*; ॰हुर्व्वाक॰ MS **79.7** चात्म॰] *em.*; चास॰ MS **79.9** स्वामेव] *em.*; स्वात्मव MS **79.10** असाधारण॰] MS^{pc}; आसाधारण॰ MS^{ac} **79.11–12**गवान्तर॰] *em.*; गवान्तरन्तर॰ MS; वा *ow.* MS **79.12** न च] *em.*; वच MS

वान्तरव्यावृत्त्यनिश्चये स युज्यते। न[ख](ल्वर्थक्रिया उत्पाद)विनाशिन्यो ऽप्यन्योन्यव्यावृत्त्यनवग्रहे साधारणे रूपमात्रग्रहे वा यथायथमवभासितेयं प्रागपीति प्रतीतिगो(च)⟨f.117ᵛ⟩राः कल्पन्ते।

अथैकार्थक्रियाकारित्वादतत्क्रियाव्यावृत्तेस्तुल्यत्वात्। तदप्यसांप्रतम्, अर्थक्रियाणामपि भेदादतत्क्रियाव्यावृत्तेस्तुल्यत्वायोगात्। नैकसाध्यान्यस्यार्थक्रिया येनातत्कारिव्यावृत्तिस्तुल्या स्यात्। वस्तुस्वभावश्च व्यावृत्तिः प्रतिवस्तुभेदान्न तुल्या। अथास्वभावाः, तेषां कथं तुल्या?

चोदयति– **अथ** निश्चये ऽपि परस्पर[व्यावृत्तेः स्व]लक्षणसन्तानानाम**एकार्थक्रियाकारित्वादतत्क्रियाका**[रि](**व्यावृत्तेस्तुल्यत्वा**त्सा)मान्यनिबन्धनश्च व्यवहारो गवान्तरव्यावृत्तश्च। यथाह कीर्तिः–

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।
एकधीहेतुभावेन(व्यक्तीनामप्यभिन्न)ता॥ इति।

दूषयति– **तदप्यसांप्रतम्, अर्थक्रियाणामपि भेदादतत्क्रियाकारिव्यावृत्तेस्तुल्यत्वायोगात्।** दर्शनलक्षणया दोहा(दिना सम्पाद्यमानार्थ)क्रिया, न त्वियं प्रतिव्यक्तिविद्यमानैकाकारबुद्धिव्यपदेशनिबन्धनं भवितुमर्हति। न खलु चि-

---

80.4–5 *Pramāṇavārttika* III.109: एकप्रत्यवमर्शस्य … … व्यक्तीनामप्यभिन्नता॥

80.1–3 Cf. *Bhāvaśuddhi* (276.13–15): अथेति॥ निश्चये ऽपि परस्परव्यावृत्तेः स्वलक्षणसन्तानानामेकार्थक्रियाकारित्वम्; अतत्क्रियाकारिव्यावृत्तेस्तुल्यत्वात्। सामान्यनिबन्धनश्च (°रन्धनश्च *edn*) व्यवहारः, गवान्तरव्यावृत्तश्चेत्यर्थः।
80.8–13 Cf. *Bhāvaśuddhi* (277.2–5): न खलु चित्रगवि साध्यो दोहः कपिलासाध्यो भवति, येनातत्कारिव्यवच्छेदेन व्यक्तीनामैक्यकल्पनेत्यर्थः। व्यावृत्तिश्च वस्तुनः स्वभावो (वा? अस्वभावो वा?) आद्यं प्रत्याह– वस्तुस्वभावश्चेदिति॥ अतत्कारिव्यावृत्तिर्न तुल्या स्यादित्यर्थः। द्वितीयं दूषयितुमनुवदति– अथेति॥

79.14 °नवग्रहे] MS^{pc}; °नवग्रहो MS^{ac} • **यथायथमव°**] *conj.*; याशायशमयशमधो MS **79.15 प्रागपीति प्रतीतिगो°**] *em.*; प्रगेपीति प्रतिगो° MS **80.2 व्यवहारो**] *em.*; व्यापावहारो MS **80.3 यथाह**] MS^{pc}; यथा MS^{ac} **80.4 °वमर्शस्य**] र्श *ow.* MS **80.7 °लक्षणया**] या *ow.* MS • **°क्रिया**] *em.*; °क्रियां MS

त्रगवि साध्यो दोहो वानुभवो (वा कपिलासाध्यो) भवति येनातत्कारिव्यवच्छेदेन व्यक्तीनामैक्यं कल्प्येत। तदिदमुक्तम्– **नैकसाध्यान्यस्यार्थक्रिया येनातत्कारिव्या[वृत्ति](स्तुल्या स्यादिति**। सा) चेयं व्यावृत्तिर्वस्तुनः स्वभावो वा स्यादस्वभावो वा? तत्र प्रथमं कल्पं दूषयति– **वस्तुस्वभावश्च व्यावृत्तिः प्रतिवस्तुभेदा[न्न] तु**(ल्येति। द्वितीयमाह– **अथा**)**स्वभावाः**, व्यावृत्तिः **कथं तेषां वस्तूनां तुल्या**? न चास्याः सम्बन्धो वस्तुनेत्युपपादितम्।

अथानादिवासनोपादानो न वस्तुगतविशेषापेक्षः। तदयुक्तम्, नियमात्। कासुचिदेव हि व्यक्तिषु कश्चिदेवावभासः, स वासनामात्रोपादानत्वे न युज्यते। तस्मात्प्रकृत्यैव केचित्कस्यचिदभेदावमर्शस्य योग्याः केचिन्नेति स्वभावविपरीता भावानां सामर्थ्यातिशयाः कल्पयितव्याः। तथा सत्येवं गौरवात्कल्पनायाः। एकस्यैवास्तु माहात्म्यं यदेको ऽपि नानेवावभासते, लघुत्वात्कल्पनायाः। न तु भिन्नानां ते सामर्थ्यातिशयाः, यदमी अभिन्ना इव भासन्ते।

संप्रति बौद्धराद्धान्तरहस्य[मुत्थाप](यति– **अथानादिवासनो**)⟨f.118r⟩**पादानो न वस्तुगतविशेषापेक्षो** ऽनुवृत्तावभासः प्रत्ययस्तत्पूर्वश्च व्यवहारः। इदमत्राभिसंहितम्– चतुर्विधो ऽप्ययं विक(ल्पो सदसद्धर्मावगा)ही गौरीश्वरो

81.1 तदयुक्तम्] तदप्ययुक्तम् *edn* **81.2** एवावभासः] B; एवाभेदावभासः *edn*
81.6 नानेवावभासते] नानेव भासते *edn* **81.8** इव भासन्ते] इवावभासन्ते *edn*

81.2–4 Cf. *Nyāyavārttikatātparyaṭīkā* (440.6–9): एतदत्राकूतम्। विकल्पयोनयो हि शब्दास्तदेवाभिनिविशन्ते यद्विकल्पानां गोचरः, कार्यकारणयोः सामानाधिकरण्येन संप्रतिपत्तेः। चतुष्टयी चेयं विकल्पानां सदसद्धर्मावगाहिनां (सदसद्धर्मिसद्धर्मावगाहिनां *edn*) जातिर्गौरीश्वरो नीलं नित्यमित्येवमादीनां न च विकल्पानां गोचरः।

80.9 °गवि] *em.*; °गवी MS • भवति] MS^{pc}; भविति MS^{ac} **80.10** कल्प्येत] *em.*; कल्प्येत् MS^{pc}; कल्प्यत MS^{ac} **80.13** °भेदान्न तु°] *em.*; °भेदान्न त्तु° MS^{pc}; °भेदात्तु° MS^{ac} **81.2** वस्तुगतविशेषा°] MS^{pc}; वस्तुनाविशेषा° MS^{ac} **81.3** °संहितम्] *em.*; °सहितं MS • चतुर्विधो ऽप्ययं] *em.*; चतुर्विधोप्येयं MS^{pc}; चतुर्विधोप्येवंयं MS^{ac}

नीलं नित्यमित्येवमादिर्न तावत्परमार्थसत्स्वलक्षणमभिनिविशते। अभिलापसंसर्गयोग्यप्रतिभासत[या](कल्पनारूपेण शक्य)संकेतस्तत्र वर्णितः। तदेव च शक्यसंकेतो यद्दर्शनक्रियासमभिहारगोचरः, न च क्षणाः परमार्थसन्तस्तथा। अत एव च [न](खलु ग्राह्यग्राहका)कारो विज्ञानम्, स्वलक्षणाभेदेन तयोरपि तथाभावात्। ज्ञानप्रतिभासस्यैवानर्थस्यार्थत्वेन समारोपितस्य विकल्पविषयत्वम्। य(दि स्वप्रतिभासे ऽनर्थे ऽ)गृहीतेन स्वलक्षणे ऽर्थाध्यवसायेन प्रवृत्तिरिति चेत्? न, विकल्पासहत्वात्।

को नु खल्वयमध्यवसायो नाम किं ग्रहणमा[हो](स्वित्करणमुत यो)⟨f.118^{v}⟩–जनाथ समारोपः? तत्र स्वाभासमनर्थं कथं गृह्णीयात्कथं वा कुर्याद्विकल्पः? न हि जातु नीलं पीतं शक्यं कर्तुं ग्रहीतुं न केनचिद्बहुशि[ल्प](कुशलेनापि। तथा हि) विकल्पाप्रतिभासिना चागृहीतेन स्वलक्षणेन कथमात्माकारं योजयेद्विकल्पः? समारोपो ऽप्यनुभवपूर्वः। न च विकल्पः प्रा(क् स्वाकारमनुभूय) पश्चादारोपयति। क्षणद्वयस्थितिविकला हि सर्व एव भावाः, विशेषतो विज्ञानमर्थसमसमयः स्वरूपानुभवेनार्थसम(समयेन गृह्यमा)णो ऽवि-

---

81.8–15 Cf. *Nyāyavārttikatātparyaṭīkā* (441.8–14): स्वाकारमबाह्यं बाह्यमध्यवस्यन्विकल्पः स्वाकारबाह्यत्वविषय इति चेत्? यथाह– स्वप्रतिभासेऽनर्थेऽध्यवसायेन प्रवृत्तिरिति। अथ को ऽयमध्यवसायः? किं ग्रहणम्, आहोस्वित्करणम्, उत योजना, अथ समारोपः? तत्र स्वाभासमनर्थमर्थं कथं गृह्णीयात्, कुर्याद्वा विकल्पः? न हि पीतं नीलं शक्यं ग्रहीतुं कर्तुं वा शिल्पकुशलेनापि नाप्यगृहीतेन स्वलक्षणेन स्वाकारं योजयितुमर्हति विकल्पः।

81.15–16 Cf. *Abhiprāyaprakāśikā* (276.26–27): आरोप्यमाणानुभवपूर्वश्चारोपः। न च विकल्पः प्राक् स्वाकारमनुभूय पश्चादारोपयति; क्षणिकत्वात्।

81.4 नीलं नित्यमित्येव॰] *em.*; नीलन्निमित्येव॰ MS^{pc}; नीलमित्येव॰ MS^{ac} • ॰मभिनिविशते] *em.*; ॰मतिनिविशते MS^{pc}; ॰मभिनिविशतिते MS^{ac} **81.5** ॰प्रतिभासतया] MS^{pc}; ॰प्रतितया MS^{ac} • वर्णितः] *em.*; वर्त्तित MS **81.6** शक्यसंकेतो] *em.*; शक्यं संकेतं MS **81.7** ॰णाभेदेन] MS^{pc}; ॰णादभेदेन MS^{ac} **81.8** ॰स्यैवानर्थस्यार्थत्वेन] MS^{pc}; ॰स्यैवानेर्थस्यार्थेत्वेन MS^{ac} **81.8–9**विकल्पविषय॰] MS^{pc}; विषय॰ MS^{ac} **81.9** स्वलक्षणे ऽर्थाध्यव॰] *conj.*; स्वलक्षेर्व्विर्थाध्यव॰ MS; र्था *ow.* MS **81.11** ॰वसायो नाम] MS^{pc}; ॰वसा नामा MS^{ac} • ग्रहण॰] MS^{pc}; ग्रह॰ MS^{ac} **81.12** ॰थ समारोपः] थ *ow.* MS • ॰मनर्थं कथं] *em.*; ॰मनंर्थ MS **81.13** जातु] *em.*; जानु MS • शक्यं कर्तुं ग्रहीतुं] *em.*; संक्या कत्व ग्रहीतु MS **81.15** समारोपो] MS^{pc}; समारो MS^{ac} **81.16** क्षणद्वय॰] *em.*; क्षणद्व॰ MS **81.17** ॰नमर्थसम॰] MS^{pc}; ॰नं असम॰ MS^{ac}

कल्पनीयार्थो विज्ञानस्वरूपादविकल्पसंवेदनसिद्धान्न भिन्नो नाप्यविकल्पगोचरात्स्वलक्षणादित्यलीकं व्यवतिष्ठ(ते बाह्यम्, यथाध्य)वसायमतत्त्वाद्यथातत्त्वं चानध्यवसायादिति। विकल्पप्रत्ययानां चाविद्यात्मनामयमीदृगिति दर्शन एवानुभवसिद्धे (ऽसन्तमस)⟨f.119r⟩दृशमपि सन्तमिवानुभूतस्वलक्षणसदृशमिवादर्शयन्ति। अत एव चासदर्थप्रकाशनादनुभवसिद्धादविद्यास्वभावा विकल्पा अ(ध्यवसीयन्त इत्यवि)द्यात्वं विकल्पानाम्।

तच्चालीकं केचिद्विधिरूपमास्थिषत। न खल्वविहित एकस्मिन् तदन्यव्यावृत्तिः शक्या प्रतिपत्तुम्। तस्मा(न्नियतत्वेन विहिता अमी) विकल्पास्तत्सामर्थ्यादेवान्यनिवृत्तिमाक्षिपन्ति, न पुनरियं प्रतीतिः कृतेति। तदिदमसुन्दरम्। विधिरूपं चेदमी बाह्यसदृशं समारोपयन्ति (व्यलीकम्, तद्धि व्य)भिचारात्स्वभावविरोधाच्चास्ति नास्तीति विकल्पान्तरसन्निधापितौ भावाभावौ नापेक्षेत ताभ्यां च न सम्बध्येत। वस्तु हि सद्भावात्मक(मसद्भावात्मकं चास्तिना)स्तिगोचरौ भावाभावावपेक्षते ताभ्यां च सम्बध्यते। विकल्पविषयो ऽपि चेद्विधिरूपो वस्तुस्वरूपो नायमपि तद्वदेव तावपेक्षेत स[म्ब](ध्येत वा ताभ्यामेकत्रै)वास्ति वृक्षो नास्ति वृक्ष इति। सो ऽयं भावाभावासाधारणो बाह्यविकल्पो न विधिरूपो भवितुमर्हति। तस्माद् वृक्षे वृक्षाभावो ऽस्ति प्रस(ज्यप्रतिषेधात्मकः।) ⟨f.119v⟩ सत्त्वं च विधिरूपं संस्पष्टं विधिरूपं चारोपयितुमसमर्थः केवलेनावृक्षाभावेन विशिष्टमवृक्षाभावनिष्ठं वृक्षमारोपयति। ततो बाह्ये-

---

81.19–20 *Pramāṇavārttika–svavṛtti I. 212–213:* यथाभिनिवेशमतत्त्वाद्यथातत्त्वं चासमीहितत्वात्।

81.18 °नीयार्थो] *conj.*; °नायार्थो MS^{pc}; °नार्थो MS^{ac} • °सिद्धान्न] *em.*; °सिद्धानु MS **81.19** °मतत्त्वाद्यथा°] *em.*; °मतत्त्वा यथा° MS^{pc}; °मतत्त्वा येथा° MS^{ac} **81.20** °मीदृगिति] *em.*; °मिदृगति MS **81.21** सन्तमिवानु°] *em.*; सन्तमिनु° MS **81.22** चासदर्थ°] MS^{pc}; चाससदर्थ° MS^{ac} **81.24** °स्थिषत] *em.*; °स्थिषत् MS • खल्वविहित एकस्मिन्] MS^{pc}; खयखल्वविहित एकस्मिन MS^{ac} **81.24–25** °व्यावृत्तिः] MS^{pc}; °व्याद्विवृत्तिः MS^{ac} **81.25** °पत्तुम्] त्तुं *ow.* MS • विकल्पास्त°] स्त *ow.* MS **81.26** प्रतीतिः] *em.*; प्रतीति MS **81.27** °सदृशं समा°] *em.*; °सदृसमा° MS **81.28** °चारात्स्वभावविरोधा°] *conj.*; °चारावभावाविरोधा° MS **81.30** ताभ्यां] ता *ow.* MS • सम्बध्यते] MS^{pc}; सम्बध्याते MS^{ac} **81.31** चेद्विधि°] चे *ow.* MS **81.32** °वास्ति वृक्षो नास्ति वृक्ष] *em.*; चास्ति वृक्षोमस्ति वृक्ष MS^{pc}; नास्ति वृक्षोमस्ति वृक्ष MS^{ac} • °विकल्पो] *em.*; °विधर्स्मा MS **81.33** तस्माद् वृक्षे] *em.*; तस्मावृष्टे MS **81.34** संस्पष्टं] *em.*; संस्प्रष्टं MS • °मसमर्थः] *em.*; °पसमर्थः MS **81.35** केवलेना°] *em.*; केवलना° MS

(नासदृशं वृक्षमारो)पयन्नपि विकल्पो बाह्यमिवादर्शयति। भावाभावासाधारण्यात्खल्वयं भावैकात्मना स्वलक्षणेन विसदृशो ऽप्यवृक्षाभावाव्यावृत्त्या सदृश [इ](वावृक्षाभावविशिष्टं) बाह्यमादर्शयति विकल्पः। अवृक्षाभावविशिष्टस्य च समारोपितस्य वृक्षो ऽयमित्यवसाय एव बाह्यत्वावसायः। न तु साक्षाद्बा[ह्या](ह्यावृक्षाभावप्रती)तिः, बाह्यवृक्षाप्रतिपत्तौ तन्नियतायास्तस्या अप्रतीतेः। अपि च शब्दो न नित्य इति प्रतिषेधप्रक्रमे शब्दसमानाधिकरणं चा[भि](न्नं नित्यत्वं प्रतिषिध्यते)नैकं दृष्टं वस्तु। तत्रैकस्मिन्ननिवर्तिते नेतरं निवर्तयितुं शक्यम्, अवस्थिते च शब्दे प्रतिषिध्यते तदभिन्नं नित्यत्वम्। तदेतद्बाह्यसदृ[शो](पि विकल्पो ऽप्रतीतो)[गोचरे नोपपद्येत। तस्य] भावाभावसम्बन्धयोग्यार्थे प्रतीते त्वसमानाधिकरणधर्मान्तरनिषेधे ऽप्यनिषेधाच्चान्यव्यावृत्तिनि[ष्ठ](त्वं पर्यवस्य) ⟨f.120^{r}⟩ न्ति विकल्पा इत्यवस्यामः। यद्यपि चास्ति नास्तीति विधिनिषेधौ न बाह्ये तस्यानवभासनात्, न बुद्धितद्ग्राह्याकारयोस्तयोरनुभूयमा(नत्वात्, न च समारोपिते) तस्यापि तेन रूपेण तदानीं गृह्यमाणस्य व्याघातपौनरुक्त्याभ्यां प्रतिषेद्धुं विधातुं चाशक्यत्वात्। तथापि समारोपितस्य त(द्बाह्यत्वस्य विधि)निषेधावुपपत्स्येते। अध्यवसायो हि विकल्पग्राह्यस्यालीकस्य बाह्यभेदो नाम भागो विधिनिषेधाभ्यां युज्यते, न ग्राह्यः समारोपितः।[त](था हि यद्भावा)भावसाधारणं रूपमवसीयते तदन्यव्यावृत्तिनिष्ठमेव। यथानश्वावसायेनानश्वो ऽवधार्यमाणो ऽस्ति न चेति भावाभावसाधारणो ऽन्य[व्या](वृत्तो ऽवसीयते। तेन सा)धारणं च भावाभावयो रूपमवधार्यते विवादाध्यासितैर्विकल्पैरिति स्वभावहेतुः। न चायमसिद्धः,

81.52–55 Cf. *Nyāyakaṇikā* (641.3–6): तथा हि यद्भावाभावसाधारणं रूपमवसीयते तदन्यव्यावृत्तिनिष्ठमेव यथामूर्तत्वादि, तथा च गवादिविकल्पविषया इति स्वभावहेतुः।

81.36 °वाक्यमिवा°] MS^{pc}; °वाक्येमिवा° MS • भावाभावा°] *em.*; भाभाभावा° MS **81.37** विसदृशो ऽप्य°] *em.*; विदृशोष्म° MS **81.38** अवृक्षा°] MS^{pc}; आवृक्षा° MS^{ac} **81.41** शब्दो] श *ow.* MS **81.42** °न्ननिवर्तिते] *em.*; °न्ननिवर्त्तते MS **81.45** °योग्यार्थे] MS^{pc}; °योयोग्यार्थे MS^{ac} **81.48** °रनुभूय°] *em.*; °रन्नभूय° MS • तस्यापि तेन] MS^{pc} (deleted akṣaras enclosed within braces); तस्यापि ते तस्यापि तेन MS^{ac} • तदानीं] *em.*; तदानी MS **81.49** °पौनरुक्त्याभ्यां] MS^{pc}; °पौनक्त्याभ्यां MS^{ac} **81.50** °वुपपत्स्येते] वु *ow.* MS • °वसायो] MS^{pc}; °सवसोयो MS^{ac} **81.51** °निषेधाभ्यां] MS^{pc}; °निषेभ्यां MS^{ac} **81.52** समारोपितः] *em.*; समापितः MS^{ac} **81.53** यथा°] MS^{pc}; यथ° MS^{ac} • °वसायेनानश्वो] *em.*; °वसायानानस्वा MS **81.55** विवादाध्यासितैर्विकल्पै°] *em.*विवादासितैर्विकल्पै° MS^{pc}; विवादासितैर्विकाल्पै° MS^{ac}

अनुभवसिद्धो हि सर्वस्य भावाभावसा[धा](रणो ऽन्यव्यावृत्तिनिष्ठो वस्तु)नो विकल्पः। नापि संदिग्धव्यतिरेकः। एकव्यावृत्तिनिष्ठं रूपावसायनिबन्धनं हि साधारणग्रहणम्, उक्तेन क्रमेण न हि तदनि[बन्धनं](नाप्यन्यनिबन्धनमिति) तत्र विपक्षवृत्तौ व्यापकस्य निमित्तवत्त्वस्याभाव इति व्यापकानुपलब्ध्या विपक्षाद्व्यावृत्तमानं साधारणं ग्रहणमेकव्यावृत्तिनिष्ठ[रू](पावसाये तिष्ठतीति प्रति)⟨f.120^{v}⟩बन्धसिद्धिः।

अपि च यदत्यन्तविसदृशस्य ताद्रूप्यग्रहणं तदन्यनिवृत्तिकृतसादृश्यग्रहणतन्त्रम्, यथा स्तम्भः कुम्भविसदृशो ऽपि यस्य भावविशि[ष्ट](त्वस्य ग्रहणात् कु)म्भसदृशो ऽवधार्यते स्तम्भः पटः कुम्भो घट इति। तथा च विकल्पविषयो ऽत्यन्तविसदृशो ऽपि बाह्य इवावसीयत इति स्वभावहेतुः। बाह्यावसाय(स्य विकल्पानां सर्वेषाम)नुभवसिद्ध इति नासिद्धो हेतुः। न चालीकबाह्यत्वग्रहणमनिमित्तं नाप्यन्यनिमित्तमिति यथोक्तम्, अन्यनिवृत्त्यग्रहणे बाह्यत्वग्रहणं [निमि](त्तवत्त्वस्य व्यापकस्याभा)वान्निवर्तमानमन्यनिवृत्तिनिमित्तबाह्यग्रहणे विश्राम्यतीति व्याप्तिसिद्धिः।

अपि च विधिरूपो विकल्प्यते ऽर्थ इति ब्रुवता विधि(रूपेण विकल्पेनान्य)निवृत्तिरवसीयत इति स्फुटमादर्शितं भवति। न चैतद्युक्तम्, यत एकविधिविकल्पकाले तदितरनिवृत्तावप्रतीयमानायां विधिरूपेण वि(कल्पो ऽवसीयत इति)न शक्यो वक्तुम्। रूपान्तरसन्देहे हि संदिग्धः स्याद्विकल्पगोचरः, तथा चानवधारयन्नयं न प्रेक्षावान् क्वचित्कुतश्चित्प्रवर्तेत निवर्तेत [वा](। अतो ऽन्यनिवृत्तिनिष्ठ)मेवं नियतमर्थं विकल्पयति विकल्पः। तदिदमप्येवं प्रयोगमारोहति– यन्नियतरूपावधारणं तदन्यनिवृत्तिनिष्ठम्, यथा स्थाणु(रयमिति

81.62–65 Cf. *Nyāyakaṇikā* (641.8–642.2): तथा च यदत्यन्तविसदृशानां सादृश्यमापादयति तदन्यव्यावृत्तिनिष्ठमेव यथा वराहमहिषमातङ्गादीनामत्यन्तविसदृशानामक्रमेलकत्वम्। तथा चात्यन्तविसदृशानां शावलेयादिस्वलक्षणानां गोत्वमिति स्वभावहेतुः।

81.58 °निबन्धनं] *em.*; °निबन्धन MS • °णमुक्तेन] *em.*; °णंमुक्तेन MS **81.59** °भाव] *em.*; °भावा MS **81.62** यदत्यन्त°] *em.*; यदन्त्य° MS **81.63** °विसदृशो] *em.*; °विदृसोMS **81.64** स्तम्भः पटः] *em.*; स्तम्भो पट MS • विकल्पविषयो] MS^{pc}; विषयो MS^{ac} **81.66** नासिद्धो] सि *ow.* MS **81.67** नाप्यन्य°] MS^{pc}; नाप्य° MS^{ac} • यथोक्तमन्य°] *em.*; यथोक्तान्य° MS **81.68** °न्निवर्त°] a half-written akṣara deleted after व) **81.73** स्याद्विकल्पगोचरः] *conj.*; स्याद्विकल्पः गोचरः MS **81.74** तथा चा°] चा *ow.* MS **81.75** तदिद°] दिद *ow.* MS **81.76** °णं तद°] MS^{pc}; °णमद° MS^{ac}

स्थाणुवि)(f.121^{r})षयो विकल्पस्तदितरपुरुषादिनिवृत्तिनिष्ठः। तथा च नियताध्यवसायिनो विवादाध्यासिता विकल्पा इति स्वभावहेतुः। अत्रापि नियता[व](धारणमन्यनिवृत्ति)निमित्तमुपपद्यत उक्तेन क्रमेणेति विपक्षान्निवृत्तं नियतग्रहणं व्यापकस्य निमित्तवत्त्वस्याभावादन्यनिवृत्तिमदवधारणे तिष्ठ[ती](ति व्याप्तिसिद्धिः।

विधिरू)पत्वे विकल्पानां यतश्च व्यावर्तते यच्च व्यावर्तते या च व्यावृत्तिस्तत्त्रितयावभासप्रसङ्गः, यथा न गौरयमश्व इत्यस्मिन्विकल्प इति चेत्, न। स[द](सत्समन्वयान्नियतावभा)सगोचरास्तावद्विकल्पा उदयन्ति व्ययन्त इति सर्वजनीनम्। न चान्यव्यावृत्तिनिष्ठतामन्तरेणैवैतदित्युपपादितम्। तस्माद्यथा जातिमन्तम[र्थं प](श्यन्तो व्यक्तिलोपान्यथानुपप)त्त्या कृत्ये विशेषणविशेष्यभावसंप्रत्यये विशिष्टप्रत्ययानुरोधात्सामान्यविशिष्टव्यक्तिदर्शनं परिकल्पितवन्तः, एवं सदसत्समन्व(यादन्यव्यावृत्तिनिष्ठ)तालोपान्यथानुपपत्त्या त्रयानवमर्शे ऽप्यन्यव्यावृत्तिपरतारोप्यत इत्यवस्यामः। अन्यः खल्वयं विकल्पो विषाणी गौरयं नाश्व इति (विधिरूपः, अन्यश्चायं) खल्वभावो ऽनश्वो गौरिति मुकुलितविकल्पनिर्भासः। तुल्यार्थानामपि समासाभ्यां प्रत्ययभेदो यथा⟨f.121^{v}⟩ तिष्ठति न यातीति। तदेतेषु विकल्पेष्वनाद्यविद्यानुभववासनायोनिषु यथास्वमेकैकव्यावृत्तिनिष्ठमर्थमवगाहमानेषु यादृशमेको ग[वा](दिविकल्पो ऽलीकं)कल्पयत्यर्थं तादृशमेव तद्विधं गोविकल्पान्तरमपि। न च तेषां प्रकटानां परस्परं पूर्वप्रत्ययोपदर्शितसदृशो मयार्थः परिच्छिद्यत इत्यस्ति [प्र](त्ययो येनाभेदारोपा)दर्थानां परस्परतो भेदो न गृह्यते। तदनुरोधिनी च पश्चात्प्रत्यभिज्ञोपजायते स एवायं यः पूर्वदृष्टो ऽर्थ इति। स चाभिन्नः समारोप्य[मा](णो विकल्पविलसितैनै)कत्वेनारोप्यते। तस्मादनादिवासनोपा-

---

81.93–94 Cf. *Nyāyakaṇikā* (647.1–3): ननूक्तं भेदे ऽप्यलीकानां यादृशमेको गोविकल्पः कल्पयत्यलीकं तादृशमेवापर इति भेदाग्रहादलीकानामभेदावसाय इति।

81.78 °दाध्यासिता] MS^{pc}; °दासिता MS^{ac} **81.79** निमित्त°] MS^{pc}; निमित्तनिमित्त° MS^{ac} **81.82–83** °त्तिस्तत्त्रितया°] *em.*; °त्तिः तं त्रितया° MS **81.84** °दित्युप°] त्यु *ow.* MS **81.87** °संप्रत्यये] MS^{pc}; °संप्रत्यये प्रत्यये MS^{ac} **81.89** °परतारोप्यत] MS^{pc}; °परनारोप्यत MS^{ac} **81.90** विषाणी] *conj.*; विकासी MS • ऽनश्वो] MS^{pc}; न्यस्व MS^{ac} **81.93** °व्यावृत्तिनिष्ठ°] MS^{pc}; °व्यावृत्तितिष्ठ° MS^{ac} **81.94** तादृश°] *em.*; तांदृश° MS **81.95** प्रकटानां] *conj.*; प्रटानां MS

दानविकल्पविलसितमेकत्वमभिन्नव्यवहारहेतुरिति सिद्धम्। तदेतद्दूषयति– **तदयुक्तम्**। कुतः? **नि(यमात्। दृश्यते हि) कासुचिदेव व्यक्तिषु शाबलेयबाहुलेयादिषु न तु शोणकर्कादिषु कश्चिदेव** गौर्गौरित्यवभासो न पुनरश्वो ऽश्व इति। सो ऽयं नियमो ऽर्थानपेक्षवा(सनामात्रोपादानत्वे न युज्य)ते, तन्मात्रस्य सर्वत्राविशेषात्, कारणनियमे कार्यनियमायोगात्।

अत्रेदमाकूतम्– इदं तावद्भवान् पृष्टो व्याचष्टां यत्तदलीकं [वि](कल्पयति त-त्किमन्य)व्यावृत्तिराहोस्विदियमस्य धर्मः। यद्यनर्थान्तरं तर्हि त्रितयोल्लेखात्मकं तदनुभूयेत ⟨f.122^{r}⟩ गौरिति विकल्पविज्ञानम्। न ह्यस्ति संभवो व्यावर्त्तनीयं व्यावृत्तिविषयश्च नानुभूयेते व्यावृत्तिश्चानुभूयत इति। जातिमन्तमर्थं प[श्य](तां यथा विशेषणवि)शेष्यसंप्रत्यये गौरिति विशिष्टप्रत्ययानुरोधात्सामान्यविशिष्टव्यक्तिदर्शनकल्पना परेषामेवमिहापि त्रयानवमर्शो ऽप्यन्यव्यावृत्तिनिष्ठद[र्श](नानुरोधादिति चेत्, अहो) बतास्य स्वदृष्टिपक्षपातो यदात्मसंवेदनमपि मद्दर्शनमसंवेदनमिवानुमातुमुद्यतः। न च परेषामालोचने वा विकल्पे वा जाति[जा](तिमतोरभेदव्यवहारस्य) विशेषणविशेष्यभावस्य वा न प्रथा। एकविज्ञानसंसर्गिणोः खल्वाकाराकारिणोरनुरञ्जकानुरञ्जनीयभावो विशेषणविशेष्यभाव(श्चाभेदव्यवहारश्चा)भिमतौ जातिजातिमतोरिति नेह तिरोहितमिवास्ति किञ्चन। तव च गौरिति विकल्पे ऽगोप्रसज्यप्रतिषेधावगा-

---

81.99–103 Cf. *Abhiprāyaprakāśikā* (278.15–18): दूषयति– तदप्ययुक्तमिति॥ नियममेवाह– कासुचिदिति॥ शाबलेयबाहुलेयादिष्वेव गौर्गौरित्यभेदावभासः, न त्वश्वमातङ्गयोः सो ऽयं नियम इत्यर्थः। अनपेक्षवासनामात्रोपादानत्वं न युज्यते तन्मात्रस्य सर्वत्राविशेषात्। अर्थसापेक्षत्वे च वासनायाः प्राप्तमर्थस्यैवाभेदावभासयोग्यत्वमित्यर्थः।

81.100 कासुचिदेव] *em.*; कामुचिदेव MS • व्यक्तिषु] MS^{pc}; व्यक्ति MS^{ac} 81.100–101 शाबलेयबाहुलेयादिषु] MS^{pc}; साबलेयादिषु MS^{ac} 81.101 तु शोणकर्कादिषु] *conj.*; त्योणावार्कादिषु MS^{pc}; त्योणावार्कादि MS^{ac} • °वभासो] *em.*; °वभाभो MS 81.102 नियमो] MS^{pc}; नियनिमो MS^{ac}; मो *ow.* MS 81.105 °राहोस्विदियमस्य धर्मः।] MS^{pc}; °राहोदियमस्य धर्मा MS^{ac} 81.106 °भूयेत] *em.*; °भूयेत् MS^{pc}; °भूयत् MS^{ac} 81.107 व्यावृत्ति°] MS^{pc}; व्यावृर्त्ति° MS^{ac} • °विषयश्च] *em.*; °विषयस्वय MS 81.109 °दर्शनकल्पना] MS^{pc}; °दर्शन MS^{ac} • °मेवमिहापि] *conj.*; °मिवेहापि MS 81.110 °पक्षपातो] *em.*; °पक्षपोतो MS 81.111 °मसंवेदनमिवानुमातु°] *em.*; °मसम्विदतमिवानुमात्र° MS 81.112 वा] *em.*; व्य MS 81.113 °रञ्जका°] *em.*; °रजंका° MS 81.114 °मतोरिति] तो *ow.* MS 81.115 किञ्चन।] न। *ow.* MS

हिनि नागौर्न तदन्याहो(स्विदलीकं विलक्ष)णमसाधारणं प्रथत इति किमिहास्ति तिरोहितम्? प्रसज्यप्रतिषेधपरमार्थमेव तदलीकं स्वलक्षणाद्गृहीतभेदं तदात्मना वि(कल्परूपे)⟨f.122^{v}⟩ण प्रकाशत इति चेत्, ननु तत्स्वलक्षणक्षणावभासि च विकल्पविज्ञानं तदात्मना स्वगोचरमवभासयति चेति चित्रम्। तदप्यारोपितमेव, यथाह– 'तद(वसेयं यदनुमानेन गृ)ह्यते यच्चाध्यवसीयते ते द्वे अप्यन्यनिवृत्ती न वस्तुनी' इति चेत्, हन्त तर्हि यतो ऽस्यालीकस्याभेदाध्यवसायस्तदप्यन्यनिवृत्तिरूपमिति (स्वलक्षणमन्यनिवृत्ति)रपि परमार्थतस्तदन्यव्यावृत्तमिति। तत्सादृश्यात्तदभेदाग्रहे ऽलीकमपि बाह्यमित्यभिमन्यत इति चेत्, ननु भवतु नाम तत्सदृशं न पुनः पर[मा](र्थसत्। बाह्यत्वमलीकम्)पि विकल्पगोचर इत्युक्तः, अगोचरेण च विकल्पः कथमिव स्वगोचरं संभिनत्ति। समसमयप्रवृत्तेन परमार्थसत्स्वलक्षणावगाहिना नि(मित्तेन विकल्पस्यालीकस्या)नवसायाद्विषयस्य बाह्यत्वावसाय इति चेत्। न तावदयं ताभ्यामेव स्वगोचरनियतप्रचाराभ्यां भवति नाविकल्पान्तरेण, ताभ्यां लब्धजन्म[नो] (विकल्पस्यालीकत्वात्। प्रति)पत्तुरभिनिवेशमात्रमेतदिति चेत्। न, प्रतिपत्तुश्चाभिनिवेशस्य च बुद्धेरनतिरेकात्। तस्याश्च विकल्पिकाया अविकल्पि[का](या वाविशेषात्।) ⟨f.123^{r}⟩ अपि च तद्बाह्यसदृशं सत्कथं न विधिरूपम्? तद्रूपं चेत्कथं बाह्यस्यान्यव्यावृत्तिभागेन सदृशं सद्भावाभावसाधार[णेन] विधि[भा](गेन च विसदृशम्?) बाह्यात्मनानुभूयमानस्य साधारण्यानुपपत्तेः, निर्भागस्य चैकस्य परमार्थसतो भागभेदानुपपत्तेः, कल्पनानिर्मित[स्या](लीकबाह्यत्वस्य) विधिभागस्यापि चान्यनिवृत्तिरूपता-

81.120–121 Cf. *Nyāyakaṇikā* (557.4–6): तदवसेयस्यापि परमार्थसत्त्वाभावात्। तथा हि यदनुमानेन गृह्यते यच्चाध्यवसीयते द्वे अप्यन्यनिवृत्ती न वस्तुनी।

81.116 तदन्याहो°] *em.*; तदत्याहो° MS • प्रथत] *conj.*; प्रथन्त MS^{pc}; प्रसज्यन्त MS^{ac} **81.116–117** किमिहास्ति] *em.*; किमिहा MS **81.118–119** तत्स्वलक्षणक्षणावभासि] *em.*; तस्वक्षक्षणावभासि MS^{pc}; तस्वक्षणक्षणावभासि MS^{ac} **81.119** चित्रम्] त्रं *ow.* MS **81.123** °तस्तदन्य°] MS^{pc}; °तस्तन्य° MS^{ac} **81.124** भवतु] *em.*; भवन्न MS **81.126** सम्भिनत्ति] *em.*; सम्भिन्नत्ति MS **81.129** °निवेशमात्रमे°] MS^{pc}; °निवेशमात्रमेतिमे° MS^{ac}; वे *ow.* MS **81.130** °रनतिरेकात्] °रननिरेकात् MS^{pc}; °राननिरेकात् MS^{ac} **81.132** °स्यान्यव्यावृत्ति°] MS^{pc}; °स्यान्यनिव्यावृत्ति° MS^{ac} **81.133** सद्भावा°] MS^{pc}; सवाद्भावा° MS^{ac} **81.134** निर्भागस्य] MS^{pc}; निर्भासगस्य MS^{ac} • परमार्थ°] *em.*; पारमार्थ° MS **81.135** कल्पनानिर्मित°] MS^{pc}; कमल्पनाविनिर्म्मीत° MS^{ac}

पत्तेः। न च प्रसज्यप्रतिषेधस्य सर्वोपाख्याविरहिणो वस्तुरूपतेति कुतस्तेनालीकस्य वस्तुसा(धारण्येन रूपा)ध्यवसायः, कुतस्तमां च व्यावृत्तिरूपतानवमर्शो ऽव्यावृत्तिरिति।

अपि च कल्पनामात्राधीनतत्त्वमलीकं कल्पनानुपदर्शितेन प्रसज्य[प्र](तिषेधेन गृह्यत इ)ति दुर्वचम्। भावो हि स्वप्रत्ययासादितस्वरूपः स्वरूपमपि वा शयानो ऽपि तेन रूपेण कल्पनयोपदर्शित इति शक्यं वक्तुम्। अस्ति हि त[स्य](स्वरूपमन्यथा का)ल्पनिकाद्रूपात्काल्पनिकामपि वेदीमन्ततः काल्पनिकत्वमपि जह्याद्भाविकमेव तदा स्यात्। तस्माद्भावात्मना प्रथम(मविकल्पकं) ⟨f.123^{v}⟩तद्रूपमेवोपेतव्यं न प्रसज्यप्रतिषेधात्मकमिति युक्तमुत्पश्यामः। सिद्धमेतदचन्द्रः शशीतिवत्प्रतीतिविरोधादनैकान्तिकं सदसाधना[ङ्ग] (वचनं वस्तुसाधार)ण्यादिति, अपक्षधर्मो वा प्रतीतिविरोधेनाजिज्ञासितविशेषतया पक्षभावाभावादिति। अस्तु तर्हि भावरूपमेवान्यव्यावृत्तिध(र्मरूपेण विकल्प)गोचरः। एवं हि प्रवृत्तिनियमः कल्पते न पुनरनियतालीकबोधने प्रवृत्तिरिति कथं धर्मो ऽपि न त्रयानवमर्शनान्तरीयकः? रूपमेवाली[क](बाह्यत्वं स्वस्मा)त्स्वेनैवात्मना नीलस्वलक्षणमिव पीतादिभ्यो ऽश्वादिविकल्पगोचरेभ्यो व्यावर्तते, तन्न तस्य त्रयावमर्शनान्तरीयकत्वमिति चेत्। क[स्त](र्ह्यनीलमित्यत्र) निषेधार्थः? न खल्वनीलमपि वस्तुसत्पीतादिभ्यो व्यावर्तमानं प्रसज्यप्रतिषेधो भवति। ननु वस्तुविचारासहतया तु विकल्पगो[च](रस्यालीकबाह्य)त्वं विधिवादिनो ऽपि प्रतिपेदिरे, विकल्पप्रथायां तूचिरे विधिरूपताम्। न चैकविध एवान्यस्य निषेध इति चोपपादितमधस्ता[त्।] (नैतदात्माश्रया)⟨f.124^{r}⟩दन्यापोहमवगाहते ऽन्योन्यसंश्रयादिति वा। न चै-

---

81.136 कुतस्तेना°] MS^{pc}; कुतेस्तेना° MS^{ac} 81.138 °त्तिरिति] MS^{pc}; °त्तिरूरिति MS^{ac} 81.139 °मात्राधीन°] त्रा *ow.* MS • °दर्शितेन] MS^{pc}; °दर्शिदतेन MS^{ac} 81.141 °योपदर्शित] MS^{pc}; °योर्द्दर्शित MS^{ac} • शक्यं] श *ow.* MS 81.142 °मन्ततः] MS^{pc}; °सन्ततः MS^{ac} 81.143 तस्माद्भावात्मना] MS^{pc}; तस्माद्भाविकमेव तदोवात्माना MS^{ac} 81.144 °षेधात्मकमिति] *em.*; °षेधोत्मकमिति MS 81.145 शशीतिवत्प्रतीतिविरोधाद°] *em.*; शशितिवत्प्रतीतिविरोद° MS 81.146 प्रतीति°] MS^{pc}; प्रति° MS^{ac} • °विरोधेनाजिज्ञा°] *em.*; °विरोधेनाजिनाजिज्ञा° MS 81.150 °त्स्वेनैवा°] *em.*; °त्स्वनैवा° MS 81.152 सत्पीतादि°] त्पीता *ow.* MS 81.153 ननु वस्तु°] *em.*; न तु वस्ता° MS • °विचारासह°] MS^{pc}; °विचारसह° MS^{ac} 81.154 तूचिरे] *em.*; रूचिरे MS 81.155 चोप°] MS^{pc}; रोप° MS^{ac} • °मधस्ता°] *em.*; °मस्ता° MS

तदलीकं कल्पनाधीनतत्त्वम्, उत्पन्नायामस्यामुत्पन्नमिव नष्टायां नष्टमिव तद्भे[दे] भिन्नमिव (तदभेदे ऽभिन्नमि)व चेत्, कथमेकावमर्शगोचरः? भेदानवमर्शादिति चेत्, किमस्यानवमृष्टमप्यस्ति तत्त्वम्? तथा चेन्न तर्हि कल्पितम्। ननु नास्य भेदो ऽपि भावि(कः। भावो हि भेदाभेदाभ्यां) युज्यते न पुनरलीकम्। मा भूद्भेदो ऽस्य भाविकः। कल्पनाधीनं तु तद्भेदाद्भिन्नं प्रतिपत्तव्यमन्यथा तदधीनत्वानुपपत्तेः। इदमेव हि त[त्क](ल्पितस्य कल्पनाधीनत्वं) यत्कल्पनाभेदाभेदाद्यनुविधानं नाम, तदधीनत्वे तु कल्पितत्वानुपपत्तेरनलीकत्वप्रसङ्गात्। तन्मा नाम भूतामस्य भाविके नानात्वैक[त्वे],(न तु भिन्नकल्पनानु)यायि शक्यमेकत्वेन प्रतिपत्तुमिति भिन्नं प्रतिपत्तव्यम्।

81.157–160 Cf. *Nyāyavārttikatātparyaṭīkā* (446.7–10): अपि च ज्ञानाकारवत्स्वलक्षणवच्चालीकबाह्यत्वमपि न विकल्पगोचरो भवितुमर्हति। तद्विकल्पाधीनम्। उत्पन्नायां कल्पनायामुत्पन्नमिव विनष्टायां विनष्टमिव विकल्पनाभेदे भिन्नमिव न शक्यमेकत्वेन प्रतिपत्तुम्। भेदावमर्शादिति चेत्? किमस्यानवमृष्टमप्यस्ति तत्त्वम्? ओमिति चेत्? न तर्हि कल्पितम्।

81.160–172 Cf. *Nyāyavārttikatātparyaṭīkā* (446.10–20): ननु नास्य भेदो ऽपि भाविकः। भावो हि भेदाभेदाभ्यां युज्यते न त्वलीकम्। मा भूद्भेदो ऽस्य भाविकः। कल्पनाधीनं तु तदलीकं तद्भेदाद्भिन्नं प्रतिपत्तव्यम्; अन्यथा तदधीनत्वानुपपत्तेः। इदमेव हि तस्य विकल्पितस्य कल्पनाधीनत्वं यत्कल्पनाभेदाभेदाद्यनुविधानं नाम, तदधीनत्वे तु कल्पितत्वानुपपत्तेरनलीकत्वप्रसङ्गात्। तन्मा नाम भूतामस्य भाविके नानात्वैकत्वे, न तु भिन्नकल्पनानुपाति शक्यमेकत्वेन प्रतिपत्तुमिति भिन्नं प्रतिपत्तव्यम्। तत्सिद्धं विकल्पागोचरत्वमलीकबाह्यत्वस्य, अभिलापसंसर्गायोग्यत्वात्सुखादिस्वलक्षणवत्। अभिलापसंसर्गयोग्यं हि तत्, तेनाशक्यसमयत्वात् सुखादिलक्षणवदिति। शक्यसमयतया खल्वसंसर्गयोग्यता व्याप्तान्यथातिप्रसङ्गात्। सालीकबाह्यतायाः प्रतिविकल्पं भिन्नाया व्यावर्तमानाभिलापसंसर्गयोग्यत्वमपि व्यावर्तयतीति प्रतिबन्धसिद्धिः।

81.162–164 Cf. *Nyāyakaṇikā* (651.6–12): इदमेव हि कल्पितस्य कल्पनाधीनत्वं यत्कल्पनाभेदाभेदाद्यनुविधानं नाम, तदधीनत्वे तु कल्पितत्वानुपपत्तेरनलीकत्वप्रसङ्ग इत्युक्तम्। यच्चालीकस्य न स्वाभाविके नानात्वैकत्वे इति, अद्धा प्रतीयमानावस्थायां त्वावेदयामः। न भिन्नकल्पनानुयायि शक्यमेकत्वेन प्रतिपत्तुम्, तदनुपातित्वानुपपत्तेः, कल्पनायाः प्रथनान्तरेण तस्य तत्त्वासम्भवात्।

81.157 न चैतद॰] MS^{pc}; चैतद॰ MS^{ac} • ॰तत्त्वम्, उत्पन्नायामस्या॰] MS^{pc}; ॰तत्त्वमुत्पन्नयोमस्या॰ MS^{ac}; त्त्व *ow.* MS **81.158–158**भेदानवमर्शा॰] *em.*; चेदानचमर्शा॰ MS **81.160** नास्य] *em.*; नास्या MS^{pc}; नस्या॰ MS^{ac} **81.161** ॰रलीकम्] *em.*; ॰रलीका MS **81.162** ॰द्यनुविधानं] MS^{pc}; ॰द्यनुधानं MS^{ac} **81.163** नाम] MS^{pc}; नाना MS^{ac}

तथा च न विकल्पगोचरत्वं ज्ञानाकारालीकबाह्यत्वयोरभिलापसंसर्गायोग्यत्वात्। यद्यदभिलापसंसर्गायोग्यं न तद्विकल्पगोचरो यथा सुखादिस्वलक्षणमिति। ⟨f.124v⟩ अभिलापसंसर्गायोग्ये च ते, तेन सहाशक्यसमयत्वात्। यत्तेन सहाशक्यसमयं न तत्तत्संसर्गयोग्यं सुखादिस्वलक्षणवदिति शक्यसमयतया खल्वभिलापसंसर्गयोग्यता व्याप्ता, अन्यथातिप्रसङ्गात्। सा ज्ञानाकारालीकबाह्यत्व(योर्निवर्तमानाभि)लापसंसर्गयोग्यतामपि निवर्तयतीति प्रतिबन्धसिद्धिः। तस्मान्नाभिन्नबुद्धिव्यवहाराविती भवितुमर्हतः। न च परमार्थसत्सामा(न्याभिधाने ऽपि भावाभावसा)धारण्यं न कल्पते, तदाश्रयाणां व्यक्तीनां तल्लक्षितानां देशकालविप्रकीर्णतया भावाभावसाधारण्यसंभवात्। न च समानाधिक(रणं तत्, यथा न शब्दो) नित्यो ध्वनेरिति, गगनादौ लब्धरूपस्य नित्यत्वस्य ध्वनौ निषेधोपपत्तेः। उपपादितं चैतत्पुरस्तात्, तदिदमतिरूढतयोपेक्ष्य (विकल्पस्वभा)वो दर्शितः।

यदि मन्येत चतुर्विधो ऽप्ययं विकल्पो ऽनुभवाविद्यावासनायोनिः, तत्रानुभववासनावशान्नियतस्यानुभवनियमः।(अभेदबुद्धि) ⟨f.125r⟩ स्वासतो ग्राहक

81.166–167 Cf. *Nyāyakaṇikā* (654.8–11): तत्सिद्धमेतन्नाभिलापसंसर्गयोग्यता ज्ञानाकारालीकबाह्यत्वयोरभिलापेनाशक्यसमयत्वाद्यदभिलापेनाशक्यसमयं न तत्तत्संसर्गयोग्यं यथा सुखादीनामात्मेति।

81.169–170 Cf. *Nyāyakaṇikā* (657.4–7): शक्यसमयतया खल्वभिलापसंसर्गयोग्यता व्याप्ता, अन्यथातिप्रसङ्गात्। सा ज्ञानाकारालीकबाह्यताभ्यां निवर्तमानाभिलापसंसर्गयोग्यतामपि निवर्तयतीति प्रतिबन्धसिद्धिः।

81.172–173 Cf. *Nyāyakaṇikā* (653.7–654.4): न च परमार्थसत्सामान्याभिधाने ऽपि भावाभावसाधारण्यं न कल्पते। तदाश्रयाणां व्यक्तीनां तल्लक्षितानां देशकालविप्रकीर्णतया भावाभावसाधारण्यसंभवात्।

81.166–166 °भिलापसंसर्गायोग्य°] MS^{pc} (deleted akṣaras enclosed within braces); °भिलापसंसग्गायोग्य° …°भिलापसंसग्गायोग्य° MS^{ac} **81.167** °त्वात्। यद्यदभि°] *em.*; °त्वात यद्ययदभि° MS **81.167** सुखादिस्व°] MS^{pc}; स्व° MS^{ac} **81.168** च ते] MS^{pc}; च तो MS^{ac} **81.169** °समयं न] MS^{pc}; °समयमपन्न MS^{ac} • तत्तत्संसर्ग°] *em.*; तत्तत्सर्ग° MS **81.169** °मयतया] *em.*; °मतया MS^{ac} **81.171** °लापसंसर्ग°] MS^{pc}; °लापंसंसर्ग° MS^{ac} • निवर्तयतीति] MS^{pc}; निवर्तयतीति MS^{ac} **81.172** °भिन्नबुद्धि°] MS^{pc}; °भिन्नः बुद्धि° MS^{ac} **81.174** °नां तल्लक्षितानां देश°] *em.*; °नां ल्लक्षितानां द्देस° MS • °रण्यसंभ°] MS^{pc}; °रण्यं संभ° MS^{ac} **81.175** न च] MS^{pc}; न MS^{ac} **81.176** °धोपपत्तेः] MS^{pc}; °धोपपत्तौ MS^{ac} **81.178** तत्रानु°] *em.*; तत्रान्न° MS

इति शङ्कामुपसंहारव्याजेन निराकरोति– **तस्मात्प्रकृ**[**त्यैव** स्वभावे]नैव **के-चिद्भावाः** शाबलेयबाहु[लेया]दयो [ना](नारूपा **योग्याः कस्य**)**चिदभेदावमर्शस्य** गौरित्यादेः, न पुनरश्वो ऽश्व इत्यादेर्योग्याः, **केचिन्नेति स्वभावविपरीता भावानां** नियतगोत्वाद्यभेदनिर्वा(हहेतवो ऽनन्ताः **साम**)**र्थ्यातिशयाः कल्पयितव्यास्तथा**। एतदुक्तं भवति– न खल्वनुभववासनानियमो ऽनुभवनियममन्तरेण न चानुभवनियमो विषय(नियममन्तरेण, एवं) च क्षणिकाः परमाणवो व्यावृत्तस्वभावा न सतः कालतः स्वरूपतो वात्मानमात्मान्तरेण संभिन्दन्ति। तद्यद्यमीषामन्यतमो गोत्वा[व](भासो ऽश्वत्वावभासो) वा नाभावो नान्यो ऽपि तद्वान्भवितुमर्हति, भावस्वभावानतिरेकिणः सामर्थ्यस्य तद्भेद एकत्वानुपपत्तेः। अथान्येषां केषांचित्तद्वि(परीतं **गौरवात्क**)**ल्पनाया एकैवास्तु** सामर्थ्यमविद्यालक्षणमनिर्वचनीयं **यस्मादेको ऽपि नानेवावभासते**। अविद्याशक्तिनियमो ऽप्युपपत्स्यते, (**लघुत्वात्**) ⟨f.125^{v}⟩ शक्तिनियमकल्पनायाः। शक्तिनियमकल्पनाया उभयोरपि पक्षयोः साम्यात्तावन्मात्रेणैव कार्योपपत्तौ न भेदा भावि[का](कल्पनीयाः, गौ)रवप्रसङ्गात्। तदिदमाह– **न तु भिन्नानां** तेषां **यद्यतो ऽमी अभिन्ना इव भासन्ते**॥ ⊗॥

भेदव्यवहारश्च यथावभासं भेदवादिनामिवाभेदव्यवहार उपपद्यते। तथा हि– आत्यन्तिकभेदवादिनां यथावभासमभेदव्यवहारः, न यथावस्तु। संसर्गवादिनामपि सामान्यस्यार्थस्यार्थान्तरत्वाद्यथावभासमेव भेदेष्वभेदव्यवहारः। ये ऽप्यनर्थान्तरवादिनः, तेषामपि शबलत्वाद्वस्तुनस्तस्य चानन्वयाद्यथावभा-

---

81.192–4 Cf. *Bhāvaśuddhi* (277.16–178.2): उभयोरपि पक्षयोः साम्यात् तावन्मात्रेणैव कार्योपपत्तौ न भेदा भाविकाः कल्पनीयाः; गौरवप्रसङ्गादित्याह– न तु भिन्नानामिति॥

81.180 शंकामुप॰] MS^{pc}; संस्कारमुप॰ MS^{ac} **81.183** ॰विपरीता] *em.*; ॰विपता MS • ॰गोत्वाद्यभेदनिर्वा॰] गो and र्वा *ow.* MS **81.184** ॰नियममन्तरेण] *em.*; ॰नियमन्तरेण MS **81.186** व्यावृत्त॰] *em.*; व्यावृत्तं॰ MS • ॰स्वभावा न सतः] MS^{pc}; ॰स्वभाव नासतः MS^{ac} **81.188** तद्वान्भवितु॰] न्भ *ow.* MS **81.189** अथान्येषां केषांचित्] MS^{pc}; अन्ये यथान्येषां किंचित् MS^{ac} **81.191** ऽप्युपपत्स्यते] *em.*; ऽप्युपत्स्यते MS

समेवोभयव्यवहारः। न वस्त्वनुपातीति दर्शितमिति।

यथानुवृत्तव्यवहारसिद्धिं यथावभासं कथयन्ति बाह्याः।
तथैव भेदव्यवहारयोगं वदन्ति वेदान्तविवेकभाजः॥ ३६॥

इति श्रीमण्डनमिश्रविरचितायां ब्रह्मसिद्धौ प्रथमकाण्डः समाप्तः॥

नन्वयमस्ति व्यावृत्तिनिबन्धनः सर्वजनीनो व्यव(हारः, न च काल्पनि)कत्व उपपद्यते। न जातु कल्पितवह्निभावः खद्योतो दहति पचति चेत्यत आह– **भेदव्यवहारश्चे**ति। न हि सर्वो व्यवहारो यथा(वस्त्वित्यैकान्तिकम)यथावस्त्वपि, यथावभासं व्यवहारसिद्धेरवश्याभ्युपेयत्वात्सर्वप्रवादिभिरित्यर्थः। व्याख्याय काण्डसमाप्तिसूचनीं कारि(कां पठति–

यथानुवृ)त्तव्यवहारसिद्धं यथावभासं कथयन्ति बाह्याः।
तथैव भेदव्यवहारयोगं वदन्ति वेदान्तविवेकभाजः॥ ⊗॥

वाचस्पतिमिश्रविर(चि)तायां ब्रह्मसिद्धिप(ं)जिकायां तत्त्वसमीक्षायां प्रथमकाण्डः समाप्तः॥

82.1 भेदव्यवहारश्च] *Bhāvaśuddhi*; भेदव्यवहाराश्च *edn* **82.1–2** °व्यवहार उपपद्यते] °व्यवहारा उपपद्यन्ते *edn*

82.1–4 Cf. *Bhāvaśuddhi* (278.5–9): अस्ति तावद्व्यावृत्तिनिबन्धनो व्यवहारः। न च काल्पनिकत्वे युक्तः। न जातु कल्पितवह्निभावः खद्योतो दहति, पचति चेति, अत्राह– भेदव्यवहारश्चेति॥ न हि सर्वो व्यवहारो यथावस्तु, इत्यैकान्तिकम्, अयथावस्त्वपि, यथावभासं व्यवहारसिद्धेरवश्याभ्युपेयत्वात्सर्वत्र वादिभिरित्युपपादयति– तथा हीति॥
82.5 Cf. *Bhāvaśuddhi* (279.5–6): व्याख्यातकाण्डसमाप्तिं सूचयन्तीं कारिकां पठति– यथानुवृत्तेति॥

82.1 नन्वय°] नन्व *ow.* MS **82.2** दहति] द *ow.* MS **82.5** °सूचनीं] *conj.*; °सूचनी MS **82.7** °व्यवहारयोगं] MS[pc]; °व्यवहारेयोगं MS[ac]

॥ वाचस्पतिमिश्रकृता ब्रह्मसिद्धिपञ्जिका॥

॥ तत्त्वसमीक्षा॥

॥ द्वितीयो नियोगकाण्डः॥

द्वितीयं काण्डमारिप्सुर्द्वितीयविप्रतिपत्तिनि(रासे तात्प)⟨f.126r⟩र्यं विवेकतो ज्ञीप्सुस्तृतीयविप्रतिपत्तिनिराकरणं प्रथमकाण्डतात्पर्यं स्मारयति–⟨**एवमिति** ।⟩

एवं प्रत्यक्षादिविरोधात्कर्मविधिविरोधाच्च श्रुतार्थपरिग्रहे ये मन्यन्ते वेदान्तानामुपचरितार्थत्वं तत्प्रतिबोधनाय विहितः प्रयत्नः। संप्रति तु– कार्य एवार्थे वेदस्य प्रामाण्यम्, न भूतरूपे। एवं ह्युक्तम्– 'चोदनालक्षणो ऽर्थो धर्मः'। चोदनाप्रमाणको वेदार्थ इति यावत्।

निरसनीयां विप्रतिपत्तिं प्रदर्श[यि](ति– **संप्रति तु कार्य ए**)**वार्थे वेदस्य प्रामाण्यम्, न भूतरूपे** ब्रह्मादौ। अत्रोपपत्तिमाह– **एवं ह्युक्तमिति**। नन्वनेन

1.4 *Jaiminisūtra* I.1.2 : चोदनालक्षणो ऽर्थो धर्मः।

0.1–3 Cf. *Bhāvaśuddhi* (281:3-6): नियोगकाण्डमारिप्सुर्द्वितीयविप्रतिपत्तिनिरासे तात्पर्यं विवेकतो ऽभीप्सुः (विवेकतो(चयिष्यन्) (भी?) *edn*) तृतीयविप्रतिपत्तिनिराकरणं तर्ककाण्डतात्पर्यं स्मारयति–एवमिति॥

1.1–9 Cf. *Bhāvaśuddhi* (281:5–282.5): निरसनीयां विप्रतिपत्तिमाह– सम्प्रति त्विति॥ भूतरूपे ब्रह्मादौ प्रामाण्याभावे हेतुं दर्शयति– एवं हीति॥ ननु– अनेन प्रथमसूत्रोपात्तस्य धर्मस्य को धर्मः? किंलक्षणक इति पृष्टस्य स्वरूपम्, प्रमाणं च श्रुत्यर्थाभ्यां प्रदर्श्यते, न तु कार्ये ऽर्थे वेदस्य प्रामाण्यमुच्यत इत्याशङ्क्य व्याचष्टे– चोदनाप्रमाणक इति॥ सकलस्यैव हि स्वाध्यायस्याचार्यकरणविधिप्रयुक्ततयाविवक्षितार्थत्वमाशङ्क्य, तत्प्रयुक्तपुरुषापेक्षितानन्तरं दृश्यमानार्थावबोधनप्रयोजनवत्त्वं विवक्षितार्थत्वम् 'अथातो धर्मजिज्ञासा' इति प्रतिपाद्यते। तस्माद्वेदार्थ एवात्र साकल्येन धर्मशब्देन विवक्षित इत्यर्थः।

0.2 ज्ञीप्सुस्तृतीयविप्रतिपत्ति°] *em.*; ज्ञीप्सः तृतीयविसतिपति° MS • °तात्पर्यं] *em.*; °तात्पर्य MS **1.1** विप्रतिपत्तिं प्रदर्श°] *em.*; विप्रतिपत्ति प्रेदर्श° MS **1.2** °ण्यम्, न] *em.*; °ण्यमु MS • अत्रोपपत्ति°] *em.*; अत्रोपैयत्ति° MS

प्रथमसूत्रोपात्तस्य धर्मस्य को धर्मः [क](थंलक्षण इति पृ)ष्टस्य स्वरूपं प्रमाणं च श्रुत्यर्थाभ्यां प्रदर्श्यते, न तु कार्ये ऽर्थे वेदस्य प्रामाण्यमुच्यत इत्याचष्टे– **चोदनाप्रमाणको वेदार्थ इ**[ति] (यावत्। सकलस्यै)व हि स्वाध्यायराशेराचार्यकरणविधिप्रयुक्ततयाविवक्षितार्थत्वमाशङ्क्य तत्प्रयुक्तस्यापि पुरुषार्थापेक्षितानन्तरं दृश्य[मा](नार्थावबोधनप्रयो)जनत्वमशक्यापह्नवमिति विवक्षितार्थत्वम् 'अथातो धर्मजिज्ञासा' इति प्रतिपाद्यते। तस्माद्वेदार्थ एवात्र साकल्येन धर्मशब्दे(न विवक्षित इ) ⟨f.126^v⟩त्यर्थः।

चोदना च प्रवर्तकं वचनम्, तस्मात्कार्ये ऽर्थे वेदः प्रमाणम्। वेदान्तानामपि तु प्रतिपत्तिकर्तव्यताप्रमाणभाजां तन्मुखेन तदनुगतभूतात्मतत्त्वविषयबोधकत्वम्। अतस्ते ऽपि कार्यनिष्ठतां नातिवर्तन्ते। तथा च 'कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः' इत्याशङ्क्य 'चोदना हि भूतं भवन्तम्' इत्याद्युक्तम्।

भवतु, किमेतावतापि कार्यार्थता वेदस्य सिध्यतीत्याह– **चोदना च प्रवर्तकं वचनम्।** कथं च तत्प्रवर्तकं स्याद्यदि (कार्यं ना)भिदधीत। न ह्यन्यथा

1.3 *Śābarabhāṣya 1.1.1 :* को धर्मः कथंलक्षणः।
1.8 *Jaiminisūtra 1.1.1 :* अथातो धर्मजिज्ञासा।
2.4 *Bṛhatī ad Śābarabhāṣya 1.1.2 :* कथं तर्हि मन्त्रार्थवादाः सोपनिषत्काः ···
2.5 *Śābarabhāṣya 1.1.2 :* चोदना हि भूतं भवन्तं भविष्यन्तं विप्रकृष्टमित्येवंजातीयमप्यर्थं शक्नोत्यवगमयितुम्।

1.3–4 Cf. *Ślokavārttika Codanāsūtra 1cd-2ab :*
स्वरूपादेस्ततः सिद्धिः स्वरूपं चेह सूत्र्यते। द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां प्रदर्श्यते॥
2.1–2 Cf. *Bhāvaśuddhi* (282:4-5): भवतु, किमेतावतापि कार्यार्थता वेदस्य सिध्यति? अत्राह– चोदना चेति॥

1.3 स्वरूपं] MS^{pc}; ष्टरूपं MS^{ac} **1.6** °युक्ततया°] *em.*; °युक्तया° MS **1.7** °नन्तरं दृश्य°] *em.*; °नतुरस्य° MS • विवक्षिता°] MS^{pc}; विवेक्षिता° MS^{ac} **1.8** °जिज्ञासा' इति] MS^{pc}; °जिज्ञासेतति MS^{ac} • एवात्र साकल्येन] *em.*; नु मङ्गल्येन MS **2.1** भवतु] *em.*; भवितु MS • सिध्यती°] *em.*; सिध्यसिध्यती° MS **2.2** °कं वचनम्।] *em.*; °कम्वचना MS • स्याद्यदि(कार्यं ना)भिदधीत] *conj.*; स्याद्यदिभिरि(++++++)कांडसमाप्तिसूचनीकारिकां पठति। यथानुवृत्तव्यवहारसिद्धं यथावभासं (भासं *ow.*) कथयन्ति बाह्याः (बाक्यह्याः MS^{ac}) तथैव भेदव्यवहारयोग(गं + + + +)भिदधीत MS

चेतनः प्रयत्नपूर्वं प्रवर्तेत। नो खल्वन्ततो ऽर्भकः स्तनपानादिकामपि क्रियां न यावत्कार्यतयावगतवान(स्ति तावत्तस्यां प्रवृत्तः। य)दत्र[भवान् भाष्य]कारः– 'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः, आचार्यचोदितः करोमीति हि दृश्यते' इति। चोदितः [प्र](वर्तितः कार्यमवबो)धित इति यावदिति। तत्सिद्धमेतत्कार्ये ऽर्थे वेदः प्रमाणम्, न तु भूतादिक इत्युपसंहरति– **तस्मात्कार्य** इति। नन्वियमागम[वि](रुद्धा प्रतिज्ञा। प्रती)(f.127^{r})यते हि भूतरूपं ब्रह्म वेदान्तेभ्य इत्यत आह– **वेदान्तानामपि तु ब्रह्मविषयप्रतिपत्तिकर्तव्यतायाम्**, 'आत्मा ज्ञातव्यः' इत्यादि वि[धि](रूपं यत्प्रमाणं)तज्जजतां तत्पराणामिति यावत्, तत्प्रतिपत्तिकर्तव्यतामुखेन तदनुगमप्रतिपत्तिविषयकार्यान्वितभूतात्मतत्त्वविषयचोद(नापरत्वमित्यर्थः। स)र्वमेव हि पदजातं साक्षाद्वा कार्यार्थतया वा कार्यार्थमेव, तथैव व्युत्पत्तेः प्रतिपत्तेश्च। तदिह वेदान्तेभ्यो ऽपि यद्यपि न साक्षा[त्का](र्यं किमपि प्रतीयते ऽ)पि च सिद्धं ब्रह्म प्रतीयते, तथापि तत्राव्युत्पन्नस्यावाचकत्वात्तत्कार्यान्वितस्वार्थस्तैरभिधातव्यो यत्स्वान्वययोग्यं वा[क्यं](बोधयति मानान्तरागो)चरकार्यमिति तत्परतयैवैते भूतमर्थमभिदधाना न प्रतिज्ञां व्याघ्नन्तीति। एतच्च मीमांसाभाष्यनिबन्धनकृतो नेयादेव (ग्रन्थात्सिध्यति, यत्तेन व्याख्यातं चो)दना हीति

2.5–6 *Śābarabhāṣya* 1.1.2 : चोदनेति क्रियायाः ··· करोमीति हि दृश्यते।

2.3–4 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 305.7-9): न खल्वन्ततो ऽर्भकः स्तनपानादिकामपि क्रियां कार्यतयावगतवान् अस्ति तावत्तस्यामपि प्रवृत्तः।
2.5–6 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 307.9–11): वदति हि माणवक आचार्यचोदितः करोमीति, चोदितः प्रवर्तितः कार्यमवबोधित इति यावत्।
2.7–12 Cf. *Bhāvaśuddhi* (282:6–10): तत्सिद्धमेतत्– कार्ये ऽर्थे वेदस्य प्रामाण्यम्, न तु भूतादिक इत्युपसंहरति– तस्मादिति॥ आगमविरुद्धेयं प्रतिज्ञा। प्रतीयते हि भूतरूपं ब्रह्म वेदान्तेभ्य इति, अत्राह– वेदान्तानामिति॥ ज्ञाननियोगपराणां तत्प्रतिपत्तिकर्तव्यतामुखेन प्रतिपत्तिविषयकार्यान्वितभूतात्मतत्त्वबोधकत्वमित्यर्थः।

2.3 चेतनः] MS^{pc}; चेदतनः MS^{ac} • खल्वन्ततो ऽर्भकः स्तन॰] *em.*; खल्वन्ततस्तन॰ MS **2.4** ॰दत्रभवान्] *conj.*; ॰दनुभवन MS **2.7** प्रमाणम्, न तु भूतादिक] *em.*; प्रमाण नुभूतादिक MS^{pc}; प्रमाणानुभूताथदिक MS^{ac} **2.9** वेदान्तेभ्य] *em.*; वेदंतेभ्य MS **2.12** ॰विषयचोद॰] *em.*; ॰विषयश्चोद॰ MS • पदजातं] MS^{pc}; पदज्ञाजातं MS^{ac} **2.13** व्युत्पत्तेः] *em.*; व्युच्यतेः MS^{pc}; व्युच्यते MS^{ac} **2.15** तत्राव्युत्पन्न॰] *em.*; तत्रव्युत्पन्न॰ MS • ॰न्वितस्वार्थस्तै॰] *em.*; ॰न्वितः स्वार्थरतै॰ MS **2.17** ॰दधाना न प्रतिज्ञां] *em.*; ॰दधाना प्रतिज्ञा MS

भाष्यग्रन्थमित्याह– **तथा चेति**।

एतदुक्तं भवति– कार्यमर्थमवगमयन्ती चोदनैव भूतादिकमप्यर्थमवगमयतीति –ये मन्यन्ते तत्प्रतिबोधनाय प्रयत्यते। तिस्रश्च प्रतिपत्तयो ब्रह्मणि। प्रथमा तावच्छब्दात्, अन्या शब्दात्प्रतिपद्य तत्सन्तानवती ध्यानभावनोपासनादिशब्दवाच्या, अन्या ततो लब्धनिष्पत्तिर्विगलितनिखिलविकल्पा साक्षात्करणरूपा।

नन्वेतद्भाष्यं भूतादिकमर्थमवगमयति चोदनेति ब्रूते, न तु का(f.127^{v})र्यार्थेति, अत आह– **एतदुक्तं भवतीति**। ततश्च कार्यान्वयिना रूपेण भूतादीनामपि मानान्तरागोचरतया सिध्यत्यनपेक्षं प्र[मा](णं चोदनेत्यर्थः। तदि)ह प्रतिपत्तिकर्तव्यतायां प्रामाण्यं **ये मन्यन्ते** वेदान्तानां **तत्प्रतिबोधनाय प्रयत्यते**। 'आत्मा ज्ञातव्यः' इति हि किल ब्रह्मणि प्र[ति](पत्तिर्विधीयते, ति)स्रश्च ताः सम्भवन्तीत्याह– **तिस्रश्चेति**। **अन्या ततः** सन्तानवत्याः प्रतीतेरादरनैरन्तर्यदीर्घकालासेवनलब्धपरिपाकाया (**लब्धनिष्पत्तिर्विग**)**लितनिखिलविकल्पा**,

---

3.1–3 Cf. *Bhāvaśuddhi* (282.13-16): एतदपि भाष्यं भूतादिकमप्यर्थमवगमयति चोदनेति ब्रूते, न कार्यमेवेति, अत्राह– एतदुक्तमिति॥ ततश्च कार्यान्वयिरूपेण भूतादीनामपि मानान्तरागोचरतया सिध्यत्यनपेक्षं प्रमाणं चोदनेत्यर्थः॥

Cf. *Abhiprāyaprakāśikā* (282.26–29): ननु– एतद्भाष्यं भूतादिकमर्थमवगमयति चोदनेति ब्रूते, तत्कथं कार्यशेषभूतवस्तुनि प्रामाण्यमुक्तमिति? अत आह– एतदुक्तमिति॥ ततश्च कार्यान्वयिना रूपेण भूतादीनामपि मानान्तरागोचरतया तेष्वनपेक्षं चोदनायाः प्रामाण्यं सिध्यतीति भावः।

3.3–4 Cf. *Bhāvaśuddhi* (283.5–6): तदिह प्रतिपत्तिकर्तव्यतायां प्रामाण्यं मन्यन्ते ये वेदान्तानाम्, तत्प्रतिबोधनाय प्रयत्यत इत्याह– ये मन्यन्त इति॥

3.5–9 Cf. *Bhāvaśuddhi* (283.8–10, 12–15): आत्मा प्रतिपत्तव्य इति प्रतिपत्तिर्विधीयत इत्यस्य पक्षस्य विभागेन दोषं वक्तुमुपक्रमते– तिस्रश्चेति॥ ···अन्या त्विति॥ ततः सन्तानवत्याः प्रतीतेरादरनैरन्तर्यदीर्घकालासेवनलब्धपरिपाकायाः श्रवणद्वारा लब्धनिष्पत्तिर्विगलितनिखिलविकल्पा (°विकल्प- *edn*) विशेषणविशेष्यभावनिर्भासावच्छिन्नविषयप्रत्ययो विकल्पस्तद्रहितेत्यर्थः।

3.3 °न्तरागोचर°] *em.*; °न्तरागाचर° MS • °त्यनपेक्षं] MS^{pc}; °त्यपनपेक्षं MS^{ac} • °ह प्रतिपत्ति°] *em.*; °द प्रति° MS^{pc}; °ताद प्रति° MS^{ac} **3.4** प्रामाण्यं] *em.*; प्रामाण्य MS • मन्यन्ते वेदान्तानां] *em.*; मण्यन्ते वेदान्ताना MS **3.5** ज्ञातव्य] *em.*; ज्ञातत्य MS • ब्रह्मणि] ब्र *ow.* MS

विशेषणविशेष्यभावनिर्भासो ऽवच्छिन्नविषयप्रत्ययो विकल्पः, तद्रहितेत्यर्थः।

तत्र प्रथमामधिकृत्योच्यते–

शब्दाद्यदात्मविज्ञानं तन्न तावद्विधीयते।
भवत्यधीतवेदस्य तद्धि कर्मावबोधवत् ॥१॥

ब्रह्मणो हि प्रमाणान्तरानधिगमनीयरूपत्वाच्छब्दाधिगम्यस्वभावविषयं ज्ञानं विधेयम्। तत्र यच्छब्दादेव ज्ञानं तदविधेयम्, विधिमन्तरेण भावात्कर्मावबोधवत्। यथैव 'स्वर्गकामो यजेत' इति श्रुतवाक्यस्य वाक्यार्थावबोधस्तद्वाक्यप्रामाण्यादेव भवति, न विध्यन्तरमपेक्षते, तथात्मस्वरूपाभिधायिवाक्यप्रामाण्यादात्मावबोधो विध्यनपेक्षः संजायते, सति प्रमाणे तत्सामर्थ्येनैव प्रमेयबोधोत्पत्तेः। न खलु सोपकरणे समग्रे प्रमाणे सतीच्छापि पुरुषस्यापेक्ष्यते ज्ञानं प्रति, अनिष्टानामप्यवबोधात्, प्रागेव विधिः।

तत्र प्रथमामधिकृत्यो(च्यते– शब्दाद्यदात्म)विज्ञानमिति। कस्मात्पुनः प्रथमा शाब्दी बाह्येन्द्रियादिनिमित्तापि नेत्यत आह– **ब्रह्मणो ही**ति। नतरामवश्यं कारणा[नि](कार्यवन्ति भवन्ति, व्य)भिचारस्यापि दर्शनादित्यत आह– **न**

4.6 *Taittirīyasaṃhitā 2.5.5 :* स्वर्गकामो यजेत।

4.1–2 Cf. *Bhāvaśuddhi* (284.3): प्रथमा बाह्येन्द्रियनिमित्तापि किं नेत्याह– ब्रह्मणो हीति॥ **4.2–7** Cf. *Bhāvaśuddhi* (284.10–15): नावश्यं कारणानि कार्यवन्ति भवन्ति; व्यभिचारस्यापि दर्शनात्, अत्राह– न खल्विति॥ सोपकरणे सेतिकर्तव्ये समग्रे ऽगृह्यमाणविशेषणतया (गृह्य° *edn*) साधकान्तरसहिते साधकतमे सतीत्यर्थः। कुत एवम्? अत्राह– अनिष्टानामिति॥ दुर्जनवचनश्रवणसमनन्तरमनिष्टानामवबोधात्प्रागेव दूरोत्सारित एवेत्यर्थः॥

3.9 तद्रहितेत्य°] *em.*; तदिद्रहेत्य° MS **4.1** °मधिकृत्यो°] *em.*; °मपेक्षत्यो° MS **4.2** नेत्यत] *conj.*; कस्मान्नेत्यत MS • नतरामवश्यं] *conj.*; नन्तरावश्यं MS

खलु सोपकरणे सेतिकर्तव्यताके **समग्रे** ऽगृह्यमाणविशेषतया साधका[न्त](रसहिते साधकतमे) ⟨f.128^{r}⟩**प्रमाणे सतीच्छापि पुरुषस्यापेक्ष्यते** ज्ञानं कार्यं प्रति। कुतः? दुर्जनवचनश्रवणसमनन्तरम**निष्टानामप्यर्थानामवबोधात्**। प्रा[गे](व दूरोत्सारित एवेत्य)र्थः॥ ⊗॥

तामेव विधेरनपेक्षतां कर्मावबोधे दर्शयति–

स्वर्गकामो यजेतेति बोधे ऽस्मिन्न व्यपेक्ष्यते।
विधिरन्यो ऽनवस्थानान्नायं कर्मव्यवस्थितेः ॥ २ ॥

न कर्मविधिवाक्यार्थज्ञानप्रवृत्तौ विधिरपेक्ष्यते ऽन्यः, न तद्गत एव वा। अन्यस्मिन्ननवस्थादोषात्, तदर्थज्ञाने ऽपि विध्यन्तरस्यापेक्षणीयत्वात्, तद्गतस्य च कर्मविषयत्वेन तद्बोधं विधातुमसामर्थ्यात्। ननु यथैषां ग्रहणे विध्यन्तरमपेक्ष्यते 'स्वाध्यायो ऽध्येतव्यः' इति, न चानवस्था, तद्वत्तदर्थबोधे ऽपि स्यात्। अस्ति च विधिः– 'वेदः कृत्स्नो ऽधिगन्तव्यः' इति। विषम उपन्यासः– अप्रवृत्तो ऽपि हि स्वाध्यायाध्ययनविधिवाक्याध्ययने पुरुषान्तराधीतात्ततस्तस्य चान्येषां च वाक्यानामध्ययने प्रवर्तते, शाखान्तरीयाङ्गोपसंहार इव श्रवणमात्रात्। न खलु स्वाधीतमेव वाक्यं प्रवर्तयति। यथैकस्तथा पुरुषान्तराण्यपि, अनादित्वाद्वेदवत्तदध्ययनस्यापि।

तामेव विधेरनपेक्षतां कर्मावबोधे दर्शयति– **स्वर्गकामो यजेतेति बोधे ऽस्मिन्नेति**। चोदयति– **ननु यथैषामिति**। स्वाध्या[या](ध्ययनविधावध्येतव्यः) खल्वयं सर्वो वेदराशिस्तन्मध्यपतितश्च स्यादात्मा, **न चात्रानवस्था**। न चात्मा-

5.7–8 *Taittirīyāraṇyaka 2.15* : स्वाध्यायो ऽध्येतव्यः।
5.9 *Manusmṛti* 6.8.7 : वेदः कृत्स्नो ऽधिगन्तव्यः।

4.4 खलु] *em.*; खल्व MS • साधकान्त॰] *em.*; साधकतमान्त॰ MS 4.5 ॰स्यापेक्ष्यते] *em.*; ॰स्यापेक्षते MS 4.6 ॰समनन्तर॰] *em.*; ॰समन्तर॰ MS 5.1 विधेरनपेक्षतां कर्मावबोधे] *em.*; विधिरनपेक्षाद्धर्मावबोधि MS

श्रयत्वम्, तथा तदर्थबोधविधावपीत्यर्थः। परिह[र](ति– **विषम उपन्यास** इ)ति। न हि तदध्ययनं तदध्ययननिमित्तं नापि विध्यन्तराध्ययननिमित्तं येनात्माश्रयत्वानवस्थे स्याताम्। अपि तु यथा शाखान्तरीयमङ्गमन(धीततद्वाक्यस्त्रैवर्णि)कः पुरुषान्तराधीताद्वाक्याच्छ्रवणमात्रेणानुगम्यानुतिष्ठत्येवं पुरुषान्तराधीतादेव स्वाध्यायाध्ययनविधे(**स्तस्य चान्येषां च वाक्या**)नामध्ययनम्। न चैवमनवस्थानमात्माश्रयत्वं वा, **वेदवत्तदध्ययनाध्येतृपरम्पराया अनादित्वादित्यर्थः**।

अनवबुद्धार्थस्त्ववबोधविधिर्नावबोधे प्रवर्तयति। तदर्थबोधश्चेद्विध्यपेक्षः, न तत्र स एव प्रवर्तयति, अनवबुद्धार्थत्वात्। इतरेतराश्रयं स्यात्– तदर्थबोधात्प्रवृत्तिः, प्रवृत्तस्य च तदर्थबोध इति। तस्माद्विध्यन्तरमपेक्षितव्यमित्यनवस्था। न च 'वेदः कृत्स्नो ऽधिगन्तव्यः' इत्यपूर्वार्थविधिः। 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति न्यायप्राप्तो ऽर्थः प्रदर्श्यते। अथाप्येष विधिः, स्वाध्यायाध्ययनविधिनार्थाक्षिप्तमर्थज्ञानं नोच्येत, तथापि ब्रह्मस्वरूपाभिधायिवेदवाक्यप्रभवे बोधे न पृथग्विधिरपेक्षितव्यः, कर्मविधिवाक्यवत्। यथैव 'स्वर्गकामो यजेत'

6.7°ज्ञानं नोच्येत] °ज्ञानमुच्येत *edn*, alternative reading in *Tattvasamīkṣā*

6.5–6 *Śābarabhāṣya 1.1.1 :* दृष्टो हि तस्यार्थः कर्मावबोधनम्।

5.4–10 Cf. *Bhāvaśuddhi* (286.3-8, 12–13): न च तदध्ययननिमित्तम्, नापि वाक्यान्तराध्ययननिमित्तम्, येनात्माश्रयानवस्थे स्याताम्, किन्तु पुरुषान्तराधीतादेव स्वाध्यायाध्ययनविधेस्तस्यान्येषां च वाक्यानामित्यर्थः। उदाहरति– शाखान्तरीयेति॥ यथा शाखान्तरीयमङ्गमनधीततद्वाक्यस्त्रैवर्णिकः पुरुषान्तराधीतवाक्यश्रवणमात्रेणावगम्यानुतिष्ठतीत्यर्थः। ···वेदवत्तदध्ययनाध्येतृपरम्पराया अप्यनादित्वान्नानवस्थेत्यर्थः।

5.4 परिहर°] *em.*; परिपरिहर° MS **5.5** °निमित्तं नापि] MS^{pc}; °निमित्तान्नापि MS^{ac} • °राध्ययननिमित्तं] °राध्ययनं MS **5.6** स्याता°] MS^{pc}; स्यास्याता° MS^{ac} • शाखान्तरीयमङ्ग°] *em.*; सान्तरीयमङ्गा° MS **5.7** पुरुषान्तरा°] MS^{pc}; पुरुषावृन्तरा° MS^{ac} (वृ without head-mark) **5.9** न चैव°] *em.*; चैव° MS • तदध्ययनाध्येतृपरम्पराया] *em.*; तदध्यनाध्येतृपरस्पराया MS

इति सामान्यविधिना सिद्धे नान्यो ऽपेक्ष्यते, अनवस्थानात्, सत्यपि विधावन्यस्यापेक्षणात्, न चैतद्गत एव, कर्मविषयत्वात्। एवं तत्त्वप्रतिपत्तिपरेष्वपि वाक्येषु न विधिरपेक्षितव्यः, वाक्यसामर्थ्यादेव तत्त्वबोधोत्पादादिति।

⟨f.128^{v}⟩ न चेयं विधाववबोधविधौ 'वेदः कृत्स्नो ऽधिगन्तव्यः' "आत्मा ज्ञातव्यः' इत्यत्र वा सम्भवतीत्याह– **अनवबुद्धार्थस्त्विति**। यथा ह्यनधीतवाक्यं पुरु(षान्तरस्थमध्ययनप्र)वृत्तिहेतुरस्य चान्येषां च वाक्यानाम्, नैवमप्रतीतार्थं स्वपरार्थावबोधप्रवृत्तिहेतुः। न च परज्ञानेन परः प्रवर्तते, परस्माद्वा[र्था](न्न परस्यावबोधः। अथावबु)द्धार्थो ऽवबोधविधिः, न हि वेदान्न हि व्याख्यानादवगतो वेदार्थ इत्यर्थः। का तर्हि 'वेदः कृत्स्नो ऽधिगन्तव्यः' इत्यस्य विधेर्गतिरित्यत [आ]ह– **न च वेदः कृत्स्नो ऽधिगन्तव्य इ**)ति। भवतु वा 'वेदः कृत्स्नो ऽधिगन्तव्यः' इत्ययं विधिः, मा च भून्न्यायप्राप्तमर्थपरत्वम्, तथापि 'आत्मा ज्ञातव्यः' इत्यनेन न शाब्दं ज्ञानं विधा[त](व्यम्, सामान्यविधिनै)वास्यार्थस्य प्राप्तत्वात्। न हि 'वेदः कृत्स्नो ऽधिगन्तव्यः' इति विहिते कर्म ज्ञातव्यमिति विध्यन्तरमपेक्ष्यत इत्यभ्युपेत्याह– **अथाप्येष [वि](धिरिति। स्वाध्यायाध्ययन)विधिना यदर्थाक्षिप्तमर्थज्ञानं त-**

6.2–5 Cf. *Bhāvaśuddhi* (286.13-16): यथा ह्यनधीतवाक्यं पुरुषान्तरस्थमध्ययनप्रवृत्तिहेतुरस्यान्येषां च वाक्यानाम्, तथा 'वेदः कृत्स्नोऽधिगन्तव्यः' इति विधिरवगतार्थः स्वपरार्थवाक्यबोधप्रवृत्तिहेतुरिति, अत्राह– अनवबुद्धार्थस्त्विति॥ न हि परज्ञाते परः प्रवर्तत इत्यर्थः।
6.5–6 Cf. *Bhāvaśuddhi* (286.17): अवबुद्धस्तर्ह्यर्थबोधे प्रवर्तयेदिति, अत्राह– तदर्थबोधश्चेदिति॥
6.6–7 Cf. *Bhāvaśuddhi* (287.4-5): का तर्हि 'वेदः कृत्स्नो ऽधिगन्तव्यः' इत्यस्य विधेर्गतिरिति? अत्राह– न चेति॥
6.10–11 Cf. *Bhāvaśuddhi* (288.6-8): न हि 'वेदः कृत्स्नो ऽधिगन्तव्यः' इति विहिते, कर्म ज्ञातव्यमिति विध्यन्तरमपेक्ष्यत इत्यर्थः॥

6.1 विधावबोध॰] *em.*; विवाधबोध॰ MS **6.2** सम्भवती॰] *em.*; सम्भवी॰ MS • ह्यनधीत॰] *em.*; द्यनधीत॰ MS^{pc}; द्यवनधीत॰ MS^{ac} **6.5** वेदान्न] *em.*; वेदर्न्न MS **6.6** ॰दवगतो वेदार्थ] *conj.*; ॰दवगतो ऽर्थो न वेदार्थ MS • का] *em.*; क MS • कृत्स्नो ऽधि॰] *em.*; कृत्स्नवे॰ MS **6.8** विधिर्मा] MS^{ac}; विधिः र्म्मा MS^{pc} • भून्न्याय॰] *em.*; भूत न्याय॰ MS **6.10** वेदः] MS^{pc}; वेद MS^{ac} **6.11** विहिते] *em.*; विहि MS • ॰मपेक्ष्यत] *em.*; ॰मपेक्षान्त MS

दनेन नोच्येत नानूद्येत। केचित्तु **नं** न पठन्ति। तत्रायमर्थः– उक्तं हि **न्यायप्राप्तो ऽर्थः** ⟨f.129ʳ⟩ **प्रदर्श्यत** इति। तदेव व्यतिरेकमुखेन द्रढयति– **अथाप्येष विधिस्तथापि स्वाध्यायाध्ययनविधिनार्थाक्षिप्तमर्थज्ञानमुच्येतानू-**द्येतेत्यनिच्छताप्यभ्युपेयम्। अनभ्युपगमे हीतरवेदवाक्यवद् 'वेदः कृत्स्नो ऽधिग[न्त](व्यः' इत्येतदप्यविव)क्षितार्थम्। तथा च तदधीनमर्थावधारणं वेदराशेरप्रमाणकं प्रसज्येतेति बलाद् 'दृष्टो हि तस्यार्थः' इति न्याय एव प्रमाण(मास्थातव्यम्। तथा सति)तत्सिद्ध एवार्थो 'वेदः कृत्स्नो ऽधिग-न्तव्यः' इति वाक्येनानुवाच्यत इति सिद्धम्। भवतु वायं विधिस्तथापि 'आत्मा ज्ञातव्यः' इति **न वि[धि](रपेक्षितव्यः, सामान्यवि)धिना** चरितार्थ-त्वादित्याह– **तथापि ब्रह्मस्वरूपेति**। काकाक्षिवदुभयत्र मध्यस्थं तथापीति योजनीयम्। **वाक्यसामर्थ्यादिवेति**। वे[दा](न्तेषु 'तत्त्वमसि' इ)त्यस्य वा वाक्यस्य 'सदेव सोम्येदमग्र आसीद्' इत्यादेर्वा सामर्थ्यादित्यर्थः॥ ⊗॥

इतश्च –

6.23 *Chāndogyopaniṣad* VI.8.7 : तत्त्वमसि।
6.24 *Chāndogyopaniṣad* VI.2.1 : सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्।

6.13–20 Cf. *Bhāvaśuddhi* (287.9–16): यदुक्तम्– न्यायप्राप्तो ऽर्थः प्रदर्श्यत इति, तदेव व्यतिरेकमुखेन द्रढयति– अथापीति॥ विधित्वे ऽपि स्वाध्यायाध्ययनविधिनार्थाक्षिप्तमर्थ-ज्ञानम्, उच्यते=अनूद्यते, इत्यनिच्छताप्यभ्युपेयम्, अनभ्युपगमे हीतरवेदवाक्यवद् 'वेदः कृत्स्नो ऽधिगन्तव्यः' इत्येतदप्यविवक्षितार्थम्, तथा तदधीनमर्थावधारणं वेदराशेरप्रमा-णकं स्यादिति बलात्– 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति न्याय एव प्रमाणमा-स्थातव्यम्। तथा सति तत्सिद्ध एवार्थः; 'वेदः कृत्स्नो ऽधिगन्तव्यः' इत्यस्य वाक्यस्य सामर्थ्यादित्यर्थः॥
6.20–24 Cf. *Bhāvaśuddhi* (287.17–288.5): केचित्तु नं (केचित्तु *edn*) पठन्ति– तत्राय-मर्थः। अर्थज्ञानं नानूद्यते, वेदः कृत्स्नो ऽधिगन्तव्यः' इत्ययं विधिरेव, इति– न्यायप्रा-प्तार्थपरत्वे विधित्वे ऽपि 'सदेव सोम्य' इत्यादिवाक्यार्थज्ञानेनापरो विधिरेष्टव्य इत्याह– तथापीति॥ सामान्यविधिनैव सिद्धत्वात्।

6.13 तदनेन नोच्येत] *em.*; तदानन रोच्यत MS • केचित्तु नं न] *conj.*; केचिन्नू न नं MS **6.14** °मुखेन] *em.*; °मुखेण MS (blank space enough for three akṣaras left after °मुखेण) **6.15** °मुच्येतानू°] *em.*; °मुच्येतनू° MS **6.16** °प्यभ्युपेयम्, अनभ्युप-गमे] *em.*; °प्यभ्युपगमे MS • च] MS[pc]; चं MS **6.18** वेदराशेर°] *em.*; वेदगमे न MS • न्याय एव] *em.*; न्याय एव एव MS **6.22** तथापीति] MS[pc]; तथापीति MS[ac]

फलं विधेयावगमात्प्रवृत्तिश्चोत्तरा विधेः।
अन्योन्यसंश्रयान्नैष शाब्दो बोधः स नो परः॥ ३॥

शब्दादवगम्य विधेयं या प्रवृत्तिः सा विधेः प्रयोजनम्, न तु शब्दप्रभवो विधेयावगम एव, अन्योन्यसंश्रयात्– अवगते शब्दार्थे प्रवृत्तेः, प्रवृत्तस्य चावगमात्। शब्दार्थबोधादेव वा शब्दार्थबोध इत्यात्माश्रयः। अन्योन्यसंश्रयस्तु तुल्यानुपपत्तित्वादुक्तः। यस्तु तत्त्वावबोधपराद्वाक्यात्तत्त्वावबोधः, नासौ शब्दार्थबोधात्पराचीनः, किन्तु स एवेति।

अपि च 'आत्मा ज्ञातव्यः' इत्यनेन वेदान्तसहिते[न](विधिना यदि वेदान्त) ⟨f.129^{v}⟩ विद्वेदान्तवाक्यजन्मन्यात्मज्ञाने प्रवर्तते, प्राप्तमन्योन्यसंश्रयमात्माश्रयं वा। वेदान्तसहितः खलु 'आत्मा ज्ञातव्यः' इति विधिनौंपनिष[द](मात्मज्ञानं जनयतीति **शब्दाद**)**वगम्य** कार्ये नियोज्येन प्रवर्तितव्यम्। सोऽयं यद्यनुप्रवर्तितो नास्य प्रतीतिप्रवृत्त्योः संप्रतिपत्तिः स्यात्, वैयधिकरण्या[त्त](योः। तर्हि नियोज्येनान्यत)र एव कार्ये प्रवर्तितव्यम्। तथा चेतरेतराश्रयत्वम्, प्रवृत्तिमन्तरेणौपनिषदात्मज्ञानाभावात्तदन्तरेण च प्रवृ[त्त्य](भावात्। अयं हि विधिबोधि)तौपनिषदात्मज्ञानविषयकार्यः प्रवर्तितुमर्हति, न चान्यकार्यवेदनमौपनिषदात्मविषयनिरूपणमन्तरेण। यतो ज्ञाननि[रू](पणं विना न प्रवृत्तिर्न च ताम)न्तरेण तदिति प्रवृत्तौ सत्यां ⟨तदधिगम⟩ तदधिगमे

7.9–12 Cf. *Bhāvaśuddhi* (289.14–18): विधिबलाच्चेच्छब्दात्स्वार्थबोधः, शब्दात्स्वार्थबोधे जाते विधिना स एव बोधः कार्यत इत्यात्माश्रय इत्यर्थः। तर्हीतरेतराश्रयः कथमुक्तः? अत्राह– अन्योन्यसंशय इति॥ शब्दादर्थज्ञानं विना न प्रवृत्तिः, प्रवृत्तिं विना न शब्दादर्थज्ञानमपि; तुल्यानुपपत्तित्वादित्यर्थः।

7.3 वेदान्तसहितः] *em.*; वेदान्तसहिता MS • ज्ञातव्य इति] *em.*; तव्य इति MS • विधिनौंप॰] *em.*; विधिन्नोप॰ MS **7.4** कार्ये नियोज्येन] *em.*; कार्यन्नियोज्येन MS **7.5** ॰यं यद्यनु॰] *em.*; ॰यमद्यनु॰ MS • ॰प्रवर्तितो नास्य] *em.*; ॰प्रवर्तित नास्य MS^{pc}; ॰प्रवर्तिता नास्य MS^{ac} **7.6-7**चेतरेतराश्रयत्वम्] *em.*; चतरेतराश्रयं MS **7.7** तदन्तरेण च प्रवृत्त्य॰] *em.*; तदन्तरेण च प्रवृत्त्यन्तरेण च प्रवृत्त्य॰ MS **7.9** यतो] MS^{pc}; रूयतो MS **7.10** तदधिगमे] *em.*; नुदधिगमे MS

च सति प्रवृत्तिरिति। यदि पुनर्मध्यवर्तिनीं प्रवृत्तिमविवक्षित्वा प्रवृत्तिफलं विधिफ[लं](विवक्षति तर्हि तस्मा)देव तदित्यात्माश्रयः। **अन्योन्यसंश्रयस्तूक्तस्तुल्यानुपपत्तित्वात्।** उभयोरप्यनु⟨f.130ʳ⟩पपत्तिः समानेति भक्त्यात्माश्रय एवान्योन्यसंश्रय उक्त इति॥ ⊗॥

अपि च

जाते बोधे न प्रवर्त्यो नतरां खल्वबोधके।
शब्दे न निश्चये तस्मादन्यस्मादन्यवाञ्छनम् ॥ ४ ॥

उदपादि चेत् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रमात् 'तत्त्वमसि' इत्यन्ताद्वाक्यादात्मतत्त्वावबोधः, पदानां परस्परान्वितार्थत्वात्, किमन्यद्विधिः करिष्यति? न प्रवृत्त एव प्रवर्त्यः। अथ पदार्थसमन्वयमात्रान्न तत्त्वबोधोत्पादः, सुतरामप्रवर्त्यः। शाब्दस्य तत्त्वावबोधस्यासंभवात्। स्यादेतत्— उत्पन्ने ऽपि तत्त्वावभासे शब्दात्, निश्चये प्रवर्त्यः 'एवमिदम्' इति। तन्न। यदि तस्माच्छब्दान्निश्चयः, स जात एव। अथान्यतो निश्चयः, अन्यवाञ्छनं प्रमाणान्तरापेक्षा, न तत्र तत्त्वनिश्चयनिबन्धनं शब्दः स्यात्। एवं तावन्न तत्त्वनिश्चयाय विधिरर्थ्यते।

अपि चानागतमुत्पाद्यं प्रवृत्तेर्विषयः। उत्पन्नश्चेत् **'सदेव सोम्येदम(ग्र आसीदेकमेवाद्विती)यम्' इत्युपक्रमात् 'तत्त्वमसि' इत्यन्ताच्छब्दाद्बोधः,** नायमनागत इति न तत्र प्रवर्त्यः। तदिदमाह— शब्दाज्जाते **बोधे न प्रवर्त्य** इति। अथायमबोध[क](आत्मन इति चेत्, त)त्राह— **नतरां खल्वबोधके**

8.3शब्दे न] शब्देन *edn*

7.11 पुनर्मध्य॰] MS^{pc}; पुननर्मध्य॰ MS^{ac} • ॰वर्तिनीं] *em.*; ॰वर्तिनी MS **7.12** ॰श्रयः। अन्योन्यसंश्रय॰] *em.*; ॰स्रमन्योन्यसंस्रय॰ MS (blank space enough for eight akṣaras before ॰संस्रय॰) **7.13** ॰नुपपत्तित्वा॰] MS^{pc}; ॰नुरूपत्वा॰ MS^{ac} **8.1** अपि चाना॰] MS^{pc}; अपि चना॰ MS^{ac} • ॰गतमुत्पाद्यं] *em.*; ॰गतामुत्पाद्यं MS • सोम्येद॰] *em.*; त्साम्यद॰ MS **8.3** बोधे] *em.*; बाधे MS

शब्द इति। उत्पन्ने ऽपि शब्दाद्बोधे तस्यानन्तरविनाशित्वात्सम्भवत्यनागतो बोध उत्पाद्यः, केवलमसौ श(ब्दप्रभवबोधसं)स्कारसहितान्मनोमात्रादेव भवितुमर्हति न प्रवृत्तिमपेक्षते। अबोधके तु प्रवृत्तावपि न कार्योत्पाद इति **नतरामित्युक्तम्**। **अथ न प**[**दा**](**र्थसमन्वयमात्रात्तत्त्वनि**)**श्चयोत्पाद** 'एवमेतन्न त्वेवम्' इति। **स शब्दाच्चेज्जात एव**, किमर्थमयं घटते? तदिदमाह– **न निश्चये तस्मादि**ति। मानान्तराच्चे[न्मा](नान्तरापेक्षो ऽ)यं शब्दो ऽर्थमवगमयतीति सापेक्षत्वप्रसङ्गः, तदिदमाह– **अन्यस्मादन्यवाञ्छनमि**ति। ननु भूतार्थत्वात्सापेक्षत्वम्? ⟨f.130^{v}⟩ न त्वयं तदर्थः कार्यपरश्च, तस्मात्कार्यार्थतत्परत्वेनैव भूतार्थाभिधानात्तस्य च मानान्तरागोचरत्वात्। कुतो ऽस्य सापेक्षतेत्यत आह– **तत्र न त**[**त्त्व**](**निश्चयनिबन्धनं शब्दः**)**स्यात्**। तथा च न शाब्दबोधे प्रवर्तेतेति शेषः॥ ⊗॥

अथाविवक्षितार्थत्वनिवृत्त्यै प्रार्थ्यते विधिः।
अर्थो ज्ञातव्य इत्युक्ते ज्ञेयः स्यान्नाविवक्षितः ॥ ५ ॥

यदपि मतम्– सत्यपि वाक्यादर्थोपप्लवे तात्पर्यं दुर्लभम्, भूतार्थपरस्य वैयर्थ्यात्। सांशयिकत्वं वा, अतात्पर्यस्यापि दर्शनाज्जपमन्त्रेषु। विधौ तु सत्यर्थज्ञानस्य चोदितत्वान्नार्थो ऽविवक्षितो भवितुमर्हति। तस्माद्विवक्षितार्थत्वाय विधिः प्रार्थ्यः।

उपप्लवो ऽप्रमाणं ज्ञानम्। अत्र हेतुमाह– **भूतार्थपरस्ये**ति। **सांशयिकत्वं**

9.1–5 Cf. *Bhāvaśuddhi* (291.11–19): उपप्लवः=अप्रामाण्यज्ञानम्। अत्र हेतुमाह– भूतार्थेति॥ वाचकः शब्दो न वाच्यमन्तरेणेति वैयर्थ्यानुपपत्तिः, अत्राह– सांशयिकत्वं वेति॥ तत्रापि हेतुमाह– अतात्पर्यस्यापीति॥ अविद्यमानार्थतात्पर्यस्यापि दर्शनाज्जपमन्त्रेषु। स्वरूपपराः खल्वमी बहुलमुपलभ्यन्ते जपमन्त्रा इति मन्त्राधिकरणपूर्वपक्षाभिप्रा-

---

8.5 °द्बोधे तस्यानन्तर°] *em.*; °द्बोधेस्तस्यान्तर° MS • °त्वात्सम्भव°] त्स *ow.* MS **8.6** उत्पाद्यः] *em.*; जत्पाद्यः MS^{pc}; त्यजत्पाद्यः MS^{ac} • °स्कारसहिता°] *conj.*; °त्कारसंहिता° MS **8.8-9** 'एवमेतन्न त्वेवम्' इति] *conj.*; एवावमतं नानेवमिति MS **8.9** शब्दाच्चेज्जात] *em.*; सब्दाच्चेज्ञात MS^{pc}; सब्दाच्चेतिज्ञात MS^{ac} **8.11** °वाञ्छनमिति] *em.*; °वाज्ञाननमिति MS **8.12** °त्वात्सापेक्ष°] MS^{pc}; °त्वासत्सापेक्ष° MS^{ac} • °परश्च] *conj.*; °परस्त MS **8.14-14**ऽस्य सापेक्ष°] *em.*; स्यपेक्ष° MS **9.1** सांशयिकत्वं] MS^{pc}; ननु भूतार्थत्वा सांसयिकत्वं MS^{ac}

[वा],(अविद्यमानार्थतात्पर्य)स्यापि दर्शनाज्जपमन्त्रेषु। स्वरूपपराः खल्वमी बहुलमुपलभ्यन्ते जपमन्त्राः। तदिह वेदान्तेषु स्वरूपपरत्वमुतस्विदर्थपरत्वमिति विश(ये स्वरूपपरत्वमेव), प्राथम्यात्, न पुनर्जघन्यार्थपरत्वमिति प्राप्ते ऽर्थपरत्वापादनं विधेः प्रयोजनमिति॥ ⊗॥

तद्वार्तमर्थपरता शब्दानां लोकवेदयोः।
'अविशिष्टस्तु वाक्यार्थ' इत्युत्सर्गवती यतः ॥ ६॥

औत्सर्गिकः शब्दानामर्थं प्रति शेषभावः। निमित्तान्तरात्तु स्वरूपप्रधानत्वमविवक्षितार्थत्वमपवादो लोके। तथा वेदे ऽपि, लोकावगम्यत्वाच्छब्दसामर्थ्यस्य। तदुक्तम्– 'अविशिष्टस्तु वाक्यार्थः' इति।

तदेतद्दूषयति– **तद्वार्तमिति**। लो[क](वेदसाधारणं सा)मर्थ्यं पदानाम्, लोके च तानि पराञ्चीत्युत्सर्गः। किंचिदेव तु पदं क्वचिद्बलवतो ऽपवादादित्यादेर्गवित्ययमाहेत्यादौ प्रत्यग्भवति। त[दि]ह वेदान्तेष्वप्यसत्यपवा)दे नार्थपरतौत्सर्गिकी प्राथम्यमात्रेणाक्षराणां शक्यापवदितुम्। तुल्यकक्षत्वे हि प्राथम्यं विशेषत्वाय युज्यते। दर्शिता त्वस्य [लो](के बाधानर्ह)⟨f.131ʳ⟩ता। यस्तु क्वचिद्दर्शनमात्रादपवादमुत्प्रेक्षेत तं प्रति प्रतिवि[हित]मत्रभवता वार्त्तिककृतैव–

10.2, 5–6 *Jaiminisūtra 1.2.40 :* अविशिष्टस्तु वाक्यार्थः।

यः; तत्र 'उरु प्रथस्व' इत्यादिमन्त्राणामुच्चारणमात्रोपयोग इत्युक्तत्वात्। ननु– वेदान्तेषु स्वरूपपरत्वम्, उत स्वार्थपरत्वमिति विशये स्वरूपपरत्वमेव; प्राथम्यात्, न पुनर्जघन्यार्थपरत्वमपीति शङ्का विधावपि तुल्येति, अत्राह– विधौ त्विति॥

10.3–4 Cf. *Bhāvaśuddhi* (292.12–14): वेदान्तेष्वप्यसत्यपवादे नार्थपरतौत्सर्गिकी प्राथम्यमात्रेणाक्षराणां शक्यापवदितुमित्यर्थः।

9.2 °मन्त्रेषु] *em.*; मत्रेषु MS **9.3** बहुलमुपलभ्यन्ते] *em.*; बलुलमुपलभ्येन्त MS **9.4** °र्थपर°] MS^{pc}; °र्थमेपर° MS^{ac} **10.1** तदेत°] MS^{pc}; तदेवत° MS^{ac} (व without head mark) • तद्वार्त°] *em.*; तद्वातु° MS **10.2** पराञ्ची°] *conj.*; परांधी° MS **10.4** °तौत्सर्गिकी] *em.*; °तौत्सगर्गकी MS • °क्षराणां] *em.*; °क्षराणा MS • °पवदितुम्] *em.*; °पवयितुं MS • तुल्यकक्षत्वे] *em.*; तुत्यकक्षत्वे MS^{pc}; तुत्यककक्षत्वे MS^{ac} **10.5** विशेषत्वाय] *em.*; विशेषात्पाय MS **10.6** °चिद्दर्शन°] MS^{pc}; °चिर्द्दर्शन° MS^{ac} • °मुत्प्रेक्षेत] *em.*; °मुत्पेक्षेत MS • तं प्रति प्रतिवि°] *conj.*; तप्रतिपत्तिवि° MS • वार्त्तिककृतैव] *em.*; वर्त्तिकृतेव MS

उत्प्रेक्षेत हि यो मोहादजातमपि बाधकम्।
स स[र्व](व्यवहारेषु संशयात्मा) क्षयं व्रजेत्॥ इति।

कृतोपपादनं चैतन्न्यायकणिकायाम्। अत्रैव पारमर्षसूत्रावयवं योजयति– **तदुक्तमविशिष्टस्तु वाक्यार्थ** इति॥ ⊗॥

अपि च
दृष्टार्थता च स्वाध्यायविधेरत्र न भिद्यते।
भवेदितरथा कृत्स्नः स विध्यर्थो ऽविवक्षितः ॥ ७॥

यथैव कर्मविधीनां 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति नाविवक्षितार्थानामध्ययनात्फलान्तरकल्पना तथा दृष्टत्वादात्मतत्त्वावबोधस्य वेदान्तानाम्। न च भूतार्थप्रतिपत्तौ वैयर्थ्यमिति वक्ष्यते। प्रतिपत्तिविधौ च तुल्यम्। अवश्यं चैतदेवं विज्ञेयम्। अन्यथा सह विधायकेन कृत्स्नस्याविवक्षितार्थता स्यात्। यतो विधायकशब्दनिबन्धनमन्येषां विवक्षितार्थत्वम्, विधायकस्य तु न तन्निबन्धनमस्ति। एवं च तस्याविवक्षितार्थत्व इतरे ऽपि तथा स्युः। अथ विधायकः प्रकृत्या दृष्टार्थत्वेन चार्थपरः, इतरे ऽपि तथेति व्यर्थो ऽसौ विधिः।

अपि(**च दृष्टार्थता चे**)ति। **यथैव हि कर्मविधीनां** 'स्वाध्यायो ऽध्येतव्यः' इति कृदभिहितकर्मभावानां संस्कार्याणां तत्संस्काराध्ययनानन्तरपरिदृश्यमानमितरा[प](रिदृष्टं कर्मावबोधनं) च प्रयोजनम्, न तदपह्नवेनाविवक्षितार्थानां

10.7–8 *Bṛhaṭṭīkā*, also quoted in *Nyāyakaṇikā*(604.16–17): उत्प्रेक्षेत हि यो मोहादजातमपि बाधकम्। स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत्॥
11.4 *Śābarabhāṣya 1.1.1* : दृष्टो हि तस्यार्थः कर्मावबोधनम्।

10.7 बाधकम्] *em.*; बाधनं MS **10.8** क्षयं व्रजे॰] *em.*; त्सयं व्रजे॰ MS^{pc}; मात्सयं व्रह्मजे॰ MS^{ac} **10.9** चैतन्न्याय॰] *em.*; चैतन्याय॰ MS • पारमर्षसूत्रावयवं] *em.*; पारमर्थसूत्रवयवं MS **11.1** ऽध्येतव्य] MS^{pc}; ऽध्येतव्यत MS^{ac} **11.2** कृदभिहित॰] *em.*; कृतभिहित॰ MS **11.3** ॰नमितराप॰] *conj.*; ॰नचेतरा। प॰ MS • प्रयोजनम्] *em.*; प्रयोजनां MS^{pc}; प्रयोजनानां MS^{ac} • तदपह्नवेना॰] *em.*; तदपङ्कवेना॰ MS

विनियोगभङ्गेन साक्षादध्ययनादेव स्वर्गस्य वार्थवादिकस्य वा फलान्तरस्य कल्पना। 'न (च सहसैव विधिद)र्शनात्स्वर्गाद्येव फलं कल्प्यते। योग्यतया हि यस्य यदनन्तरभावो ऽवगम्यते तदेव तस्य कार्यम्।' तद्यदि न साक्षादपेक्षितं चेतनेन ततस्तदी(यपरम्परया तद)पेक्षितमनुस्रियते विध्यनुरोधात्। यदि तु यत्नेनानुसरन्तः परम्परयापि नापेक्षितमुपलभेमहि यथा 'सक्तूञ् जुहोति' इति, ततः परावृत्य भ(क्त्या तस्य विधि)वशादपेक्षितोपायतामातिष्ठामहे। अस्ति तु स्वाध्यायाध्ययनस्यार्थाधिगमतदनुष्ठानपरम्परालभ्यमभिलक्षितं चेतनस्येति त[दि](तरफलानुक)⟨f.131v⟩ल्पनविनियोगभङ्गादिकल्पनोचिता। दृष्टान्तं प्रसाध्य दार्ष्टान्तिके योजयति– **तथा वेदान्तानां नाध्ययनात्फलम्**। कुतः? तज्जनितस्यात्मतत्त्वावबोध(स्य दृष्टत्वेना)भिव्याप्यर्थत्वात्। नन्वभिव्याप्यतां नाम भूतमात्मतत्त्वम्, प्रेक्षावतस्तु किं तेनेत्यत आह– **न च भूतार्थप्रतिपत्तौ व्याप्तौ बोधफलवैयर्थ्यमिति वक्ष्य[ते।]**('आत्मा ज्ञातव्यः') इति **प्रति[पत्तिविधा]वपि तुल्यं वैयर्थ्यम्**। एतदपि वक्ष्यते–

प्रतिपत्तिविधौ तुल्यं यदि सैव प्रयोजनम्। इति।

अतः स्वाध्ययनविधिर्दृष्टार्थत्वमनुसर(ति। **अवश्यं**) **चैतदेवमिति** सुगमम्॥ ⊗॥

ज्ञानस्य पुरुषार्थत्वसिद्धये विधिरिष्यते।
सर्वत्र पुरुषार्थत्वं विधेरित्यप्यपेशलम्॥ ८॥

विध्यधीनः पुरुषार्थसाधनतावबोधः, तच्छब्दतो लब्धजन्मनो

11.5–6 Cf. *Tantravārttika* I.2.7: न च सहसैव विधिदर्शनात्स्वर्गाद्येव फलं कल्प्यते। योग्यतया हि यस्य यदनन्तरभावो ऽवगम्यते तदेव तस्य कार्यम्।
11.8 *Taittirīyasaṃhitā* III.3.8: सक्तूञ्जुहोति।
11.17 *Brahmasiddhi* II.92cd : प्रतिपत्तिविधौ तुल्यं यदि सैव प्रयोजनम्।

11.5 स्वर्गाद्येव] *em.*; स्वर्गादिव MS 11.6 यदनन्तर॰] MS^pc; यदनदन्तर॰ MS^ac 11.8 परम्परयापि] *em.*; परम्परयावि MS 11.11 ॰परम्परा॰] *em.*; ॰परस्परा॰ MS 11.11 दृष्टान्तं] *em.*; दृष्टार्तं MS 11.13 तज्जनितस्यात्म॰] *em.*; तज्जनियतस्यात्म॰ MS^pc; जगतज्जनियतस्यात्म॰ MS^ac 11.15 ॰तत्त्वम्, प्रेक्षावतस्तु] *em.*; ॰तत्त्व प्रेक्षावत् स्तु MS 11.17 तुल्यं यदि] *em.*; तुल्य यंदि MS • प्रयोजनम्। इति] MS^pc; प्रयोजमिनमिति MS^ac 11.18 अतः] *em.*; आत MS • ॰विधिर्दृष्टार्थ॰] *em.*; ॰विर्दृष्टार्थ॰ MS

ऽप्यात्मतत्त्वावबोधस्य पुरुषार्थसाधनत्वावगमो विधेरित्येतदपि न शोभनम्।

चोदयित्वा निरासं संगिरते– ज्ञानस्येति। यदि खल्वात्मज्ञानं न विधीयेत वेदान्तैरुपजनितमपि न पुरुषार्थमिति गम्येत [।] (यत्तु विधेः क)त्रेपेक्षितोपायतारूपत्वादुपहितसीम्नो ऽस्य पुरुषार्थता सिध्यत्येवं च प्रवर्ततेतरां चेतन इत्येतदप्यसुन्दरमिति प्रतिजा[नी](ते– सर्वत्रेति॥ ⊗॥)

ज्ञेयाभिव्याप्तितो यस्मान्न विज्ञानात्फलान्तरम्।
इष्यते मोक्ष इति चेत्साध्यस्तत्त्वच्युतेर्न सः॥ ९॥

ज्ञानस्य हि दृष्टमेव फलम्– ज्ञात्रा ज्ञेयाभिव्याप्तिः, ज्ञातारं प्रति तस्य प्रकाशनम्– न त्वदृष्टं कालान्तरभावि, यदर्थो विधिः स्यात्। स्यादेतत्– आत्मज्ञानस्य फलान्तरमपीष्यते मोक्षः। तन्न, असाध्यत्वात्। न हेतुजन्यो ऽसौ मोक्षः, तत्त्वच्युतेः। कार्यत्वे विनाशात्तस्य पुनःसंसारात्। आत्यन्तिकी च संसारनिवृत्तिर्मोक्ष इत्युच्यते।

ज्ञेयाभिव्याप्तित इति। **ज्ञानस्य** ह्यात्मव्यापारस्य **दृष्टं फलं ज्ञेयाभिव्याप्तिः**

13.4 प्रकाशनम्] प्रकाशता *edn*

12.1–2 Cf. *Bhāvaśuddhi* (295.10–12): यदि खल्वात्मज्ञानं न विधीयेत, वेदान्तैरुपजनितमपि पुरुषार्थसाधनमिति नावगम्येत, विधौ तु तद्धीरित्यर्थः।
12.2–3 Cf. *Bhāvaśuddhi* (295.8-9): विधेरपेक्षितोपायतारूपत्वात्तदुपगृहीतसीम्न एव पुरुषार्थसाधनताधीरित्यर्थः।
13.1–8 Cf. *Bhāvaśuddhi* (295.14–20): ज्ञानस्य हीति॥ ज्ञानस्य ह्यात्मव्यापारस्य फलं प्राकट्यमर्थस्य, तच्च वेदान्तलब्धजन्मनो ज्ञानादेव सिध्यति, इति किमत्र विधिनेत्यर्थः। प्राकट्यमर्थजन्म (धर्म) श्चेत्, सर्वत्र प्रतिपत्तॄणां साधारणः स्यात् शौक्ल्यादिवदिति, अत्राह– ज्ञातारं प्रतीति॥ यदीयया (यदि *edn*) ज्ञानक्रियया योऽर्थो व्याप्यते, तं प्रत्यसौ प्रकटः, नान्यं प्रति, यथा यदपेक्षाबुद्धिजन्यं यद्वित्वम्, तत्तस्यैव प्रत्यक्षमित्यर्थः॥

12.1 °ज्ञानं न] *em.*; °ज्ञानं MS **12.2** वेदान्तैरुप°] *em.*; वेदान्तरुप° MS **12.2-3** °त्रेपेक्षितोपाय°] *em.*; °र्तुपेक्षतोपाय° MS **12.3** °दुपहित°] MS^{pc}; °दुपहीत° MS^{ac} • चेतन] चेतना MS^{pc}; चेतनाना MS^{ac} • इत्येतदप्यसुन्दरमिति] MS^{pc}; इत्येदतदप्यसुन्दरप्रमिति MS^{ac} **12.4** इत्येतदप्यसुन्दरमिति] MS^{pc}; इत्येदतदप्यसुन्दरप्रमिति MS^{ac} **13.1** ह्यात्म°] MS^{pc}; ह्यात्मा° MS^{ac}

प्राकट्यमर्थस्य, तच्च तस्मादेवाध्ययनविध्यधीनग्रहणवे[दा](न्तज्ञानात्सिध्य)तीति कृतमत्र विधिना। नन्वेतदर्थधर्मश्चेच्छुक्लत्वमिव पटस्य, हन्त सर्वान् प्रमातॄन् प्रति यथा शुक्लः पटः, प्रकटो ऽप्येवं प्रसज्येतेत्यत [आ](ह– **तस्य प्र**)⟨f.132^{r}⟩**काशनम्**। एतदुक्तं भवति– यदीयया ज्ञानक्रियया यो ऽर्थो ऽभिव्याप्यते तं प्रत्यसौ प्रकटो न पुनरन्यमपि प्रति। यदीयापेक्षाबुद्ध्या ययोर्द्वि[त्वं] (जायते तमेव पु)रुषं प्रति ते द्वे वस्तुनी नान्यं प्रति। कृतोपपादनं चैतन्न्यायकणिकायामिति।

स्यादेतदात्मज्ञानस्येति। न खलु जन्यमित्येव फलतया (यत्किंचिदिहेष्यते) ऽपि तु यच्चेतनसमीहितम्, असमीहिता च ज्ञेयाभिव्याप्तिः परिहारात्मिका। मोक्षस्तु निरतिशयानन्दलक्षणो ऽस्य समीहित इ(तीष्टं ज्ञानस्य फलम्, इष्ट)लक्षणत्वात्फलस्य। न चासौ विधिमन्तरेणेति तदर्थमर्थनीयो विधिरित्यर्थः। तदेतद्दूषयति– **तन्न**, **असाध्यत्वात्**, (**न हेतुजन्यो ऽसौ मोक्षस्तत्त्वच्यु**)**तेः**। ननु वन्ध्यात्वजननीत्वयोरिव न मोक्षत्वकार्यत्वयोर्विरोधमुत्पश्याम इत्यत आह– **कार्यत्वे (विनाशात्तस्य पुनःसं)सारात्**। तथापि को विरोध इत्यत आह– **आत्यन्तिकी चेति**।

13.5–7 Cf. *Abhiprāyaprakāśikā* (296.16–18): यस्यापेक्षाबुद्ध्या द्वित्वं घटादौ जायते, तत्तस्यैव यथा प्रकाशते, नान्यस्य; तथा यज्ज्ञानक्रियया यो ऽर्थो ऽभिव्याप्यते, तं प्रत्यसौ प्रकटो भवति, न पुनरन्यमपि प्रतीति भावः॥
13.11–12 Cf. *Bhāvaśuddhi* (295.21-22): फलस्येष्टलक्षणत्वान्निरतिशयसुखरूपो मोक्षो ज्ञानस्य फलम्, अतस्तत्साधनत्वसिद्धये ज्ञाने विधिरिति चोदयति– स्यादेतदिति॥
13.14–16 Cf. *Bhāvaśuddhi* (295.23–296.3): वन्ध्यात्वजननीत्वयोरिव मोक्षत्वकार्यत्वयोर्विरोध इति, अत्राह– कार्यत्व इति॥ तथापि को विरोध इति? अत आह– आत्यन्तिकीति॥

13.2 प्राकट्य°] *em.*; प्राकट्या° MS • °विध्यधीन] *em.*; °विधीन MS **13.4** प्रमातॄन्प्रति] *em.*; प्रमातृन्पप्रति MS • शुक्लः] MS^{pc}; क्लुशुक्लः MS^{ac} **13.5** °क्रियया यो ऽर्थो] *em.*; °क्रिययो ऽर्थो MS **13.6** °व्याप्यते तं प्रत्यसौ] *em.*; °व्याप्यते प्रत्यसौ MS • प्रकटो] *em.*; प्रटको MS • यदीया°] *em.*; यथादीया° MS **13.7** °रुषं प्रति] *em.*; °रुषणं प्रति MS **13.8** चैतन्न्याय°] *em.*; चैतन्याय° MS **13.10** ऽपि तु] MS^{pc}; ऽपि तुद्व MS^{ac} (द्व without head mark) • ज्ञेयाभिव्याप्तिः परि°] *em.*; ज्ञयाभिव्याप्तिपरि° MS **13.11** °यानन्दलक्षणो] *em.*; °यानत्वलक्षणो MS^{pc}; °यानत्वलक्षणो यो MS^{ac} **13.12** °लक्षणत्वात्फलस्य] *em.*; °लक्षणत्वात्फलमिष्टलक्षणत्वात्फलस्य MS **13.13** तन्न, असाध्यत्वात्] *em.*; तत्साध्यत्वात् MS **13.14** मोक्षत्वकार्यत्वयोर्वि°] *em.*; मोक्षत्वकार्यत्वयोरिव न मोक्षत्वकार्यत्वयोर्वि° MS

ननु कार्यो ऽपि नाशो न नश्यति। सत्यम्, भावरूपं तु मोक्षं निरतिशयानन्दलक्षणं निरतिशयैश्वर्यलक्षणं चाभिप्रेत्यैतदुच्यते, भावस्य कार्यस्य विनाशेनाविनाभावात्। आगामिशरीरेन्द्रियबुद्धिसंयोगाभावस्य प्रागभावस्य कार्यत्वमनुपपन्नमेव। बन्धहेतुनिवृत्तिस्तु यद्यपि कार्या, कार्यत्वे ऽपि च नास्या अनित्यत्वप्रसङ्गः, तथापि नासौ तत्त्वज्ञानात्पृथगिति न तेन साध्या। अविद्या हि बन्धहेतुस्तत्त्वज्ञानोदय एव च तन्निवृत्तिः।

ननु विनाशे कार्यत्वमनैकान्तिकम्, कार्यस्यापि ध्वंसस्याविनाशान्नष्ट(स्य पुनर्नाशायो)⟨f.132^{v}⟩गादित्याह– **ननु कार्य** इति। परिहरति– नानैकान्तिकम्, भावरूपत्वे सतीति विशेषणात्। नाप्यसिद्धं विशेषणम्, निरतिशयान[न्दै](श्वर्यलक्षणत्वान्मोक्षस्ये)त्यर्थः। नन्वभावरूपमेव मोक्षमास्थिषत पैठराः। यथाहुः– 'तदत्यन्तविमोक्षो ऽपवर्गः' इति। अत आह– **आगामीति**। अयमभिसन्धिः। न त(त्रोपात्तदेहेन्द्रियादिवि)योगमात्रमपवर्गः, सर्वेषामेव जन्तूनामुपात्तदेहेन्द्रियादि त्यजतां तत्प्रसङ्गादपि तु य आत्यन्तिकस्तद्वि-

---

14.5 *Nyāyasūtra* I.1.22: तदत्यन्तविमोक्षो ऽपवर्गः।

14.1–5 Cf. *Bhāvaśuddhi* (296.4-7): विनाशे साध्ये कार्यत्वमनैकान्तिकम्; कार्यस्यापि प्रध्वंसस्य नित्यत्वादिति चोदयति– नन्विति॥ भावत्वेन विशेषणान्न व्यभिचार इत्याह– सत्यमिति॥ अभावरूपमेव मोक्षमास्थिषत पैठरकाः। यथाहुः– 'तदत्यन्तविमोक्षो ऽपवर्गः' इति, अत्राह– आगामीति॥

14.6–12 Cf. *Bhāvaśuddhi* (296.8–14): देहादिवियोगमात्रस्यापवर्गत्वे सर्वेषामेवोपात्तदेहादि (°देहादिं *edn*) त्यजतां तत्प्रसङ्गादात्यन्तिकस्तद्वियोगः सः, इदं च तदात्यन्तिकत्वं यद्देहादीनामागामिनामप्यप्रादुर्भावः, सर्वेषां प्रागभावो न कार्यः, तत्कुतो ऽस्य (कुतो ऽनै° *edn*) नैयोगिकत्वमिति। बन्धहेतुनिवृत्तिरेव मोक्षः; मुचेर्बन्धनविमोक्षार्थत्वात्। न चास्य कार्यत्वे ऽपि नाशः (ऽविनाशः *edn*); भावरूपत्वाभावात्। न च सवासनाविद्या समूलघातं निहता (स वासनाविद्यामूलघातं निहत(ना) *edn*) भवितुमर्हति; हेत्वभावादित्याशङ्क्याह– बन्धहेत्विति॥

14.1 ध्वंसस्याविना°] *em.*; धन्स्वस्यापिविना° MS **14.3** °सिद्धं विशेषणम्] *em.*; °सिद्धविशेषणां MS **14.5** °दत्यन्तविमोक्षो ऽप°] *em.*; °दत्त्यविमोक्षो ऽवप° MS • आगामीति] *em.*; अगामीति MS **14.7** त्यजतां तत्प्र°] MS^{pc}; त्यजन्तातान्ततत्प्र° MS^{ac} • य आत्यन्तिक°] *conj.*; यस्यात्यन्तिक° MS

योगः। इदं च तदा(त्यन्तिकत्वं यद्देहेन्द्रि)यादीनामागामिनामप्यप्रादुर्भावः। स चैष प्रागभावो न कार्यस्तत्कुतो ऽस्य नैयोगिकत्वमिति। स्यादेतत्, बन्धहेतुनिवृत्तिरेव मो[क्षः],(मुचेर्बन्धनविमोक्षार्थ)त्वात्। न चास्य कार्यत्वे ऽपि नाशः, भावरूपत्वाभावात्। न च सवासनाविद्या समूलघातं निहता भवितुमर्हति, हेत्वभावादित्याशङ्क्याह– **ब(न्धहेतुनिवृत्तिस्तु) यद्यपि कार्या, कार्यत्वे ऽपि च नास्या अनित्यत्वप्रसङ्गः, तथापि नासौ तत्त्वज्ञानात्पृथगिति न तेन साध्या**। नन्वयं बन्धहेतुः शाब्दे तत्त्वा(धिगमे ऽनुवर्तमानस्त)⟨f.133ʳ⟩द्वतो ऽपि सांसारिकधर्मप्रबन्धदर्शनात्कथं स्वोच्छेदात्मकत्वं [तत्त्वज्ञानस्यावहतीत्यत आह– **अवि]द्या हि बन्धहेतुस्तत्त्वज्ञानोदय [एव](च तन्निवृत्तिरि**ति। इदम)भिसंहितम्। शाब्दः प्रत्ययस्तावदादरनैरन्तर्यदीर्घकालासेवितो दृढभूमिः स्वगोचरब्रह्मस्वरूपसाक्षात्कारहेतुरिति, न तु श(ब्दः साक्षाद्बन्धनिवृत्तिहेतु)रसिद्धत्वात्। तदिह साक्षात्कारस्य सवासनाविद्याभिधानबन्धहेतुध्वंससाधनत्वमनधिगतं प्रमाणान्तराद्विधिगोचरो ऽभ्युपेयम्। न(तु तस्य शाब्दप्रत्ययात्म)नस्तत्साधनत्वसंभवः। न खलु ब्रह्मणो ऽतिरिच्यते वस्तुतस्तत्त्वज्ञानम्, न च ततो बन्धहेतुध्वंसः। न ह्यद्वैतं साक्षात्कुर्वतो ऽस्ति सात्र यापि का(चिदिष्टसाधनता) किं केन साधयेदिति। तदनेन प्रबन्धेन कार्यत्वे सति विनाशप्रसक्त्या मोक्षत्वच्युतेर्न मोक्षः फलमिति व्याख्यातम्।

14.17–18 Cf. *Yogasūtra* I.14: स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः।

14.14–16 Cf. *Bhāvaśuddhi* (296.14–297.6): अयं बन्धहेतुः शाब्दे तत्त्वज्ञाने ऽनुवर्तमानस्तद्वतो ऽपि (°स्तत्त्वतो ऽपि *edn*) सांसारिकधर्मप्रबन्धदर्शनात्(°धर्म(ब)न्ध° *edn*) कथं स्वोच्छेदात्मकत्वं तत्त्वज्ञानस्यावहतीति? अत्राह– अविद्या हीति॥
14.24 Cf. *Bhāvaśuddhi* (297.8): मोक्षच्युतेर्न मोक्षः फलमिति व्याख्यातम्॥

14.9 चैष] MS[pc]; चेष MS[ac] • प्रागभावो] *em.*; प्राग्भावो MS **14.10** न चास्य] *em.*; न चायस्य MS **14.11** °भावात्। न च] *conj.*; °भावानु MS **14.12** भवितु°] MS[pc]; विभवितु° MS[ac] • हेत्वभावादि°] *em.*; हेत्वभादि° MS **14.13** नास्या अनित्य°] *em.*; नास्या ऽनित्य° MS **14.13-14** तत्त्वज्ञानात्पृथगिति] *em.*; तत्त्वज्ञात्पृथमिति MS **14.15** स्वोच्छेदा°] *em.*; ⁻च्छेदा° MS **14.17** °नैरन्तर्य°] *em.*; °नैरर्य° MS **14.18** दृढभूमिः] *em.*; दृढमिभूमिः MS • न तु] *em.*; नानु MS **14.19** °त्वात्।] *conj.*; °त्वाह। MS • सवासना°] *em.*; सवासना° MS **14.20** ऽभ्युपेयम्] *conj.*; ऽभ्युपेयः MS **14.21** ब्रह्मणो] *em.*; ब्राह्मणो MS **14.22** °तस्तत्त्वज्ञानम्] *em.*; °तस्तज्ञानं MS • न च] MS[pc]; च न च MS[ac] **14.23** सात्र यापि] *conj.*; मात्र पायि MS **14.24** °प्रसक्त्या] *em.*; °प्रसह्यां MS • °च्युतेर्न] *em.*; °द्युतेर्न MS • मोक्षः] *em.*; मोक्ष MS • व्याख्यातम्] *em.*; व्याख्यानं MS

अथवा 'परं ज्योतिरुपसंपद्य स्वेन रूपेणावतिष्ठते' इति स्वरूपस्थितिर्मुक्तिरुक्ता। साध्यत्वे च न स्वरूपस्थितिः स्यात्। अतो मोक्षत्वाच्च्यवेत। यत्तु– 'न स पुनरावर्तते' इति श्रुतेः प्रामाण्यात्कार्यस्यापि मोक्षस्य नित्यत्वमिति, दृष्टविपरीतमपि तदाश्रीयेत, अनन्यगतित्वे श्रुतेः। यदा तु विदितात्मतत्त्वस्याद्वयं विशुद्धप्रकाशमात्मानं पश्यतः समुत्खातायामनवयवेनाविद्यायां हेत्वभावात्पुनर्बन्धस्यासंभाव्यत्वात्प्राप्तमेवार्थं वर्तमानापदेशादनुवदति श्रुतिरर्थवादत्वेन, तदा कुतस्तत्प्रामाण्यादनन्तफलत्वम्? तथा हि– वर्तमानापदेशादेव नापुनरावृत्तिः साध्यत्वेनावगम्यते। न च कामोपबन्धो ऽस्ति, यतः साध्यता गम्येत। तस्मादर्थवादः। अर्थवादादपि च या फलकल्पना, सापि ज्ञाने ज्ञेयतत्त्वावभासदृष्टफलनिराकाङ्क्षे ऽनुपपन्ना। पुरुषार्थता चास्य वक्ष्यत इति।

संप्रति **तत्त्वच्युते**[रि](त्यन्यथा व्याचष्टे– **अथ**)वेति। नित्यस्य हि ब्रह्मणः स्वरूपे ऽवस्थानं मोक्षः, स्फटिकस्येवोपधानापकर्षण इति सिद्धमाम्नायतः। तच्चैतत्कार्यस्याभूत्वा भ[व](नशीलत्वान्न कार्यम।) ⟨f.133^{v}⟩स्यादेतत्प्राक्प्रध्वंसाभावत्वविनिश्चये कार्यत्वानुमानम्, न चैतदागमे बाधितविषयं तत्र प्रवर्ति-

---

15.3 न स] न च *edn*

15.1 *Chāndogyopaniṣad* XVIII.12.2: परं ज्योतिरुपसंपद्य स्वेन रूपेणावतिष्ठते।
15.3 *Chāndogyopaniṣad* VIII.15.1: न स पुनरावर्तते।

15.1 Cf. *Bhāvaśuddhi* (297.9): संप्रति तत्त्वच्युतेरित्यन्यथा व्याचष्टे– अथवेति॥
15.3–7 Cf. *Bhāvaśuddhi* (297.12–13): मोक्षः, विनाशी, भावकार्यत्वात्, कुम्भवदित्याशङ्क्यागमविरुद्धकालात्ययापदिष्टत्वमित्याह– यत्त्विति॥

Cf. *Abhiprāyaprakāśikā* (297.23–24): 'कार्यत्वादि'त्याद्यनुमानं श्रुतिविरुद्धतया कालात्ययापदिष्टमिति शङ्कामुत्थाप्य दूषयति– यत्त्वित्यादिना॥

15.1 तत्त्व॰] *em.*; ततत्त्व॰ MS **15.2** मोक्षः] MS^{pc}; मोक्ष MS^{ac} • स्फटिकस्येवोप॰] *conj.*; स्फुटिकास्यवोप॰ MS • सिद्धमाम्ना॰] MS^{ac}; सिद्धमामाम्ना॰ MS^{pc} **15.4** कार्यत्वानु॰] *em.*; कार्यवत्वमनु॰ MS^{pc}; कार्यत्वमनु॰ MS^{ac} • ॰मानम्, न चैतदागमे] *em.*; ॰माननु चैतयुगमे MS

तुमुत्सहते, शुचि नरशिरःकपालं प्रा[ण्य](ङ्गत्वाच्छङ्खशुक्तिवदिति। अ)स्ति च 'न स पुनरावर्तते' इत्याम्नाय इत्यत आह– **यत्तु 'न स पुनरावर्तते' इति श्रुतेरिति**। अनन्यथासिद्धं हि मानान्तरमनुमानं बाधते न पु(नरन्यथासिद्धमपि,) इतरथा ज्वालादेरपि स्थेमप्रसङ्गात्। दर्शिता त्वन्यथासिद्धिर् 'न स पुनरावर्तते' इति वर्तमानापदेशस्येत्यर्थः। **अनवयवेन** कार्त्स्न्येन। [का]-(मोपबन्धाभावे ऽपि) यथा **वर्तमानापदेशादेव** 'प्रतितिष्ठन्ति' इति रात्रिसत्रे प्रतिष्ठाफलं कल्पते तथेहापि कस्मान्नेत्यत आह– **अर्थवादादपि चेति**। यथा हि (पुरुषापेक्षितदृष्टफल)निराकाङ्क्षे ऽध्ययने नार्थवादिकफलकल्पनैवमत्रापि। रात्रिसत्रे त्वलब्धपुरुषसमीहितस्य विधेरस्त्वाकाङ्क्षा, न च पिण्डपितृयज्ञव-[त्स्व](र्गफलकल्पना। यावदत्यन्त)परोक्षा वृत्तिरर्थवादस्य विध्येकवाक्यता तावन्नश्यति॥ ⊗॥

अन्ये पुनराहुः–

विधेर्विना कार्यशून्यं भूतार्थमनुवादकम्।
वचः स्यादनुवादश्च प्रमाणान्तरगोचरे॥ १०॥

15.10 *Tāṇḍyabrāhmaṇa 23.2.4 :* प्रतितिष्ठन्ति ह वा यत्र एता रात्रीरुपयन्ति।

15.7–9 Cf. *Bhāvaśuddhi* (297.15–17): अनन्यथासिद्धं हि मानान्तरमनुमानं बाधते, न पुनरन्यथासिद्धमपि; इतरथा ज्वालादेरपि स्थेमप्रसंगादिति निराह– दृष्टविपरीतमिति॥ अपुनरावृत्तिरन्यथासिद्धैवेति, अत्राह– यदा त्विति॥
15.9 Cf. *Abhiprāyaprakāśikā* (297.27–28): अनवयवेन निरवशेषेणेति यावत्।
15.9–15 Cf. *Bhāvaśuddhi* (298.8–13): कामोपबन्धाभावे ऽपि यथा वर्तमानापदेशादेव 'प्रतितिष्ठन्ति' इति रात्रिसत्रे प्रतिष्ठाफलकल्पना, तथात्रापि स्यादिति, अत्राह– अर्थवादादिति॥ यथा हि पुरुषापेक्षितदृष्टफलनिराकाङ्क्षे ऽध्ययने नार्थवादिकफलकल्पना, एवमत्रापि, सत्रे पुनरलब्धपुरुषसमीहितस्य विधेरस्त्याकाङ्क्षापि। न हि पिण्डपितृयज्ञादिवत्स्वर्गफलकल्पना; तथा सत्यर्थवादस्यात्यन्तपरोक्षवृत्तितापादादित्यर्थः।

15.5 नरशिरः॰] *em.*; तरसिनः॰ MS **15.6** न स] *em.*; र स MS • यत्तु] *em.*; यतु MS **15.8** ज्वालादे॰] *em.*; ज्वालादि॰ MS • स्थेम॰] *em.*; स्थेन॰ MS **15.8–9**सिद्धिर् 'न] *em.*; सिद्धिन्न MS **15.9** अनवयवेन कार्त्स्न्येन] *em.*; अनयवेन कात्स्नेन MS[pc]; अवनवयवेन काप्रत्स्नेन MS[ac] **15.10** रात्रिसत्रे] *em.*; रान्निसत्रे MS **15.11** तथेहापि] *em.*; तथाहपि MS • यथा] *em.*; यथे MS **15.13** ॰सत्रे] *em.*; ॰सते MS • विधेरस्त्वा॰] MS[pc]; रविधेरस्त्वा॰MS[ac] • न च] *em.*; न्न च MS[pc]; वन्न च MS[ac] **15.14** विध्येक॰] *em.*; विध्येत॰ MS **15.15** तावन्नश्यति] वन्नश्यति MS[pc]; यन्नश्यति MS[ac]

तत्प्रमाणान्तरापेक्षं प्रामाण्यमतिवर्तते।
मानान्तरस्याविषये विध्यर्थे तु प्रतिष्ठितम् ॥११॥
अनपेक्षं प्रमाणत्वमश्नुते कर्मवाक्यवत्।
परप्रवृत्त्यभावे ऽपि प्रामाण्यायैव तद्विधिः ॥१२॥

विधिमन्तरेण न कार्योपदेशप्रतीतिः। यथावस्थितं वस्तु, तद्विधस्यानुवादमात्रत्वं गम्यते। अनुवादश्च प्रमाणान्तरविषय इति तदपेक्षो भूतार्थो नार्थ उच्यत इति सापेक्षत्वादप्रामाण्यम्। विध्यर्थस्य तु प्रमाणान्तराविषयत्वात्तन्निष्ठमनपेक्षं प्रमाणं कर्मविधिवाक्यवत्। प्रमाणान्तराविषयश्च विध्यर्थः। न हि 'कुरु' इति शब्दज्ञानादन्यतः प्रतीतिः। एवं च सति तत्त्वप्रतिपत्तिपरे वाक्ये यद्यपि वाक्यार्थबोधात्पराचीना प्रवृत्तिर्विधिफलं नास्ति। प्रामाण्यायैव तु विधिनिष्ठत्वमेषितव्यमिति।

अथ मा भूच्छाब्दब्रह्मविज्ञानात्पराचीना प्रवृत्तिर्विधिफलम्, तत्प्रामाण्यापत्तेर्विधिरा[श्र]यितव्यः, तथा) हि तस्य कार्यरूपस्य मानान्तरापूर्वस्याभिधायकं वचनमनधिगतमर्थं बोधयदनपेक्षतया **प्रामाण्यमश्नुते** ।⟨f.134r⟩ भूतार्थं तु लोके मानान्तरापेक्षमर्थमवगमयदनुवादकं दृष्टमिति वैदिकमपि भूतार्थतया [तथा स्यात्। तस्मा]त्**प्रामाण्यायैव** विधिरज्ञातज्ञा[प]कतयैषितव्य इति)। चोदयति– **अन्ये पुनराहुः– विधिर्विनेति। न हि कुर्विति** शब्दविषयाज्ज्ञानाद-

16.1–3 Cf. *Bhāvaśuddhi* (299.10–13): कार्यरूपस्य मानान्तरापूर्वस्याभिधायकं वचनमनधिगतमर्थमवबोधयदनपेक्षतया प्रामाण्यमश्नुत इत्यर्थः। शाब्दज्ञानात्पराचीनप्रवृत्तेर्विधिफलस्याभावे कथं विधिः? तत्राह– परप्रवृत्तीति॥
16.4–5 Cf. *Bhāvaśuddhi* (298.19–20): लोके भूतार्थवचसामनुवादत्वदर्शनाद्वैदिकमपि वचस्तथा ऽस्त्विति।

16.1 भूच्छाब्दब्रह्मविज्ञानात्पराचीना प्रवृत्ति॰] *em.*; भूत शाब्दब्रह्मविज्ञानातरावृत्ति॰ MS • ॰फलम्] *em.*; ॰फल MS **16.2** ॰पत्तेर्विधि॰] *em.*; ॰पत्तविधि॰ MS **16.3** ॰मनधिगतमर्थं] *em.*; ॰मधिगतमर्थ MS **16.4** लोके] *em.*; लेकि MS • ॰मर्थमवगम॰] *em.*; ॰मर्थवगम॰ MS • ॰नुवादकं] *em.*; ॰नुवाधकं MS **16.5** ॰त्प्रामाण्यायैव] MS^{pc}; ॰त्प्रामाण्योयैव MS^{ac} **16.6** ॰विषयाज्ज्ञा॰] *em.*; ॰विषयाज्ञा॰ MS

न्यतः प्रतीतिः। त्रैकाल्यसंभेदयोग्यार्थविषयाणि हि माना[न्त](राणि न च कुर्वितीत्य)र्थः। तथा न खल्वयं वर्तमानः करोषीत्यविशेषप्रसङ्गात्, नातीतो ऽकार्षीरिति, नानागतः करिष्यसीति। न च घटादिशब्दार्थतुल्यः, तस्य (शब्दात् त्रैकाल्यसंभे)दानवगमे ऽप्यस्त्यभूद्भविष्यतीत्यादिपदान्तरसमभिव्याहारात्तत्संभिन्नस्य प्रतीतेः। कुर्विति तु तदभावात्। तस्माद्विध्यर्थे मानान्तरागोच[रे](तद्वचसो ऽनपेक्षम)प्रत्यूहं प्रामाण्यं सिध्यतीति॥ ⊗॥

अत्रोच्यते –

प्रमाणान्तरयातार्थभावः किमनुवादता।
उत भूतार्थता तत्र सिद्धार्थमपि यद्वचः॥ १३॥
न मानान्तरलब्धार्थतया तस्यावबोधकम्।
न तत्सापेक्षमेषा चेदभिप्रेतानुवादता॥ १४॥

कः पुनरनुवादः – अधिगमान्तरसंभिन्नार्थत्वम्, मानान्तरेणाधिगत इति प्रतिपादनम्, आहोस्विद्भूतार्थतामात्रम्? तत्र पूर्वस्मिन् कल्पे भवत्वधिगमान्तरसंभिन्नार्थं सापेक्षम्। यत्तु भूतार्थमपि न मानान्तराधिगत इति बोधयति न तदनुवादकम्, न सापेक्षम्, पूर्वाधिगमसंस्पर्शेन प्रतिपत्तेरभावात्।

16.7–12 Cf. *Bhāvaśuddhi* (300.11–17): त्रैकाल्यसंभेदयोग्यार्थविषयाणि हि मानान्तराणि न च कुर्वन्तीत्यर्थः (कुर्वन्ती (र्वित्य ?) त्यथः *edn*)। तथा न खल्वयं वर्तमानः; 'करोषि'('करोति' *edn*) इत्यविशेषप्रसङ्गात्, नातीतः; 'अकार्षीः'('कार्षीः' *edn*) इति; नानागतः; 'करिष्यसि' इति। न च घटादिशब्दार्थतुल्यः, तस्य शब्दात्त्रैकाल्यसंभेदानवगमे ऽपि अस्ति, अभूत्, भविष्यति, इत्यादिपदान्तरसमभिव्याहारात्तत्संभिन्नस्य (°रा(रे सति)तत्संभिन्नस्य *edn*) प्रतीतेरित्यर्थः। नियोगस्य मानान्तरपूर्वकतया तद्विशिष्टवचसो ऽनपेक्षत्वसिद्धौ फलितमाह – एवं चेति॥

16.7 त्रैकाल्य°] *em.*; तत्रैकल्य° MS **16.8** खल्वयं वर्तमानः] *em.*; खल्वयस्वर्त्तमाचः MS **16.9** °तीतो ऽकार्षीरिति] *em.*; °तीता अकार्षीनिति MS **16.10** °दानवगमे] MS^{pc}; °दोनवगमे MS^{ac} • °ष्यतीत्यादि°] *em.*; °ष्यतीत्युदि° MS **16.12** °भिव्याहारात्त°] *em.*; °भिहारात्त° MS **16.12** °प्रत्यूहं] *em.*; °प्रत्यहं MS

तत्रानुवादतां विकल्प्य प्रथमे कल्पे दूषणमाह– **अत्रोच्यते– प्रमाणान्तरयातार्थभाव** इति। ननु ध(र्मिण्यनुमानस्यापि) प्रत्यक्षाधिगमसंभिन्नविषयत्वमस्तीति तदपि प्रत्यक्षापेक्षतया न प्रमाणं स्यादि[त्या](शङ्क्या)ह– **मानान्तरे)णाधिगत इति प्रतिपादनम्।** सत्यं प्रत्यक्षाविषये धर्मिण्यनुमानं प्रवर्तते, न तु प्रत्यक्षाधिगमसंभिन्नो ऽस्य गोचरः। न हि तदनुभू[तं प्र](माणान्तराधिगतत्वेन) ⟨f.134^v⟩गोचरयत्यपि तु स्वरूपेण। तदिदमुक्तम्– **पूर्वाधिगमसंस्पर्शेन प्रतिपत्तेरभावादिति॥** ⊗॥

अथापरः कल्पः–

सापेक्षतायाः को हेतुः शुद्धा सिद्धार्थता यदि।
प्रमाणान्तरसंभेदस्तद्ध्यपेक्षणकारणम्॥ १५॥
अनृधीप्रभवे नास्ति भूतार्थे ऽपि स वैदिके।

भूतार्थमात्रं चेदनुवादता न सापेक्षत्वहेतुरस्ति। न भूतार्थतैव सापेक्षत्वहेतुः, भूतार्थयोरपि प्रत्यक्षानुमानयोरनपेक्षत्वात्। तस्माद्भूतार्थे ऽभूतार्थे वाधिगमान्तरसंस्पर्शः प्रमाणान्तरापेक्षाहेतुः, स्मृतौ दर्शनात्। सा ह्यधिगमान्तरसंभिन्नार्थेति तत्साधनमपेक्षते। एवं च पुरुषबुद्धिप्रभवं भूतार्थमभूतार्थं वा वचो भवति सापेक्षम्। ततो हि तत्संभिन्न एवार्थे प्रत्ययः, न त्वनपेक्षितपूर्वाधिगमः स्वातन्त्र्येणार्थे। यथोक्तम्– ‘अपि च पौरुषेयाद्वचनाद् ‘एवमयं पुरुषो वेद’ इति भवति प्रत्ययः, न

18.11–13 *Śābarabhāṣya 1.1.2* : अपि च पौरुषेयाद्वचनाद् ··· न ‘एवमयमर्थः’ इति।

17.2–4 Cf. *Bhāvaśuddhi* (301.7–10: धर्मिण्यनुमानस्यापि प्रत्यक्षाधिगमसंभिन्नविषयत्वमस्ति, इति, तदपि प्रत्यक्षापेक्षतया न प्रमाणं स्यादित्याशङ्क्याधिगमान्तरसम्भिन्नार्थत्वं प्रथयति– मानान्तरेणेति॥

17.2 °यातार्थ°] *em.*; °यानार्थ° MS **17.2-3** प्रत्यक्षाधिगमसंभिन्नविषयत्वमस्तीति तदपि] *em.*; प्रत्यक्षाधिगमसंभिन्नविषयत्वमस्तीति तदपि प्रत्यक्षाधिगमसंभिन्नविषयत्वमस्तीति तदपि MS **17.3** प्रत्यक्षा°] *em.*; प्रत्यसा° MS^{pc}; प्रत्यसाक्ष° MS^{ac} **17.4** °नुमानं] *em.*; °नुमान MS **17.7** °रभावादिति] *em.*; °रवादिति MS

'एवमर्थः' इति'। अपुरुषबुद्धिप्रभवत्वाद्वेदवचसि भूतार्थे ऽपि न सापेक्षत्वहेतुः, पुरुषसंबन्धकृतत्वात्पूर्वाधिगमसंभेदस्य।

अथापरः कल्पः। तत्राह– **सापेक्षतायाः को हेतु[रि](ति**। न भूतार्थं व)च इत्येव सापेक्षम्, प्रत्यक्षानुमयोरपि **भूतार्थयोः** सापेक्षत्वेनाप्रामाण्यप्रसङ्गात्। प्रत्युत्पन्नेन्द्रियलिङ्गलब्धजन्मतयान्योन्यनिरपे(क्षत्वादनुमा)नं भूतार्थमपि प्रमाणमेतदिति चेत्, हन्त भोः किमपराद्धं भवति वचनेनाप्यपौरुषेयेण? पौरुषेयं हि पुरुषबुद्धिसाधनं तमनपे(क्ष्य न स्वार्थविनिश्चयाय) कल्पत इति तदपेक्षतया भवत्वप्रमाणम्, भूतार्थं नद्यास्तीरे फलानि सन्तीति कार्यार्थं वा (जीर्णे भुञ्जीतारोग्यका)म इति। न त्वियं विधा भूतार्थस्याप्यपौरुषेयस्य संभविनी, वचसस्तस्य स्वत एव स्वार्थविनिश्चयफलत्वादिति॥ ⊗॥

स्यादेतत्– अपौरुषेये ऽपि भूतार्थे तद्विषये प्रमाणान्तरस्य संभवात्तदपेक्षा। तथा हि– संभवति प्रमाणान्तरे तद्विषये तद्विसंवादो ऽपि शङ्क्येत। तस्मात्तदभावाय तत्संवादो ऽपेक्षणीयः। असंभवति तु कार्ये ऽर्थे न कुतश्चिद्विसंवादाशङ्केति नापेक्ष्यमस्ति।

स्यादेतत्। पौरुषेय(त्वाभावे ऽपि भूतार्थपरत्वे)शब्दस्य मानान्तरगोचरत्वे

18.1 Cf. *Bhāvaśuddhi* (301.15: अथापरः कल्पः, तत्राह– सापेक्षताया इति॥
18.6–8 Cf. *Bhāvaśuddhi* (302.9–12: 'नदीतीरे फलानि' इति सिद्धार्थाज् 'जीर्णे भुञ्जीत आरोग्यकामः' इति कार्यार्थाद्वा मानान्तरसम्भिन्नार्थे धीर्भवति नापेक्षितः पूर्वाधिगमो यस्मिन् प्रत्यये स तथा, न त्वियं विधा भूतार्थस्याप्यपौरुषेयवचसो ऽस्तीत्यर्थः।
19.1–5 Cf. *Bhāvaśuddhi* (303.4-9): भूतार्थपरत्वे हि शब्दस्य मानान्तरगोचरत्वेन मानान्तरापेक्षा स्यादिति शङ्कते– स्यादेतदिति। एतद्व्यनक्ति– तथा हीति॥ मानान्तरसमानविषयतया (°समाना° *edn*) तद्विसंवादाशङ्का स्यात्, यस्मादाशङ्कानिराकरणाय संवादकं मानान्तरमपेक्षणीयमित्याह– तस्मादिति॥ आशङ्कितविसंवादितस्यानिश्चायकत्वादित्यर्थः॥ मानान्तरानर्हकार्यपरत्वस्वीकारे निरपेक्षप्रामाण्यसिद्धिरित्याह– असम्भवतीति॥

18.2 °मयोरपि भूतार्थयोः] *em.*; °मत्योरपि पूतार्थयोः MS **18.3** °निरपे°] MS^{pc}; °निरक्षेपे° MS^{ac} **18.4** भोः] *em.*; भाः MS • °राद्धं भवति] *conj.*; °राद्धनुभवति MS • वचनेनाप्य°] MS^{pc}; वचने वचनेनाप्य° MS^{ac} **18.5** °साधनं तमनपे°] *em.*; °साधनमनपे° MS **18.5-6**कल्पत इति तदपेक्षतया] *em.*; कल्पत इति। तदपिपेक्षत्यार्थविनिश्चयाथ कल्पत इति तदपेक्षतया MS **18.8** वचसस्तस्य] *em.*; वचसस्तस्य MS **19.1** °न्तरगोचरत्वे] *em.*; °न्तरार्हगोचरत्वे MS

समानविषयतया तद्विसंवादाशङ्का, ततो नार्थनिश्चय इति शङ्कानिराकरणाय संवादकं मानान्त(रमपेक्षणीयम्। तस्मात्)तदपेक्षं निश्चयं जनयञ्छब्दोऽप्रमाणं प्रसज्येतेति मानान्तरानर्हकार्यपरत्वमभ्युपेयते, तत्र च विसंवादाशङ्काभावादनपेक्षत[या]⟨f.135^{r}⟩ प्रामाण्यसिद्धिरित्यर्थः।

अत्रोच्यते–

न च संभवमात्रेण तदपेक्षावकल्पते ॥ १६ ॥
विशेषो न हि गम्येत सापेक्षत्वे तदा तयोः।

द्वयोरेकविषयसंभवे कुत एतत्– शब्दस्तदपेक्षः, न पुनस्तत्प्रमाणान्तरं शब्दापेक्षं स्यादिति? यदि शब्दः प्रमाणान्तराधिगतविषयो लोके दृष्ट इति, प्रमाणान्तरस्याविषये तर्हि नतरां प्रामाण्यं तस्य भवति। प्रमाणान्तरविषये हि प्रमाणान्तरसंभवादपि तावत्स्यात्, अन्यत्र तदभावाद् दुर्लभं तत्। अथ पौरुषेयत्वकारिता लोकवचसां प्रमाणान्तराधिगतार्थता, न शब्दसामर्थ्यकारिता। शब्दस्य प्रमाणान्तरासंभिन्न एवार्थे सामर्थ्यम्। न तर्हि प्रमाणान्तरसंभवाच्छब्द एव सापेक्षः, तदपि शब्दसंभवाच्छब्दापेक्षं स्यात्। किमतस्तस्य सापेक्षत्वेन? अप्रमाणं स्यात्। न शब्दस्य तत्रापेक्षा युज्यते। सति हि तस्य प्रामाण्ये तत्संवादविसंवादावपेक्ष्येयाताम्। अथ शब्दस्याप्रामाण्यान्न तच्छब्दापेक्षया प्रमाणम्। प्रमाणमेव, अनपेक्षत्वात्। शब्दस्याप्रामाण्यं कुतः? प्रमाणान्तरापेक्षत्वात्। तस्य च प्रामाण्यमनपेक्षत्वात्,

20.5 यदि शब्दः] A; अथ शब्दः *edn*

19.2 °विषयतया] *em.*; °विषयातया MS • °शङ्का, ततो नार्थ°] *em.*; °संकां ततो ऽर्थ° MS • °निराकरणा°] *em.*; °निराधारणा° MS 19.3 °कं मानान्त°] *em.*; °कस्मान्नान्त° MS • जनयन्न] *em.*; जनयन MS • शब्दो] *em.*; शब्द MS 19.4 प्रसज्येतेति] *em.*; प्रसज्येति MS 19.4-5विसंवादाशङ्का°] *em.*; विसम्वादाङ्का° MS^{pc}; विसम्वदाङ्का° MS^{ac}

अनपेक्षत्वं च शब्दस्याप्रामाण्यादितरेतराश्रयम्। प्रमाणे हि शब्दे तद्विषये संभवति तदपि सापेक्षं स्यात्तत्संभव इव शब्दः, विशेषाभावात्। अथ शब्दसंभवे ऽपि न तत्सापेक्षम्। तत्संभवे ऽपि न शब्दस्य सापेक्षता, विशेषाभावात्।

तदेतत्परिहरति– **न च** [संभवमात्रेणेति]। **द्वयोः** [शब्दमानान्तरयोरेकस्मिन् विषये] संभवे **कुत एतत्– श[ब्द](स्तदपेक्षः, न पुनस्त)न्मानान्तरं शब्दापेक्षम्।** अनुशयनिबन्धनमुद्घाट्य निराकरोति– **यदि शब्दः प्रमाणान्तराधिगतेति।** दर्शनकथंतां च संबोधरहितो हि [पु](रुषः कथमपि न श)क्यो ऽङ्गीकारयितुम्। यथालोकदर्शनं चेच्छब्दानां गतिः, हन्त यथा न भूतार्थं वचो लोके निरपेक्षं दृष्टमिति वैदिकमपि भूतार्थं (तथा स्यादिति। तदेवं) न मानान्तरागोचरार्थं लौकिकमुपलब्धमिति वैदिकमपि सं[वा](दकमपेक्षेत। प्रमाण)मपि भवतु, संवादसंभवात्। न पुनर्मानान्तरागोचरार्थं तत्खलु प्रतिपादकमेव स्यात्, कुतो ऽस्य सत्यता कुतस्तरां च प्रामाण्यमित्याह– **प्र[मा](णान्तरस्याविषय इ)ति।** प्रमाणशब्दो ऽनुसक्तः समीचीनतां लक्षयति। यदि तु दर्शनकथंतामास्थायोच्येत पौरुषेयत्वकारिता सापेक्षता, न तु शब्दस[म](र्थताकारिता

20.5–6 Cf. *Bhāvaśuddhi* (303.16–19): यथालोकदर्शनं चेच्छब्दानां गतिः, (तर्हि) लोके भूतार्थं सापेक्षं च वचो दृष्टम्, इति वैदिकमपि तथा स्यादिति। मानान्तरानर्हकार्यार्थम्, निरपेक्षं च न स्यादिति दूषयति– प्रमाणान्तरस्येति॥
20.11–19 Cf. *Bhāvaśuddhi* (303.21–304.9): लौकिकवचसां सापेक्षता पौरुषेयत्वकारिता, न स्वसामर्थ्यकारिता, येन मानान्तरानधिगतकार्यप्रतिपादकं वाक्यं न स्यादिति चोदयति– अथेति॥ स एव लौकिकग्रन्थेनाह– शब्दस्येति॥ स्वभावत इति शेषः। दूषयति– न, तर्हीति॥ अर्थमात्रे शब्दसामर्थ्यम्, न मानान्तरसंभिन्न इति स्वीकारे मानान्तरशब्दयोरेकविषयत्वे शब्द एव मानान्तरापेक्षः, न मानान्तरमपि शब्दापेक्षं स्यादित्यर्थः। तथापि

20.1 तदेतत्परि॰] *em.*; तदेतदत्परि॰ MS **20.4** ॰कथंतां च] *em.*; ॰कथन्नाव MS **20.5** यथालोक॰] *em.*; यथायथालोक॰ MS • चेच्छब्दानां गतिः] *em.*; चेत शब्दानां यतिः MS • भूतार्थं वचो] *em.*; भूतार्थमुचो MS **20.6** न मानान्तरागोचरार्थं] *em.*; न मानान्तरयोरेकस्मिन्विषयेमंभवे कुत एतत शब्दस्तदपेक्षो। यावत्तदेव (या *ow.*) न मानान्तरागोचरार्थं MS **20.7** भवतु] *em.*; भवितु MS **20.8** ॰संभवात्। न पुनर्माना॰] *em.*; ॰सम्भान्नर्माना॰ MS^{pc}; ॰संभावान्नर्माना॰ MS^{ac} • ॰गोचरार्थं] *em.*; ॰गोचरार्थ MS • तत्खलु] MS^{pc}; तत्सत्खलु MS^{ac} • प्रतिपाद॰] *em.*; प्रतीपाद॰ MS **20.10** समीचीनतां] *em.*; समीचीनंता MS **20.11** सापेक्षता] MS^{pc}; सापेक्षाता MS^{ac}

लौकिकवच)साम्, येन मानान्तरानधिगतकार्यविषयमप्रतिपादकं वैदिकं वचः स्यादित्याह– **अथ पौरुषेयत्वेति**। स एवैकग्रन्थेनाह– **शब्दस्य** [प्र](**माणान्तरासंभिन्न**) ⟨f.135^{v}⟩ **एवार्थे सामर्थ्यं** स्वभावत इति। दूषयति– **दर्शनं** चेन्नाद्रियते मानान्तरसंभवमात्राच्च सापेक्षत्वमातिष्ठते, **न तर्हि प्रमाणान्तरसंभवाच्छब्द एव** (**सापेक्षस्तदपि** मा)नान्तरं **शब्दसंभवाच्छब्दापेक्षं स्यात्**। **किमतो भवेत्तस्य सापेक्षत्वेनेति**। प्रमाणं व्यपेक्षते नेति प्रमाणं सापेक्षम्।

अन्धस्येवान्धलग्नस्य वि[नि](पातः पदे पदे।

इति) हि लौकिकानामाभाणकः। सापेक्षताहेतुना शब्दस्याप्रामाण्यम्। ननु प्रमाणान्तरं प्रमाणयतो दुरुत्तरमितरेतराश्रयमापततीत्याह– [अ](**नपेक्षत्वमिति सुग**)**मम्**॥ ⊗॥

अपि च

प्रत्यक्षानुमयोरेवं वृत्तेरन्योन्यगोचरे॥ १७॥
परस्परव्यपेक्षत्वमविशेषं प्रसज्यते।
स्यादक्षमपि सापेक्षं यदक्षान्तरगोचरे॥ १८॥

संभवमात्रेण सापेक्षत्वे प्रत्यक्षानुमयोरेकस्मिन् विषये संभवादन्योन्यापेक्षत्वादप्रामाण्यप्रसङ्गः। तथा सत्तागुणत्वद्रव्येष्वनेकेन्द्रियग्राह्येष्विन्द्रियान्तराणामिन्द्रियान्तरसापेक्षत्वप्रसङ्गः। अ-

---

20.18 A saying also quoted in *Bhāmatī* ad *adhyāsabhāṣya*:
अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे।

शब्दस्य सापेक्षत्वं तदवस्थमेवेत्याशयेन पृच्छति– किमत इति॥ इदं ततो भवतीत्याह– तस्येति॥ प्रमाणं ह्यपेक्षते, नाप्रमाणम्; 'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे' इति न्यायादित्याह– सति हीति॥

20.12-13वचः स्यादि॰] *em.*; वचस्सादि॰ MS **20.13** पौरुषेयत्वेति] *em.*; पौरुषेयत्वेते MS • ॰ग्रन्थेनाह] *em.*; ॰ग्रंहेथेनाह MS **20.14** सामर्थ्यं स्वभावत] *conj.*; सामर्थ्यमजानत MS^{pc}; प्रसामर्थ्यमजानत MS^{ac} **20.15** चेन्नाद्रियते] *em.*; चेन्नाद्रियसे MS^{pc}; न्नाद्रियसे MS^{ac} • ॰संभवमात्राच्च] MS^{pc}; ॰संभवंमात्राच्च MS^{ac} **20.17** भवेत्तस्य] *em.*; भवन्तस्य MS • सापेक्षम्] *em.*; मापेक्षं MS **20.19** ॰हेतुना शब्दस्याप्रा॰] *em.*; ॰हेतुरु शब्दप्रा॰ MS **20.20** दुरुत्तर॰] *em.*; दुत्तर॰ MS • ॰श्रयमापतती॰] *em.*; ॰श्रेयमापती॰ MS

थ शब्दस्यैव प्रमाणान्तरसंभवे सापेक्षत्वम्, विशेषहेतुर्वाच्यः। प्रमाणान्तराधिगतार्थत्वदर्शनादिति चेत्, उक्तमत्र– यदि शब्दमात्रधर्मो ऽयमसंभवादेव तद्विषये प्रत्यक्षादेर्बुद्धादिवाक्यवदप्रामाण्यं प्राप्नोति, संभवे त्विन्द्रियविषये प्रत्ययितपुरुषवचोवद्युज्यते प्रामाण्यम्। यथोक्तम्– 'तच्चेत्प्रत्ययितात्पुरुषादिन्द्रियविषयं वा, अवितथमेव तत्' इति। अथ पौरुषेयधर्मो ऽयम्, न संभवत्प्रमाणान्तरविषयस्याप्यपौरुषेयस्य शब्दस्य सापेक्षत्वम्। अपि च प्रत्यक्षाधिगतविषयं किंचिदनुमानमिति न सामान्यतोदृष्टस्य तथा प्रत्यक्षसापेक्षता, यथा चागमपूर्वकं षड्जादिविवेकविषयं प्रत्यक्षमिति न सर्वं प्रत्यक्षं तथा, एवं पुरुषवचसां प्रमाणान्तराधिगतविषयत्वदर्शने ऽपि नापौरुषेयस्य तथाभावो भूतार्थस्यापि। अन्यथा सुतरां प्रमाणान्तरासंभवादप्रामाण्यं स्यादित्युक्तम्।

अपि मानान्तरसंवादासंभवात्सापेक्षत्वेनाप्रामाण्यमिच्छतः–

प्रत्यक्षानुमयोरेवं वृत्तेरन्योन्यगोचरे।
परस्परव्य[पे](क्षत्वमविशेषं प्रस)ज्यते॥

न केवलमात्मादौ प्रमेये प्रत्यक्षानुमानयोः प्रत्यक्षभेदानामपि च केषांचिदित्याह–

स्यादक्षमपि सापेक्षं यद[क्षा](न्तरगोचरे।

21.12–13 *Śābarabhāṣya 1.1.2:* तच्चेत्प्रत्ययितात् ··· अवितथमेव तत्।

21.1–3 Cf. *Bhāvaśuddhi* (305.11–12): मानान्तरसंवादासंभवात्सापेक्षत्वेनाप्रामाण्यमिच्छतो ऽतिप्रसङ्गमाह– अपि चेति॥
21.4–6 Cf. *Bhāvaśuddhi* (305.14–16): न केवलमात्मादौ प्रमेये प्रत्यक्षानुमानयोः, प्रत्यक्षभेदानामपि च केषाञ्चिद्रीत्येत्याह– स्यादक्षमिति॥

21.1 °संवादासंभवा°] *em.*; °संभचा° MS[pc]; °संभंचा° MS[ac] **21.2** प्रत्यक्षानुमयोरेवं वृत्ते°] *em.*; प्रत्यानुमत्यो एवम्वृत्ते° MS **21.3** परस्परव्य°] *em.*; परस्पव्य° MS

अक्षान्तरगो)चरमिति क्वचित्पाठः, तदा प्रविभागो मतो द्रष्टव्यः। निराकृतमपि प्रपञ्चार्थमधिकं च किंचिद्वक्तुं पुनराशङ्कते– [प्रमा](णान्तरादधिगतार्थ)त्वदर्शनादिति। उक्तमत्रोत्तरं सप्रपञ्चं स्मारयति– उ[क्तमत्रेति। अधिकं चाह– **प्रत्यक्षेति**]। तस्मात्पौरुषेयत्वप्रयुक्त(f.136r)व्याप्त्युपजीवकतया न भूतार्थवचनत्वं प्रयोजकं सापे[क्षता]या इत्य[र्थः। अनादृत]प्रयोजकाप्रयोजकं तु यथादर्श[नं भू](तार्थमप्रमाणमाह– **अन्य**)**था** **सुतरामिति**॥ ⊗॥

अपि च

असंभवादौषधादिनियोगस्यानपेक्षता।
लौकिकस्य प्रसज्येत नरप्रत्ययपूर्वकः॥ १९॥
विनियोगस्तत्र तेन व्यपेक्षा वैदिके पुनः।
अबुद्धिपूर्वकः सो ऽपीत्यनपेक्षत्वमुच्यते॥ २०॥

यदि कार्ये नियोगार्थे प्रमाणान्तरस्यासंभवाद्वेदवचसां तन्निष्ठानामनपेक्षत्वम्, 'ज्वरवियोगकाम इदमौषधं पिबेत्', 'स्वर्गकामः सिकता भक्षयेत्' इति लोकवचांस्यपि कार्यनिष्ठान्यनपेक्षाणि प्रामाण्यमश्नुवीरन्। अथ यस्तत्र साध्यसाधनभावः स पुरुषविवक्षापूर्वकः, तेन तत्र सापेक्षता, वेदे तु साध्यसाधनभावो ऽपि न पुरुषविवक्षापूर्वकः इत्यनपेक्षत्वम्। यो वा विषयनियोज्यनियोगानां संबन्धः, स पुरुषबुद्धिविरचितो लोकवाक्ये। वेदे तु केवलं नियोगो ऽपुरुषबुद्धिपूर्वकः सो ऽपीत्यनपेक्षत्वम्।

21.7–9 Cf. *Bhāvaśuddhi* (306.4-5): नतरां प्रामाण्यमित्येतत्प्रपञ्चनार्थमधिकं च किंचिद् वक्तुं पुनराशङ्कते– प्रमाणान्तरेति। उक्तमुत्तरं स्मारयति– उक्तमत्रेति॥
21.10–12 Cf. *Bhāvaśuddhi* (307.12–15): पौरुषेयत्वं वचसः सापेक्षत्वप्रयोजकमित्यनङ्गीकारे बाधमभिधत्ते– अन्यथेति॥ भूतार्थत्वं न प्रयोजकं सापेक्षत्वस्येत्युक्तम्।

21.7 प्रविभागो मतो] *conj.*; पविभीणः यता MS **21.8** °मधिकं] *em.*; °मधिक MS **21.9** सप्रपञ्चं] *em.*; सप्रपञ्च MS **21.12** सुतरामिति] *em.*; सतवामिति MS

उक्तं भूतार्थत्वमप्रयोजकं सापेक्षतायाः, निरपेक्षताया अपि कार्यार्थत्वं न प्रयोजकमतिप्रसङ्गादित्या(ह- **अपि च**-

असम्भवा)दौषधादिनियोगस्यानपेक्षता।
लौकिकस्य प्रसज्येत।

सत्यस्यासत्यस्य वा। शंकते-

नरप्रत्ययपूर्वकः॥
विनियोगस्तत्र तेन व्य[पे](क्षा वैदिके पुनः।
अबु)द्धिपूर्वकः सो ऽपीत्यनपेक्षत्वमुच्यते॥

विनियोगः साध्यसाधनभावो विषयनियोज्यनियोगानामन्वयो वाभिधीयते॥ ⊗॥

उच्यते-

नृबुद्धिपूर्वतैवेत्थं हन्तापेक्षानिबन्धनम्।
मानान्तरासंभवे ऽपि तत्र सापेक्षता यतः॥ २१॥

असंभवत्प्रमाणान्तरकार्यनिष्ठे ऽपि चेद्वाक्ये पुरुषसंबन्धात्सापेक्षत्वम्, पुरुषबुद्धिपूर्वतैव तर्हि प्रमाणान्तरव्यपेक्षाकारणमन्व-

22.1–2 Cf. *Bhāvaśuddhi* (307.15–16): भूतार्थत्वं न प्रयोजकं सापेक्षत्वस्येत्युक्तम्। कार्यार्थत्वमपि न निरपेक्षत्वप्रयोजकम्; अतिप्रसङ्गादित्याह- अपि चेति॥

Cf. *Abhiprāyaprakāśikā* (307.last-308.17): एवं तावद्भूतार्थत्वं सापेक्षत्वप्रयोजकं न भवतीत्युक्तम्, इदानीं कार्यार्थत्वमपि निरपेक्षत्वप्रयोजकं न भवेदिति; तथा सत्यतिप्रसङ्गः स्यादित्याह- अपि चेति॥

22.5–6 Cf. *Bhāvaśuddhi* (307.18–19): लौकिकस्य=सत्यस्य, असत्यस्य वेति शेषः। शङ्कते- नरप्रत्ययेति॥

Cf. *Abhiprāyaprakāśikā* (308.18–19): शङ्कते पूर्ववादी- नरप्रत्ययेति॥ विनियोगः साध्यसाधनसम्बन्धः।

22.9 Cf. *Bhāvaśuddhi* (307.19–20): विनियोगः=साध्यसाधनभावः, विषयनियोज्यनियोगानामन्वयो वाभिधीयते।

Cf. *Abhiprāyaprakāśikā* (308.18): विनियोगः=साध्यसाधनभावः, तन्निष्ठत्वाद्वाक्यस्य।

22.1 कार्यार्थत्वं] *em.*; कार्थत्वं MS **22.3** °नियोगस्या°] *em.*; °नियोगास्या° MS **22.4** प्रसज्येत] *em.*; प्रसज्यते MS **22.9** विनियोगः साध्यसाधनभावो] *em.*; विनियोगस्य साधने भावो MS

यव्यतिरेकाभ्याम्। तद्भावे लोके सापेक्षत्वात्, तदभावे वेदे निरपेक्षत्वात्। न विषये प्रमाणान्तरसंभवः, तदभावे ऽपि लोकनियोगे सापेक्षत्वदर्शनात्।

त[स्मि](न् चोद्यं निराक)रोति– **नृबुद्धिपूर्वतैवेत्थमिति**। नेदं तिरोहितमिवास्ति किञ्चन॥ ⊗॥

अथ मतम्–

वेदे नियोगनिष्ठत्वं विनियोगप्रधानता।
लोके वेदे न व्यपेक्षा तल्लोके च व्यपेक्षणम्॥ २२॥

नियोगपर्यवसितं वैदिकं वचः, स च प्रमाणान्तरस्यागोचर इत्यनपेक्षत्वम्। साध्यसाधनभावनिष्ठं तु लौकिकं वचः, स प्रमाणान्तरविषय इति सापेक्षता।

न शब्दमात्रसामर्थ्यप्रविभागो ऽयमीदृशः।
लोकावगतसामर्थ्यः शब्दो वेदे ऽपि बोधकः॥ २३॥

न तावदयं शब्दमात्रस्यानपेक्षितपुरुषसंबन्धासंबन्धस्य शक्तिप्रविभागः– यदेकत्र नियोगः शब्दार्थः। अन्यत्र विनियोगः, यथा गोशब्दस्य सास्नादिमान्, अश्वशब्दस्य केसरादिमान्। यतो लोकाधिगतसामर्थ्यो वेदे ऽपि प्रतिपादकः। लोके चेद्विनियोगः शब्दार्थः, तत्रैवास्य सामर्थ्यमधिगतम्, न नियोगे। तत्र वेदे ऽपि विनियोग एव प्रमाणार्थः स्यात्।

चोदयति– **वेदे नियोगनिष्ठत्वमिति**। मानान्तरयो[ग्यं सा](**ध्यसाधनभाव-**

23.1 Cf. *Bhāvaśuddhi* (308.13): एतन्निराकरोति– नृबुद्धीति॥

23.1 °वेत्थमिति] त्थ *ow.* MS • नेदं] *em.*; नेद MS **24.1** °निष्ठत्वमिति] *em.*; °तिष्ठत्वमिति MS

नि)ष्ठं हि लौकिकं वचः। तत्क्वचिद्यथाप्रमाणं प्रवर्तते, यथा ज्वरवियोगकाम इदमौषधं पिबेदिति। क्वचित्पुनः क्वचित्प्रमित(साध्यसाधनभावम)न्यत्रारोप्यते, यथा स्वर्गकामः सिकता भक्षयेदिति। तस्मात्सकलमेव लौकिकं वचो विनियोगनिष्ठम्। तथा च नासंभवत्प्रमा(णा)(न्तरगोचरमिति) ⟨f.136^{v}⟩ युज्यते सापेक्षत्वम्। न त्वेवं वैदिकं वचः, तस्य मानान्तरापूर्वनियोगरूपकार्याभिधायित्वादित्यर्थः॥ ⊗॥

अथ मानान्तराज्ज्ञात्वा प्रयुङ्क्ते पुरुषो वचः।
अर्थे तत्तेन तन्निष्ठमितरत्त्वन्यथा स्थितम्॥ २४॥

अथ मतम्– नैष शब्दमात्रस्य सामर्थ्यविभागः। शब्दस्य हि निजं सामर्थ्यं कार्यनिष्ठतैव। तथा हि– कार्यो नियोगार्थः। कार्याय चान्यस्यान्वयः प्रतीयते। न तु कार्यस्यान्यार्थो ऽन्वयः। तस्मात्कार्यत्वान्नियोगस्य तत्प्रधानता। पुरुषस्तु प्रमाणान्तरादवगम्यार्थं तत्र प्रयुङ्क्ते वचनम्। न च नियोगः प्रमाणान्तरगोचरः। तस्मान्न तत्र प्रयोक्तुमर्हति। विनियोगस्य तु तथाभावात्तत्र युज्यते प्रयोगः। तस्माद्विनियोगप्रधानं पुरुषवचः। वैदिकं तु सामर्थ्येन कार्यत्वान्नियोगस्य तत्प्रधानमिति।

पुनश्चोदयति– **अथ मानान्तराज्ज्ञात्वे**[ति](। पुरुषवचो मानान्त)रगोचर-

---

24.2–6 Cf. *Bhāvaśuddhi* (310.8–12): लौकिकं वचः क्वचिद्यथाप्रमाणं प्रवर्तते– यथा 'ज्वरवियोगकाम इदमौषधं पिबेत्' इति, क्वचित्पुनः प्रमितसाध्यसाधनभावं प्रवर्तते, यथा 'स्वर्गकामः सिकतां भक्षयेत्' इति। तस्मात्सकलमेवलौकिकं वचो विनियोगनिष्ठम्, तथा नासम्भवत्प्रमाणान्तरगोचरमिति युज्यते सापेक्षत्वमित्यर्थः॥
25.1–2 Cf. *Bhāvaśuddhi* (311.11–12): द्वितीयकल्पमुत्थापयति– अथेति॥ तत्=पुरुषवचः, तेन=पौरुषेयत्वेन, तत्परम्=विनियोगपरम्।

24.2 ज्वरवियोग॰] *em.*; ज्वरनियोग॰ MS **24.3** पिबेदिति] *em.*; बिपेदिति MS **24.4** ॰कामः सिकता] *em.*; ॰कामस्मिकता MS • लौकिकं] *em.*; लौदिकं MS **24.5** विनियोग॰] *em.*; नियोग॰ MS **24.6** सापेक्षत्वम्] *em.*; सापेक्षं MS • ॰नियोग॰] *em.*; ॰नियोगा॰ MS **25.1** मानान्तराज्ज्ञात्वे॰] *em.*; मानान्तराज्ञात्वे॰ MS

त्वेन तन्निष्ठं विनियोगनिष्ठम्। अत्रेदमाकूतम्। यद्यपि लोकाधीनावधारणः शब्दार्थसम्बन्धस्तथापि लोके गामानयेत्यादिवा(क्यश्रवणसमन)न्तरं स्वतन्त्रचेतनप्रवृत्तिमुपलभ्य बालो व्युत्पित्सुः स्वात्मनि विदितप्रवृत्तिर्हि हेतुभावं कार्यावबोधमनुमिनोति। प्रवर्तमानस्य [प्र](वृत्तिहेतुत्वेना)न्येष्वसन्निहितेष्वनुपजातः शब्दश्रवणसमनन्तरमधिगतजन्मात्मा न शब्दश्रवणकारणतामनुमापयति। तस्माच्छब्दानां [सा](क्षान्नियोगनिष्ठा)नां पारम्पर्येण वा कार्यार्थं स्वार्थं समानं सर्वेषामेव कार्यपरत्वम्। तच्च कार्यत्वं क्रियाया एव स्वतो दुःखरूपायाः प्रति हिताहितप्रा[प्तिप](रिहारसाधनतया) विहितम्। तथापि 'अग्निहोत्रं जुहुयात्' इत्यादिषु वेदवाक्येषु न साध्यस्वर्गविशिष्टेन नियोज्येन क्रिया क्षणभङ्गिनी शक्या कालान्तरभा(विफलहेतुरिति) न कार्यतया प्रतिपत्तुम्, अन्वयानर्हत्वात्। तदर्हतया तदतिरिक्तं च कालान्तरावस्थायि स्वर्गादि फलोदयानुकूलं भावार्थभेदप्र(तिपादकं प्र)⟨f.137ʳ⟩तिपत्तव्यम्। तच्च

25.2–5 Cf. *Nyāyakaṇikā* (Stern 2004): इदमाकूतम्। कार्याभिधायिता तावल्लिङादीनामवगता आचार्यवाक्येषु माणवक समिधमाहरेत्यादिषु। तथा हि। एतद्वाक्यश्रवणानन्तरं प्रवर्तमानं समिदाहरणे माणवकमुपलभ्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति।

25.8–13 Cf. *Nyāyakaṇikā* (306.5-8, 11–14): तच्च कार्य्यमन्वितमभिधेयमिति स्थितौ सत्यां 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादिषु वाक्येषु षष्ठाद्यराद्धान्तानुसारेण स्वर्गकामपदेन नियोज्यतया स्वर्गकामः समर्पणीय इति स्थितम्। … न च क्रिया क्षणभङ्गिनी कालान्तरभाविफलहेतुरिति न कार्यतया नियोज्येन सहान्वेति। यत्कालान्तरस्थायि कार्यं तदेव तेन सहान्वयं गन्तुमर्हतीति क्रियातिरेकि मानान्तरावेद्यमेव लिङादयः कार्यमभिदधतीति।

25.11–12 Cf. *Vākyārthamātṛkā II.23cd:* कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते।

25.13–15 Cf. *Vākyārthamātṛkā II.25–26:*

क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत्। अतो मानान्तरापूर्वमपूर्वमभिधीयते॥
कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ। नियोग इति मीमांसानिष्णातैरभिधीयते॥

25.13–15 Cf. *Nyāyakaṇikā* (306.14-307.2): तच्च मानान्तरापूर्वतया अपूर्वमिति च कार्यतयावगम्यमानमात्मनि पुरुषं नियुञ्जानं नियोग इति व्यपदिश्यते।

25.2 यद्यपि] *em.*; यद्यति MS **25.3** °न्तरं] *em.*; °न्तरा MS **25.4** व्युत्पित्सुः] *em.*; व्युत्पत्तित्सुः MS **25.8** समानं] *em.*; समान MS^{pc}; समाना MS^{ac} **25.9** °रूपायाः] *em.*; °रूपाया MS **25.9-10**तथापि 'अग्नि°] MS^{pc}; तथाप्यिग्नि° MS **25.10** °होत्रं जुहुया°] °होत्र जुहूया° MS • साध्यस्वर्ग°] *em.*; साध्यस्व° MS **25.11** न] *em.*; ना MS^{pc}; त्वा MS^{ac} **25.12** °रिक्तं च] *conj.*; °रिक्तं MS • कालान्तरा°] MS^{pc}; कालान्तदा° MS^{ac} **25.13** फलोदयानुकूलं] *conj.*; फला --नुकूलं MS

मानान्तरापूर्वतयापूर्वमिति वक्ष्यते, प्रतीप्सिततया कार्यमिति च, स्वज्ञानेन स्वात्मनि पुरुषं नियुञ्जानं नियोग इ[ति](च। एवं त्रयाणामे)कार्थत्वमव्याप्यमित्येकस्मिन्नभिधातव्ये ऽपूर्वकं विधीयेत। क्रिया चाकार्यमिति विशति– 'अनन्यलभ्यः शब्दार्थः' इति। तत्र यस्यानन्यल[भ्यो] (ऽर्थस्तदेव का)र्यम्, अपूर्वं च तथा। तेनैतच्च तदुपधानं च कृतिरन्यतः कुतःकुतश्चिदपि लभ्यते। यद्यपि कृतिस्वरूपं धात्वर्थाल्लभ्यते तथाप्य[पू](र्वं नाभिधीयते), तस्य मानान्तरावेद्यतयार्थलभ्यकृत्युपधानप्रतीतेरनुपपत्तेः। धात्वर्थस्य तु मानान्तरेण तदुपहितस्यावगतेरन्यलभ्यतया (वाचकत्वाभिमाना)दपूर्वाभिधाननियमसिद्धिरुच्यते, तदभिधायिनो ऽपि च शक्तिलक्षणया क्रियाकार्यत्वपरत्वात्, क्रियाकर्तव्यतानान्त(रीयकत्वात्क्रियाक)र्तव्यताया असाधितायाः क्रियायास्तत्साधनत्वानुपपत्तेः। क्रियाकर्तव्यतायास्तु लोके ऽपूर्वकर्तव्यतानान्तरीयकत्वा(नुपलब्धेर्वाचक)त्वादपूर्वस्य वैपरीत्यानुपपत्तेरत्यन्तप्रयोगप्राचुर्याच्च लाक्षणिकत्वानभिमानाल्लौकिकप्रयोगोपपत्तिः। तस्मादौ(त्सर्गिकं)⟨f.137v⟩ नियोगपरत्वं वचसामनयोदितम्। तावदेके तु मानान्तराधीनवृत्तीनामेषां न नियोगपरता सम्भवतीति लक्षणया विनियोगपरतामालम्बन्ते। ते(षां ज्व-

---

25.17 Source Unknown: अनन्यलभ्यः शब्दार्थः।

25.21–26 Cf. *Nyāyakaṇikā* (312.6–313.4): लक्षणयापि च कर्तव्यतायां क्रियायां लौकिकस्य लिङादिप्रयोगस्योपपत्तेरपूर्वकर्तव्यतानान्तरीयकत्वात्क्रियाकर्तव्यताया असाधितायाः क्रियायास्तत्साधनत्वानुपपत्तेर्लौकिकप्रयोगाविरोधात्। अपूर्वकर्तव्यतायास्तु लौकिकक्रियाकर्तव्यतानान्तरीयकत्वानुपलब्धेर्वैपरीत्यानुपपत्तेरत्यन्तप्रयोगाभ्यासाच्च लाक्षणिकस्यापि वाचकत्वाभिमानादपूर्वाभिधाननियमसिद्धिरिति।

25.14 वक्ष्यते, प्रतीप्सित॰] *em.*; वक्षतें प्रतिप्सित॰ MS **25.15** नियुञ्जानं] MS[pc]; निजुयुंजानं MS[ac] **25.17** तत्र यस्यानन्य॰] *conj.*; ‐‐यस्यानुन्य॰ MS **25.18** तेनैतच्च] *em.*; तनितच्च MS[pc]; तनितच्चाच्च MS[ac] • कृतिरन्यतः कुतःकुतश्चिदपि] *em.*; क्षतिरन्यत कुतकुतश्चिदपि MS **25.19** ॰र्थाल्लभ्यते] *em.*; ॰र्थालूभ्यते MS • तथाप्य॰] MS[pc]; थतथाप्य॰ **25.20** धात्वर्थस्य तु] *em.*; धात्वर्थ तु MS **25.22** ॰द्धिरुच्यते] *em.*; ॰द्धिर्लिउच्यते MS • शक्तिलक्षणया] *conj.*; माकेलक्षणया MS **25.23** असाधितायाः] *em.*; असाधितयोः MS **25.24** ॰कर्तव्यतायास्तु] *em.*; ॰कर्तव्ययास्तु MS **25.24–25** ॰नान्तरीयकत्वा॰] *em.*; ॰नान्तरीयकंयकत्वा॰ MS • वैपरीत्या॰] वै *ow.* MS **25.25** वैपरीत्या॰] वै *ow.* MS **25.27** ॰योदितम्। तावदेके] *conj.*; ॰योदितवेदेके MS[pc]; ॰योदितवेदेवके MS[ac] **25.28** ॰परता] *em.*; ॰परतां MS

रवियोगका)म इदमौषधं पिबेदित्यादीनां वचसां विनियोगनिष्ठानामुचितं मानान्तरापेक्षत्वम्, असदृशं तु वैदिकानां नियोगनिष्ठानामिति॥ ⊗॥

अत्रोच्यते–

मानान्तरव्यपेक्षत्वात्संभव्यन्यप्रमाणकः।
हन्तास्य गोचरो नास्मादपेक्षास्य प्रमान्तरे॥ २५॥

यदि पुरुषो ऽधिगते विषये वचः प्रयुङ्क्त इति विनियोगविषयता तस्य कल्प्यते प्रमाणान्तरापेक्षत्वात्, तर्हि संभवत्प्रमाणान्तरो ऽस्य विषयः। न तु संभवत्प्रमाणान्तरविषयत्वात्पुरुषवचो ऽपि सापेक्षम्, सापेक्षत्वनिमित्तत्वात्तद्विधस्य विषयस्य।

त(देतन्निराकर्तुमु)पक्रमते– **अत्रोच्यते**। अथ ज्वरवियोगकाम इदमौषधं पिबेदित्यादिना नु नियोगपरतौत्सर्गिकी। कस्मात्? उत्सर्गस्य पुंवाक्येन [मा]-(नान्तरापेक्षत्वात्। नायं) संभव्यन्यप्रमाणकः, गोचरतयापवादादिति चेत्–

मानान्तरव्यपेक्षत्वात्संभव्यन्यप्रमाणकः।
हन्तास्य गोचरो नास्मादपेक्षास्य प्रमा(न्तरे॥

स्यादेत)त्, कुतस्त्यः पुनरयमपूर्वकार्याभिधाननियमो लिङादीनाम्? ननु क्रियाकार्याभिधानमपि? अनेकार्थत्वस्यान्याय्यत्वादिति चेत्, तदे(व कुतः? अनेकश)क्तिकल्पनागौरवादिति चेत्, नन्वपूर्वाण्यपि नैकविधप्रधानाङ्गवर्ती-

26.7–10 Cf. *Nyāyakaṇikā* (313.5-9): नन्वनेकार्थत्वमन्याय्यमित्येतदेव कुतः? अनेकशक्तिकल्पनागौरवादिति चेत्? नन्वपूर्वमपि नैकविधप्रधानाङ्गवर्ति नानेति कथमैकार्थ्यं लिङः? कृतिव्याप्यतायाः प्रवृत्तिनिमित्तस्य सर्वत्राविशेषात् …।

25.29 °म इदमौ°] *em.*; °स इदमौ° MS • °दीनां वचसां] *em.*; °दिनोम्वचसां MS • °मुचितं] *em.*; °मुचित MS **25.30** असदृशं] *em.*; असंदृशं MS **26.2** उत्सर्गस्य] *conj.*; उत्सग्गास्य MS **26.3** °प्रमाणकः] *em.*; °प्रमाणकः MS • °पवादादिति चेत्] *em.*; °पवादादिति षत् MS[pc]; °पवावदादिति षत् MS[ac] **26.4** संभव्यन्य°] *em.*; संभव्य° MS **26.6** °त्, कुतस्त्यः] *em.*; °त्कुतस्त्यं MS • लिङादीनाम्] *em.*; लिङ्गादीनां MS **26.8** नन्वपूर्वाण्यपि] *em.*; तच्च पूर्वाण्यपि MS **26.8–9** °वर्तीनि नानेति] MS[pc]; °वर्तीनि नान्वेति MS[ac]

नि नानेति कथमैकार्थ्यं लिङः? कृतिव्याप्यतायाः [प्र](वृत्तिनिमित्तस्य सर्वत्रा)विशेषात्। यथैव हि ⟨फलं⟩ धात्वर्थो †दुःखतया चेतनो† व्यापारं प्रति नोद्देश्यमेवमपूर्वमपि। न खल्वतो दुःखमेव, सुखदुःख[मि](श्रं हि पुरुषो विषय)⟨f.138r⟩मनुभवति। न च नैवंविधमुद्दिश्य प्रयत्नः प्रवर्तत इति प्रयत्न[यो]र्निमित्तनिमित्तिनोरसमानाधिकरण्येन विप्रतिपत्तौ तत्त्वानुप[प](त्तिः। एवं प्रवृत्तिनिमि)त्तं कृतिव्याप्यत्वेन तुल्यं क्रियापूर्वयोरिति न प्रवृत्तिनिमित्तभेदः। तथा च कृतिव्याप्यतामात्रोपहितमर्यादाभिधाव्यापारो लिङादि(शब्दो धात्वर्थ)वापूर्वं च कार्यं गोचरयन्नान्यलभ्यत्वे तन्त्रीकर्तुमुत्सहते। शक्तिकल्पनाभिया खल्वयमन्यलभ्यं परिहरति, अनुमित्या चान्यलभ्यो ययापि (शक्त्यानुमिताव)नुप्रवृत्तस्तयैव च शक्त्यान्यलभ्यो ऽपि वर्तितुमुत्सहते, सकृत्प्रवृत्तायाः किमवगुण्ठनेनेति नान्यलभ्यं परिहरति। न च साध्यस्वर्ग[वि](शिष्टेन नियोज्येन क्रि)या कार्यान्नीयत इति निपुणतरमुपपादितं न्यायकणिकायाम्। तस्मान्नियोगपरता वेदे लोके च विनियोगपरतेति स्वतन्त्रसिद्धान्तमु[प](पादितं प्रा)माणिकमिति स्थितं तथापीममभिभागमभ्युपेत्याचार्येण दूषणान्तरं दत्तमिति॥ ⊗॥

तस्मान्मानान्तराद्गत्वा परस्य प्रतिपत्तये।
वचः प्रयुङ्क्ते पुरुषो नाकस्मात्तेन तद्गिरि॥ २६॥
प्रमाणान्तरसंभेदो व्यपेक्षातो न संभवात्।

स्वोपलब्धिख्यापनाय पुरुषस्य गीः, ततस्तस्यां प्रमाणान्तरसंभेदः, मयोपलब्धो ऽयमर्थ इत्यर्थः। तेन तत्रोपलब्धेः संभवासंभवावेवापेक्ष्येयाताम्। यत्रोपलब्धेर्निश्चयः ‘संभवत्यस्योपलब्धिर्न चानुपलभ्यायं ब्रवीति’ इति तत्र प्रामाण्यम्, यथा-

---

26.9 °मैकार्थ्यं लिङः] *em.*; °मैकार्थ्य लिंगः MS **26.11** खल्वतो दुःख°] *em.*; खल्वत दुःख° MS^{pc}; खल्वतत दुःपूख° MS^{ac} **26.12** च नैवंविध°] *em.*; चानेवम्विध° MS • प्रयत्न°] MS^{pc}; प्रयत्नो° MS^{ac} **26.14** °त्तं कृतिव्याप्यत्वेन] *em.*; °त्त कृतिव्याप्यत्वत MS **26.15** लिङादि°] *em.*; लिङ्गादि° MS **26.16** गोचरयन्नान्य°] *em.*; गोचयन्नान्य° MS **26.17** अनुमित्या] *conj.*; अमत्या MS • °लभ्यो] *em.*; °लिभ्यो MS **26.18** शक्त्या] *em.*; त्सत्त्या MS **26.19** °गुण्ठनेनेति] *em.*; °गुण्ठेनेनेति MS **26.22** °पीममभि°] MS^{pc}; °पिममभि° MS^{ac} • °मभ्युपेत्या°] *em.*; °मभ्यत्या° MS

प्तपुरुषस्य प्रमाणविषये। यत्रोपलब्धेरसंभव एव यथा दृष्टार्थे बुद्धादिवाक्ये, यत्र चानुपलभ्यापि वचनप्रवृत्तिसंभावना, तत्राप्रामाण्यात्। न तु प्रमाणान्तरसंभवात्पुरुषवचने ऽपि तदपेक्षा।

यदि मानान्तरं पुंवचो ऽर्थस्य निश्चा(यकं कृतं तर्हि वचसा)⟨f.138ᵛ⟩मानान्तरादेव तन्निश्चयादिति शङ्कामुपसंहरन् परिहरति– **तस्मान्मानान्तराद्गत्वेति**। द्विविधं हि लौकिकं वचः संभवत्प्रमाणान्तरं त[द्वि](परीतं च, विहिते निषि)द्धे वाप्तस्यानाप्तस्य च। तत्राप्तस्य संभवत्प्रमाणान्तरनिराकरण आपतते, दृष्टार्थमदृष्टार्थं वा वचो यथा 'जीर्णे भुञ्जीतारोग्यकामः, अ[ष्ट](काः कर्तव्याः' इति, तदनु)मानादिप्रमाणान्तरोपस्थापकतया प्रमाणम्। यत्तु संभवत्प्रमाणान्तरमप्यनाप्तप्रणीतं यथा 'नद्यास्तीरे तरवः' इति परोक्षार्थं [श्रो](तुः, तत्सन्दिग्धार्थमनिश्चा)यकत्वादप्रमाणम्। यत्पुनरसंभवत्प्रमाणान्तरं बुद्धादिवचश्चैत्यवन्दनपोषधादिसाधनं तदप्रमाणमेव। अशक्यो हि तद्गोचरः पुरु(षेण ज्ञातुमृते वचना)त्। न चानुवादः सम्भवति, कर्तृसामान्याभावादिति। तदिदमुक्तम्– **यत्रोपलब्धेरसंभव** इत्यादिना॥ ⊗॥

27.8 यत्रोपलब्धे॰] यत्र तूपलब्धे॰ *edn*

27.1–2 Cf. *Bhāvaśuddhi* (313.15–17): यदि मानान्तरमपेक्ष्य पुंवचो ऽर्थस्य निश्चायकम्, कृतं तर्हि वचसा; मानान्तरादेव तन्निश्चयादिति शङ्कामुपसंहरन् परिहरति– तस्मान्मानान्तरादिति॥
27.3–6 Cf. *Bhāvaśuddhi* (314.8–12): द्विविधं हि लौकिकं वचः– संभवत्प्रमाणान्तरम्, तद्विपरीतं च। तत्राद्यमाप्तस्येत्याह– यत्रेति॥ निश्चयमेव दर्शयति– न चेति। आप्तत्वादित्यर्थः। तदपि द्वयं दृष्टार्थम्, अदृष्टार्थं च– यथा– 'जीर्णे भुञ्जीतारोग्यकामः' 'अष्टकाः कर्तव्याः' इति। तत्प्रमाणान्तरोपस्थापकतया प्रमाणमित्याशयेनाह– यथेति॥
27.6–8 Cf. *Bhāvaśuddhi* (314.16–118): यत्तु संभवत्प्रमाणान्तरमप्यनाप्तप्रणीतम्, यथा– 'नद्यास्तीरे तरवः' इति परोक्षार्थं श्रोतुः, तत्सन्दिग्धार्थमनिश्चयात्मकत्वादप्रमाणम्।
27.9–10 Cf. *Śābarabhāṣya I.1.2:* अशक्यं हि तत्पुरुषेण ज्ञातुमृते वचनात्।

27.1 पुंवचो] *em.*; प्रम्वचो MS **27.2** तन्निश्चयादिति] *em.*; तन्निश्चदिति MS • ॰संहरन् परिहरति] *em.*; ॰संहरयन् पसंहरति MS • ॰राद्गत्वेति] *em.*; ॰राद्गत्वदिति MS **27.4** तत्राप्तस्य] *em.*; तत्रास्य MS **27.5** अदृष्टार्थं वा] *em.*; त्यैदृष्टार्थम्वा MS • यथा जीर्णे भुञ्जीता॰] *em.*; यथा यथा जीर्ण्णे भुंभीता॰ MS **27.6** ॰मानादि॰] *em.*; ॰मादि॰ MS **27.7** परोक्षार्थं श्रो॰] *em.*; परोक्षाच्चं श्रा॰ MS **27.8** बुद्धा॰] MS[pc]; बुद्धाद्धा॰ MS[ac] **27.9** ॰साधनं तद॰] *em.*; ॰सोधरन्तद॰ MS **27.10** चानुवादः] *em.*; चानुवेदः MS **27.11** ॰लब्धेरसंभव] *em.*; ॰लब्धेः संभव MS

अपौरुषेयता तेन पौरुषेयत्वमेव च॥ २७॥
अनपेक्षव्यपेक्षत्वनिमित्ते वर्णिते बुधैः।
भूतार्थमपि सापेक्षं नातो ऽपुरुषबुद्धिजम्॥ २८॥

अत एव पौरुषेयत्वापौरुषेयत्वे सापेक्षत्वानपेक्षत्वकारणे न्यायविद्भिर्दर्शिते पौरुषेयत्वनिराकरणप्रयत्नेन– 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति। औत्पत्तिके शब्दार्थसम्बन्धे ऽस्वातन्त्र्याच्छब्दस्य न पुरुषबुद्धिपूर्वकत्वमिति न प्रमाणान्तरसंभिन्ना शब्दादर्थावगतिरिति निरपेक्षत्वम्।

ननु प्रमाणान्तरासंभवे ऽपि कृत एव यत्नः– 'सत्संप्रयोगे' इति। सत्यम्। चोदनैव प्रमाणम्, नान्यत्– इत्यवधारणसिद्धये। न तु प्रमाणमेव इति। अथ प्रमाणान्तरसंभवे ऽपि यदि चोदनाप्रामाण्यं न व्याहन्यते, को ऽर्थः प्रमाणान्तरनिराकरणेन? धर्मतत्त्वज्ञानम्। प्रमाणान्तरसंभवे हि सर्वज्ञाभिमतबुद्धाद्युपदिष्टो ऽपि धर्मः प्रतीयेत तत्र न धर्मतत्त्वमवधारितं स्यात्। तदवधारणार्थश्चायं यत्नः। चोदनाप्रामाण्यमपि तदर्थं मृग्यते, नादृष्टाय। अथवा तद्विरोधाच्चोदनाया बाधः स्यात्, संशयो वा तुल्यबलत्वे, तेन तस्यासंभवः प्रतिपाद्यते। न तु तत्संभवात्सापेक्षतेति।

अत्रैवार्थे वृद्धानुमतिमा[द](र्शयति– **अपौरुषेयता**) तेनेति। **धर्मतत्त्वज्ञानमिति।**

28.5–6 *Jaiminisūtra* I.1.5: औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः।
28.9 *Jaiminisūtra* I.1.4: सत्संप्रयोगे पुरुषेन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्।

28.1 Cf. *Bhāvaśuddhi* (314.16–18): अत्रैवार्थे वृद्धानुमतिमादर्शयति– अपौरुषेयतेति॥
28.1–5 Cf. *Bhāvaśuddhi* (317.2-5): राद्धान्त्याह– धर्मेति॥ अर्थ इत्यनुषङ्गः। तदाभासविविक्तं हि स्वरूपं तत्त्वम्, तस्य ज्ञानम्=विनिश्चयः, स चैष प्रमाणान्तरनिराकरण आयात इत्यर्थः। अन्यथा चैत्यवन्दनादेरपि धर्मत्वप्रसक्तावाभासविवेकेनाग्निहोत्रादिरेव धर्म इति निश्चयो न स्यादित्याह– प्रमाणान्तरेति॥

तदाभासविविक्तं हि स्वरूपं तत्त्वं तस्य ज्ञानं विनिश्चयः। स चैष प्रमाणान्तरनिराकरण आपतते। अन्य(था **सर्वज्ञाभिमतबुद्धाद्युपदि**)ष्टो **धर्मः** प्रसज्येत चैत्यवन्दनादिः। तथा च तथाभासविवेकेन धर्मतत्त्वानवधारणाज्ज्योतिष्टोमादिवच्चैत्यवन्दनादेर[प्य](नुष्ठेयत्वं स्यात्। **अथ**)⟨f.139r⟩**वा** चोदनार्थानुष्ठाने त्रिशरणभङ्गप्रसङ्गः, तत्र च बुद्धादिभिर्दोषो दर्शित इति सर्वज्ञप्रत्यक्षविरोधश्चोदनायाम्। एवं †स्नानवस्त[हि](--- [7] ---) विहिते सर्वप्रतिषिद्धो† न च प्रत्यक्षविरोधिशब्दः प्रामाण्यमश्नुते ग्रावप्लवनादिगोचरवचनवत्। तस्मात्प्रत्यक्षविरोधान्मा निषेधीच्चोद[ने](त्येतदर्थः प्रयत्नो माना)न्तरनिषेधस्येत्याह– **अथवा तद्विरोधाच्चोदनाया बाधः स्यादिति**। यदि द्वयोरनपेक्षयोः स्वगोचरे प्रवर्तमानयोः प्राथम्यस्य चाप्र[मा](णभूतरजतादि)ज्ञानवर्तित्वेन व्यभिचारात्, सार्वज्ञे च प्रत्यक्षे ऽसिद्धत्वान् ⟨न गृह्यते विशेषः⟩ । तथापि तुल्यबलप्रमाणद्वयविप्रतिपत्तौ साधकबाधकप्र[माणा](न्तराभावे को धर्म इति) यत्प्राप्तः संशय इति कुतः प्रामाण्यं चोदनाया इत्याह– **संशयो वेति**। तस्माद्गोचरमानान्तरसम्भवात्सापेक्षता मा प्रसाङ्क्षी(दित्याह– **तेनेति**। माना)न्तरनिरासस्यापि तद्विषये विरोधे प्रमाणान्तरसंभवान्मा भूदप्रमाणं चोदनेति तस्यार्थ इत्यर्थः।

ननु तदभावो ऽपेक्षणीयः स्यात्। कामम्। न तु शब्दः प्रमाणान्तरापेक्षमर्थं प्रतिपादयति। यतो यदर्थस्य प्रतिपादकं न तु

28.5–8 Cf. *Bhāvaśuddhi* (317.10–12): अथवेति॥ चोदनार्थानुष्ठाने हि बुद्धादिभिर्दोषो दर्शित इति सर्वज्ञप्रत्यक्षविरोधश्चोदनायाम्। न च प्रत्यक्षविरोधे शब्दः प्रामाण्यमश्नुत इत्यर्थः।

28.10–15 Cf. *Bhāvaśuddhi* (317.12–19): यदि द्वयोः स्वगोचरे वर्तमानयोः प्रथमस्य (द्वितीयस्य) चाप्रमाणभूतरजतादिज्ञानवर्तित्वेन(°वर्जितत्वेन *edn*) व्यभिचारान्न गृह्यते विशेषः, तत्राह– संशयो वेति॥ तुल्यबलप्रमाणद्वयविप्रतिपत्तौ साधकबाधकप्रमाणान्तराभावे बुद्धाद्युपदिष्टचैत्यवन्दनादिर्धर्मः, किं वा चोदनालक्षणोऽग्निहोत्रादिरिति संशयः स्यादित्यर्थः। तस्माच्चोदनार्थे मानान्तरासम्भवान्मा भूदप्रमाणं चोदनेत्येतदर्थो ऽन्ययोगव्यवच्छेदप्रयत्नः, न तु मानान्तरसम्भवात्सापेक्षता मा प्रसाङ्क्षीदित्येतदर्थ इत्याह– तेनेति॥

28.2 तदाभास°] *em.*; तदभास° MS • ज्ञानं] *em.*; ज्ञान MS **28.3** आपतते।] *em.*; आपततो MS **28.6** बुद्धादिभि°] *em.*; बुध्यादिभि° MS • सर्वज्ञप्रत्य°] *em.*; सर्वज्ञजत्प्रत्य° MS **28.8** °मश्नुते] *conj.*; °मस्तु MS **28.10** तद्विरोधाच्चोदनाया] *em.*; तद्विरोच्चोदनोया MS • यदि] *em.*; यदिति MS **28.12** °प्रमाण°] MS^{pc}; °प्रमाणादि° MS^{ac} **28.13** यत्प्राप्तः] *conj.*; त्प्रा *ow.* MS; not clear **28.14** वेति] *em.*; चेति MS

तदपेक्ष्यते, यदपेक्ष्यते न तदर्थं प्रतिपादयति। न हि विरोधिप्रमाणाभावः प्रतिपत्तिहेतुः। विरोधसंभवमात्रेण चाप्रामाण्ये प्रत्यक्षादीनामपि तत्स्यात्।

नन्वेवमपि विरोधिप्रमा[ण](संभवाभावापेक्ष)[त्वा]च्चोदनाया नानपेक्षतया प्रामाण्यम्, तदनपेक्षत्वे वा वृथा तत्प्रसाधनमिति चोदयति– **ननु तदभावो ऽपेक्षणीयः स्यात्**। प[रि](हरति– **काममिति**।) ⟨f.139ᵛ⟩तदभावो ऽपेक्षत एव। कथं तर्हि तत्प्रामाण्यम्? अनपेक्षत्वादित्यत आह– **न तु शब्द** इति। वचसं सर्वथा परापेक्षतां शब्दस्य व्यासेध(न्तीमाह– **यत** इति),[न] च विरोधिनीम्। सैव हि तद्गतानपेक्षता, तद्गोचरप्रमोपजनहेतुप्रमाणापेक्षिता च तद्विरोधिनी, अपेक्षणीयादेव नियमे[न](मानान्तरसंभवा)द्गोचरप्रमोत्पादादपेक्षकस्य कृतकरतया प्रमाहेतुभावाभावात्। विरोधसंभवाभावस्तु न प्रमाहेतुरिति तदपेक्षतया प्रामा(ण्यं नेत्याह– **न ही**)ति। न तदभावस्तदभाववानित्यर्थः। **अथ** भूतार्थत्वे वेदान्तानां मानान्तरागोचरार्थत्वेन तत्संभवादेवं तद्विसंवादशङ्कायाम(प्रामाण्यप्रसङ्ग) इति कार्यनिष्ठता प्रयत्नेन प्रतिपाद्यत इत्याशङ्क्याह– **विरोधिसंभवमात्रेण चाप्रामाण्ये प्रत्यक्षादीनामपि तदप्रामा**[ण्यं](**स्यात्**, भूतार्थता)मात्रेण विरोधिप्रमाणोत्प्रेक्षायाः प्रत्यक्षादिष्वपि भूतार्थेषु साम्यात्।

29.1–4 Cf. *Bhāvaśuddhi* (318.2-5): एवमपि प्रमाणसंभवापेक्षत्वाच्चोदनाया नानपेक्षतया प्रामाण्यम्? तदनपेक्षत्वे वा वृथा तत्प्रसाधनमिति चोदयति– नन्विति॥ तदभावो ऽपेक्ष्यतामित्याह– काममिति। कथं तर्हि प्रामाण्यम्? अनपेक्षत्वादित्याह– न त्विति॥ **29.10–13** Cf. *Bhāvaśuddhi* (318.7-11): अथ भूतार्थत्वेन=वेदान्तानां मानान्तरगोचरार्थत्वेन तत्संभवात्तद्विसंवादशङ्कायामप्रामाण्यप्रसङ्गः, इति कार्यनिष्ठता प्रयत्नेन प्रतिपाद्यत इत्याशङ्क्याह– विरोधीति॥ भूतार्थतामात्रेण विरोधिप्रमाणोत्प्रेक्षायाः प्रत्यक्षादिष्वपि साम्यादित्यर्थः।

29.1 विरोधि॰] *em.*; तिरोधि॰ MS • ॰त्वाच्चोदनाया नानपेक्ष॰] *em.*; ॰त्वास्वादनायानपेक्ष॰ MS **29.5** परापेक्षतां] MS^{pc}; पराक्षपेक्षतां MS^{ac} **29.6** तद्गतानपेक्षता] MS^{pc}; तद्गमनपेक्षता MS^{ac} **29.6-7**तद्विरोधिनी] MS^{pc}; तद्विरोधिनीं MS^{ac} **29.7** ॰दपेक्षकस्य] MS^{pc}; ॰दपेक्षस्य कस्य MS^{ac} **29.9-10**तदपेक्षतया] *em.*; तदपेक्षता MS **29.9** ॰भाववानित्यर्थः] *em.*; ॰भानित्यर्थः MS **29.10** भूतार्थत्वे] MS^{pc}; भूथात्वतार्थत्वे MS^{ac} • ॰वादेवं तद्विसंवाद॰] *em.*; ॰वादवन्तद्विसंवाद॰ MS **29.12** चाप्रामाण्ये] *em.*; चाप्रमाण्ये MS • तदप्रामाण्यं] MS^{pc}; दतदप्रमाण्यं MS^{ac} **29.13** ॰णोत्प्रेक्षायाः] *em.*; ॰णोपेक्षायाः MS

अपि च विरोधिसंभवादप्रामाण्यं कार्यनिष्ठत्वे ऽप्यपरिहार्यम्, कर्तव्यताद्वारेण भूतार्थप्रतिपत्तेरिष्टत्वात्। तत्र तु प्रमाणान्तरविरोधिसंभावनात्। भूतार्थस्य प्रमाणान्तरविषयत्वात्तेन कार्यनिष्ठता वर्ण्यते। प्रमाणान्तरविषयत्वे किलानुवादत्वात्प्रमाणान्तरापेक्षमर्थं प्रतिपादयति प्रमाणान्तरेणायमधिगत इति न स्वातन्त्र्येण। कार्यनिष्ठत्वे तु स्वातन्त्र्येण, तस्य प्रमाणान्तरागोचरत्वात्। उक्तेन प्रकारेण न सापेक्षत्वमिति 'भूतार्थमपि सापेक्षं नातो ऽपुरुषबुद्धिजम्' इति सुष्ठूक्तम्।

प्रसङ्गान्तरमाह– **अपि च विरोधिसंभवादप्रामा**(**ण्यं कार्यनिष्ठत्वे ऽ**)**पि** वेदान्तानाम**परिहार्यम्**। ननु मानान्तरागोचरप्रतिपत्तिकर्तव्यतापरत्वे कुतो विरोधिमानान्तरासंभव इत्यत (आह–) ⟨f.140r⟩ **कर्तव्यताद्वारेण** ब्रह्मरूप**भूतार्थ**[**प्रति**](**पत्तेरिष्टत्वात्तत्र तु प्र**)**माणान्तरविरोधसंभवात्**। कुतः? **भूतार्थस्य प्रमाणान्तरविषयत्वात्**। **तेन** भूतार्थपरत्वे सापेक्षत्वेनाप्रामाण्यप्रसङ्गेन **कार्य**[**नि**](**ष्ठता वर्ण्यते**। तमेवा)नेन हेतुनाप्रामाण्यप्रसङ्गाभासं परोक्षं स्मारयति– **प्रमाणान्तरविषयत्वे किलेति**। आभासतामेव किलशब्देन सूचितामस्य प्र-

30.1–4 Cf. *Bhāvaśuddhi* (318.12–15): प्रसङ्गान्तरमाह– अपि चेति॥ प्रतिपत्तिकर्तव्यतापरत्वे ऽप्यपरिहार्यमित्यर्थः। मानान्तरागोचरनियोगपरत्वे कुतो विरोधिमानान्तरासंभव इति? अत्राह– कर्तव्यतेति॥ ब्रह्मरूपप्रतिपत्तेरिष्टत्वादित्यर्थः।
30.4–8 Cf. *Bhāvaśuddhi* (318.16-319.7): कुत एवम्? अत्राह– भूतार्थस्येति॥ तेन भूतार्थपरत्वेन सापेक्षत्वेनाप्रामाण्यप्रसङ्गेन कार्यनिष्ठता वर्ण्यत इत्यर्थः। तमेवानेन हेतुनाप्रामाण्यप्रसङ्गाभासं परोक्तं स्मारयति– प्रमाणान्तरेति। आभासतामेव किलशब्देन सूचितामस्य प्रसङ्गस्य दर्शयति– उक्तेनेति॥
30.6–8 Cf. *Abhiprāyaprakāśikā* (319.25–26): अप्रामाण्यप्रकारं परोक्तं स्मारयति– प्रमाणान्तरेति॥ इदानीं किलशब्देन सूचितां प्रसङ्गस्याभासतां दर्शयति– उक्तेनेति॥

30.2 °मपरिहार्यम्] MS^{pc}; °मापरिहार्यं MS^{ac} **30.3** विरोधिमाना°] MS^{pc}; विरोधिर्म्मामाना° MS^{ac} • °न्तरासंभव] *em.*; °न्तरं संभव MS **30.3-4**ब्रह्मरूपभूतार्थप्रति°] *em.*; ब्रह्मरूपभूतार्थमात्रेण विरोधिप्रमाणो[त्प्रेक्षायाः (°प्रमाणोत्प्रेत्प्रेक्षायाः MS^{ac}) प्रत्य]क्षादिष्वपि भूतार्थेषु साम्यात्। प्रसङ्गान्तरमाह– प्रति° MS **30.5** सापेक्षत्वेना°] त्वे *ow.* MS • °प्रसङ्गेन] °प्रसङ्गन MS **30.6** हेतुनाप्रामाण्य°] MS^{pc}; हेतुप्रामाण्य° MS^{ac} **30.7** किलेति] MS^{pc}; कित्तेति MS^{ac} • आभासतामेव] *em.*; आभासनामेव MS

सङ्गस्य (दर्शयति– उक्तेन प्र)कारेणेति। न च भूतार्थत्वे सति शक्यवचनतया वाक्यत्वादिहेतुप्रसञ्जितं पौरुषेयत्वं वेदस्य दुर्वारम्, ततश्च सापेक्षत्वाद[प्रा]-(माण्यम्। शब्दस्य पु)नः कार्यार्थत्वे कार्यस्य मानान्तरापरिदृष्टस्य तत्त्वेन वा समारोपेण वा बुद्धावालम्बितुमशक्यत्वात्पौरुषेयत्वानुमानत्वाभ्यां ग-(म्यमानस्य कार्यत्वा)दपौरुषेयत्वेन प्रामाण्यमनपेक्षत्वादप्रत्यूहं प्रसिध्यतीति कार्यत्वं प्रामाण्यायैषितव्यमिति साम्प्रतम्, अपूर्वकार्याभिधा[न](नियमात् प्रत्यक्षा)दीनाम्। सिद्ध्येदप्ययं मनोरथो न तु तदभिधानं नाभिधानात्तन्नियमो वेत्युक्तमधस्तात्, उपपादितं च न्यायकणिकायाम्।

अपि च भ(वेदपूर्वकार्याभिधान)⟨f.140v⟩नियमस्तथापि न पौरुषेयता वेदस्य। कस्मात्? तदर्थस्यादृष्टपूर्वस्य तत्त्वेन समारोपेण वा बुद्धावालेखितुमशक्य-त्वात्। पुरुषेण [के](नचित्कदाचिदपि) हन्तायमौपनिषदो ऽपि पुरुषः किं क्वचिद्दृष्टपूर्वः? तद्विधस्य सिद्धस्यान्यस्य दृष्टचरत्वादस्य दृष्टपूर्वत्वे कर्मणः कार्यस्य दृष्टत्वमित्य(र्थः। तस्य स्वरूपा)दतथात्वे वौपनिषदस्याप्यात्मनो ऽतथाभाव इति सर्वं समानम्, अन्यत्राभिनिवेशात्। तस्मात्सुष्ठूक्तम्–

‘भूतार्थमपि सापेक्षं नातो (ऽपुरुषबुद्धिजम्’ इ)ति॥ ⊗॥

अथ संसर्गभाजो नो पदार्थाः क्रियया विना।

30.17–21 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 196.28–197.11): अपि चायमौ-पनिषदो ऽपि पुरुषो न प्रमाणान्तरगोचर इति कथमुपनिषदामपि पौरुषेयता दुर्वारा? तथाविधस्यान्यस्य सिद्धरूपस्य प्रमाणान्तरगोचरत्वमुपलब्धमित्यस्यापि सिद्धतया तदर्थ-त्वमिति चेत्। एवं तर्हि क्रियात्मनः कार्यस्य मानान्तरगोचरतेति कार्यतया नियोगस्यापि तदर्थत्वमिति तदर्थस्यापि वेदस्य पौरुषेयता दुर्वारा भवेत्। स्वरूपेण वा तस्य प्रमाणान्त-रागोचरत्वे औपनिषदस्यात्मनोऽपि तदिति सर्वं समानमन्यत्राभिनिवेशात्।

30.8 °कारेणेति] *em.*; °कारेणेतिः MS **30.9** वाक्यत्वादि°] MS*pc*; वाक् क्यत्वा-दि° MS*ac* • °प्रसञ्जितं] MS*pc*; °प्रसिंजितं MS*ac* **30.10** मानान्तरा°] *em.*; म-नान्तरा° MS **30.11** °लम्बितु°] *em.*; °लम्बित्त° MS • °नुमानत्वाभ्यां] *em.*; °नुमानत्वास्या MS **30.13** कार्यत्वं] *em.*; कार्यत्व MS • प्रामाण्यायैषितव्यमिति सा-म्प्रतम्] *em.*; प्रामाण्यायेषितव्यामिति सा -तम् MS • अपूर्व°] *em.*; अपुर्व्व° MS **30.14** सिद्ध्येदप्ययं] *em.*; सिद्धेदप्ययं MS • °धानं नाभिधाना°] *em.*; °धानन्नभिधा-ना° MS **30.15** °कणिकायाम्] णि *ow.* MS **30.17** समारोपेण] *em.*; समारोपण MS **30.19** क्वचिद्दृष्ट°] *em.*; क्वचिदृष्ट° MS • सिद्धस्यान्यस्य] *em.*; सिद्धस्योन्यस्य MS **30.20** वौपनिषदस्या°] *em.*; वा ओपनिषदधस्या° MS

किमायातं विधेः सापि त्वस्त्यादिः सुलभा क्व न ॥ २९ ॥

यदि मतम्– आख्यातपदार्थमन्तरेण न नामपदार्थानां संसर्गः। क्रिया हि पदार्थसंश्लेषहेतुस्तदभावे साकाङ्क्षत्वात्। अतः सिद्धो ऽर्थो ब्रह्मादिर्न शब्दगोचरः पदस्याविदितसंगतित्वेनानवबोधकत्वात्। न वाक्यार्थस्तस्य संसर्गात्मकत्वात्। क्रियारहितानां च पदार्थानामसंसर्गात्। एवमपि क्रियाभ्युपेयताम्, तद्द्वारेण च पदार्थसंसर्गसिद्धिराशास्यताम्। न विधेः कश्चिदर्थः। सापि च क्रिया सर्वत्र सुलभैवाश्रूयमाणाप्यस्त्यादिः 'अस्तिर्भवन्तीपरः प्रथमपुरुषो ऽप्रयुज्यमानो ऽपि गम्यते' इति। तत्र ब्रह्मस्वरूपप्रतिपत्तिपरं वाक्यमस्त्यर्थनिष्ठम्। तन्निबन्धनस्तत्र पदार्थसंश्लेषः। सत्तायाश्च प्रकृत्यैव सत्प्रधानत्वात्तद्द्वारेण विशिष्टवस्तुसिद्धिरिति।

यस्तु मन्यते मा नाम भूत्प्रामाण्याय विध्यपेक्षा, आनन्दविज्ञानादिपदार्थसंसर्गाय तु विधिरपेक्षिष्यते। न खलु ना(मपदार्थानां सिद्धरू)पाणां गुणप्रधानभावमनापन्नानामन्योन्यनिराकाङ्क्षाणामस्ति समन्वयः। आख्यातार्थे हि

31.9–10 *Mahābhāṣya II.3.1* : अस्तिर्भवन्तीपरः प्रथमपुरुषो ऽप्रयुज्यमानो ऽपि गम्यते।

31.1–2 Cf. *Bhāvaśuddhi* (319.9–10): मा नाम भूत्प्रामाण्याय विध्यपेक्षा, पदार्थसंसर्गाय तु विधिरपेक्ष्यत इति चोदयति– अथेति।
31.2–8 Cf. *Bhāvaśuddhi* (319.15–23): यदि मतमिति॥ न खलु नामपदार्थानां सिद्धरूपाणां गुणप्रधानभावमनापन्नानामन्योन्यनिराकाङ्क्षाणामस्ति समन्वय इत्यर्थः। कुतस्तर्हि पदार्थसंसर्गावगतिः? अत्राह– क्रिया हीति॥ आख्यातार्थे हि साध्यरूपे सिद्धार्थानां 'भूतं भव्यायोपदिश्यते' इति समन्वये परस्परमपि नामपदार्थानां स कल्पत इत्यर्थः। तत्रापि हेतुमाह– तदभाव इति॥ मृदं घटमित्यादिषु संसर्गमनवगच्छन्तो न निराकाङ्क्षाः प्रतिपत्तारः। निराकाङ्क्षस्तु कुर्विति प्रयोग इत्यर्थः। क्रिया च विधिविषयत्वाद्विधिनिमित्तेति संसर्गसिद्धये विधिरुपेय इत्याह– अत इति॥

31.1 मा नाम] *em.*; न्या नाम MS **31.2** °संसर्गाय तु] *em.*; °सत्सग्गायत्त MS **31.3** °मनापन्नाना°] *em.*; °मनापत्नाना° MS

साध्यरूपे सिद्धार्थानां ('भूतं भव्यायोपदि)श्यते' इति समन्वये परस्परमपि नामार्थानां स कल्पेत। अत एव मृदो घटा इत्यादिषु संसर्गमनवगच्छन्तो न निराका[ङ्क्षाः](प्रतिपत्तारः, निरा)काङ्क्षास्तु कुर्विति प्रयोगे। तस्मात्क्रिया-निमित्ता [पदा]र्थसंसर्गप्रतीतिः, सा च विधिविषय इति विधिनिमित्तेति त-(त्संसर्गसिद्धये विधिरुपेय इत्याह– **अत इति**।) ……

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

अत्राहुः – न प्रमाणावगम्यताया अन्या काचन सत्ता। तथा हि– यत्प्रमाणेनावगम्यते तत्र 'अस्ति' इति व्यवहारो लौकिकानां विपर्यये 'नास्ति' इति। न खल्वन्यः सदसद्विभागहेतुर्लक्ष्यते। अर्थक्रियाभावाभावौ चेत्। न, तयोरपि प्रमाणभावाभावाधीनत्वात्। तथा हि– कार्ये ऽपि सद्व्यवहारो यदि कार्यान्तरनिबन्धनो ऽनवस्था। तस्मादन्ते ऽपि प्रमाणादेव सद्व्यवहारः, तद्विपर्ययाच्चासद्व्यवहारः। एवं चेदादावेव प्रमाणाभावाभावनिबन्धनौ सदसद्व्यवहारौ स्ताम्। तथा चास्त्यर्थनिष्ठं वाक्यं प्रमाणान्तरापेक्षमेवार्थं बोधयति, प्रमाणविषयताया अस्त्यर्थत्वात्। अत्रोच्यते –

न च मानावगम्यत्वमस्तीति विषयो मतः।
मानादेव यतो बुद्धिरभूदस्ति भविष्यति ॥ ३० ॥
धूमादिना मिते हि स्याद्वह्न्यादावियमन्यथा।
भिद्येतोत्तरकाले वा भवन्ती न खलु त्रिधा ॥ ३१ ॥

न प्रमाणावगम्यत्वमस्त्यर्थः, न 'अस्ति' इति बुद्धेस्तद्विषयः। यतः प्रमाणादेव त्रिधा बुद्धिर्भवति– 'धूमादस्त्यत्राग्निः'

31.4 परस्परमपि] *em.*; परमपि MS **31.5** स कल्पेत] *em.*; संकल्पेत MS[pc]; संकक-ल्पेत MS[ac] • मृदो] *em.*; मृदा MS • °गच्छन्तो] *em.*; °गच्छतो MS **31.6** कुर्विति प्रयोगे। तस्मात्क्रिया°] *em.*; करोति प्रयोगो तस्मात क्रिया° MS **31.7** विधिनिमि-त्तेति] *conj.*; विधिनिमित्तापि MS

'नदीपूरविशेषादभूद् वृष्टिः' 'मेघोदयविशेषाद्भविष्यति वृष्टिः' इति। तत्र यदि बुद्धिः प्रमाणविषयतां गोचरयति, प्रमिते हि स्यान्न प्रमाणादेव। न हि प्राक् प्रमाणोत्पत्तेः सन् प्रमाणसंबन्धः। प्रमाणसंबन्धनिबन्धना चेयं बुद्धिः। अथ वैयात्याद्‌त्तरकालतामस्या ब्रूयात्। त्रैविध्यमनुपपन्नम्, प्रमाणसंबन्धस्याभेदाद्भिन्नकालेष्वप्यर्थेषु।

···⟨f.142^{r}⟩ (चोदयति– **अत्राहुः– न प्र)माणावगम्यताया** इति। तदेतत्परिहरति– **अत्रोच्यत** इति।

अयमर्थः– मानावगम्यत्वमस्तीति बुद्धेर्विषयं ब्रुवाणः प्रष्टव्यो ऽत्र जाय(ते– किं प्राक्प्रवृत्तमानग)म्यत्वमस्त्यर्थो ऽथ वर्तमानमानगम्यत्वमिति। तत्राद्यं कल्पं निराकरोति– **न च मानावगम्यत्वमिति**। न **प्राक्सिद्धप्रमाणावगम्यत्वमस्त्यर्थः**। तदेव [स्फु](टयति– **नास्तीति**।) कस्मात्? **यतः** प्रागप्रमिते वस्तुनि **प्रमाणादेव त्रिधा बुद्धिर्भवति– धूमादस्त्यत्राग्निः, नद्याः पूरविशे**षात्प्रभूतकाष्ठफलकेन व[ह](मानेना**भूद्वृष्टिः**), अनुकूलमन्दजवपवनोह्यमानमधुरगन्धगम्भीरध्वानतमालमालामलिनमेघोदयविशेषाद्भविष्यति **वृष्टिरिति।** ननु निर्वि(कल्पेन वस्तून्यालो)चिते तत्पृष्ठभावी सदिति विकल्पो ऽनन्तरो-

---

32.22 °कालतामस्या] °कालतामेवास्या *edn*

32.3–6 Cf. *Bhāvaśuddhi* (322.7–10): प्राक्प्रवृत्तमानावगम्यत्वमस्त्यर्थः? वर्तमानमानावगम्यत्वं वा? नाद्य इत्याह– न चेति॥ न प्राक्सिद्धप्रमाणगम्यत्वमस्तीतिबुद्धिव्यपदेशयोर्विषय इत्यर्थः।
32.6–9 Cf. *Bhāvaśuddhi* (323.5-7): तदेव स्फुटयति– नास्तीति॥ कुत इति? अत्राह– यत इति॥ प्रागप्रमिते च वस्तुनि त्रिविधलिङ्गदर्शनात्त्रिकालसम्बन्धिसत्तारूपिता बुद्धिः– वृष्टिरासीत्, वृष्टिर्भविष्यति, पर्वते ऽग्निरस्तीति भवतीत्यर्थः।
32.10–12 Cf. *Bhāvaśuddhi* (322.11–14): निर्विकल्पेन वस्तून्यालोचिते तत्पृष्ठभावी सदि-

---

32.1 तदेतत्परि°] MS^{pc}; तदेत्पतत्परि° MS^{ac} **32.3** ब्रुवाणः प्रष्टव्यो ऽत्र] *em.*; ब्रुवणेः प्रष्टव्यो प्रMS **32.4** °त्वमस्त्यर्थो ऽथ] *em.*; °त्वमर्थ MS **32.5** प्राक्सिद्ध°] *em.*; प्राक्षाद्ध° MS **32.6** °मस्त्यर्थः] *em.*; °सस्त्यर्थः MS • प्रागप्रमिते] *em.*; प्रागप्रमिति MS **32.7** °र्भवति] MS^{pc}; °र्भर्वति MS^{ac} • °त्राग्निः, नद्याः] *em.*; °त्राग्निनद्याः MS^{pc}; °त्राग्निनन्द्याद्याः MS^{ac} **32.9** °गन्धगम्भीर°] *em.*; °गम्भगम्भीर° MS • °विशेषाद्भविष्यति] *em.*; °विशेषात भविष्यति MS **32.10** ननु] *conj.*; चनु MS

त्पन्ननिर्विकल्पकप्रमासम्बन्धमस्या गोचरयन् कथं न प्रमासम्बन्धनिबन्धन इत्याशङ्क्याह– (**अथ वैयात्याद्युत्तर**)**कालतामस्या ब्रूयात्, त्रैविध्यमनुपपन्नम्।** अस्यार्थः– सविकल्पकमविकल्पकं वा विज्ञानं वस्तु गोचरयत्स्वाभावव्यवच्छिन्नं सदे[व] (वस्तुविषय)⟨f.142v⟩मविकल्पस्य सद्गोचरत्वमपह्नुवानो व्यक्तं वैयात्यं गोचरयति। न चैवमप्यस्याभिमतसिद्धिस्त्रैविध्यानुपपत्तेरिति॥ ⊗॥

स्वसंबन्धितया मानमथ वस्त्वधिगच्छति।
तथापि नैव भिद्येत नेत्थं चान्यव्यपेक्षता॥ ३२॥

अथ मतम्– आत्मसंबन्धितयैव प्रमाणेनार्थो ऽवगम्यते। अतो न 'अस्ति' इति बुद्धेरुत्तरकालता प्रमाणसंबन्धविषयाया अपि, स्वात्मसंबन्धितयैवार्थस्य प्रतीतेः। एवमप्यस्तीत्येव सर्वत्र स्यात्। न त्रैविध्यम्, सर्वस्य प्रमितौ प्रमाणसंबन्धस्य वर्तमानत्वात्। न चेत्थं प्रमाणान्तरव्यपेक्षत्वम्, अस्त्यर्थनिष्ठे वचसि तत्प्रमाणसंबन्धस्यैवास्त्यर्थत्वात्।

(द्वितीयस्मिन् कल्पे ऽ)प्यस्य त्रैविध्यानुपपत्त्या मानान्तरापेक्षत्वप्रसङ्गेन च दूषयति– **स्वसम्बन्धितया मानमिति**॥ ⊗॥

अन्यमानावगम्यत्वमथ लिङ्गात् त्रिधेष्यते।
स्याल्लिङ्गमपि सापेक्षं तत्सिद्धेस्तत एव चेत्॥ ३३॥

---

34 .2 तत एव चेत्] *edn* ; तत एव तु alternative reading in *Tattvasamīkṣā* and *Abhiprāyaprakāśikā*

ति विकल्पो ऽनन्तरोत्पन्ननिर्विकल्पकप्रमासम्बन्धमस्य गोचरयेत् कथं न प्रमासंबन्ध इति, अत्राह– भिद्येतेति॥
32.15 Cf. *Bhāvaśuddhi* (323.14–15): एवमपि नाभिमतसिद्धिः; त्रैविध्यानुपपत्तेरिति दूषयति– त्रैविध्यमिति॥
33.1–2 Cf. *Bhāvaśuddhi* (323.17–18): वर्तमानावगम्यत्वमस्त्यर्थ इति द्वितीयकल्पमुत्थापयति– स्वसंबन्धितयेति॥

32.11 °मस्या] °मस्यMS **32.12** इत्याशङ्क्याह] MS^{pc}; इत्यांसंक्याह MS^{ac} **32.13** गोचरयत्स्वा°] *em.*; गोचरयतस्वा° MS **32.14** °मविकल्पस्य] MS^{pc}; (an unfinished akṣara deleted before ल्प) • सद्गोचरत्वमपह्नुवानो] *em.*; सद्गोचरत्वमपद्गोचरत्वमपह्नुवानो MS **32.15** °प्यस्याभि°] MS^{pc}; °प्यस्यभि° MS^{ac} **33.1** °प्यस्य] *conj.*; °न्यस्य MS

नैरपेक्ष्यं यदि न तद्वेदे दण्डैर्निवार्यते।

अथ मतम्– प्रमाणान्तरगम्यतैव लिङ्गेनाधिगम्यते। तेन नोत्तरकालता। तच्च प्रमाणं त्रिकालमिति त्रैविध्यम्। किं पुनस्तत्? प्रत्यक्षम्। तथा हि– भूतायां दृष्टौ कस्यचिद्भूतं प्रत्यक्षम्, भविष्यन्त्यां भविष्यत्, वर्तमानेऽग्नौ वर्तमानमिति। एतच्च वार्तम्, नित्यानुमेये तस्याभावात्। अपि च लिङ्गमप्येवं प्रमाणान्तरापेक्षत्वादप्रमाणं स्यात्। अथ लिङ्गादेव प्रमाणान्तरसद्भावस्य सिद्धेर्निरपेक्षत्वम्। तथा हि– प्रमाणान्तरसद्भाव एवेदानीं लिङ्गं प्रमाणम्। न च तत्रान्यदपेक्ष्यते। प्रमाणसद्भावद्वारा प्रमेयसिद्धिरिति। नायं विधिर्वेदे दण्डवारितः। वैदिकमपि वचोऽस्त्यर्थनिष्ठं विशिष्टार्थप्रमाणसद्भाव एव प्रमाणम्। तत्र निरपेक्षम्। तत्प्रमाणद्वारा च विशिष्टार्थसिद्धिरिति समानम्।

चोदयति–

अन्यमानावगम्यत्व(मथ लिङ्गात् त्रिधेक्ष्य)ते।

प्रत्यक्षमत्रान्यमानमभिमतम्? उत्तरम्– **स्याल्लिङ्गमपि सापेक्षम्**। तदपि हि गिरिरग्निमानिति प्रवर्तमानमग्निसत्ताविशिष्टगिरिगोचरम्, स(त्ता च प्रत्यक्षविष)यतेति प्रत्यक्षापेक्षतया प्रामाण्याच्च्यवेत। चोदक आह– **तत्सिद्धेः** प्रत्यक्षसिद्धेस्तत **एव** लिङ्गादेव **नैरपेक्ष्यं चेल्लिङ्गस्य**। [चेदि](ति निश्चये ऽपि

34.1–9 Cf. *Bhāvaśuddhi* (324.15-325.3): लिङ्गादन्यमानम्=प्रत्यक्षम्, तद्विषयत्वं सत्त्वं लिङ्गगम्यमिति चोदयति– अन्यमानेति॥ दूषयति– स्याल्लिङ्गमिति॥ तदपि हि 'गिरिर्वह्निमान्' इति वर्तमानमग्निसत्ताविशिष्टगिरिगोचरम्, सत्ता च प्रत्यक्षविषयतया, इति सापेक्षतया स्यादप्रमाणमित्यर्थः। चोदक आह– तत्सिद्धेरिति॥ तत एव=लिङ्गादेव, प्रत्यक्षसिद्धेर्नैरपेक्ष्यं लिङ्गस्य 'चेदि'ति निश्चये ऽपि प्रयुञ्जते वृद्धाः॥ 'ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः। शास्त्राणि चेत्प्रमाणं स्युर्यातास्ते परमां गतिम्॥' इति।

34.4 °विशिष्टगिरिगोचरं] *em.*; °विशिष्टगोचरं MS **34.5** प्रत्यक्षापेक्षतया प्रामाण्याच्च्यवेत] *em.*; प्रक्षपेक्षतया प्रामाण्याअउच्यवेत MS **34.6** °सिद्धेस्तत] *em.*; °सिद्धेःस्तत MS • नैरपेक्ष्यं चेल्लिङ्गस्य] *em.*; नैरपेक्षं चेलिंगस्य MS

प्र)युञ्जते वृद्धाः। यथाहुः –

ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः।
शास्त्राणि चेत्प्रमाणं स्युर्यातास्ते परमां गतिम्॥ इति।

उ[त्त](रमाह – **वेदे दण्डैर्नि**)**वार्यत** इति। एवमपि तावदर्थेन लिङ्गस्य निरपेक्षत्वम्, तत्र चानपेक्षतयाप्रामाण्यमिष्यते। अभ्युपेत्यापि दूषणान्तरम्। अभ्युपगम[श्चा](नुमेयप्रत्यक्षस्य।) ⟨f.143ʳ⟩केचित् '**तत एव तु**' इति पठन्ति। स च सुगम एव, **नित्यानुमेये** स्वभावविप्रकर्षवतीन्द्रियादौ **तस्य** प्रत्यक्ष**स्याभावात्**। न च त[द](पि कस्यचिदपि प्रत्यक्षं प्र)मेयत्वात्पटादिवदिति सांप्रतम्। प्रत्यक्षता ह्यस्मदादीन्द्रियग्रहणार्हतया स्वयमप्रकाशस्य व्याप्ता, सा च स्वभाववि[प्र](कर्षिणो निवर्तमाना)स्वामपि निवर्तयति। दृष्टा सा लक्ष्ये, न ह्यनुमानं नैकान्तविलक्षणं गोचरयति। अन्यथा विवादाध्यासितानां क्रमेलकादीना(मनुमाने ऽपि निष्क)र्षे शृङ्गानुमानं प्रसज्येत। अत्यन्तं

34.8–9 *Bṛhaṭṭīkā ??:* ईजाना ··· यातास्ते परमां गतिम्॥

34.10–16 Cf. *Bhāvaśuddhi* (325.9–17): पर आह – अनुमेयप्रत्यक्षस्वीकारे स्यादनुमानवैयर्थ्यमिति, अत्राह – तथा हीति॥ एवमप्यर्थे लिङ्गस्य निरपेक्षतया प्रामाण्यं न स्यादिति दूषयति – एतच्चेति॥ दोषान्तरमाह – नित्यानुमेय इति॥ स्वभावविप्रकर्षवतीन्द्रियादौ तस्य = प्रत्यक्षस्याभावात्सद्बुद्धिर्न स्यादित्यर्थः॥ तदपि कस्यचिदपि प्रत्यक्षम्, प्रमेयत्वात्; घटवदिति, अत्राह – अपि चेति॥ प्रत्यक्षता ह्यस्मदादीन्द्रियग्रहणार्हतया स्वयमप्रकाशमानस्य व्याप्ता (व्याप्त्या *edn*), सा च स्वभावविप्रकर्षिणो निवर्तमाना स्वामपि (तावपि *edn*) निवर्तयति। अङ्गीकृत्यापि दूषणान्तरमिति द्रष्टव्यम्॥

34.12–13 Cf. *Abhiprāyaprakāśikā* as quoted in Shastri 1939:86, fn.9: शास्त्राणि चेत्प्रमाणं स्युरित्यादौ चेदिति [शब्दस्य निश्चये ऽपि प्रयोगाद्यदिना न पौनरुक्त्यम्; तत एव तु इति] पाठे तु न पौनरुक्त्यशङ्कापि। (The text within rectangular brackets is not found in the edition(325.26–27).)

34.8 °ब्राह्मणा] *em.*; °ब्राह्मस्मा MS **34.11** अभ्युपेत्यापि दूषणान्तरम्] *em.*; अभ्युपेपि भून्तरम् MS **34.12** केचित् 'तं वेदे' इति] *em.*; केचित्तं वंवेतः MS **34.13** °कर्षवतीन्द्रियादौ] *em.*; °कर्षवत्तींप्रियादौ MS **34.14** °त्वात्पटादिवदिति] MS^{pc}; °त्वात्पटादितिवदिति MS^{ac} **34.15** ह्यस्मदा°] *em.*; ह्यस्मादा° MS **34.16** सा च] MS^{pc}; च सा च MS^{ac} • स्वामपि] *em.*; वोमपि MS • दृष्टा सा] *em.*; दृष्ट सा MS **34.17** लक्ष्ये न ह्यनुमानं] *em.*; लक्ष्ये मह्यनुनानां MS **34.18** क्रमेलका°] *em.*; कुमेलका° MS • प्रसज्येत] *em.*; प्रज्येत MS • अत्यन्तं] *em.*; अत्यल्प MS

चैतत्सर्वमेव सर्वत्र प्रसज्येत, सर्वस्य सर्वेण कस्यचित्कथंचित्साधर्म्यस्य सम्भवात्स्वभावविरुद्धस्य हेतोरप्य)सुलभत्वात्। इन्द्रियैश्चान्यथानुपपत्तिगम्यत्वात्प्रमेयत्वस्य च प्रत्यक्षतामन्तरेणानुपपत्तेरभावात्सिद्धे नित्यानु(मेयत्वे निरपेक्षं प्र)त्यक्षत्वमिति।

तत्संभवो ऽलौकिकार्थे बुद्धवाक्यार्थवन्न तु॥ ३४॥
अत्रेति साक्षात्करणाभ्युपायादसमञ्जसम्।

स्यान्मतम्– युक्तं लिङ्गस्य प्रामाण्यमेवम्, अर्थे तस्य प्रमाणान्तरस्य संभवात्। संभवति हि वृष्ट्यादिषु प्रमाणान्तरम्। ततस्तद्द्वारार्थगतिः। न तु सर्वविशेषातीते ब्रह्मण्याम्नायैकनिबन्धने ऽभ्युपगम्यते। तत्र यथैव बुद्धादिवाक्यानाम् 'एवमयं पुरुषो वेद' इति ज्ञाननिष्ठानामतीन्द्रियार्थे ज्ञानस्यासंभवान्नार्थे प्रामाण्यमतीन्द्रियार्थोपदेशिनाम्, तथात्रापि स्यात्। संभविप्रमाणविषयाप्तवचनवत्तु लिङ्गस्य प्रमाणनिष्ठत्वे ऽपि युज्यते प्रामाण्यम्। तदसत्, ब्रह्मण्यपि साक्षात्करणस्याभ्युपगमादविद्यासंहारे। अविद्यावतां तु तदाम्नायैकनिबन्धनमुच्यते।

चोद्यमुपन्यस्य दूषयति–

तत्सम्भवो ऽलौकिकार्थे बुद्धवाक्यार्थवन्न तु।
अत्रेति साक्षात्करणाभ्युपाया(दसमञ्जसम्॥

यथा खल्व)लौकिकार्थं बुद्धवाक्यं बुद्धप्रत्ययानुमानद्वारेणापि नार्थस्य निश्चा-

35.1ऽलौकिकार्थे] लैङ्गिके ऽर्थे *edn*

35.4–6 Cf. *Bhāvaśuddhi* (327.4-7): यथा खल्वलौकिकार्थं बुद्धवाक्यं बुद्धप्रत्ययानुमानद्वारेणापि नार्थस्य निश्चायकम्। अशक्यं ह्यलौकिकं बुद्धेन ज्ञातुम्, ऋते प्रमाणान्तरात्। न च तत्प्रमाणान्तरगोचर इत्यर्थः।

34.19 प्रसज्येत] *em.*; प्रसज्येत् MS **34.20** सुलभत्वात्] *em.*; सुलत्वात् MS • इन्द्रियैश्चान्यथा॰] *em.*; इन्द्रियीश्चोन्यथा॰ MS **35.4** ॰लौकिकार्थं] *em.*; ॰लौकिकार्थ MS

यकम्। अशक्यं ह्यलौकिकं बुद्धेन ज्ञातुम्, ऋते प्रमाणान्तरा[त्]।(न च तत्प्रमाणान्तर)⟨f.143ᵛ⟩गोचरम्। एवं ब्रह्माप्यलौकिकतया प्रमाणान्तरागोचर इति तदस्तितानिष्ठा वेदान्ता न प्रमाणं स्युः। मानान्तरगोचरत्वे वा ब्र(ह्म-णो नाम्नायैक)निबन्धनत्वमिति। तदिदमसमञ्जसम्, **ब्रह्मण्यपि साक्षात्करणस्याभ्युपगमात्। अविद्यावतां तु तदाम्नायैकनिबन्धनमुक्तमिति** [श](ब्दप्रयोगो ऽर्थावगम)स्यानन्तरं द्रष्टव्यः॥

अपि च

मेयत्वमेव सत्ता चेन्माने त्रिविधता कुतः॥ ३५॥
तत्संबन्धादतो नार्थे त्रैविध्यमवकल्पते।

यदि च लिङ्गेन प्रमाणमेव मीयते, मीयमानतैव च सत्ता, तत्र प्रमीयमाणत्वात्प्रमाणं सर्वं सदेव। सच्च वर्तमानमित्युच्यते। तत्र वर्तमानत्वात्प्रमाणस्य सर्वत्रार्थे 'अस्ति' इत्येव स्यात्। न प्रमाणत्रैविध्यादर्थे त्रैविध्यम्, मीयमानस्य सत्त्वात्सतश्च वर्तमानत्वादिति।

अपि च मीयमानतायां सत्तायां प्रत्यक्षमपि लिङ्गेन मीयमानं वर्तमानमेवेति तद्वारे[णा](र्थस्य न **त्रैविध्यम्**,)वर्तमानतैव हि स्यादित्याह– **मेयत्वमेव सत्ता चेदिति**।

35.5 Cf. *Śābarabhāṣya I.1.2:* अशक्यं हि तत्पुरुषेण ज्ञातुमृते वचनात्।
35.6–9 Cf. *Bhāvaśuddhi* (326.21–327.3): ब्रह्माप्यलौकिकतया प्रमाणान्तरागोचरः,(°न्तरगोचरः *edn*) इति तदस्तितानिष्ठा वेदान्ता न प्रमाणं स्युः, मानान्तरगोचरत्वे वा ब्रह्मणो नाम्नायैकनिबन्धनत्वमित्यर्थः।
36.1–3 Cf. *Bhāvaśuddhi* (327.14–16): किंच मीयमानतायां सत्तायां प्रत्यक्षमपि लिङ्गेन मीयमानं वर्तमानमेवेति तद्वारेण नार्थस्य त्रैविध्यम्; वर्तमानतैव स्यादित्याह– अपि चेति।

35.5 ह्यलौकिकं] *em.*; ह्यमोकिकं MS **35.6** °गोचरम्] *em.*; °गोचरं MS • °किकतया] *em.*; °किकंतया MS • प्रमाणान्तरा°] MS[pc]; प्रमाणन्तारा° MS[ac] **35.7** मानान्तरगोचरत्वे] *em.*; मानन्तरोगरत्वे MS **35.8** °निबन्धन°] *em.*; °विबन्धन° MS • °मसमञ्जसम्] *em.*; °मसमज्जातां MS **35.8-9**साक्षात्करणस्याभ्युप°] *em.*; साक्षाचाभ्युप° MS **35.10** °नन्तरं द्रष्टव्यः] *em.*; °नन्तरन्द्रव्यः MS **36.1** मीयमानतायां] *em.*; सीयमानताया MS • मीयमानं] *em.*; मीयमान MS **36.2** तद्वारेणा°] *em.*; तद्वारेणा° MS

अपि च इदमयं प्रष्टव्यः– किं वर्तमानप्रमाणयोगः प्रमाणसंबन्धः सत्ता, तद्विपर्ययो ऽसत्ता, आहोस्वित्प्रमाणयोगमात्रमनाश्रितकालविशेषम्? तत्र–

वर्तमानप्रमायोगः सत्तासत्ता विपर्ययः॥ ३६॥
मते यदि ततः प्राप्तमसत्त्वं स्मृतिगोचरे।

न स्मर्यमाणस्य वर्तमानप्रमाणसंबन्धः। ननु स्मर्यमाणे विनाशसंभवान्नैव 'अस्ति' इति व्यवहारः। सत्यम्। 'नास्ति' इत्यपि नास्ति। यदि वर्तमानप्रमाणयोगः सत्ता तद्विपर्ययो ऽसत्ता, 'नास्ति' इत्येव स्यान्न च 'अस्ति' इति। तस्मादन्ये सदसत्त्वे।

प्रमाणयोगमात्रं चेत्सत्तासत्ता विपर्ययः॥ ३७॥
प्राप्ता प्रमितनष्टेन घटेन मधुधारणा।
प्रमिते च न जिज्ञासा पुनः स्यात्सदसत्त्वयोः॥ ३८॥

अनाश्रितकालविशेषे प्रमाणयोगमात्रे सत्त्वे प्रमितनष्टमपि वस्तु सदिति तेनार्थक्रियाप्रसङ्गे ऽनष्टेनेव, सत्त्वाविशेषात्। नष्टानष्टयोर्विशेषान्नैवमिति चेत्, स एव तर्हि विशेषः सदसद्व्यवहारव्यवस्थाया हेतुः कार्यव्यवस्थाया इव, न प्रमाणयोगः। तदनुसारिण्येवैषा दृश्यते लोके। न खलु प्रमितनष्टं 'सत्' इत्युपचरति लोकः। किं च प्रमिते ऽर्थे सदसत्त्वे जिज्ञासेरन्न पुनर्लौकिकाः, सिद्धत्वात्प्रमाणयोगमात्रस्य तल्लक्षणत्वाच्च सत्त्वस्य।

प्राप्तमसत्त्वं स्मृतिगोचर इति। स्मृतेरप्रमाणत्वेन तद्गोचरो न वर्त(मान-

---

37.1–2 Cf. *Bhāvaśuddhi* (328.10–11): स्मृतेरप्रमाणत्वेन तद्गोचरो न वर्तमानप्रमाणगोचरः, अपि तु निवृत्तप्रमाणगोचर इत्यर्थः।

37.1 तद्गोचरो न] *em.*; तद्गोचरो MS

प्रमाणगोच)रो ऽपि त्वनिवृत्तप्रमाणगोचर इत्यर्थः। **न खलु प्रमितनष्टं सदि-** त्युपचरति लोक इत्युपचारः शब्दप्रयोगो [गो](चरमेवार्थमनु)तिष्ठति।

अथ प्रमाणयोग्यत्वं सत्ता नष्टाच्च तच्च्युतम्।
स्मर्यमाणे प्रचलितं क्वचिदित्यप्यसुन्दरम्॥ ३९॥

अथ मतम्– न वर्तमानप्रमाणयोगः सत्ता, नानाश्रितकालं तद्योगमात्रम्। अपि तु प्रमाणं प्रति योग्यता। सा च नष्टाच्च्युतेति न तस्य सत्त्वप्रसङ्गः। स्मर्यमाणे तु कुतश्चिच्च्युता कुतश्चिन्नेति न सर्वस्यासत्त्वमिति। एतदपि न सुन्दरम्, अभ्युपगतहानात्। तथा हि– इत्थमर्थस्वभाव एव सत्ता वर्णिता भवति। प्रमाणयोग्यो ऽर्थस्वभावः सत्ता, अर्थस्वभावनिबन्धन एव सदसद्व्यवहारविभागः, न प्रमाणतदभावोपाधिः। तस्य त्वेष कथनोपायः, न प्रमाणसंस्पर्शः, यथा 'नीलाकारज्ञानयोग्यो ऽर्थो नीलः' इत्याख्याते ऽपि न नीलशब्दो नीलज्ञानोपाधिः। तथा च सो ऽस्तिशब्देनाभिधीयत इत्यर्थस्वभावनिष्ठमस्त्यर्थप्रधानं वाक्यमिति कुतः सापेक्षत्वम्? प्रमाणस्यासंस्पर्शात्।

अथ प्रमाणयोग्यत्वं सत्ता। न चैवं सति प्रमितनष्टेन घटेन मधुधारणप्रसक्तिरित्याह– **नष्टाच्च**। तद्योग्यत्व(मर्थस्वभावः। तस्मिन्)धर्मिणि घटे तद्धर्मः सामर्थ्यं प्रत्युत्पन्नं संभवति। नापि स्मर्यमाणस्याभावनिश्चयान्न संदे-

---

38.1सत्ता] AB; सत्त्वं *edn*

38.1–5 Cf. *Bhāvaśuddhi* (330.5–10): परश्चोदयति– अथेति॥ न चैवं सति प्रमितनष्टघटेन मधुधारणाप्रसक्तिरित्याह– नष्टाच्चेति॥ धर्मिण्यसति धर्मासम्भवात्। नापि स्मर्यमाणस्य; अभावनिश्चयाद्, न सन्देह इत्याह– स्मर्यमाण इति॥ प्रचलितम्=व्यभिचारः, ततः संशयो युक्त इत्यर्थः। दूषयति– इत्यपीति॥

37.2 °रो ऽपि त्वनिवृत्त] MS^{pc}; °रत्वे ऽपि त्वनिवृत्त MS^{ac} **38.1** प्रमाणयोग्यत्वं] *em.*; प्रामाण्ययोग्यत्वं MS • प्रमितनष्टेन घटेन] *em.*; प्रतित ˉष्टेन घटो न MS **38.2** धर्मिणि घटे] *em.*; धर्मणि घटो MS **38.3** °निश्चयान्न] *em.*; °विस्वयान्न MS

ह इत्याह– **स्मर्यमाणे प्रचलित**(मिति। क्वचित्प्रचलि)⟨f.144^{r}⟩[तेन व्यभि]-चारस्ततः संशयो युक्त इत्यर्थः। अस्यासाधुतां प्रतिजानीते– **इत्यप्यसुन्द-रमिति**। कारिकाप्रतिज्ञातमसौन्दर्यं प्रति [हेतु](माह– **अभ्युपगतहानाद्**िति। तदेतस्योपपत्तिं स्मारयति– **तथा हीत्थमर्थस्वभावनिबन्धन एव सदसद्व्यव-हारविभाग** इति। सत्त्वासत्त्वे अर्थ्यमाणत्वादर्थे उक्ते। य[द्यर्थ](स्वभावः **सत्ता** कुतस्तर्हि) प्रमाणयोग्यतोपन्यास इत्यत आह– **तस्य त्वेष कथनोपायो न प्रमाणसंस्पर्श** एव सत्तेति। अत्रैव निदर्शनमाह– **यथा नीले**[ति]। (तथा च प्रमाणस्या)विनिवेशान्न सापेक्षता ब्रह्मस्वभावसत्तानिष्ठानामपि वेदान्ताना-मित्याह– **तथा** चेति।

स्यादेतत्– भिन्ना एवार्थस्वभावाः प्रमाणं प्रति योग्याः स-च्छब्दवाच्याः सन्तु, नैका सत्ता। मा भूत्। एतत्साध्यम्– सर्वथार्थस्वभावाभिधाय्यस्तिशब्दो न प्रमाणयोगनिमित्त इति। प्रमाणसंस्पर्शे हि सापेक्षता स्यात्। अनेकता तु न कञ्चिद्दोषमा-वहति। अपि च यदि तस्यानेकत्वम्, कथमभिन्नशब्दप्रवृत्तिः? तथा हि– भिन्नेष्वभिन्नं विशेषणमुपलक्षणं वाश्रित्यैकः शब्दो वर्तेत, भिन्ननिमित्तो वा साधारणशब्दः स्यादक्षादिवत्। तत्र न तावदनन्तार्थस्वभावेषु साधारणत्वमुपपद्यते, संबन्धग्रहण-

---

39.2 एतत्साध्यं] नैतत्साध्यं *edn*

38.8–12 Cf. *Bhāvaśuddhi* (330.16-331.5): न तावद्योग्यतामात्रं सत्त्वम्; तदतीन्द्रिय-त्वादपरोक्षव्यवहारविरोधात्, किं तु यस्य योग्यता, अर्थस्वभावः सत्तेत्यर्थः। कुतस्तर्हि प्रमाणयोग्यतोपन्यास इति? अत्राह– तस्य त्विति॥ न प्रमाणसंस्पर्शन एव सत्तेत्यर्थः। अत्रैव निदर्शनमाह– यथेति॥ तथा च प्रमाणस्यानिवेशान्न (°स्या (पि?) निवेशान्न *edn*) सापेक्षता ब्रह्मस्वभावसत्तानिष्ठानामपि वेदान्तानामित्याह– तथा चेति॥

38.5 अस्यासाधुतां प्रति°] *em.*; अस्यासाधुता प्रतति° MS; (त without head mark) **38.6** °मसौन्दर्यं] *em.*; °मसौन्दर्य MS **38.7** °तस्योपपत्तिं स्मारयति] *conj.*; °त-स्योरयति MS • हीत्थमर्थ°] *em.*; हीत्थ अर्थ° MS **38.8** सत्त्वासत्त्वे अर्थ्यमाणत्वाद-र्थे] *em.*; सत्थासत्त्वे अर्यमाणत्वादर्थ MS **38.9** °योग्यतोप°] MS^{pc}; °योग्योतोप° MS^{ac} **38.10** एव सत्तेति] MS^{pc}; एवं सत्वेति MS^{ac} **38.11** °विनिवेशान्न] *em.*; °विनिवेसात न MS; सा *ow.* MS

सामर्थ्यात्। परिमितजातिविषया ह्यक्षादिशब्दाः परिमितोपलक्षणलक्षिता वा स्युः।

नन्वर्थस्वभावे ऽपि नैका सत्ता सिध्यति, भि[न्ना](नामपि तत्स्वभावानां) खण्डमुण्डादीनामुपलम्भादिति ⟨चोदयति–⟩ **स्यादेतद्भिन्ना** इति। किं तर्हि भवतां साध्यमित्याह– **एतदिति**। अपि चाभ्युपेत्यैतदुक्तम्, परमार्थ[(तस्त्वनन्तार्थ)]स्वभावस्यैकत्वमेव, नानात्वे सति व्यपदेशाभेदानुपपत्तेरित्याह– **अपि च यदीति**। उक्तमर्थमुपपादयितुं संकल्पत्र[य](माह– **तथा**) ⟨f.144v⟩ **हि भिन्नेष्विति**। आकाशदिक्कालशब्दैः साक्षान्नियतव्यक्तिनिवेशिभिः सच्छब्दस्य नैमित्तिकप्रवृत्तेरसाधर्म्यमिति परि(मितोपलक्षणम्)। तेन सह सधर्माणो विचारयति– **तदुक्तं भिन्नेष्विति**। **विशेषणं** गोत्वादि तत्किलाकारः स्वरूपविनिवेशेनाकारिणीं व्यक्ति(मनुरञ्जयति, अयुत)सिद्धं हि तत्। **उपलक्षणं** तु दण्डकुण्डलादि। दण्डकुण्डलिनः कण्ठादेः पृथगाश्रयत्वेन वा, पृथगिति सत्त्वेनासत्त्वेन वा, युतसिद्धं न(कण्ठादीनात्मनि)वेशेनानुरञ्जयति, अपि तूपलक्षयत्येतद्बाह्यो व्यवच्छेदादिति। तत्र साधारणशब्दतामक्षादिपदवत्स-

39.1–3 Cf. *Bhāvaśuddhi* (331.6-9): अर्थस्वभावे ऽपि नैका सत्ता सिध्यति; भिन्नानामपि तत्स्वभावानां खण्डमुण्डादीनामुपलम्भादिति चोदयति– स्यादेतदिति। परिहरति– मा भूदिति॥ किं तर्हि भवतां साध्यमिति? तदाह– सर्वथेति॥
39.5–12 Cf. *Bhāvaśuddhi* (331.16-332.7): उक्तमुपपादयितुं विकल्पयति– तथा हीति॥ आकाशकालादिशब्दैः साक्षान्नियतव्यक्तिनिवेशिभिः सच्छब्दस्य नैमित्तिकप्रवृत्तेरसाधर्म्यमिति नैमित्तिकप्रवृत्तीरेव तेन सह धर्मिणो विचारयति– भिन्नेष्विति॥ विशेषणं गोत्वादि तत्स्वरूपनिवेशेन व्यक्तिमनुरञ्जयति। अयुतसिद्धं हि तत्, उपलक्षणं तु दण्डकुण्डलादि। दण्डकुण्डलिनः कण्ठादेः पृथगाश्रयत्वेन पृथगिति सत्त्वेन, असत्त्वेन वा युतसिद्धं न कण्ठादीनात्मनिवेशेनानुरञ्जयति, किन्तूपलक्षयति; एतद्बाह्यो व्यवच्छेदादिति।

39.3 चाभ्युपेत्यैत॰] MS^{pc}; चाभ्युपेयत्यैत॰ MS^{ac} **39.4** सति] *em.*; सदिति MS **39.6** ॰व्यक्तिनिवेशिभिः] *em.*; ॰व्यक्तिनिविसभिः MS **39.6-7** सच्छब्दस्य] MS^{pc}; सत्शब्दस्ये MS^{ac} **39.7** ॰प्रवृत्तेर॰] MS^{pc}; ॰प्रवृत्तिर॰ MS^{ac} • ॰साधर्म्यमिति] *em.*; ॰साधर्मामिति MS^{ac} • सधर्माणो] *conj.*; सधर्मणो MS **39.8** गोत्वादि] *em.*; गोत्वादिति MS **39.8-9**स्वरुपविनिवेशे॰] *em.*; स्वरूविनिवेशे॰ MS **39.9** ॰सिद्धं] MS^{pc}; ॰सिद्धिं MS^{ac} • तत्।] *em.*; तता MS **39.10** कण्ठादेः] *conj.*; कठादेः MS • पृथगि॰] *em.*; पृथग्ग॰ MS **39.11** सत्त्वेनासत्त्वेन वा] *em.*; सत्त्वेन वा MS • युतसिद्धं] *em.*; युतत्सिद्धं MS **39.12** तूपलक्षयति, एतद्बाह्यो] *em.*; नूपलक्षयत्यतद्बभ्यो MS^{pc}; नुपलक्षयत्यतद्बयोभ्यो MS^{ac} **39.12-13**॰तामक्षादिपदवत्सच्छब्दस्य] *em.*; ॰तापक्षादिपदवत् संसब्दस्य MS

च्छब्दस्य दूषयति– (तत्र न तावदिति।) **अक्षादिशब्दा** इति। आदिशब्देनाक्षवानित्यादयो ग्राह्याः, ततश्च परिमितोपलक्षणलक्षिता वेत्युपपन्नं भवति। बिभीत[का](दयो ऽक्षशब्देन ग्रा)ह्याः, बह्वर्थत्वात्।

स्यादेतत्– द्रव्यत्वादिसामान्यत्रयोपलक्षितानामर्थानां सच्छब्दः साधारण इति। तन्न। यो हि सत्तामवजानीते स द्रव्यत्वादीन्यप्यवजानीत एव। न किल तेजो दृष्टवतो ऽप्सु तदवमर्शो भवति। अपि च सामान्यविशेषसमवाया अपि सन्त एव। न तेष्वौपचारिकः सच्छब्दः प्रत्ययस्यावैलक्षण्यात्। न च सामान्याद्भिनोपचारः। सति वा सामान्ये तदेव सच्छब्दार्थः। तदेव च सत्ता, तुल्यत्वात्प्रत्ययस्य।

चोदयति– द्रव्यत्वकर्मत्वगुणत्वसामान्यत्रयोपलक्षिता यथास्वं पृथिव्यादयः सच्छब्दास्पदं भवि(ष्यन्त्यक्षादि)⟨f.145ʳ⟩पदवाच्या इव, तत्किमेकसत्त्वसामान्यग्रहेणेत्यर्थः। तदेतद्दूषयति– **तन्नेति**। विशदतरपूर्वावमर्शाभावेन ख[ल्व](यं सत्तासामान्यमपह्नु)वानो द्रव्यत्वादिसामान्यमपि न गोचरयत एव। न ह्यत्रापि विशदतरः पूर्वावमर्शः। तदिदमाह– **न किलेति**। [क](थं सच्छब्दः

40.1–4 Cf. *Bhāvaśuddhi* (332.15–17): द्रव्यत्वगुणत्वकर्मत्वसामान्यत्रयोपलक्षिता यथायथं सच्छब्दास्पदं पृथिव्यादयो भविष्यन्ति, किमेकसत्त्वसामान्यस्वीकरेणेति चोदयति– स्यादेतदिति॥ दूषयति– तन्नेति॥ विशदतरपूर्वावमर्शाभावेन खल्वयं सत्तासामान्यमपह्नुवानो द्रव्यत्वादिसामान्यमपि न गोचरयत(रोचत *edn*) एव। तत्र हेतुमाह– नेति॥ विशदपूर्वावमर्शाभावादित्यर्थः।
40.5–13 Cf. *Bhāvaśuddhi* (333.2-8): सच्छब्दः साधारण इति वदतः सामान्यादौ सच्छब्दप्रयोगो लौकिको न स्यादित्याह– अपि चेति॥ सामान्यादेः सत्तयैकार्थसमवायात्तत्र औपचारिक इति, अत्राह– न तेष्विति॥ औपचारिकत्वे ऽपि प्रयोगप्राचुर्यात्प्रत्ययावैलक्षण्यमुपपद्यते, इति यो न परितुष्यति(योगः परिशु(शि)ष्यति *edn*), तं प्रति हेत्वन्त-

---

39.13 अक्षादिशब्दा इत्यादि॰] *em.*; अक्षादिशब्दादित्यादि॰ MS **39.14** ग्राह्याः] *em.*; प्राह्य MS^{pc}; प्राह्या MS^{ac} **39.15** बिभीतका॰] MS^{pc}; बिभीकतका॰ MS^{ac} **39.15** ॰ह्याः, बह्वर्थत्वात्] MS^{pc}; ॰क्या पहुचत्वात् MS^{ac} **40.1** ॰त्रयोपलक्षिता] *em.*; ॰त्वयोपलक्षिता MS **40.2** ॰पदवाच्या] *em.*; ॰पदवाद्या MS^{pc}; ॰पदवावद्या MS^{ac} **40.4** गोचरयत एव।] *em.*; गोचरयतः एवा MS; गो *ow.* MS **40.5** किलेति] *em.*; किलेति इति MS

साधारण इ)ति। अपि चैवं वदतो निःसामान्येषु सामान्यविशेषसमवायेषु नालौकिकः सच्छब्दः प्रवर्तेतेत्याह– **अपि चेति**। ननु प्र(त्ययाविशेषादुप-चा)रस्य मुख्यत्वमपि। तदयमौपचारिको भविष्यति तद्विधस्यापि लोके दर्शनादित्यत आह– **न तेष्वौपचारिकः सच्छब्दः(प्रत्ययस्यावैल)क्षण्यात्।** यस्त्वौपचारिकत्वे ऽपि प्रयोगप्राचुर्यात्प्रत्ययावैलक्षण्यमुपपद्यत इति न प-रितुष्यति तं प्रति हेत्वन्तर[मा](ह– **न च सामान्यादिति**।)सादृश्यं वा सहचरणादि वोपचारनिबन्धनम्, असति तस्मिन्नोपचारो गौणी लाक्षणि-की वा वृत्तिः सच्छब्दस्य न भवेत्। न (तावद्व्यक्तीनामेकार्थ)समवायात्तेष्वपि सच्छब्द इति युक्तम्। समवायस्य तदभावादसत्त्वेन तदेकार्थसमवायाभावा-त्मनः सामान्यादेर्भक्तेरनु(पपत्तिः। विशेष्यविशेषण) ⟨f.145[v]⟩भावेन वा सम-वायस्य तदुपपत्तावभावस्यापि सत्त्वप्रसङ्गः। तस्मात्पदार्थानां षण्णामपि स्व-रूपसत्त्वमिच्छद्भिरकामैरपि [प](रिमितोपलक्षणं सत्ता)सामान्यमभ्युपेतव्यम्। तदभावे भक्तेरभावेन भाक्तस्यापि प्रयोगस्यानुपपत्तेरित्यर्थः।

अथ मतम्– सर्वप्रवादेषु सर्वपदार्थाः परिमितैः कैश्चिद्धर्मैरु-पसंगृहीताः। तदुपलक्षणानामनन्तानामप्यर्थानां ‘सत्’ इति साधारणः शब्दः। तदयुक्तम्। संग्रहो हि नैकमन्तरेण।

रमाह– न च सामान्यादिति॥ सादृश्यं वा, सहचरणादि वोपचारनिबन्धनम्; असति तस्मिन्नुपचारो गौणी लाक्षणिकी वा वृत्तिः सच्छब्दस्य न भवेदित्यर्थः।

40.13–17 Cf. *Bhāvaśuddhi* (333.20–24): अथेहापि सत्तासंबन्धाद्व्यक्तिसंबन्धित्वमुपचा-रे निमित्तम्, नैवम्; संबन्धस्यानिरूपणात्। न तावद्व्यक्तिसमवायः संबन्धः; समवाये समवायान्तराभावेनोपचाराभावप्रसङ्गात्। नापि विशेषणविशेष्यभावः, अभावे ऽपि सद्व्य-वहारापत्तेः। अत उपचारमिच्छतां षण्णां पदार्थानां स्वरूपसत्त्वमङ्गीकुर्वतां तेषामनुगतं न सत्तासामान्यमपलपनीयमित्यर्थः।

40.6 °समवायेषु] *em.*; °समवाये MS **40.7** प्रवर्तेतेत्याह] *em.*; प्रवर्त्ततेत्याह MS **40.9** °क्षण्यात्] *em.*; °क्ष्यण्यात् MS **40.10** °प्राचुर्यात्प्रत्ययावैलक्षण्यमुप°] *em.*; °प्राचर्यात्प्रत्यक्षायावैलस्यमुप° MS **40.11** तं प्रति] MS[pc]; संप्रति MS[ac] **40.12** °च-रणादि] र *ow.* MS • °निबन्धन°] ब *ow.* MS[ac] **40.12–13**लाक्षणिकी वा] *em.*; लक्षणि MS **40.14** सच्छब्द] MS[pc]; संत्सब्द MS[ac] **40.14–15**°भावात्मनः] *em.*; °भावात्मा MS **40.15** सामान्यादेर्भक्ते°] *em.*; सामान्यादर्भक्ते° MS

पुनः शङ्कते– **अथ मतम्– सर्व[प्र]वा(देषु सर्वपदार्थाः परिमितैः)** किल रूपत्वविज्ञानादिभिः पञ्चस्कन्धाः, चैतन्यदृश्यत्वादिभिः प्रकृतिपुरुषौ वा, द्रव्यत्वगुणत्वादिभिः षट्पदार्था वोपसं(गृहीताः, तेन तेषां तत्सं)ग्रहोपलक्षितानामनन्तानामप्यर्थानां सदिति साधारणशब्दः। एतद्दूषयति– **तदयुक्तम्**। कुतः? **संग्रहो हि नैक[म](न्तरेण** भवति। यथा नरत्वे)नैकेनोपसंगृहीताश्चत्वारो वर्णा ब्राह्मणत्वादिधर्मभाजः, रसत्वेन वा नव शृङ्गारादयः, तद्वदेते पञ्चस्कन्धा वा रू[पा](दयः, दृश्यचैतन्ये प्रकृति)पुरुषौ वा, षट्पदार्था वा द्रव्यादयः, येनैकेनोपसंगृहीताः प्रवादेषु तदेकं वक्तव्यम्।

तत्र यदि सच्छब्दार्थतया संग्रहः 'एतावत्प्रभेदः सच्छब्दार्थः' इति, नार्थान्तरनिवृत्तिः स्यात्। तत्र न सर्वार्थसंग्रहः स्यात्, यथा 'नवविधो गोशब्दार्थः' इति नान्येषामभाव एव। तत्र

42.1सच्छब्दार्थतया] सच्छब्दतायां *edn*

41.1–4 Cf. *Bhāvaśuddhi* (333.12-334.4): अथेति॥ परिमितैः किल रूप(त्व)विज्ञानादिभिः पञ्चस्कन्धाः, द्रष्टृत्वदृश्यत्वाभ्यामात्मानात्मानौ वा, द्रव्यत्वादिभिः षट्पदार्था वोपसंगृहीताः। तेन तत्संगृहीतास्ते न तत्संग्रहोपलक्षितानामनन्तानामप्यर्थानां सदिति साधारणशब्द इत्यर्थः।

Cf. *Abhiprāyaprakāśikā* (333.26–29): अथेति॥ रूपविज्ञानादिभिः पञ्चस्कन्धाः, चैतन्यदृश्यत्वादिभिः प्रकृतिपुरुषौ वा, द्रव्यगुणत्वादिभिः षट्पदार्था वा परैरुपसंगृहीताः, तदुपलक्षितेषु विनाप्येकं निमित्तं सच्छब्दः साधारणः किं न स्यादिति भावः।

41.4–8 Cf. *Bhāvaśuddhi* (334.4-8): दूषयति– तदयुक्तमिति॥ हेतुमाह– संग्रहो हीति। यथा नरत्वेनैकेनोपसंगृहीताश्चत्वारो वर्णा ब्राह्मणत्वादिधर्मभाजः, तद्वदेते पञ्चस्कन्धादयः पदार्थाः, येनैकेनोपसंगृहीतः प्रवादेषु, तदेकं वक्तव्यम्॥

Cf. *Abhiprāyaprakāśikā* (334.19–22): तदयुक्तमिति॥ यथा नरत्वेनैकेनोपसंगृहीताश्चत्वारो वर्णा ब्राह्मणादयः, रसत्वेन वा सङ्गृहीता नव शृङ्गारहास्यादयः, तथात्रापि पञ्चद्वित्वादिसङ्ख्यानिवेशयैकं निमित्तं वक्तव्यमिति भावः॥

41.2 °स्कन्धाः] *em.*; °स्कन्धा MS • °त्वादिभिः] MS^{pc}; °त्वदिभिः MS^{ac} **41.3** षट्पदार्था] *em.*; षट्पर्था MS • वोपसं°] MS^{pc}; वा। उपसंमृ° MS^{ac} **41.4** साधारणशब्दः] MS^{pc}; साधारणब्दशब्दः MS^{ac} **41.5** संग्रहो] MS^{pc}; संहग्रहो MS^{ac} (ह without head mark) **41.5-6** °श्चत्वारो] *em.*; °श्चरो MS **41.6** वर्णा] MS^{pc}; वर्णाब्र MS^{ac} (an unfinished akṣara deleted before ब्रा) • °रादयः] MS^{ac}; °रादयाः MS^{pc} • तद्वदेते] *em.*; तदेते MS **41.7** षट्पदार्था वा] *em.*; ट्पदार्था वा MS^{pc}; ट्पदादार्थाना वा MS^{ac} **41.8** येनैकेनो°] *em.*; यनैकेनो° MS

न प्रवादेभ्यः काचिदर्थतत्त्वावगतिः स्यात्। ननु न प्रवादानामर्थवत्ता साध्या। न ब्रूमः प्रवादानामर्थवत्ता साध्येति। किं तु प्रतिपद्यन्ते प्रवादिनः कंचिदर्थस्वभावमेकम्, यस्यायं 'पञ्च, षट्' इत्यादि प्रभेदसंग्रहः। यतो नैकमन्तरेणोपसंग्राहकमवान्तरसंख्यानां निवेशः।

तत्र यदि सच्छब्दार्थत[या] (**संग्रह एतावत्प्रभे**)**दः सच्छब्दार्थ इति**, **ततो नार्थान्तरस्य** षष्ठस्य तृतीयस्य वा **निवृत्तिः स्यात्**। अथ मा भून्निवृत्तिः किमत इत्य[त्रा](ह– **तत्र न सर्वार्थसं**)⟨f.146ʳ⟩**ग्रहः स्यात्**, न पदार्थाः संगृह्येरन्, अन्येषामपि संभवात्। अत्रैव निदर्शनमाह– **यथा नवविधो गोशब्दार्थ इति नान्येषामभा**[भा](**व एव**। अथ मा भूत्संग्रह)स्तथापि किमित्यत आह– **तत्र च प्रवादेभ्यः काचिदर्थतत्त्वावगतिः स्यादि**ति। चोदयति– **ननु ने**ति। मा भूत्सिद्धान्तभेदिनाम[र्था](नां संग्रहः, न केनापि)समालिङ्गितमेकदा विश्वमिति। उत्तरम्– **न ब्रूम** इति। सत्यमेतत्, किं तु यदधिष्ठानाः प्रवादाः स खल्वेको ऽर्थः सर्वतन्त्रसि(द्धान्तो ऽभ्युपगन्तव्यः,) विवादाभावात्। न खल्वात्मास्तित्ववादिनो नरविषाणनास्तित्ववादिनः प्रति विप्रतिपद्यन्ते, नापि समानविषयत्वे ऽपि [नि](ष्प्रपञ्चब्रह्मवादि)नं प्रति चेतन आत्मेति संगिरमाणाः। तस्मात्समानाधिकरणौ परस्परविरुद्धौ पक्षप्रतिपक्षौ विवादाधिकरणौ। तथा (च सदधिष्ठानाभ्युपगम)स्तदनभ्युपगमे वैयधिकरण्येन विवादाभावप्रसङ्गात्। सो ऽर्थः समस्तप्रवादिसिद्धो ऽभ्युपेतव्यः। सदधिष्ठानश्चायं सर्व-

---

42.2–3 Cf. *Bhāvaśuddhi* (334.14): मा भून्निवृत्तिः, किमत इति? अत्राह– तत्र नेति॥
42.8–9 Cf. *Bhāvaśuddhi* (335.3-5): न ब्रूम इति॥ किमुच्यते तर्हीति? अत्राह– किन्त्विति॥ यदधिष्ठानः प्रवादः, स खल्वेको ऽर्थः सर्वतन्त्रसिद्धान्तो ऽभ्युपगन्तव्य इत्यर्थः।
42.14–16 Cf. *Bhāvaśuddhi* (335.5-8): एतावन्त एव प्रमाणभूमौ पदार्था इत्यवधारणार्थमवान्तरसंख्यानिवेशः सामान्यमन्तरेण न युज्यते, यथा नव द्रव्याण्येकादशेन्द्रियाणीति वेत्यर्थः।

42.1 सच्छब्दार्थ॰] *em.*; संसब्दार्थ॰ MS **42.2** षष्ठस्य] *em.*; षष्ठ ¯MS **42.3** स्यान्न] *em.*; स्यानु MS **42.4** नवविधो] *em.*; नविधो MS **42.5** किमित्यत] *em.*; कित्यत MS **42.6** प्रवादेभ्यः] *em.*; प्रत्यदेभ्यः MS **42.7** समालिङ्गित॰] MS[pc]; ससमालिंगित॰ MS[ac] **42.8-9** खल्वेको] *em.*; खल्वको MS **42.10** नरविषाणनास्तित्ववादिनः] *em.*; नरणविषाणनास्विवदिनः MS **42.11** ॰नं प्रति] *em.*; ॰ना प्रति MS **42.14** सो ऽर्थः] *em.*; सो ऽर्थ MS

(प्रवादिनामवान्तरसं)ख्यादिषु विवाद इति सदर्थः सर्वतन्त्रसिद्धान्तः। न च वादिनां सच्छब्दवाच्यतायां विवादः किं तु तदर्थे। न चावान्तर(**संख्यानां निवेश**) ⟨f.146^{v}⟩ **उपसंग्राहकमेकमन्तरेण**। अपेक्षाबुद्धिप्रभवा हि ताः, न चैकमन्तरेण संकलनं भवतीत्यभिप्रायः।

अथैतावान् प्रमाणयोग्यो ऽर्थक्रियासामर्थ्यो वेति प्रमाणयोग्यत्वे ऽर्थक्रियासामर्थ्ये वा संग्रहः, ताभ्यामेव सच्छब्दार्थ उपलक्ष्यताम्, व्यर्थः परिमितधर्मोपन्यासः। तत्र सामान्यशब्दतैव स्यात्, न साधारणशब्दता।

ननु मा भूत्सत्त्वमेकं सामान्यम्, प्र[मा](णयोग्यत्वमर्थक्रिया)कारित्वं वैकमुपसंग्राहकं भविष्यतीति चोदयति– **अथेति**। परिहरति– **ताभ्यामेव सच्छब्दार्थ उपलक्ष्यताम्, व्यर्थः परिमितधर्मो**(पन्यासः। परिमित)धर्मेषु पञ्चसु षट्सु वा सदिति साधारणशब्द इति व्यर्थम्, अर्थक्रियाकारित्वस्य ⟨मानयोग्यत्वस्य⟩ वा साधारणस्यैव प्रवृत्तिनिमित्तस्य भावात्। **तत्र सामा**[**न्य**](**शब्दतैव स्यात्**), नापि साधारणमस्तीति पारिशेष्यात्सत्त्वमेव साधारणमभ्युपेतव्यं भावेषु। भावाभावसाधारणं तु प्रमात्वोपहितम[र्थ](क्रियाकारित्वम्, त)देव च सर्वतन्त्रसिद्धान्तः, तदाश्रयत्वादेव सिद्धान्तभेदिना-

---

43.1–5 Cf. *Bhāvaśuddhi* (335.9–15): मा भूत्सत्त्वमेकं सामान्यम्, प्रमाणयोग्यत्वम्, अर्थक्रियाकारित्वं वैकमुपसंग्राहकं भविष्यतीति चोदयति– अथेति॥ परिहरति– ताभ्यामिति॥ परिमितधर्मेषु पञ्चसु षट्सु वा सदिति साधारणशब्द इति व्यर्थम्, अर्थक्रियाकारित्वस्य मानयोग्यत्वस्य वा साधारणस्यैव प्रवृत्तिनिमित्तस्य भावादित्यर्थः।
43.4–7 Cf. *Abhiprāyaprakāśikā* (335.27–29): तत्रेति॥ मानयोग्यत्वस्य, अर्थक्रियाकारित्वस्य वा प्रतिवस्तु विलक्षणतया साधारणस्यासम्भवात्साधारणतया सत्त्वमेव परिशिष्यत इत्यर्थः।

42.15 सर्वतन्त्र॰] MS^{pc}; सर्वःतन्त्र॰ MS^{ac} **42.16** तदर्थे। न चावान्तर॰] *conj.*; तदर्था न चावात्यन्तर॰ MS^{ac} (an unfinished akṣara deleted before र) **42.17** उपसंग्राहक॰] उपसंग्रहक॰ MS^{pc}; उपंसंग्रहक॰ MS^{ac} **43.1** भूत्सत्त्वमेकं] *em.*; त्सत्त्वमेकं MS • सामान्यम्] *em.*; सामान्य MS • ॰कारित्वं] *em.*; ॰कारित्व MS **43.2** ताभ्यामेव] *em.*; ताभ्यामिव MS **43.3** उपलक्ष्यताम्] *em.*; उपलक्ष्यता MS • षट्सु] *em.*; षप्सु MS **43.5** अर्थक्रियाकारित्वस्य] *em.*; अर्थकारित्वस्य MS **43.5** भावात्। तत्र] *em.*; भावातत्र MS **43.6** नापि] *em.*; नपि MS **43.7** ॰रणमभ्यु॰] *em.*; ॰रणसभ्यु॰ MS

मर्थानाम्। न तु सत्त्वमभेदाव्यापकत्वाभ्यां तदाश्रयत्वादपि विवादस्ये(ति भिन्ननिमित्तानां सा)धारणशब्दानामक्षादीनां तद्भावः।

भिन्ननिमित्तत्वे चाक्षादिशब्देभ्य इव निमित्तभेदात्संशयः स्यात्, न विशेषप्रतीतिः। न हि 'सन् घटः' इति निमित्तभेदेषु प्रतिपत्तारः संशेरते। यथैव 'शुक्लः पटः' इति निराकाङ्क्षः, तथा 'सन् घटः' इत्यपि। यस्तु द्रव्यं गुणः कर्म रूपं विज्ञानमिति वा संशयः, न स लौकिकानाम्। लौकिकास्त्वभिन्नमेव निमित्तं प्रतिपद्यन्ते। अर्थाच्च संदेहः, न शब्दात्। कुतः? विशेषप्रतीतिमन्तरेणापि प्रतिपत्तुर्नैराकाङ्क्ष्यात्। यत्र ह्यर्थसामर्थ्येन संशयः, यथा 'वृक्षश्छिद्यताम्' इति परशुकुठारादिषु, तत्रान्यतरविशेषानवगमे ऽपि नैराकाङ्क्ष्यम्, यस्य कस्यचिदुपादानात्, अन्यथानवस्थानात्। यत्र तु शब्दात्, तत्र विशेषावगमहेतोर्विना साकाङ्क्षत्वमेव। तदेवं न नानानिमित्तः साधारणशब्दः। विशेषणमप्येकं प्रमाणं स्यात्। तच्च प्रागपि ततः सच्छब्दानुविद्धबुद्ध्युत्पादादनुपपन्नमित्युक्तम्– 'मानादेव यतो बुद्धिः' इति प्रपञ्चेन।

प्रकरणादावसति निर्णयहेतौ विदितसङ्गतेः पुरुषस्य तत्र तत्रार्थे सं(शयो निमित्तभेदात्प्रा)प्तः। सा च सच्छब्दात्तद्विरुद्धनिश्चयजनकत्वदर्शनान्निवर्तमाना व्यापकविरुद्धोपलब्ध्या साधारणशब्दतामप्यस्य [नि](वर्तयति। तथा च

44.1–2 Cf. *Bhāvaśuddhi* (335.17–19): 'अक्षमानये'त्युक्ते बिभीतकादिषु संशयवत् 'सन् घटः' इत्युक्ते ऽपि विदितसङ्गतिकस्य द्रव्यगुणादिषु संशयो स्यादित्याह– भिन्नेति॥ Cf. *Bhāvaśuddhi* (336.3-4): 'सन् घटः' इत्युक्ते ऽपि तत्राविदितसङ्गतिकस्य (तात्रा° edn) द्रव्यादिषु संशयो ऽस्ति।

43.10 सत्त्वमभेदाव्यापकत्वाभ्यां] *em.*; सत्त्वसभेदाव्यापकत्वाभ्य MS **44.1** °हेतौ] *em.*; °हेतो MS • विदितसङ्गतेः] MS[pc]; विदि। तहेतोसङ्गतेः MS[ac] • तत्रार्थे] *em.*; तत्रार्थि MS **44.2-3** °वर्तमाना] *em.*; °वर्तमान्य MS **44.3** व्यापकविरुद्धो°] व्यापविरुद्धो° MS

‘स) ⟨f.147ʳ⟩न् घटः’ इत्यत्र गुणादिषु वा रूपविज्ञानादिषु वा कतमस्मिन्दिति संदिहते, संदिहाना वा तदर्थिनो न प्रवर्तन्ते। (तत्र न स्यात्साधा)रणशब्दतेत्याह– **भिन्ननिमित्तत्वे चाक्षादिशब्देभ्य इवेति**। विशिष्यत इति विशेषः। ‘सन् घटः’ इति निराशङ्कसत्ता(यां गम्यमानायामपि कि)मिदानीं सच्छब्दार्थ इत्यनेनास्य द्रव्यादिभावे संदिहते। तथा शब्दो **द्रव्यं गुणो** वेति व्यर्थमभि[धी](यते, अर्थे संशयः परीक्षका)णामित्यत आह– **अर्थाच्चेति**। सत्यमस्त्ययं संशयो न तु शब्दतः किं तु तत्प्रमितादर्थतः। इतरथा तु [वि](शेषप्रतीतिमन्तरेणाप्य)क्षादिपदादिवज्जिज्ञासाविरामानुपपत्तेरित्यर्थः। निराकृतमप्यर्थन्निराकरणान्तराभिधित्सया पुनरा(शङ्कते– **यत्र तु शब्दात्संदेहः** सं)भाव्येत। तत्रापाततस्तावत्पूर्वनिराकरणं स्मारयति– ⟨**तच्च प्रागपीति**।⟩

अपि च कार्यादपि वृत्तमेव प्रमाणमवसीयते। तत्र कुतस्तद्विशिष्टता। न खल्वर्थो ऽसन्निहितविशेषगुणो विशिष्टो भवति। न च निश्चिते विशेषणाभावे विशिष्टाभिधानानुविद्धः संशयो भवति दण्डाभावनिश्चय इव ‘दण्डी न वा’ इति। भवति च शून्यनगरादिषु चिरनिखातनिधिषु प्रमाणाभावनिश्चये ऽपि ‘सन्ति न’ इति संशयः। तस्मादन्यः प्रमाणयोगात्सदर्थः, यत्रैष संशयः। नाप्युपलक्षणं प्रमाणम्, प्रमितध्वस्तेषु सच्छब्दाप्रयोगात्स्मर्यमाणे च सच्छब्दानुविद्धात्संदेहात्। वृत्तप्रमाणसंबन्धस्य प्रमाणोपलक्षितत्वात्सत्त्वमेव स्यात्, नासत्त्वम्, न संशयः। यो

44.7–8 Cf. *Bhāvaśuddhi* (336.12–14): सन् घट इत्युक्ते द्रव्यादिविशेषावगतिमन्तरेणापि श्रोतुर्निराकाङ्क्षज्ञानोदयादवगम्यत इत्याह– विशेषेति॥
44.13 Cf. *Bhāvaśuddhi* (337.11–12): स्यात् = संभाव्येतेत्यर्थः। आपाततस्तावत्पूर्वपक्षनिराकरणं स्मारयति– तच्चेति॥

44.5 संदिहाना] *em.*; संदेहाना MS • न प्रवर्तन्ते] MS^{pc}; न वप्रवर्तन्ते MS^{ac} **44.6** चाक्षादिशब्देभ्य] *em.*; वाक्यादिशब्देभ्य MS^{pc}; वाक्यादिशब्दे॰भ्ये MS^{ac} **44.8** सच्छब्दार्थ इत्यनेनास्य] *conj.*; सत्सब्द इत्यर्थ इत्यनुनास्य MS^{pc}; सत्सब्द इत्यर्थः। इत्यनुनास्य MS^{ac} **44.9** व्यर्थमभि॰] *em.*; व्यतिव्यर्थमभि॰ MS • अर्थाच्चेति] *em.*; अथाच्चेति MS **44.10** संशयो] MS^{pc}; संससयो MS^{ac} • ॰मितादर्थतः] MS^{pc}; ॰मितातदर्थतः MS^{ac} **44.13** ॰स्तावत्पूर्व॰] *em.*; ॰स्तावत्पूर्वं॰ MS • स्मारयति] MS^{pc}; स्मरयति MS^{ac}

ऽप्यर्थक्रियया सच्छब्दार्थं विशिनष्टि उपलक्षयति वा, तस्यापि प्राक्कार्यदर्शनान्न सच्छब्दयोगः स्यात्। अथ प्रमाणजननमेवार्थक्रियां ब्रूयात्, प्रमाणादेवास्तिबुद्धिर्न स्यात्। अथ वैकल्पिकीयं प्रमाणोत्तरकालतेति मतम्, लिङ्गान्न स्यात्।

निराकरणान्तरमाह– **अपि च कार्यादिति**। संवे(दनरूपं हि प्रमाणं ज्ञेयाभिव्याप्तिलक्षण)फलप्रसवसमुन्नेयं तत्पूर्वकालमनुमीयते न तु फलकालम्, तत्कालस्य तदुत्पादानुपयोगात्। फ(लो)(त्पादानुपयोगिनश्च कल्पने गौ)⟨f.147^{v}⟩-रवात्। प्रमाणं विशेषणमसन्निहितं पदार्थस्य विशेषकं सत्सत्पदप्रवृत्तिनिबन्धनमित्यर्थः।[अ](तिवृत्तमनुमीयताम्, नोपलक्षणं भवे)त्प्रमाणं विशेषणं तु भविष्यति। तेन हि वस्तूनां नानापि रूपभेदा उपलक्ष्यन्ते, न चोपल[क्षणम्। भवेदुपलक्ष](णमेव वा प्रमाणम्। न ह्युपलक्षणाभावा)त्कण्ठो वियुक्तकुण्डलो न कण्ठः, तस्मादसत्यप्युपलक्षणे चिरनिखातनिध्यादिषूपलक्ष्येषु युक्तः संश(य इत्याह– **नापीति**। हेतुमाह– **प्रमितेति**।) उपलक्षणमपि यदि सत्तया सच्छब्दप्रवृत्तिनिमित्तम्, ततः पूर्वोक्तो दोष इत्यतिवृत्तस्यापि त[च्छ](ब्दस्य प्रवृत्तिनिमित्तत्वं वाच्यम्। त)था च प्रमितनष्टेष्वपि तत्प्रसङ्ग इति। एवं

45.1–4 Cf. *Bhāvaśuddhi* (337.13-16): निराकरणान्तरमाह– अपि चेति॥ संवेदनरूपं हि प्रमाणं ज्ञेयाभिव्याप्तिलक्षणफलप्रसवोन्नेयं तत्पूर्वकालमनुमीयते, न तु फलानन्तरम्; तस्य तदुत्पादानुपयोगात्, फलोत्पादानुपयोगिनश्च कल्पने गौरवादित्यर्थः।

45.5–7 Cf. *Bhāvaśuddhi* (337.16–18): अतिवृत्तमनुमीयताम्, किमेतावतेति? अत्राह– न खल्विति॥ असन्निहितं प्रमाणं विशेषणं यस्य, तादृक्; कुण्डलविगमे ऽपि कुण्डलित्वप्रसङ्गादित्यर्थः॥

45.7–12 Cf. *Bhāvaśuddhi* (338.4–10): अस्तु तर्हि प्रमाणमुपलक्षणम्– कदाचिद् ज्ञानसम्बन्धस्य स्वयमसतो ऽपि कुरुक्षेत्रं गुरुटीकेत्यादावुपलक्षणत्वादिति, अत्राह– नापीति॥ हेतुमाह– प्रमितेति॥ उपलक्षणस्यापि सतः सच्छब्दप्रवृत्तिनिमित्तत्वे पूर्वोक्तदोषादतिवृत्तस्य तच्छब्दस्य प्रवृत्तिनिमित्तत्वं वाच्यम्। तथा च प्रमितनष्टेष्वपि तत्प्रसङ्ग इत्यर्थः। हेत्वन्तरमाह– स्मर्यमाणे चेति॥ स्मृतिगोचरे ऽपि सत्त्वसंशयो न स्यादित्यर्थः।

45.4 °रवात्] *em.*; °रत्वात् MS • °सन्निहितं पदार्थस्य] *em.*; °सन्निहितन्पर्थस्य MS **45.6** रूपभेदा] *em.*; रूपभेदा न MS (न without head mark) **45.8** कण्ठः] *em.*; कठः MS • °दसत्यप्युप°] MS^{pc}; °दसत्युत्यप्युप° MS^{ac} • °निध्यादिषूप°] *em.*; °निध्यादिष्टप° MS **45.10** इत्यतिवृत्त°] MS^{pc}; इतिपि अतिवृत्त° MS^{ac} **45.11** प्रमितनष्टेष्वपि तत्प्रसङ्ग] *em.*; प्रतितर्थस्तेष्वपि तत्प्रमिसङ्ग MS

स्मर्यमाणे ऽपि नासत्त्वं सत्त्वसंशयो वा स्यादिति। अथ विकल्पिकेयं नि-(र्विकल्पकपूर्वकत्वादनुमानादे)र्लिङ्गान्न स्यात्। न खल्वेतत्पर्वतस्थवह्निग्रह-पुरस्सरम्, न च महानसगतस्य ग्रहे गिरिगतस्याग्रहे ऽपि ग्रहो (भवति। पर्वतशिखरे धूमं दृष्ट्वै)व वह्निरस्तीति प्रवर्तत इत्यर्थः।

अथ निर्ज्ञातकार्यसंबन्धमेव लिङ्गेनानुगम्यते, एवं तर्हि प्रमेयाभावः। तथा हि– कार्यवत्ता ह्यस्त्यर्थः, सा चाधिगतैव। कार्यवत्तयैव च कार्यवत्तावगम्यत इत्यचतुरस्रम्।

ननु न प्रमाणजननमेव सर्वत्रार्थक्रियामाचक्ष्महे, किं त्वन्यदपि।[तेन](यद्यप्यानुमानिकस्याग्नेस्तन्नास्ति, अ)⟨f.148r⟩स्ति तु धूमजननमर्थक्रिया। सा चास्य तत्र तत्रावधारिता, तदुत्पत्त्यैव हि धूमो लिङ्गमिति। धूमकारणस्याग्नेर्युक्तमस्तीत्यनुमा[न](मित्याह– **अथ निर्ज्ञा**)**तकार्यसम्बन्धमेवेति**। तदेतत्तादात्म्यानुपलम्भात्तयोरव्यापकमिति दूषणे स्थवीयसि स्थिते ऽपि दोषान्तरमाह– **प्र(मेयाभावः, तथा हि) कार्यवत्ता ह्यस्त्यर्थः, सा चाधिगतैव।** आत्माश्रयप्रसङ्गश्चेत्याह– **कार्यवत्तयैव च कार्यवत्तावगम्यत इत्यचतुरस्रम्।**

46.1 °वत्तयैव च] A; °वत्तयैव *edn*

45.12–13 Cf. *Bhāvaśuddhi* (339.3-4): दूषयति– लिङ्गादिति॥ धूमादेर्लिङ्गादग्न्यादावस्तिधीर्न स्यात्; अनुमानादेरनिर्विकल्पपूर्वकत्वादित्यर्थः।
46.1–4 Cf. *Bhāvaśuddhi* (339.4-8): प्रमाणजननमेव न सर्वत्रार्थक्रिया, किन्त्वन्यदपि, तेन यद्यप्यानुमानिकस्याग्नेस्तन्नास्ति; समस्तधूमजननक्रिया। सा चास्य तत्र तत्रावधारिता, तदुत्पत्त्यैव हि धूमो लिङ्गम्, इति धूमकारणस्याग्नेरस्तीत्यनुमानमित्याह– अथ निर्ज्ञातेति॥
46.5–9 Cf. *Bhāvaśuddhi* (339.9–13): दूषयति– एवं तर्हीति॥ अनुमेयाभावं साधयति– तथा हीति॥ किमतः? तत्राह– सा चेति॥ आत्माश्रयप्रसङ्गश्चेत्याह– कार्यवत्तयैवेति॥ धूमजनकत्वेन हि वह्निरस्तीत्यवगन्तव्यः। अस्तिता चास्य तज्जनकत्वमिति तदेव तेन गम्यत इत्यात्माश्रय इति, अत्राह– कार्येति॥

45.13 खल्वेतत्पर्वत°] MS^{pc}; खल्वेतत्पूर्व्वत° MS^{ac} **46.1** सर्वत्रार्थ°] *em.*; सर्वत्रार्थं° MS • किं त्वन्यदपि] *em.*; कित्वन्यपि MS **46.3** तदुत्पत्त्यैव] *em.*; तदुपत्त्यैव MS **46.5** °लम्भात्तयो°] *em.*; °लसातयो° MS • स्थवीयसि] *em.*; स्थवीयसिसि MS **46.6** ह्यस्त्यर्थः] MS^{pc}; ह्यर्थस्त्यर्थः MS^{ac} **46.7** आत्माश्रय°] *em.*; आत्मश्रय° MS • °गम्यत] *em.*; °गम्यन्त MS

[धू](मजनकत्वेन वह्नि र)स्तीत्यवगन्तव्यः, अस्तिता चास्य तज्जनकत्वमिति तदेव तेन गम्यत इत्यात्माश्रयप्रसङ्ग इत्यर्थः।

कार्यकारणयोश्च यौगपद्याभावाद्विशिष्टतानुपपत्तिः। अथोपलक्षणम्, अतीतस्यापि सत्त्वप्रसङ्गः। स्मर्यमाणे च संशयो न स्यादित्युक्तम्। तस्माद्यथैव नीलादिशब्दार्थो ऽर्थस्वभावः, न कार्यलक्ष्यः, न प्रमाणलक्ष्यः, अनवस्थानात्। स्वरूपव्यवस्थस्तु यथाप्रमाणमवसीयते। तथा सदर्थस्वभावो ऽपीति युक्तम्। कार्यप्रमाणसदसद्भावनिबन्धने हि सदसद्व्यवहारविभागे तस्याप्रवृत्तिरेव, कार्यप्रमाणसदसद्व्यवहारविभागस्यापि तन्निबन्धनत्वप्रसङ्गादनवस्थानात्। तस्मादर्थस्वभाव एका सत्तेति ब्रह्मविदो मन्यन्ते।

यस्तु धूम(जनकत्वे ऽपि महानसग)तस्याग्नेर्गिरिगतधूमजनकत्वमनधिगतचरमनुमानगोचरमिति मन्वानो न परितुष्यति तं प्रति दोषान्तरमाह– क्ष[णि](कविज्ञानवादिनां **कार्यका**)**रणयोश्च यौगपद्याभावा**दिति। सुगमम्। **अनवस्थाना**दिति स्मारयति– **कार्यप्रमाणसदसद्भावे** भावानां **सदसद्व्यवहार**(**विभागे** तन्निबन्धने चानु)⟨f.148^{v}⟩माने **तस्य** सदसद्व्यवहारविभाग**स्याप्रवृत्तिरेव**। कुतः? **कार्ये**ति। न च स्वसंवेदनसिद्धावपि मानस्य मेयता संभ[वि-

47.8°स्वभाव एका सत्तेति] °स्वभाव एकः सत्तेति *edn*

47.3 Cf. *Bhāvaśuddhi* (339.13-14): अत्राह– कार्येति॥ क्षणिकवादिनां कार्यकारणयोरेककालानवस्थानादित्यर्थः॥
47.3–9 Cf. *Bhāvaśuddhi* (340.8–12): अनवस्थानादित्युक्तं विशदयति– कार्यप्रमाणेति॥ तस्य=सदसद्व्यवहारस्य। विभागस्याप्रवृत्तिरेव कुत इति? अत्राह– कार्येति॥ न च स्वसंवेदनसिद्धावपि मानस्य मेयता (मानसमेयता *edn*) संभविनी, येन मेयतायां सत्तायां नानवस्था स्यादित्याशयः। प्रकाशमानतायां तु सत्तायामुक्तानि दूषणान्यूहनीयानीत्यभिधायोपसंहरति– तस्मादिति॥

46.8 °त्वमिति] *em.*; °त्वमि MS **46.9** इत्यात्माश्रयप्रसङ्ग] *em.*; इत्याश्रयप्रसङ्ग इत्यात्माश्रयप्रसंग MS **47.1** °तस्याग्नेर्गिरिगत°] *em.*; °त्वस्याग्निरिगत° MS **47.2** °गोचरमिति] *em.*; °गोचर इति MS **47.4** °स्थानादिति] *em.*; °स्थादिति MS **47.5-6** °प्रवृत्तिरेव।] *em.*; °प्रवृत्ति एवा MS

नी] (येन मेयतायां सत्तायां नानव)स्था स्यात्। न हि स्वसंवेदनं मानं मानकर्मभावमनुभवति, प्रकाशमानतायां तु सत्तायामुक्तानि दूषणान्यभ्यूहनीया(नीत्यभिधायोपसंहरति– तस्मा)दर्थस्वभाव एका सत्तेति ब्रह्मविदो मन्यन्ते। प्रमाणयोग्यताया अर्थस्वभावस्य प्रत्यर्थं भेदवतः सदिति [व्यप](देशात्सर्वव्यवहारेषु) सत्त्वमेव सामान्यमेकमध्यक्षगोचरं गोचरयन्ते ब्रह्मविद इत्यर्थः॥ ⊗॥

अथ मतम्– नार्थस्वभावो योग्यता, प्रमाणहेतुसद्भावस्तु। न चासतां प्रमाणहेतवः सन्तीति। तदयुक्तम्–

भूमौ निखातं निर्लिङ्गमवेद्यानुपपन्नकम्।
नष्टद्रष्टृकमत्येति यत्सर्वमितियोग्यताम्॥ ४०॥

भूमौ निखातमविद्यमानेन्द्रियसंबन्धमदृश्यमानाविनाभूतमसंवेद्यमानान्यथानवकल्पमानं वस्तु प्रलीनद्रष्टृकं यत्तस्य न प्रत्यक्षानुमानार्थापत्त्यागमहेतवः सन्ति। सादृश्यविषयं ह्युपमानम्, तस्य हेतुर्दूरापेत एव। सर्वप्रमाणयोग्यतामतिक्रामति, न च तदसत्। ननु सत्त्वमप्यस्य कथम्? एवमपि संशयः। तत्र प्रमाणहेतुभावलक्षणयोग्यतारूपे सत्त्वे प्रमाणहेत्वभावस्य निश्चयात्संशयो न स्यात्। अथ स्वभावविशेषः कश्चित्प्रमाणं प्रति योग्यः सत्त्वम्, प्रकृतहानादसुन्दरमित्युक्तम्। अथ प्रमाणविशिष्टः सच्छब्दार्थ इत्येतदनेन निराक्रियते। न निश्चिते विशेषणाभावे विशिष्टाभिधायिशब्दानुविद्धः संशयो युक्त इति।

नन्वर्थस्वभावत्वे यो[ग्यतायाः सत्तासा](मान्यत्वं भवितुमर्हति), न पुनरियं

48.22अथ प्रमाण°] अथ वा प्रमाण° *edn*

47.7 °स्था स्यात्] *em.*; °त्था स्यात् MS 47.8 °मानतायां] *em.*; °मावतायां MS 47.11 सत्त्वमेव] MS[pc]; सत्त्वमेक MS[ac] 48.1 °स्वभावत्वे] *conj.*; °स्वभावे MS • °योग्यतायाः] *em.*; °योग्यताया MS

योग्यतार्थस्वभावः, **प्रमाणहेतुसद्भावस्तु**, सहकारिसमवधानलक्षणत्वादागन्तुकयोग्यतायाः।[न चा](सतां **प्रमाणहेतवः स**)**न्ति**। येषु सत्सु कार्यं भवत्येव त एव हेतवः। न चासतां तादृशाः प्रमाणहेतवः सन्ति, तद्भावे प्रमितिभावेन प्रमेयस[द्भावः](स्यादित्यर्थः। दूष)(f.149^{r})यति। **तदयुक्तम्**। कुतः? **भूमौ निखातमिति**। प्रमाणहेतुसद्भावश्चेत्सत्ता न तदभावविनिश्चये वस्तुनि सन्देहः स्यात्। निश्चिते संदे[हो](नेति चोदयति–)**अथ स्वभावविशेष** इति। यः खलु सत्स्वन्येषूपलम्भकारणेषु स[न्नुपलभ्यत] एव स [एव] स्वभावविशेष आख्यायते। अस्ति चायं चिर(निखातनिधिषु), न हि ते खननादिना नोपलभ्यन्ते। तेन मानहेत्वभावविनिश्चये ऽपि [युक्तश्चै]ष संशय इत्यर्थः। दूषयति– **प्रकृतहानादिति**।(स्वभावः सामान्यो) वा विशेषः प्रतिभावं [विद्यमानो नाभिन्न]व्यपदेशोत्थापनसह इत्यभिन्नाभिद्यमानभावाश्रयो ऽभ्युपेतव्यः। तथा प्र[कृत](हानिरित्यर्थः।) तदेवं शंको(त्तरतया व्या)[ख्या]योत्कारिकमुक्तस्य चार्थ[स्येयं] कारिकेत्याह– **अथ प्रमाणविशिष्ट** इति॥ •॥

48.2–5 Cf. *Bhāvaśuddhi* (340.13-19): चोदयति– अथेति॥ सहकारिसमवधानलक्षणत्वादागन्तुकयोग्यताया इति हेतुमाह– प्रमाणेति॥ प्रमितिसामग्रीरूपयोग्यत्वस्य सच्छब्दार्थत्वे ऽसत्तायामपि सत्त्वप्रसङ्ग इति, अत्राह– न चेति॥ येषु हि सत्सु कार्यं भवत्येव, त एव हेतवः। न चासतां तादृशाः प्रमाणहेतवः सन्ति; तद्भावे प्रमितिभावेन प्रमेयसद्भावः स्यादित्यर्थः॥ अव्याप्त्या दूषयति– तदयुक्तमिति॥

48.6–11 Cf. *Bhāvaśuddhi* (341.13-18): बाधकवत्साधकस्याप्यभावात्सत्त्वनिश्चयो ऽप्ययुक्त इति चोदयति– नन्विति॥ परिहरति– एवमपीति॥ स्यात्तर्हि, तत्सदसत्त्वसंशय इति, अत्राह– तत्रेति॥ चोदयति– अथेति॥ यः खलु सत्स्वन्येषूपलम्भकारणेषु सन्नुपलभ्यत एव, स स्वभावविशेषश्चिरनिखातनि (षे?) धिषु वास्ति; तेषामपि (न?) खननादिना प्रतीतेः। अतो मानहेत्वभावनिश्चयेवि (ऽपि) युक्तः संशय इत्यर्थः। दूषयति– प्रकृतहानादिति॥

48.13–14 Cf. *Bhāvaśuddhi* (342.4–5): तदेवं शंकोत्तरतया व्याख्यायोत्तरकारिकायामुक्तस्य चार्थस्येयं कारिकेत्याह– अथवेति॥

Cf. *Bhāvaśuddhi* (374.13–14): तदिदमुत्कारिकमुक्त्वा कारिकया परिहारान्तरं वक्तुमुपक्रमते – तदास्तामिति॥

48.2 योग्यतार्थ॰] MS^{pc}; योग्यतायार्थ॰ MS^{ac} **48.2-3** ॰गन्तुकयोग्यता॰] *em.*; ॰गंतुयोग्यता॰ MS **48.3** सत्सु] *em.*; सअ MS^{ac} **48.4** तादृशाः] MS^{pc}; सातादृशाः MS^{ac} • प्रमाणहेतवः] *em.*; प्रमाहेतवः MS **48.4-5** तद्भावे प्रमितिभावेन] *em.*; सद्भावप्रतिभावेन MS **48.8** स एव] MS^{pc}; स व MS^{ac} **48.10** ॰भ्यन्ते] *em.*; ॰भ्यते MS **48.12** ॰भिन्न॰] MS^{pc}; ॰भिनन्न MS^{ac}

अपि चाभावस्यापि प्रमेयत्वान्न प्रमाणयोग्यता सत्तालक्षणम्। तथा हि–

असत्प्रमेयं च तथा यथैव स्थापयत्ययम्।
अमितं हि तथा कस्मात्तथा न पुनरन्यथा॥ ४९॥

अवश्यं खल्वनेन सदसद्व्यवहारविभागमिच्छतासत्कथंचिद्व्यवस्थाप्यम्, अन्यथा व्यवहारसंकरात्। तत्र यदि प्रमाणस्याविषयः, यदि सर्वशक्तिविरहो वासद्बुद्धेर्विषयः, सर्वथा तथा प्रमेयम्। अपरिच्छिन्नं हि तथा प्रमाणेन किमिति तद्विधम्, न पुनरन्यथा स्यात्? न चेत्तस्य तथाभावे ऽतथाभावे वा प्रमाणव्यापारः, किंनिमित्त एकपक्षानुरागः?

अव(श्यमनेन बौद्धेनेष)⟨f.149v द्धुद्धगन्धिना वा मीमांसके[**नासत्कथंचि**]द्व्यवस्थापनीयम्, इदं तदसद्यत्सतो व्यावर्त्तत इति। न खल्वस्यैवमव्यवस्थापयतः पक्ष[प्रति](पक्षौ स्थापना) वा सन्ति, तदभावेन वा नायं लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीयः स्यात्। [तत्र] **यदि प्रमाणस्याविषयः** प्रमाणविषया(द् व्यावृत्तो ऽसत्, यथा दु)स्सहबौद्धगन्धिमीमांसकः। **यदि वा सर्वशक्तिविरहः**, असत्सतो व्यावर्त्तमानमर्थक्रियाशक्तात्, यथा बौद्धः। सर्वथा[प्र](मेयत्वे व्यवस्थापका)[भावान्नै]कपक्षानुरागः स्यादित्यर्थः॥ •॥

अपि च–

49.1–7 Cf. *Bhāvaśuddhi* (342.11–19): सौगतप्राभाकराभ्यामसतो ऽनिष्टत्वात्तन्न व्यवस्थाप्यत, इति, अत्राह– अवश्यमिति॥ इदं तदसत्, यत् सतो व्यावर्तत इति व्यवस्थाप्यमित्यर्थः। व्यतिरेके दण्डमाह– अन्यथेति॥ पक्ष-प्रतिपक्षौ वा, स्थापना वा न सिध्येदित्यर्थः॥ सर्वशक्तिविरहमर्थक्रियाशक्ताद्व्यावर्तमानमसद् व्यवस्थापयति सौगत इति, अत्राह– तत्र यदीति॥ दूषयति– सर्वथा ऽपीति॥ तथात्वेन प्रमेयत्वं कुतः स्वीकार्यमिति, अत्राह– अपरिच्छिन्नं हीति॥ असद्व्यवहारगोचररूपस्याप्रमेयत्वे व्यवस्थापकाभावाद् नैकपक्षानुरागो ऽपि स्यादित्याह– न चेदिति॥

49.2 °त्सतो] *em.*; °सवा MS **49.4** परीक्षक] *em.*; परीक्ष MS **49.7** °नुरागः] MSpc (deleted akṣaras enclosed within braces); °नुरागः। न च प्रमाणाविषयः MSac

अमित्वा कण्टकाभावं चरणं न्यस्यते कथम्।
नान्यग्रहात्तस्य भावे पुरस्ताच्च प्रसङ्गतः॥ ४२॥
जिज्ञासा न प्रवर्तेत यदि संवित्त्यभावतः।

'दृष्टिपूतं पदं न्यसेत्' इति कीटकण्टकाद्यभावे ऽप्रमिते कथं तन्न्यासः? तथा हि– कीटकण्टकाद्यर्थान्तरभूतलादिपरिच्छेदात्स स्यात्, कीटाद्यपरिच्छेदात्, अभावपरिच्छेदाद्वा। तत्र न तावदर्थान्तरपरिच्छेदात्, कण्टकादिभावे ऽपि प्रसङ्गात्। तत्रापि वस्त्वन्तरपरिच्छेदस्य सत्त्वात्। प्रागपि च भूभागपरिच्छेदात् प्रसज्येत, यस्य कस्यचिद्वस्त्वन्तरस्य परिच्छित्तेर्विद्यमानत्वात्। अथ कीटकण्टकाद्यपरिच्छेदात्, न तद्भावाभावजिज्ञासा स्यात्। जिज्ञासापूर्वमपि प्रयत्नात्तदपरिच्छेदमात्रमेव प्राप्यते यस्याभावो न प्रमेयः। तच्च प्रागपि ततो ऽस्ति। अभावे तु प्रमेये ऽभावनिश्चयाय जिज्ञासा युज्यते। न चापरिच्छेद एव जिज्ञास्यः, स्वतः सिद्धत्वात्। परिच्छेदेन हि स निवर्त्यते। अप्रमेयत्वाच्च सो ऽपि खल्वभाव इत्यप्रमेयः।

न च प्रमाणाविषयत्वमात्रमसद्व्यवहारं वर्त्तयितुम(र्हति प्रमेयाभावान)भ्युपगम इत्याह– **अपि च, अमित्वा कण्टकाभावमिति। पुरस्ताच्च प्रसङ्गत** इति व्याचष्टे– **प्रागपि च भूतलपरिच्छेदा**[त्प्र](**सज्येत** ⟨f.*150r⟩**यस्य**) **कस्यचिद्व**-

50.22जिज्ञासापूर्वमपि] जिज्ञासापूर्वादपि A; जिज्ञासापूर्वकादपि *edn*

50.15 Cf. *Manusmṛti VI.46a:* दृष्टिपूतं न्यसेत्पादम्

50.1–3 Cf. *Bhāvaśuddhi* (343.6–11): न च प्रमाणाविषयत्वमात्रमसद्व्यवहारं प्रवर्तयितुमर्हति प्रमेयाभावानभ्युपगम इत्याह– अमित्वेति॥ अर्थान्तरपरिच्छेदाच्चरणन्यास इति, अत्राह– अन्येति॥ हेतुमाह– तस्येति॥ कण्टकस्य सत्त्वे भूभागग्रहात्, पुरस्ताच्च तत्प्रसङ्गतः कण्टकाद्यग्रहाच्चरणन्यास इति, अत्राह– जिज्ञासेति॥

50.1 वर्त्तयितु॰] MS^{pc}; वर्त्तयितुमु॰ MS^{ac} **50.2** पुरस्ताच्च] MS^{pc}; पुरस्तात्च्च MS^{ac} • प्रसङ्गत] *em.*; प्रसङ्गत्त MS

स्त्वन्तरस्य परिच्छित्तेर्विद्यमानत्वात्। यदि संवित्त्यभावत इति व्याचष्टे– अथ कीटकण्टकाद्यपरिच्छेदात्सर्वो(पाख्यारहितत्वान्न तद्भावाभावजि)[ज्ञा]सा **स्यात्।** कस्मात्? **जिज्ञासापूर्वमपीति।** न तावदयमपरिच्छेदस्तुच्छः शक्यप्राप्तिः, अभ्युपेत्य तु **प्राप्य**(ते **तदपरिच्छेदमात्रं यस्याभावो न प्रमेयः।** विशेषातिरिक्तं नो वस्तु न)[हि भवतामित्यस्माकं सर्वोपाख्यारहितो ऽभावः किं तु] ⟨भवतां⟩ सत्प्रतिपक्षः, प्रमेयत्वकार्यत्वनित्यानित्यत्वाद्यु(पलक्षणाभावात्। अस्य न जिज्ञासाप्राप्यत्वमित्यर्थः। अपरिच्छेद एव कस्मान्न जिज्ञा)सागोचर इत्यत आह– **न चापरिच्छेद एवेति।** निरुपाख्यस्यापरिच्छेदस्य भव[तां](मते प्रागभावतयानादित्वाज्जिज्ञासाया निवर्तकत्वाच्चाप्रमेयत्वम्।

अथ मतम्– सत्सूपलम्भहेतुषु प्रमाणविषयस्यापरिच्छेदात् प्रवृत्तिः। तदसत्–

प्रमाणविषयत्वस्य नोपयोगो ऽत्र दृश्यते॥ ४३॥
असद्बोधे ऽनन्यहेतुभानेन ह्युपयुज्यते।

अपरिच्छेदाच्चेत्प्रवृत्तिर्न प्रमाणविषयत्वस्योपयोगः, इतरत्राप्यपरिच्छेदस्य तुल्यत्वात्ततश्च प्रवृत्तेः। यस्य स्वभावः प्रमेयः, तत्परिच्छेदात्प्रवृत्तिः, तस्यानन्यनिमित्तत्वेनोपयोगवत्प्रमाणविषयत्वम्। नायमपरिच्छेदः सत्येवार्थे हेतुवैकल्यनिमित्तः, समग्रत्वात्तद्धेतूनाम्। तस्मादर्थाभावादिति।

50.4–12 Cf. *Bhāvaśuddhi* (343.21–344.9): यस्येति॥ जाग्रतो यस्य कस्यचिद्वस्त्वन्तरस्य परिच्छित्तेर्विद्यमानत्वादित्यर्थः॥ द्वितीयकल्पमुद्भावयति– अथेति॥ दूषयति– न तदिति॥ कथमिति, अत्राह– तच्चेति॥ अभावस्यापि सर्वोपाख्यारहितत्वान्न जिज्ञासाप्राप्यत्वमिति, अत्राह– अभावे त्विति॥ न च तुच्छो ऽसावित्यर्थः। अपरिच्छेद एव कस्मान्न जिज्ञासागोचर इति? अत्राह– न चेति॥ प्रागभावतया तस्यानादित्वादित्यर्थः। जिज्ञासाया निवर्तकत्वाच्चेति हेत्वन्तरमाह– परिच्छेदेनेति॥ अपरिच्छेदस्यानादेरकार्यत्वे ऽपि ज्ञेयत्वं स्यादिति, अत्राह– अप्रमेयत्वाच्चेति॥

50.4 संवित्त्यभावत इति] *em.*; संवित्त्यभाव इति MS[pc]; संवित्त्यभावस्य इति MS[ac] • व्याचष्टे] *em.*; व्याचष्टो MS **50.5** कीटकण्टकाद्य°] *em.*; कीटकण्डूकाद्य° MS **50.5–6** °ज्ञासा स्यात्] *em.*; °ज्ञास्यासा स्यात् MS

अथ यत्र प्रवृत्तिः स्यात्तत्र केवलसंविदः ॥ ४४ ॥
जिज्ञासेत न सूक्ष्मार्थं कैवल्यं संविदो यदि ।
केवलो विषयो नेष्टो रूपान्मिश्रे ऽपि तद्यतः ॥ ४५ ॥
विशिष्टस्य च नास्त्यन्यदन्याभावाद्विशेषणम् ।

यदि मतम्– यत्र भूभागादौ चरणन्यासादिलक्षणा प्रवृत्तिः, तस्य केवलस्य सा ज्ञानादिति । तत्रापि संप्रधार्यम्– किमिदं ज्ञानस्य कैवल्यमभिसंहितमेकविषयप्रतिनियमो विषयान्तरासंसर्गः, आहोस्विद्विषयस्य । यदि विज्ञानस्य, प्रमिते ऽपि भूभागादौ स्थूले सूक्ष्मकीटकण्टकादिभावाभावपरीक्षा न स्यात् । प्रवर्तेतैव, केवलभूतलावग्रहज्ञानात् । अथ विषयस्य, तत्रापि संप्रधार्यम्– स्वरूपेण वा विषयस्य कैवल्यम्, विशेषणयोगेन वा । तत्र न तावत्स्वरूपेण, मिश्रे ऽपि तस्य भावात् । विशेषणयोगेन कैवल्ये प्राप्ता कीटकण्टकाद्यभावविशिष्टपरिच्छेदात्पदन्यासादिलक्षणा प्रवृत्तिः । यतो नान्याभावाद्विशेषणमन्यादृशं किंचिद्दृश्यते, यद्विशेषणं वस्तु केवलं स्यादिति ।

अथ मतम्)– [सत्सूपलम्भहेतुषु चक्षुरादिषु] **प्रमाणविषयस्यै**कविषयदर्श[नयो]-**(ग्यस्यापरिच्छेदा**च्चरणन्यासादि**प्रवृत्ति**रिति शङ्कते– अथेति । अपरिच्छेद)-[स्य दृश्यत्वं च समा]रोपितं मन्तव्यं न तु तत्त्वमेव, असतस्तदनुपपत्तेः । दूष[यति]–**(तदसत्, प्रमाणविषयत्वस्ये**ति । असद्बोधस्य प्रमाणविषयत्वं दृ-

51.12 रूपान्मिश्रे] रूपोन्मिश्रे *edn*

51.1–2 Cf. *Bhāvaśuddhi* (344.11–12): प्रतीतिकारणचक्षुरादिपरिपूर्तावेकदर्शनयोग्यस्यापरिच्छेदाच्चरणन्यासादिप्रवृत्तिरिति शङ्कते– अथेति ॥
Cf. *Abhiprāyaprakāśikā* (345.20–21): प्रमाणसामग्र्यां सत्यां विषयानुपलम्भादेव प्रवृत्तिसिद्धेर्नाभावस्य प्रमेयत्वमित्याशङ्क्य दूषयति– अथ मतमिति ॥

51.1 ॰प्रमाणविषय॰] MS^{pc}; ॰प्रमाणविषस्यय॰ MS^{ac} **51.3** ॰रोपितं मन्तव्यम्] MS^{pc}; ॰रोचिपितम्मन्तव्यं MS^{ac}

श्यत्वसमारो)पणं चानन्यस्य वा हेतुः। तद्ज्ञाने तुच्छत्वानुपपत्तिरित्यभिसन्धिः [।] (केवलभूतलज्ञानात्प्रवृत्तिरिति शङ्कते– **अथ यत्रेति**। न वयं प्रवृत्तिहेतुत्वेन तु)⟨f. *150ᵛ⟩[च्छ]मपरिच्छेदमाचक्ष्महे नापि भूतलपरिच्छेदम्। त(त्र कैवल्यं संविदो विशेषणं संवेद्यस्य वेति विकल्प्य क्रमेण दू)[षयति]–

जिज्ञासेत न [सूक्ष्मार्थं कैवल्यं] संविदो यदि।

एकविषयप्रतिनि(यमो विषयान्तरासंसर्गः कैवल्यम्, तद्विज्ञानस्याहोस्विद्द्विषयस्य? परीक्षका नूनमे)[वास्य संविदसंसृष्टं सूक्ष्मम]र्थं जिज्ञासते। आप्ता ह्यवि(वक्षितमर्थं पुरस्कृत्य न प्रवर्तन्ते, अतस्तत्र सं)[विद्यो विषयः केव]लो विवक्षितो न संविन्मात्रम्। **तत्रैष रूपाद्वा केवलः** स्या(**द्विशेषणयोगेन वा**? आद्यं निराकरोति– **केवलो विषयो ने)ष्टो रूपात्**। कु[तः?](**मिश्रे ऽपि तस्य भावा)**दिति। भूतले त]द्रूपभूतलस्य **यतः**। [स्या](द्विशेषणयोगेन तु। कण्टका-

51.5–9 Cf. *Bhāvaśuddhi* (346.8–10): केवलभूतलज्ञानात्प्रवृत्तिरिति शङ्कते– अथ यत्रेति॥ कैवल्यं संविदो विशेषणं संवेद्यस्य वा? यद्याद्यः, तत्राह– जिज्ञासेतेति॥

Cf. *Abhiprāyaprakāśikā* (346.27–28, 30–31): अर्थान्तरपरिच्छेदादपरिच्छेदाद्वा प्रवृत्तिरिति पक्षद्वये दूषणं परिहरन्नाशङ्कते– अथ यत्रेति॥ ⋯किं संविदः कैवल्यमुत विषयस्येति विकल्प्य क्रमेण दूषयति– जिज्ञासेतेति॥

51.13–16 Cf. *Bhāvaśuddhi* (346.11–13): संवेद्यस्यापि स्वरूपेण कैवल्यं विशेषणयोगेन वा? नाद्य इत्याह– केवल इति॥ रूपोन्मिश्रे ऽपि– कण्टकादिमति। तत्– कैवल्यमित्यर्थः।

51.13–26 Cf. *Nyāyakaṇikā* (Stern 2004/Gosvami 49.8–23): किं पुनरस्य कैवल्यम्? स्वरूपमिति चेत्, न, घटकण्टकादिग्रहे ऽपि तत्सद्भावात्। तद्धर्म इति चेत्? स तर्हि घटादिभावविरोधी भूमिकान्तरेण तदभाव एवेति सिद्धं नः समीहितम्। यदाह– 'गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्' इति। तत्र न तावत्संसृष्टभूतलग्रहः, तद्धेतुविरोधात्। न खल्वस्ति संभवः, घटसंसृष्टभूतलग्रहश्च तत्र घटाभावनिश्चयश्चेति। नापि घटाभाववद्भूतलग्रहः, आत्माश्रयप्रसङ्गात्। न खलु स एव तस्य हेतुरिति सांप्रतम्। तस्माददृश्ये प्रतियोगिनि घटादौ भूतलमात्रग्रहणं घटाभावपरिच्छेदहेतुरित्यकामेनापि घटाभावादन्यत्कैवल्यं भूतलस्य स्वीकरणीयम्। तदेव चाभावव्यवहारनिबन्धनमिति किमन्तर्गडुना घटाभावेनेति। तदेतदयुक्तम्, वस्तुसद्भावग्रहणमात्रस्याभावज्ञानहेतुत्वानभ्युपगमात्। अपि तु तुल्योपलम्भयोग्यस्य प्रतियोगिनो ऽनुपलम्भने सत्यस्य तत्कारणत्वमिष्यते। तदाह– स्मृत्वा च प्रतियोगिनमिति। न चैकज्ञानसंसर्गि भूतलोपलम्भे ऽपि घटानुपलम्भ इति साम्प्रतम्, नोपलब्धचरघटसंसृष्टभूतलोपलम्भे ऽपि घटानुपलम्भप्रसङ्गात्।

51.5 तुच्छत्वा°] MS^{pc}; तुच्छात्वा° MS^{ac} **51.7** नापि] *em.*; नोपि MS **51.11** °संसृष्टं] *em.*; °संसृष्ट MS

दिविरोधिभूतलान्तरेण तस्या)संभवात्तदभ्युपगम इत्य(र्थः। न)[न्व]भावप्रमेयवादिनामपि तत्परिच्छेदस(द्भावकारणमेषितव्यम्। यदाह– 'गृहीत्वा वस्तुस)द्भावम्' इति। तत्र न तावत्कण्टकान्वितभूतलग्रहणम्, तस्य तदभावविज्ञानविरोधात्। क[ण्टकसं](सृष्टभूतलग्रहः कण्टकाभावनिश्चयश्चैकत्र ⟨f.*151r⟩न संभवतः, आत्माश्र)[य]प्रसङ्गात्। तस्मात्कण्टकाभावज्ञानस्य पुरस्तादकामेनापि तद्वत्तद्भूतलमात्रग्रहो ऽभ्युपेयः। एवं चेत्स एवा(भावव्यवहारनिबन्धनमिति किमन्तर्गडु)[ना कल्पितेन] तद्देश्यकण्टकादर्शने(नेति। तदयुक्तम्),भूतलग्रहस्य तदभावज्ञानसाधनत्वाभ्युपगमात्। यदाह– 'स्मृ[त्वा] (च प्रतियोगिनम्' इति। अनेनागृह्यमाणतामस्य सूचयति, तत्त्वे स्मृत्यनुपपत्तेः। तस्मिन्) गृह्यमाणे तदसम्भवाद्ग्रहाभावे वाभ्यु[पि]यमाने चाविज्ञात[प्र]सङ्गः। नन्वेष दर्शनाभावो ज्ञातो ऽज्ञा[तो](वा? न तावज्ज्ञातः, अनवस्थानात्। अज्ञातत्वे तु सत्तामा)त्रेणास्य चक्षुरादिवद्बोधकत्वमिति सांप्रतम्, अतिवृत्ते ऽपि भावात्। तथा हि (यदायमचिरप्राप्तचैत्रविशिष्टचत्वरतलोपलम्भवान्पृच्छ्यते मैत्रः– प्राक्किमासीदिह चैत्रः)[तदेवं] प्राप्त इति। स च तत्प्रश्नसंजनितजिज्ञासः क्षणमवधाय प्रतिव[दि](ष्यति– आयुष्मन्नासीदिह चैत्रः संप्रत्येव संप्राप्त इति। तन्नोपपद्यते। यतो हि चैत्रस्य रात्रौ त)त्र प्राप्तः सत्ताभावगोचरः प्रत्ययो मध्यदिने न कल्पते, तदा(नीन्तनेनोपलम्भेन प्रा-

51.17–18, 23–24 *Ślokavārttika* Abhāvapariccheda 27ab: गृहीत्वा ··· प्रतियोगिनम्।

51.26–35 Cf. *Nyāyakaṇikā* (Stern 2004): नन्वयमनुपलम्भः प्रतीतो वा स्यादभावज्ञानहेतुः अप्रतीतो वा। न तावत्प्रतीतः, अनवस्थापातात्। सो ऽपि ह्युपलम्भाभावरूपत्वादनुपलम्भान्तरेण प्रमातव्यः एवमनुपलम्भान्तरमपीत्यनवस्थानात्। अप्रतीतत्वे तु सत्तया हेतुः स्यात्। तथा च यदायं प्रमाणोपलब्धचरचत्वरतलः प्रमित्साभावात्तस्मिन्नप्रतीतचरचैत्राभावश्चाचिरप्राप्तचैत्रविशिष्टचत्वरतलोपलम्भवान्पृच्छ्यते मैत्र प्राक्किमासीदिह चैत्र इति, स तदा तत्प्रश्नसमुदितजिज्ञासः प्राक्तनीं दृश्यमानस्य चैत्रस्यासत्तां तदानीमेवावधार्योत्तरमाह आयुष्मन् नासीदिह चैत्रः सम्प्रत्येव सम्प्राप्त इति। तन्नोपपद्यते, तदानीन्तनेनोपलम्भेन तदनुपलम्भापवादात्। न च प्राक्तनोनुपलम्भस्तस्य सम्प्रतितनीमभावधियमाधातुमर्हति। न खलून्मीलितनयनयुगलः प्राच्या नयनसत्तया सम्प्रति रूपं पश्यति। तस्मादेकज्ञानसंसर्गिवस्त्वन्तरोपलम्भ एवाभावज्ञानकारणमेषितव्यम्। तथा च स्वसंवेदनसिद्धः स एवाभावव्यवहारसाधनाय पर्याप्त इति कृतमभावेन प्रमेयेनेति।

51.18 तावत्कण्टका°] *em.*; तावकंटका° MS **51.20** कण्टका°] *em.*; कण्डूका° MS **51.21** तद्वत्तद्भूतल°] *em.*; तद्वेत्तद्भूतल° MS **51.25–26** प्रसङ्गः] MS^{pc}; प्रसप्रसङ्गः MS^{ac}

क्तनानुपलम्भापवादात्। न खलु प्राच्या) ⟨f.*151ᵛ⟩[लोचन]सत्तया संप्रत्यन्धो ऽपि रूपं पश्य(ति। तस्मादेकज्ञानसंसर्गिवस्त्वन्तरोपलम्भ एवाभावज्ञानकारणमेषितव्यमिति कृतमभावेन प्रमेयेनेति। तस्मा)त्सत्तयापि निवृत्ता प्रत्यक्षोपलम्भा यो[ग्यता](--- [37] --- ॰यो)[ग्य](प्रमाणा)भावस्य च प्रमेयाभावविज्ञानकारणत्वाद[न्य](स्य विशेषणस्याभावात्। --- [27] --- तत्रोपलभ्यमा)ने स्मर्यमाणवदभाव[व्य](वहार॰ --- [47] ---) [प्रमाणम्, उ]पलब्धस्य वा चत्वरतलस्य तादृशं स्मरणं चैत्राभावव्य[व](हारहेतुः --- [27] ---)तत्संहि[तमपि तत्र साधकम्। तदनुपलम्भो] सतीति तु विशेषणे प्राप्तस्तद्विधचत्वरतलोपलम्भादन्यश्चैत्रं [प्र](ति --- [22] ---) ⟨f.*152ʳ⟩(--- [14] ---सं)[चिन्त्य चै]त्रस्य प्रतिभासमानस्य चत्वरतले गृह्यमाणे दर्शनार्हस्य स्मर्यमाणत्वमस्तीति त[त्र] (तन्न साधकम्।)[अ]गृह्यमाणे स[ती]ति तु विशेषणे भावाभ्युपगमाद]पसिद्धान्त इति। परिशिष्टं तु न्या[य]कणिकायामुपपादितमिति कृतं विस्तरेण(॥ ⊗॥)

नास्तीति धीव्यवहृती विषयं कमुपाश्रिते॥ ४६॥
मानाभावं यदि क्षुण्णं मेयाभावस्य तत्र किम्।

अपि चानेन 'नास्ति' इति बुद्धिशब्दयोर्विषयो वाच्यः। स न वस्तुस्वरूपेण, मिश्रे ऽपि प्रसङ्गात्। न केवलम्, अभावादन्यस्य विशेषणस्याभावादित्युक्तम्। ननु 'नास्ति' इत्ययमर्थः 'नेदं प्रमीयते' इति, न पुनरभावो ऽवगम्यते। विरुद्धमिदम्—नास्त्यवगम्यते चेति। यद्येवं प्रमाणाभावो विषय उक्तः स्यात् 'नास्ति' इति धीशब्दयोः, तत्र को ऽपराधः स्यात्प्रमेयाभावस्य, येन तमतिलङ्घ्य प्रमाणाभावो विषय उच्यते? न हि तयोर्निरुपाख्यत्वे कश्चिद्विशेषः।

51.34–35 सत्तया संप्रत्यन्धो ऽपि रूपं प॰] *em.*; सत्तााया संप्रत्यच्चोपि रूम्प॰ MS 51.38 प्रमाणम्] *em.*; प्रमाणेम्॰ MS 51.39 तादृशं] *em.*; तादृशः MS • चैत्राभाव॰] *em.*; चैत्रभाव॰ MS 51.40 सतीति तु] *em.*; सत्यति तु MS 51.40–41 ॰तलोपलम्भाद॰] *em.*; ॰लोपलम्भाद॰ MS^{pc}; ॰लोपःलम्भाद॰ MS^{ac} 51.44 परिशिष्टं] *em.*; परिष्टं MS^{pc}; परि ष्टं MS^{ac} • कृतं] *em.*; कुतं MS

(एवं तावदभावज्ञानमन्तरेण केवलभूतलज्ञानाच्चरणन्यासादिप्रवृत्तिरयु)क्तैवेत्युक्तम्, संप्रति नास्तीति बुद्धिव्यपदेशाव(पि न तदन्तरेण स्यातामित्याह– **अपि चेति**। न केवलं भूतलं तद्गोचरो ऽस्तु। चोदयति–)**[ननु] नास्तीत्ययमर्थ इति**। यथा हि रूपादयः सम(नन्तरप्रत्यय° --- [19] --- तद)[भावा]श्चानुभूयन्ते, न कश्चिद्विग्रहवाननुभवः, यतो हि प्रमाणम(नुसरत एवावगम)[स्त]त्त्वानां न पुनर्व्यपदेशनात्। तस्मात्प्रतिबन्धाभावात्तत्प्रमाणाभावगोचरतया कथञ्चिद्व्याख्येयः। तथा च **वि(रुद्धमिदं नास्त्यवगम्यते) चेति**। परिहरति– **यद्येवं प्रमाणाभाव** इति। न तावत्प्रमेयान्तरपरिच्छेदने प्रमेयान्तरपरिच्छेद इत्युपपादितमध[स्ता](त्। पूर्वस्मिन्नुक्तो दो)⟨f.*152v⟩षो ऽपसिद्धान्तश्चापरः, तस्मात्परप्रतिबन्धमात्रम्। अथावोचामः प्रत्यहमालोचयामो निबन्धनमसद्व्यवहारस्य, तत्रोपलभ्यमाने ऽपि (तस्य सत्तयानुपल)म्भो ऽस्मरणलक्षणः स्मरणार्हस्य चैत्रस्य। स्मर्यन्ते हि चत्वरतलस्य प्रालेयपरिपूर्वादय उपेक्षणीया अपेक्षणीया अपि धर्मास्ततो (गोचरादिवदुपलम्भो) भवेत्, तद्वदेव वा ज्ञास्येत चानुसमवस्येत च। सो ऽयं मन्वानो हेतुसन्धानान्तराभावान्नारोपयति तत्र संप्राप्त इति। (--- [6] --- तस्मात्सत्ता)मात्रेण वा गोचरादिवदनुपलम्भः प्रमेयाभावविज्ञानकारणानुयुततद्व्यवहारकारणम्। एतेन व्यवहारस्य बुद्धिवि-

52.1–3 Cf. *Bhāvaśuddhi* (347.5-7, 14–15): एवं तावदभावज्ञानमन्तरेण चरणन्यासादिप्रवृत्तिरयुक्तेत्युक्तम्। संप्रति नास्तीतिबुद्धिव्यपदेशावपि न तदन्तरेण स्यातामित्याह– अपि चेति॥ ···केवलं भूतलं तद्गोचरो ऽस्तु, नेत्याह– न केवलमिति॥ अभावापह्नववादी चोदयति– नन्विति॥
52.16–23 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 51.13-19): तस्मात्सत्तयानुपलम्भो ऽभावज्ञानकारणमिति नानवस्था। नापि प्रमेयाभावातिरिक्तकैवल्याङ्गीकारः। चत्वरतलोपलम्भस्य चैत्रानुपलम्भे सति तत्कारणत्वात्। तदयमभावव्यवहारो वस्तुसद्भावग्रहणतत्प्रतियोगितत्स्मरणतद्बुभुत्सातिरिक्ततत्संयोगभेदजन्मेति। दृश्ये प्रतियोगिनि स्मर्यमाणे व-

52.5 न] ना MS • °नुभवः, यतो हि] *conj.*; °नुभव हि MS **52.6** °भावात्तत्प्र°] *conj.*; °भावात्तत्प्र° MS **52.7** °चिद्व्याख्येयः] MS[pc]; °चिद्व्यायख्येयः MS[ac] **52.10** °मात्रम्, अथावोचामः] *conj.*; °मात्रयजाथाचाम MS • °मालोचयामो] *em.*; °मालोचयाचो MS **52.11** तत्रोप°] *em.*; तत्रौप° MS **52.12** स्मरणार्हस्य] *conj.*; स्मरणार्ह MS **52.13** °या अपेक्षणीया अपि धर्मास्ततो] *conj.*; °या ऽपेक्षणीया ऽपि प्रातस्तता MS **52.14** ज्ञास्येत चानुसमवस्येत च] *em.*; ज्ञास्यत चानुसमवस्येत चानुसमवस्येत च MS • मन्वानो हेतु°] *em.*; मन्वाना हेतु° MS • °सन्धानान्तराभावान्नारोप°] *em.*; °सन्धानानाराभावान्नाणप° MS **52.16** °कारणानुयुततद्व्यव°] *em.*; °कारणनुयुतस्तद्व्यव° MS

कल्पानु[पा](तित्वान्नानवस्था, च)त्वरस्यापि रूपादिदर्शनात्। तत्सिद्धमेतदभाव[व्य]वहारो वस्तुरूपग्रहणप्रतियोगिदृश्यत्वतत्स्मरणतद्बुभुत्सातिरिक्त[निमि](त्ततत्संयोगजन्मा। यथा त)न्तुषु सत्स्वपि कदाचित्कत्वाद्योगेषु सत्स्वपि कदाचित्कस्य तदतिरिक्तजन्मा, यथा सत्स्वपि तन्तुषु पटः कदाचित्कः (प्रादुर्भवंस्तदतिरिक्ततत्संयोग)[ज]न्मेति। स्मर्यमाणप्रतियोगिनि योग्यवस्तुरूपग्रहणमसद्व्यवहारं प्रत्यनपेक्षमित्युक्तो हेतुरसिद्ध इति चेन्न, सो ऽयमि(ति प्राक्तनव्यवहारः प्र)⟨f.*153^{r}⟩मीयत इति व्याचक्षाणकः प्रमाणाभावमेव विषयमाह, तत्र चैतद्दूषणमिति॥ ⊗॥

अथ मतम्–

अग्रहे ऽसद्ग्रहभ्रान्तिरभावव्यवहृद्भ्रमः॥ ४७॥
अभावे च व्यवहृतेरदृष्टौ ध्वान्तदृष्टिवत्।

नैव स्तां 'नास्ति' इति बुद्धिव्यवहारौ। कथमिमौ सर्वजनानां प्रतीतावपह्नूयेते? उच्यते– भ्रमो ऽयं सद्बुद्ध्यभावे तद्विपर्ययपरिच्छेद इति। तथा सद्व्यवहाराभावे तद्विपर्ययव्यवहारभ्रमो यथालोकदर्शनाभावे 'तमः पश्यामि' इति विभ्रमः। न हि तमो नाम किंचिद्दृश्यमस्ति।

अनुशय[बी]जमनिराकृतं [मन्य](मानः पुनश्चोदयति– किं) वा, **अग्रहे ऽसद्ग्रहभ्रान्तिरिति**॥ ⊗॥

नैतत्सारम्–

इत्थं भवेत्सुषुप्तादौ त्रैलोक्याभावदृग्भ्रमः॥ ४८॥

स्तुसद्भावग्रहणे सत्यभावव्यवहारो ऽवश्यम्भावीति हेतुरसिद्ध इति चेन्न, गृह्यमाणे ऽपि प्रतियोगिन्यस्मर्यमाणे किमासीदिति प्रश्नानन्तरं प्राक्तनतदभावव्यवहारप्रवृत्तेः।

52.18 °प्रतियोगि°] *em.*; °प्रयोगि° MS • °तद्बुभुत्सातिरिक्त°] *em.*; °तद्बुत्तत्सापितिरिक्त° MS **52.19** °न्तुषु सत्स्वपि] *conj.*; °न्तिस्तु सत्स्वपि MS **52.22** न, सो] *em.*; नो सो MS **52.24** चैतद्दूषणमिति] MS^{pc}; चैतद्दूषयतिणमिति MS^{ac} **53.1-2** वा, अग्रहे ऽसद्ग्रह°] *em.*; वा अहे ऽसद्र° MS

अपरिच्छिन्दतः किंचिद्विभ्रमश्च न युज्यते।
आरोपविषयारोप्ये नाजानन् रजतभ्रमी॥ ४९॥
नाभावभिन्ना व्यवहृत्तदभावश्च धीपदे।
तमोदृष्टिस्तु भूच्छायामालोकाभावमेव वा॥ ५०॥
आलम्बते न त्वदृष्टाविष्टो दर्शनविभ्रमः।

यदि खल्वदर्शने विपर्ययदर्शनभ्रमो भवति सुषुप्ताद्यवस्थासु विश्वाभावदर्शनभ्रमः स्यादालोकादर्शनभ्रमवत्। न च किंचिदपरिच्छिन्दतो विभ्रमः। तथा हि– आरोपस्य विषयं पुरोवर्ति वस्तु आरोपणीयं च रजतं ज्ञानेनानाप्नुवन्न रजतभ्रमवान् भवति। अन्यथाप्रतिपत्तिः स्मृतिः सामान्यप्रतिपत्तिर्वा। न च बुद्ध्यभावो ज्ञानस्य विषयो न व्यवहाराभावः, नाभावबुद्धिर्नाभावव्यवहारः, विशेषणस्याभावस्य ज्ञानाविषयत्वात्। तत्रोभयोर्विषयारोपणीययोरग्रहणे न मिथ्याज्ञानमिति।

दूषयति– **नैतत्सारम्**– **इत्थं भवेदिति**। उपपादितं हि विभ्रमविवेके। इहा[प्यु]पपादयिष्यते, यथा– नासतो नापि ज्ञानाकारस्य वेदनं नाप्यवेदनं किं त्वन्यस्यान्यथेति। तथा **चापरिच्छिन्दत** इति युक्तम्। त(था चाभावव्यवहा)राभावे ऽन्यत्रदृष्टो ऽभावव्यवहार आरोपणीयः,[त]स्य माने च विरोधाभावे ऽन्यत्रदृष्टमभावविज्ञानमारोपणीयम्। न चा(भावव्यवहारमनि)च्छत एतदुपपद्यत इत्याह– **नाभावभिन्ना** विशिष्टा **व्यवहृद**भावव्यवहार इति यावत्। **तदभावश्च** व्यवहाराभावश्च **धीपदे** (**नालम्बत** इति। उपल)क्षणं

54.1–3 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 54.2-4): प्रमितस्य हि भावस्य प्रमित एव भावे समारोपभ्रान्तिर्न पुनरसतो नापि ज्ञानाकारस्य नाप्यग्रह इत्युपपादितं विभ्रमविवेके। अत्रापि सूचयिष्यति।

54.1-2 उपपादितं हि विभ्रमविवेके। इहा[प्यु]पपादयिष्यते] *em.*; उपपादितं हि विभ्रमविवेके। इहा[प्यु]पपादितं हि विभ्र(+++++++)पपादयिष्यते MS **54.2** °कारस्य] MS[pc]; °कारधस्य MS[ac] • किं] *em.*; कि MS **54.4** °राभावे] MS[pc]; °रोभावे MS[ac] **54.5** °दृष्टमभाव°] MS[pc]; °दृष्टंमभाव° MS[ac]

चैतत्। नाभाव[विज्ञानं ज्ञानाभावश्चेत्यपि द्रष्टव्यम्।] दृष्टान्तश्च साध्यविकल इत्याह– **तमोदृष्टिस्त्विति**। उपपादितमिदं हि (वार्त्तिककृतैव–

त)था द्रव्यान्तरं च्छाया रूपभेदसमा[श्र]यम्। इति।

तदनेनाभावविज्ञानमेवास्याभ्युपेयम्। न चाभावः स्वतः सतो व्यवच्छिन्नो ना[न्य](त इति स्वरूप)⟨f.*153^{v}⟩भेदः स्वतो ऽस्य नावभासत इति निरुपाख्यो भवति, तज्ज्ञानसामर्थ्यादीनामपि निरुपाख्यत्वप्रसङ्गात्। तेषामपि नाजातो ऽवा(न्तरभेदो निरुप्यते,)[ज्ञे]यशक्यभेदेन तु तद्भेदः, इहा[पि प्र[ति]योगिभेदेनेति सर्वं समानमिति भावः॥ ⊗॥

अभ्युपगम्य प्रमाणयोग्यतां सत्तां दोषाभाव उच्यते–

अस्तु वा मानयोग्यत्वं सत्त्वं तच्च प्रमीयताम्॥ ५१॥
तस्मिन्मिते वस्तुसत्त्वं भवत्यागमगोचरः।
न च सापेक्षता नास्मिन्नन्तरार्थविभिन्नताम्॥ ५२॥
प्रचक्षते ये ऽपि सत्तामन्यां न प्रतिजानते।

भवतु वा प्रमाणयोग्यता सत्ता। सैव च प्रमेयास्तु। तत्प्रमेयं वस्तुसत्त्वमागमार्थः। न च प्रमाणान्तरापेक्षता दोषः, प्रमाणा-

55.3 °गोचरः] °गोचरे *edn*

54.10 *Bṛhaṭṭīkā??:* तथा द्रव्यान्तरं च्छाया रूपभेदसमाश्रयम्।

54.12–15 Cf. *Nyāyakaṇikā* (Stern 2004/Goswami 51.30–52.11): नन्वभावो नाम विग्रहवान्न कश्चिदनुभूयत इत्युक्तम्, तत्किमयमभावव्यवहारो नास्ति, नास्ति निमित्तो वा? न तावन्नास्ति निमित्तः, कादाचित्कत्वानुपपत्तेः। न च निमित्तान्तरमस्यास्तीत्युक्तम्। न च नास्ति, भावव्यवहारस्याप्यपह्नवप्रसङ्गादित्युक्तम्। निःस्वभावस्य कथमनुभूयमानता इति चेन्न, सद्भावृत्तिरूपस्य तस्य प्रतीयमानत्वात्स्वतो ऽवान्तरविशेषानुपलब्धेः। निःस्वभावतेति चेन्न, ज्ञानशक्त्यादीनामपि तत्प्रसङ्गात्। तेषामपि हि न स्वतो भेदो निरुप्यते। ज्ञेयशक्यभेदधीनं तद्भेदनिरूपणमिति चेन्न, इहापि प्रतियोगिभेदेन तद्भेदनिरूपणादिति सर्वमवदातम्।

54.9 तमोदृष्टि°] *em.*; तमौदृष्टि° MS 54.10 च्छाया रूपभेदसमा°] *em.*; छायोरुसमा° MS 54.11 °ज्ञानमेवास्याभ्युपेयम्] *em.*; °ज्ञानमेवस्याभ्युपेयम् MS^{pc}; °ज्ञानेमेवास्यभ्युपेयम् MS^{ac} • न चाभावः] *em.*; न चाभाव MS^{pc}; ना चाभाव MS^{ac} 54.12 नावभासत] MS^{pc}; नावभास MS^{ac} 54.13 तेषामपि] *em.*; तथामपि MS

न्तरसंभेदस्याभावात्। 'प्रमाणयोग्यः' इत्येतावन्मात्राधिगतेः। तथा हि– ये ऽपि प्रमाणयोग्यतां सत्तामाहुर्न तद्व्यतिरेकिणीम्, ते ऽपि नात्रान्तरार्थसंस्पर्शमिच्छन्ति। तत्संस्पर्शे ह्यन्यत्प्रमाणमन्वेष्यं स्यात्। कथं नान्वेष्यम्? यदा वचः प्रमाणयोग्यतायां पर्यवसितं न विशिष्टार्थसत्त्वं बोधयति, तत्र यस्य प्रमाणस्य योग्यो विशिष्टो ऽर्थस्तदवश्यापेक्षणीयम्। किमर्थं तदपेक्ष्यते? विशिष्टवस्तुसत्त्वाधिगमाय। कं पुनर्विशिष्टस्य वस्तुनः सत्त्वम्? प्रमाणयोग्यत्वम्। अधिगतमेव तर्हि तदस्त्यर्थनिष्ठाद्वचनात्, प्रमाणयोग्यताया अस्त्यर्थत्वात्।

अस्तु वा मानयोग्यत्वं सत्त्वम्, **तच्च** शब्देनास्ता(मस्त्यर्थनिष्ठेन।) [नन्वेवं **प्रमा**]**णयोग्य**[**तायां वचः**] **पर्यव**[**सितमि**ति] (वस्तुसत्त्वावधा)[रणाय मानान्तरं मृग्यमित्यत आह–

तस्मिन्मिते व[**स्तु**](**सत्त्वं भवत्यागम**)[**गोच**] **रः।**

तत्त्वं हि वस्तुनो रूपभेदो वा सत्ता वा स्यात्। तत्र सत्ता मान[व्याप्यता], स चास्त्यर्थनिष्ठस्य वचसो गोचरः। एवं रूपभेदो(ऽस्ति चेत्सो ऽपि

55.1–4 Cf. *Bhāvaśuddhi* (352.10–13): तत्=सत्त्वं चशब्देन प्रमीयतामस्त्यर्थनिष्ठेन। नन्वेवं प्रमाणयोग्यतायां वचःपर्यवसितावपि वस्तुसत्त्वावधारणाय मानान्तरं मृग्यमिति, अत्राह– तस्मिन्मित इति॥

55.5–15 Cf. *Bhāvaśuddhi* (352.13-353.6): वस्तुनः सत्त्वम्=सत्ता चेदस्त्यर्थनिष्ठस्य वचसो गोचरः, एवं रूपभेदश्चेन्मानेन सो ऽपि विषयीकर्तव्यः; शक्तेः शक्तशक्याधीननिरूपणत्वादित्यर्थः। प्रवर्ततां नाम वस्तुरूपे ऽप्यागमः, तत्पुनर्मानयोग्यमित्येवं गृह्यते, इति मानान्तरस्यापि निवेशात् सापेक्षतेति, अत्राह– न चेति॥ मानयोग्यमेतदिति हि शब्दः प्रवर्तते, न तु प्रमितमिति। न चैतावतान्तरार्थविभिन्नता, मानान्तरसंभेदः, नापि सापेक्षतेत्यर्थः। एतच्च परेषामपि समानमित्याह– प्रचक्षत इति॥ सत्तां प्रमाणयोग्यतामन्यां न प्रतिपद्यन्ते किन्तु प्रमाणग्राह्यतामेव। ते ऽपि मानान्तरेणार्थविभिन्नतां मानान्तरार्थसंस्पर्शं मानान्तरप्रवृत्तिं तस्मिन्न प्रतिजानते, नाभ्युपगच्छन्तीत्यर्थः॥।

55.1 अस्तु वा] *em.*; अ ⁻वा MS • °योग्यत्वं] *em.*; °योग्यत्वां MS **55.6** चास्त्यर्थ°] चा *ow.* MS • एवं] *em.*; एव MS

माने)[नागमेन] गोचरीकर्तव्यः।[शक्तिर्हि शक्तशक्य]रूपनिरूपणाधीननिरूपणा शक्या निरूपयितुम्। ननु प्रवर्ततां ना[म](वस्तुरूपे ऽप्यागमः), तत्पुनर्मानयोग्यमित्येवं गृह्यत इति मानान्तरस्यापि निवेशः, अनिवेशे ऽनिवेशत्वेन ग्रहाभावात्। तथा च सापेक्षा, अतो मा(नयोग्यमेतदिति हि) शब्दः प्रवर्तते न तु प्रमितमि[ति]। **न चैतावता** तत्संभेदो नापि **सापेक्षतेत्यर्थः**। एतच्च प[रि]षामपि समानमि[त्या](ह– **प्रचक्षते ये ऽपि स**)⟨f.*154r⟩**त्तां** प्रमाणयोग्यता[**मन्यां** ⟨न प्रतिपद्यन्ते⟩ किं तु प्रमाणग्राह्यतामेव, ते ऽपि शब्दप्रवृत्तिं च तस्य शब्दस्या]र्थवेदनं चात्रान्तरेण मानान्तरेणार्थविभिन्न(तां मानान्तरार्थसंस्पर्शं तस्मिन्न प्रति)[जानते ऽभ्युप]गच्छन्ति। शब्दानां मानान्तरा[वगम]स्ततस्त्वर्थनिश्चय इति चेत्, तत्किमिदानीं मानान्तरमर्थाव[से](यम्? यद्यर्थान्मानान्तरमव)[सीय]ते तर्हि कुतो ऽर्थ[भेदविनिश्चयः?] (न हि मानयोग्यत्व)मभिन्नमर्थभेदेन तद्विनिश्चयाय कल्पते, तन्मात्रस्य तदनान्त(रीयकत्वात्। अर्थ)[भेदे तु कुतश्चिदे](कस्य विनिश्चयो ऽन्यस्मा)दित्यवसातव्यो ऽर्थ[भेद इत्य]स्यावसायः। शब्दादन्यतस्तस्मान्मानयोग्य[तां] (--- [17] ---) [मानान्तरमभ्युपग](न्तव्य)[मिति॥ ⊗॥]

प्रमाणान्तरसंभेदाभ्युपगमे ऽपि नाप्रामाण्यप्रसङ्गदोष इति दर्शयति–

प्रमाणान्तरभिन्नार्थमपि मानं न नो वचः॥ ५३॥
निरपेक्षमिहार्थे तु प्रमितं वस्त्विदं मया।
अर्थमात्रे च सापेक्षमन्यापेक्षार्थबोधनात्॥ ५४॥
अबाधितमपि त्वर्थे प्रमाणांशे ऽपबाधनात्।
तत्राप्रमाणतामेति बुद्धानाप्तवचो यथा॥ ५५॥

55.7–8 °धीननिरूपणा शक्या] *em.*; °धीननिशक्यानिरूपणा शक्या MS **55.9** °मित्येवं] *em.*; °मित्येव MS • मानान्तर°] *em.*; मंमांतर° MS • निवेशः, अनिवेशे ऽनिवेशत्वेन] *em.*; निवेशे ऽनिवेशे ऽनिवेशेत्वेन MS **55.10** सापेक्षा, अतो] *conj.*; सापेक्षतो MS • शब्दः] : *ow.* MS **55.11** सापेक्षतेत्यर्थः] MS^{pc}; सापेक्षत्यतेत्यर्थः MS^{ac} **55.12** °षामपि] MS^{pc}; °षामेपि MS^{ac} **55.14** °स्यार्थवेदनं चात्रान्तरेण] *conj.*; स्यर्ववेधनं चानुत्तरान MS^{ac} **55.15** शब्दानां] *em.*; शब्दाना MS **55.20** मानान्तरम°] *em.*; मानान्तराम° MS

न खलु प्रमाणान्तरसंभिन्नार्थमपि वचो न प्रमाणम्, प्रमाणमेव ह्याप्तवाक्यम्। कथं पुनः प्रमाणं सापेक्षमिति चेत्, उच्यते– निरपेक्षमेव तत् 'प्रमितो ऽयं मयार्थः' इत्यस्मिन्नर्थे। केवले ह्यर्थे 'एवमयमर्थः' इत्यप्रतीतेः 'एवमयं पुरुषो वेद' इति च प्रतीतेः पुरुषज्ञानापेक्षम्। तत्रोपलब्धौ तावदनपेक्षत्वात्प्रामाण्यमश्नुते तत्सिद्धिद्वारश्च पश्चादर्थ इति। कथं तर्हि पुरुषवचः किंचिदबाधितार्थमपि सापेक्षत्वेनाप्रमाणं कथ्यते? उच्यते– यद्यप्यर्थे बाधो नास्ति, यदपेक्षं त्वस्यार्थे प्रामाण्यं यत्सिद्धिमुखेन तं साधयति तत्र प्रमाणांशे बाध्यते। तस्यासिद्धेस्तद्द्वारेण नार्थसिद्धिरित्यर्थे ऽप्रमाणम्, यथातीन्द्रियार्थे बुद्धवचः पुरुषस्य दर्शनासंभवात्। यथोक्तम्– 'पुरुषाशक्तितस्तत्र सापवादत्वसंभवः'। इति। यथा च विप्रलम्भकवाक्यम्, अयथादृष्टार्थवादित्वस्य प्रमाणावगतत्वात्।

[तदेवं प्रमाणग्रहणयोग्य]तायामपि सत्तायामस्त्य[र्थ](निष्ठस्य वचसो मानान्तरासंभिन्नावगाहिनो)[न सापेक्षतेत्युक्तम्, संप्रति तु **प्रमाणान्तर[संभेदाभ्युपगमे ऽपि नाप्रामाण्यप्रसङ्गदोष** इ(त्युत्तरतात्पर्यमाह–

प्रमाणान्तरभिन्नार्थमपि मानं न नो वचः। इति।

56.18–19 Cf. *Ślokavārttika Codanāsūtra 96cd:* पुरुषाशक्तितस्तत्र सापवादत्वसंभवः।

56.1–15 Cf. *Bhāvaśuddhi* (356.3-13): तदेवं प्रमाणग्रहणयोग्यतायामपि सत्तायामस्त्यर्थनिष्ठस्य वचसो मानान्तररा(रसं)भिन्नावगाहिनो न सापेक्षतेत्युक्तम्, संप्रति मानान्तरसंभेदाभ्युपगमे ऽपि न दोष इत्युत्तरतात्पर्यमाह– प्रमाणान्तरेति॥ न मानं नो, किन्तु मानमेव। ननु मानान्तरसंभिन्नार्थगोचरं वचः सापेक्षं कथं मानमिति? अत्राह– निरपेक्षमिहेति॥ तत्किं सर्वत्रैवानपेक्षम्? नेत्याह– अर्थमात्रे चेति॥ हेतुमाह– अन्यापेक्षेति॥ सापेक्षमपि चेत्प्रमाणम्, कथं तर्हि चैत्यवन्दनादिवाक्यमबाधितार्थमपि सापेक्षत्वेनाप्रमाणमिति? अत्राह– अबाधितमपीति॥ अत्रोदाहरणमाह– बुद्धेति॥

56.2 °दाभ्युपगमे] *em.*; °दाद्युगमे MS **56.3** °प्रसङ्गदोष] MS^{pc}; °प्रसङ्गगोचरदोष MS^{ac}

[किं च कस्य] वचसः? अपौरुषेयस्य। नन्वनपेक्षं प्रमाणमिति मानान्तरा-[सं](भिन्नार्थ (f.*154v) गोचरं वचः सापेक्षं कथं मानमित्य)त्राह–

[निरपेक्षमिहार्थे] तु प्रमितं वस्त्विदं मया।

तत्किं सर्वत्रैवानपेक्षम्? नेत्याह–

(अर्थमात्रे च सापेक्षमन्यापेक्षार्थबोधनात्। इति)।

सापेक्षमपि [चेत्प्रमाणम्], कथं तर्हि चैत्यवन्दनादिवाक्यमबाधितार्थम[पि] सा-पेक्षत्वेनाप्रमाण(मित्याह–

अबा)धितमपि त्वर्थे प्रमाणांशे ऽपबाधनात्।
तत्राप्रमाणतामेति।

अत्रैवोदाहरणमाह–

बुद्धानाप्तव[चो यथा] ॥

आप्तवाक्यं पुनर्नार्थे न मानांशे ऽपबाधितम्।
निरपेक्षं प्रमाणांशे व्यवहारो ऽन्यथा कथम्॥ ५६॥

आप्तवचः पुनर्नार्थे नापि प्रमाणांशे संभवत्प्रमाणगोचरं बाध्य-ते। प्रमाणांशे चानपेक्षं तन्मुखेन चार्थसिद्धिं विदधन्नाप्रमाणं भवितुमर्हति। अन्यथा शब्दनिबन्धनो व्यवहारो न स्यात्।

चैत्यवन्दना[त्स्व][र्ग इत्यादिबुद्धवचः, नद्यास्तीरे फलानि) सन्तीति च समव-धृतायथादृष्टवादित्वा(द्विप्र)लम्भक[स्य पुंसः। न पुन]रयं विधाप्तवाक्यस्येत्याह–

57.1–9 Cf. *Bhāvaśuddhi* (356.13–21): 'चैत्यवन्दनात्स्वर्गः' इत्यादिबुद्धवचः, 'नद्या-स्तीरे फलानि सन्ती'ति लौकिकानाप्तवचनमनवधृतयथार्थादृष्टवादित्वाद् विप्रलम्भकस्य पुंस इत्यर्थः; न पुनरेवंविधाप्तवाक्यस्येत्याह– आप्तवाक्यमिति॥ संभवत्प्रमाणगोचरं नि-रपेक्षं प्रमाणांशे, प्रमेयांशे तु प्रमाणसापेक्षम्; तथापि नाप्रमाणम्; प्रमाणोपस्थापनद्वा-रेणार्थनिश्चायकत्वादित्यर्थः। कुत एतत्? अत्राह– व्यवहारो ऽन्यथेति॥ आप्तवाक्यस्य सापेक्षत्वेनाप्रमाणत्वे सर्व एव शब्दनिबन्धनो व्यवहारः समुच्छिद्येतेत्यर्थः॥

56.5 °नपेक्षं] *em.*; °नपेक्षा MS **56.7** तु प्रमितं] *em.*; प्रमितं MS **56.10** °ता-र्थमपि] *em.*; °तार्थमःपि MS **56.11** °त्वेनाप्रमाण°] *conj.*; °त्वेवाप्रमाण° MS **56.14** अत्रैवोदाहरण°] MS^{pc}; अत्रैवप्रमादाहरण° MS^{ac} **57.1** च समव°] *em.*; च सेमव° MS **57.2** °धृतायथा°] MS^{pc}; °धृतायाथा° MS^{ac} • °दृष्टवादित्वा°] *em.*; °दृष्टवादिता° MS

(आप्तवाक्यं पुन)[र्नार्थे न मानांशे ऽ](पबाधितम्।

संभवत्प्रमाणगोच)रं [निरपेक्षं प्रमाणांशे](प्रमेयांशे) प्रमाणसापेक्षं तथापि नाप्रमाणम्, (प्रमाणोपस्थाप)नद्वारेणार्थनिश्चायक(त्वादित्यर्थः। सापेक्ष)त्वेनाप्रामाण्ये (ऽप्याप्तवाक्यस्य बाधित)त्वाभावेनानधिगतार्थगन्तृ(त्वात्प्रामाण्यं स्या)त्, स सापेक्षत्वे ऽपि स्वगोचर इति। **व्यवहा(रो ऽन्यथा कथम्।)** यदि पुनः सापेक्षत्वेनाप्तवाक्यान्यप्रमाणानि। ततः सर्व [ए](व **शब्दनिबन्धनो व्य**) ⟨f.*155ʳ⟩ - **वहारः** समुच्छिद्येतेत्यर्थः।

मयेति वक्त्रभावेन संभेदरहितं ततः।
प्रलीनज्ञानविज्ञेयविभागं स्वात्मवेदनम्॥ ५७॥
प्रवेदयन्तु वेदान्ता मानान्तरमलौकिकम्।
तत्सिद्धिसिद्धतार्थस्य पुंवचोवद्भविष्यति॥ ५८॥

एवं च प्रमाणान्तरसंभिन्नार्थत्वे ऽपि वेदान्तवचसां न प्रामाण्यव्याहतिः, आप्तवाक्यवत्। तथा हि– तान्यपि ज्ञानज्ञेयविभागविकलं स्वप्रकाशरूपमलौकिकं काममवगमयन्तु प्रमाणान्तरम्, तद्द्वारा चार्थसिद्धिराप्तवचनवत्। इयांस्तु विशेषः स्यात्– वेदे वक्तुरभावान् 'मया' इति संस्पर्शो न स्यात्।

एवं च वेदान्तानामाप्तवचनवत्प्रमाणान्तरसंभिन्नार्थानामपि मयेति संभेदमात्ररहितानां सिद्धं [प्रा](माण्यमित्याह–

मये)ति वक्त्रभावेन संभेदरहितं ततः।
प्रलीनज्ञानवि[ज्ञेय]विभागं स्वात्म[वेदनम्॥

58.1–3 Cf. *Bhāvaśuddhi* (356.21–357.4): एवं च वेदान्तानामपौरुषेयाणामस्त्यर्थनिष्ठानामाप्तवचनवत् प्रमाणान्तरसंभिन्नार्थानामपि मयेति संभेदमात्ररहितानां सिद्धं प्रामाण्यमित्याह– मयेतीति॥

57.6 °धिगतार्थगन्तृ°] *em.*; °धिगतार्थसगन्तृ° MS **57.7** सापेक्षत्वे] *em.*; सापेक्षणे MS **57.9** समुच्छिद्येते°] *em.*; समुक्षिद्येते° MS **58.1** वेदान्ताना°] *em.*; 5ङ्ना° MS^{pc}; वेदान्नाना° MS^{ac} • °संभिन्नार्थानामपि] *em.*; °संभिन्नाथामपि MS **58.4** °विभागं] *em.*; °विभाग MS^{pc}; °विभग° MS^{ac}

प्रवेदयन्तु] वेदान्ता मानान्तरमलौकिकम्।
तत्सिद्धिसिद्ध(तार्थस्य पुंवचो)वद्भविष्यति॥

यत्किल वेदान्तैः प्रमाणमवगन्तव्यं ब्रह्मगोचरं [साक्षात्कारि]विज्ञानं प्रत्यक्षमलौकिकम्, न ततो ऽन्यद्ब्रह्म यदाह(– प्रलीनज्ञानविज्ञे)यविभागम्, अत एव स्वात्म(वेदनमिति। तथा च) [प्रमाणे निरपे]क्षा वेदा[न्ता](स्त)[दभिन्ने प्रमेये ऽप्यनपेक्षा] इति भावः॥ ⊗॥

अभ्युपगमवादं परिसमाप्य प्रकृतमुपसंहरति –

एवं न मेयता सत्ता

परः पुनः प्रत्यवतिष्ठते –

नन्वन्यापि न युज्यते।
न हि पूर्वावमर्शेन विना सामान्यकल्पना॥ ५९॥
गामेकामीक्षितवतो जायते ऽन्यत्र यादृशः।
अवमर्शो दृष्टसतस्तथा न हि सदन्तरे॥ ६०॥
एकशब्दप्रवृत्तिस्तु दण्ड्यादिवदुपेयताम्।

दृष्टरूपावमर्शः सामान्यकल्पनायां प्रमाणम्। यथा– बाहुलेयं दृष्टवतः शाबलेये 'स एवायम्' इति। न च किञ्चित्सङ्गृहीतवतो ऽन्यत्र स भवति। एकशब्दप्रवृत्तिस्तु विनापि सामान्येनार्थान्तरयोगनिमित्ता, दण्डिपाचकादिशब्दवत्। अत्रोच्यते –

को नु पूर्वावमर्शो ऽयं पूर्वरूपान्वयो धियः॥ ६१॥

58.7–10 Cf. *Bhāvaśuddhi* (357.6–11): ब्रह्मगोचरं साक्षात्कारिविज्ञानं प्रत्यक्षमलौकिकम्। न ततो ऽन्यद्ब्रह्मेत्यर्थः॥ अत एव स्वात्मवेदनम्=स्वप्रकाशम्। वेदान्तानामलौकिकमानपरत्वे कथं ब्रह्मसिद्धिः? अत्राह– तत्सिद्धिसिद्धतेति॥ प्रमाणे निरपेक्षा वेदान्तास्तदभिन्ने प्रमेये ऽप्यनपेक्षा इत्यर्थः॥

58.6 तत्सिद्धिसिद्ध°] MS[pc]; तत्सिद्धिसिद्धा° MS[ac] 58.7 प्रमाणमवगन्तव्यं] *con.*; प्रमाणमवगन्तव्य MS

सदन्तरे ऽपि सो ऽस्त्येव कयाचित्खलु मात्रया।
सर्वात्मना त्वनुगमो न दृष्टः खण्डमुण्डयोः॥ ६२॥
न तादृशश्चेन्नो भेदमात्राद्वेद्यः स्वपह्नवः।
न भेदमात्रान्मृज्जातिहीनं मणिकमल्लकम्॥ ६३॥
रूपान्वयः प्रत्ययस्य मणिकेषु हि यादृशः।
न दृष्टमल्लकस्यास्ति मणिके खलु तादृशः॥ ६४॥

कः पुनरयं पूर्वावमर्शः– पूर्वरूपावभासो बुद्धेः, अथ 'सो ऽयम्' इति पूर्वापरानुसन्धानम्। तत्र यदि पूर्वः कल्पः, सो ऽस्त्येव सदन्तरे मात्रया। तथा हि– निरुपाख्यवैलक्षण्येन सतां तुल्यरूपता प्रकाशते। अन्यथा निरुपाख्यवत्सन्तो ऽप्यत्यन्तविलक्षणाः प्रकाशेरन्। अथ सर्वरूपानुगमः, सो ऽभिप्रेते ऽपि सामान्यगोचरे नास्ति। न हि खण्डमुण्डयोः सर्वात्मनान्वयः, एकत्वप्रसङ्गात्सामान्याभावापत्तेः। अथ न तादृशो यादृशः खण्डादिषु। तदसत्। न विशेषमात्रेण संवेद्यान्वयिरूपप्रत्याख्यानं युज्यते, गोत्वादेरपि तत्संभवात्। न हि देवदत्तस्य द्वितीयदर्शने यादृशो रूपानुगमः, तादृशः खण्डं दृष्टवतो मुण्डदर्शने। सामान्यगोचरे ऽपि च न सर्वत्र तुल्यः। नानामणिकविलक्षणो हि मणिकशराबयो रूपान्वयः। न च तावता मृज्जातिहीनता तयोः, किंचित्तुल्यतयावभासमानत्वात्।

सा[मा](न्यकल्पना पूर्वावम)र्शः। सामान्यकल्पनामाह– **न भेदमात्रान्मृज्जातिहीनमि**ति। न खलु मृज्जात्यभावे मृन्मृदित्यभिन्नबुद्धिव्यपदेशसं[भवः], न च गन्धक(ल्पना संभवति। प्रति)गन्धानामपि प्रतिगन्धवद्भेदेन तदुत्थापनासामर्थ्यात्, गन्धत्वस्य च सामान्यस्यानभ्युपगमात्। अभ्युप[ग](मे ऽपि त-

59.1 °कल्पनामाह] MS^{pc}; °कल्पमा MS^{ac} **59.3** °गन्धानामपि प्रतिगन्ध°] *em.*; °गन्धानामपि प्रतिगन्धानामपि प्रतिगन्ध° MS

योरन्योन्य)⟨f.*155ᵛ⟩[मभिन्नयोर्गन्धे ऽसत्त्वादिति। अन्यथा नि]रुपाख्यवदिति। यथाद्रव्यमु[पब्धचरं तदभावे] वैलक्षण्यं स्यादिति। सदिदमयमसद्भि(न्नरूपेण ते द्वे प्रकाशेते, तेन सतां तुल्यरूपतात्य)न्तिके वैलक्षण्ये न कल्पेतेति॥ ⊗॥

अथ द्वितीयः कल्पः, अत्रोच्यते–

पूर्वावमर्शः स इति प्रख्येत्यपि न शोभते।
मणिकं वीक्षितवतः सो ऽपि नोदेति मल्लके॥ ६५॥

पूर्वापरानुसन्धानात्मिका 'सो ऽयम्' इत्यभेदमवगमयन्ती भिन्नेष्वपि सामान्यकल्पनाहेतुर्बुद्धिः पूर्वावमर्श इत्युच्यत इत्येतदपि न शोभते। यतो नानुसन्धानादेवाभेदसिद्धिः। अभिन्नरूपावभासादपि। अन्यथा नाभिन्नदेशकाल एको ऽर्थः स्यात्। न हि तत्र देशकालभेदाभावे 'सः' इत्यनुसन्धानम्। अपि च दृष्टमणिकस्य मल्लके न भवति द्रागिव 'सः' इत्यनुसन्धानं खण्डमुण्डवत्। न चैवं मृज्जातिहीनता। विमृशतस्तु 'तज्जातीयमिदम्' इति बुद्धिः सदन्तरे ऽपि समाना। तुल्ये तर्हि सामान्ययोगे कस्मात्क्वचित् 'सः' इत्यवमर्शो नान्यत्र? उच्यते–

सामान्यरूपभूयस्त्वे तस्मात्तत्त्वं प्रकाशते।
विलक्षणत्वमल्पत्वे चकास्ति तदनुद्भवात्॥ ६६॥
यस्मात्सत्यपि सामान्ययोगे मणिशराबयोः।

न, 'सः' इति प्रख्या मणिकान्तरे च भवति भूयिष्ठसामान्ययुक्ते। तस्मात्सामान्यरूपाणां भूयिष्ठत्वेनोद्भवात् 'सः' इति

59.6 वैलक्षण्यं स्यादिति] *conj.*; वैलक्षण्यावेति MS

तत्त्वप्रख्या। अल्पत्वे तु न तथा, तेषामनुद्भवात्। न च दण्ड्यादिवदेकशब्दप्रवृत्तिरित्याह–

प्रमाणं कार्यविज्ञेयमसंयोज्यास्तिधीर्यतः॥ ६७॥
प्रथमं जायते तस्मान्न दण्ड्यादिसमानता।

[द्रागित्ये]व–

पूर्वावम[र्शः स] इति प्रख्ये(त्यपि न शोभते।

भूयोनिरस्तापि प्रमाणग्राह्यता सत्ता निराकरणान्तराभिधित्सया पुनर्नि)रस्यते– **न च दण्ड्यादिवदिति।** यदीन्द्रियादि प्रमाणं (यदि वा संवेदनमात्मव्यापारः, उभयमप्यत्यन्तपरोक्षतया ज्ञेयाभि)व्याप्तिलक्षण[फलप्रसवोन्नेयमिति] तद्ग्रहे च प्रथममेवास्तिधीर्जाये[ते](त्यर्थः॥ ⊗॥

नागृहीतविशेषणा विशिष्टबुद्धिः। न च विशिष्टबुद्धेः प्राक् प्रमाणग्रहणं तत्कालं वा। तथा हि प्रमाणादेव सा भवति। प्रमाणं च प्रमितिकार्योन्नेयत्वात्पश्चात्सत्प्रतिपत्तेर्गृह्यते। तस्मादग्रहात्प्रमाणस्य तत्संयोजनविकला सा न प्रमाणयोगनिमित्ता। यदि तर्हि न प्रमाणयोगो ऽस्त्यर्थः, कथं तत्कालानुविधायिनी कालप्रवृत्तिरस्त्यर्थे– 'कूपो ऽस्ति' 'कूपो ऽभूत्' 'कूपो भविष्यति' इति? तदुपाधिप्रकल्पितभेदत्वात्, देवदत्तसत्ताया इव पाटलिपुत्रसंयोगोपाधिकल्पितभेदाया इति।

61.1विशिष्टबुद्धेः प्राक्] सद्बुद्धेः प्राक् *edn*

60.3–6 Cf. *Bhāvaśuddhi* (363.14–18): भूयो निरस्तापि प्रमाणग्राह्यता सत्ता निराकरणान्तराभिधित्सया पुनर्निरस्यते– न च दण्ड्यादिवदिति॥ यदीन्द्रियादि प्रमाणम्, यदि वा संवेदनमात्मव्यापारः, उभयमप्यत्यन्तपरोक्षतया ज्ञेयाभिव्याप्तिलक्षणफलप्रसवोन्नेयमिति प्रागेव तद्ग्रहा'दस्ती'तिधीर्जायते, अत इत्यर्थः॥

60.1 द्रागित्येव] *em.*; द्रागित्येवा MS **60.2** प्रख्ये°] *em.*; प्रक्षे° MS **60.4** यदीन्द्रियादि] MS^{pc}; यदीन्द्रियादि MS^{ac}

वैशेषिक](राद्धान्ते विशेषणज्ञानपू(र्व)कं विशेष्यज्ञानमिति तं प्रत्याह– **न च विशिष्टबुद्धेः प्रागिति**। येषां त्वेकविज्ञानसंसर्गिणी विशेष्य[वि](शेषणबुद्धि)[स्तान्] प्रत्याह– **तत्कालं वा**। एतच्चानुमेयसंवेदनवावदूकान्प्रति दूषणं द्रष्टव्यम्। एतदुक्तं भवति– विशिष्ट[ग्र](हणेन तद)⟨f.*156ʳ⟩वयवं तत्कारणं वा तद्व्याप्तम्, तदभावे †वृक्षाभाव धम इति।† चोदयति– **यदि तर्हीति**। **कथं तत्प्रमाणयोगकालानुवि[धा](यिनी कालप्रवृत्तिः**? अस्त्यर्थ)स्यैव समवायाद्व्याप्त्यादितरयोः प्रमाणयोः प्रमाणयोग्यस्य त्रैकाल्यसंभवादुपपद्यते। तस्मात्प्रमाणयो[ग्य](तैव सत्ता। परिहरति– **तदु)पाधिप्रकल्पितभेदत्वात्**।[वदन्ति] (वृद्धाः)–[इह भूत्वा] देवदत्तः पाटलिपुत्रे भवतीति, तदपि वर्तमानमेव (देवदत्तं तत्तद्देशसंयोगभेदोपधानकल्पितभेदं पश्यन्ति। न चैतावता तस्य तत्तद्देश)[संयोग] एव सत्तेत्यर्थः। तस्माद्भिन्नेषु द्रव्यगु[ण](कर्म)[स्वनन्यथासिद्धं सदित्यभिन्नबुद्धि](व्यपदेश)[निबन्धन](मस्तित्व)सामान्यं चैव गोत्वाश्वत्वादिषु सामान्यं सांप्र(तम्। यदि न) [बुद्धिव्यपदेशाभ्यां सामान्यत्वकल्पनाप्रसङ्गः], तयोरन्यथा[सिद्धेः। अस्ति तर्हि] तेषां सर्वेषामेव भिन्नेषु पिण्डेषु प्र(मेयत्वेनैकत्वम्। तदेवाभेद)⟨f.*156ᵛ⟩-[समारा]धक इति हि स्थितिः। तेनैकेन क्रोडीकृताभिन्नानि सन्तीत्युक्तम्।

61.1–3 Cf. *Abhiprāyaprakāśikā* (363.28-30): न चेति॥ विशेषणज्ञानजन्या विशिष्टबुद्धिरिति वैशेषिकाभिप्रायेण प्रागित्युक्तम्, विशेषणविशेष्ययोरेकज्ञानग्राह्यत्वमिति नैयायिकमतावलम्बनेन तत्कालं वेत्युक्तम्॥

61.6–8 Cf. *Bhāvaśuddhi* (364.10–14): अस्त्यर्थस्य सामान्यरूपत्वे वर्तमान एव रूपे समवायात् प्रमाणयोगकालानुविधायिनी कालप्रवृत्तिस्तत्र न स्यादिति चोदयति– यदि तर्हीति॥ प्रमाणयोग्यस्य त्रैकाल्यसंभवादुपपद्यते तत्प्रवृत्तिः। तस्मात्प्रमाणयोग एव सत्तेत्यर्थः। परिहरति– तदुपाधीति॥

61.8–12 Cf. *Bhāvaśuddhi* (364.16–20): उदाहरति– देवदत्तेति॥ वदन्ति वृद्धाः– 'इह भूत्वा देवदत्तः पाटलिपुत्रे भवती'ति, तद्वर्तमानमेव देवदत्तं तत्तद्देशसंयोगभेदोपधानकल्पितभेदं पश्यन्ति। न चैतावता तस्य तत्तद्देशसंयोग एव सत्तेत्यर्थः। तस्माद्भिन्नेषु द्रव्यगुणकर्मस्वनन्यथासिद्धसदित्यभिन्नबुद्धिव्यपदेशनिबन्धनमस्तित्वसामान्यं सिद्धम्॥

61.2 त्वेकविज्ञान॰] *em.*; त्वेकविज्ञा॰ MS **61.3** ॰संवेदनवावदूकान्] *em.*; ॰संवेदनःप्रावादुकान् MS **61.4** भवति] *em.*; भविति MS **61.4-5** तद्व्याप्तम्, तदभावे] *em.*; तद्व्याप्ततुदभावे MS **61.5** तर्हीति] MS[pc]; तार्हीति MS[ac] **61.6** ॰वायाद्व्याप्त्यादितरयोः] *conj.*; ॰व्ययाद्व्याप्त्यादितरयो MS[pc]; ॰व्ययाद्व्याप्त्याददितरयो MS[ac] (द without head mark) **61.7** प्रमाणयोः] *em.*; प्रेमाण MS • त्रैकाल्य॰] *em.*; तत्रैकाल्य॰ MS **61.11** तस्माद्भिन्नेषु] *em.*; तस्माच्छिन्नेषु MS **61.12** गोत्वाश्वत्वा॰] *em.*; गौषाश्वत्वा॰ MS **61.15** सन्तीत्युक्तं] *conj.*; सन्त्युक्तं MS

विशेषणावयव्यादि[भ्यो](--- [31] ---)का व्याख्याताः। तस्मात्सर्वमवदातम्॥ ⊗॥

न च 'क्रियामन्तरेण न संसर्गः पदार्थानाम्' इति शब्दार्थनयविदामविगानमित्याह–

संबन्धमात्रावसितमपि चान्ये विपश्चितः॥ ६८॥
आहुर्वचो ऽक्रियमयं राज्ञो ना फलिता द्रुमाः।

'राज्ञो ऽयं पुरुषः' फलिता एते वनस्पतयः' इति क्रियारहितेष्वपि संसर्गः प्रतीयते। न चेहापि 'अस्तिक्रिया' इति युज्यते। यतो न निर्ज्ञातराजसंबन्धस्य पुरुषस्य फलवतां च वनस्पतीनां सत्तेह प्रतिपाद्या गम्यते। न ह्येते वाक्ये सत्तायां पर्यवस्यतः। किं तु पुरुषस्य राजसंबन्धे, द्रुमाणां च फलसंबन्धे– 'यो ऽयं पुरुषः, स राज्ञः' 'य एते वनस्पतयः, ते फलिताः', न 'यो राजपुरुषः, सो ऽस्ति' 'ये च फलिताः ते सन्ति' इति। यदपि केचित्– 'अवधार्यताम्' इति प्रतिपत्तिक्रियाविधिना क्रियावत्तां मन्यते, तदपि शब्दादेव प्रतिपत्तेः सिद्धत्वात्प्राङ् निरस्तमेवेति।

यदा हि निर्ज्ञात(पुरुषवनस्पतिसद्भावः पुरुषः पृ)[च्छति] हन्त क[स्यैष](पुरुषः, कियन्तश्चैते वनस्पतय)[इति। तस्योत्तरम्– **राज्ञो ना फलिता द्रुमाः**। तत्खलु राज्ञः](फलस्य च सम्बन्धे पर्यव)[सितं](तत्प्रश्नोत्तरत्वात्, न)[पुरुषस्य] (द्रुमाणां वा)सत्तायाम्। फलिता [इति] (--- [11] ---)च संब[न्धां](शं प्रतिपाद्यते

62.4 फलिता द्रुमाः] फलिनो द्रुमाः*edn*

62.1–3 Cf. *Bhāvaśuddhi* (365.15–17): यदा हि निर्ज्ञातपुरुषवनस्पतिसद्भावः पुरुषः पृच्छति– कस्यैष पुरुषः, कियन्तश्चैते वनस्पतय इति? तस्योत्तरम्– 'राज्ञः' 'फलिता द्रुमाः' इति॥ तस्मात्सम्बन्धे पर्यवसानम्, तत्प्रश्नोत्तरत्वादित्यर्थः।

62.3 द्रुमाः] *em.*; द्रुमा MS

फलवतां)[च वनस्पतीना]मिति।

अथापि न क्रियारहितं वाक्यमस्ति क्रियायां च सापेक्षता, तथापि न दोष इत्याह–

जनिक्रियावसानाच्च विशिष्टं शक्यबोधनम्॥ ६९॥
कारणं जायत इदमीदृक्षात्कारणादिति।

ईदृक्षात्कारणाज्जगज्जायत इति जनिक्रियानिष्ठादपि वाक्यात्तद्विधकारणसत्ता शक्यते प्रतिपत्तुम्। यथा– ईदृशात्तरोरिदं फलमजनीति तद्विधतरुसद्भावः। तथा च श्रुतयः काश्चिदेवमेव ब्रह्म प्रतिपादयन्ति– 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' 'यथाग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे देवाः' इत्यादि। तथा–

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति।
यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वम्॥'

'तदेतत्सत्यम्–
यथा सुदीप्तात्पावकाद्विष्फुलिङ्गाः सहस्रशः संभवन्ते सरूपाः।
तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति॥'

तथा– 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ऽक्षरात्परतः परः॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।

63.8-9 Cf. *Chāndogyopaniṣad* I.9.1: सर्वाणि ह वा ··· समुत्पद्यन्ते।
63.9–10 Cf. *Bṛhadāraṇyakopaniṣad* II.1.20: यथाग्नेः क्षुद्राः ··· सर्वे देवाः।
63.11–12 Cf. *Muṇḍakopaniṣad* I.1.7: यथोर्णनाभिः ··· संभवतीह विश्वम्॥
63.13-15 Cf. *Muṇḍakopaniṣad* II.1.1: तदेतत्सत्यम् ··· चैवापियन्ति॥

62.5 च वनस्पतीनामिति] *em.*; वचनस्पतीनामिति MS

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥' इति।

अपियन्ति लीयन्ते ऽध्य(वस्य)[न्ति चैते] प्रतिपत्तिपदगम्याः।

इदानीं पदार्थसंसर्गायैव विधिराश्रयितव्य इति प्रत्यवतिष्ठते–

ननु प्रमान्तराधीनसंसर्गाः पुरुषोक्तिषु॥ ७०॥
पदार्था विध्यधीनात्मसंश्लेषा इतरत्र तु।
पदानां रचना तत्र विवक्षापरिपूर्तये॥ ७१॥
प्रमाणान्तरगम्ये ऽर्थे विवक्षा च व्यवस्थिता।
विध्यर्थसिद्धये वेदे तदभावे त्वसंगतेः॥ ७२॥
विशिष्टार्थगतिर्भ्रान्तिरग्रहे ग्रहविभ्रमः।

विवक्षितार्थनिष्पत्तये हि लोके पदानां समभिव्याहारः। नैकपदसाध्यो विवक्षितार्थः। प्रमाणान्तरोपलब्धश्च विवक्षाविषयः। तेन तत्र प्रमाणान्तरायत्तः संसर्गः। तथा च तद्विरोधे ऽसंसर्ग एव पदार्थानाम्– 'जरद्गवः पादुककम्बलाभ्याम्' इति। वेदे तु प्रमाणान्तराभावाद्विधिनिबन्धनो ऽसौ। तदभावे त्वसंभवाद्येयं विशिष्टार्थगतिरुच्यते सा भ्रान्तिः, समभिव्याहारात्। सो ऽयं विवेकाग्रहे संसर्गग्रहविभ्रमः। अत्रेदमेव विचार्यम्– कथं लोके प्रमाणान्तराधीनः संसर्ग इति। यदि प्रमाणान्तरेण तदवगमात्। तदसत्, अपूर्वस्यापि तस्य प्रतीतेः। अन्यथा वचनवैयर्थ्यात्। अनधिगतं हि श्रोतुरर्थं बोधयितुं वचः प्रयुज्यते। अथ संसर्गयोग्यतामात्रस्य प्रमाणान्तरेणावगमात्, समानमेतद्वेदे। तथा

63.17–20 Cf. *Muṇḍakopaniṣad* II.1.2–3: दिव्यो ह्यमूर्तः ··· विश्वस्य धारिणी॥

63.1 Cf. *Bhāvaśuddhi* (366.25): अपियन्ति = लीयन्ते।

63.1 चैते प्रतिपत्ति°] *em.*; चैतेः प्रतिपत्तिः° MS

हि– अरुणया क्रीणातीति संसर्गः, नारुणयैकहायन्येति। तथा भावार्थो नियोगविषयः, न द्रव्यगुणशब्दार्थ इति प्रमाणान्तरावसितयोग्यतासामर्थ्येनैव व्यवस्थाप्यते।

नन्वयमत्रा[ह तद]धीनत्वसि[द्धि](ः प्रमान्तरात्संसर्गो भव)ति, तथा च **तद्विरोध** इति। **वेदे तु प्रमाणान्तराभावाद्विधिनिबन्धनो** ऽसौ। अनुवादकस्वलक्षणोऽभिसन्धिः ⟨f.*157r⟩ [तद]नुसंहितविधिरपि 'सत्यं ज्ञानम्' इत्यादेर्वचसः पदार्थसंसर्गमवगच्छति। तत्किमत्र विधिनेत्यत आह– त(**दभाव** इति। न पदान्वयमात्रा)द्वाक्यात्संसर्गग्रहः पदार्थानामपि तु पदार्थसंसर्गप्रतिपादकेन वाक्येन समभिव्याहारमात्रसाम्यात्ततो विवे[का](ग्रहात्तदारोपः। संसर्गं प्रति यो)[ग्य]तायाः [प्रमाणान्त]राधीनत्वं समानं [लोकवेद]योरिति शङ्कापूर्वकमाह– **अरुणया क्रीणातीति सं[स](र्गो नारुणयैकहायन्ये**ति। न) [कारकमक्रि]यात्मना गुणेन सह संसर्ग(योग्यम)[पि] तु क्रियया, एवं [क्रि]यापि [न गुणेन किं तु

64.1 *Taittirīyopaniṣad* II.1.1 : सत्यं ज्ञानमनन्तं ब्रह्म।

64.3–4 Cf. *Bhāvaśuddhi* (368.13-15): तदभावे ऽपौरुषेये वेदे मानान्तरासंभवाद्विध्यर्थाभावे पदार्थानामसंसर्गात् 'सत्यं ज्ञानमि'त्यादेर्वचसः पदार्थसंसर्गावगमात्किमत्र विधिनेत्यत आह– विशिष्टेति।
64.4–6 Cf. *Bhāvaśuddhi* (369.10–14): 'सत्यं ज्ञानमि'त्यादौ पदान्वयमात्रात्संसर्गावगमादिति, अत्राह– येयमिति॥ पदार्थसंसर्गप्रतिपादकेन वाक्येन समभिव्याहारमात्रसाम्यात्ततो विवेकाग्रहादसंसर्गाग्रहे संसर्गग्रहारोपस्तद्व्यवहार इत्यर्थः॥
64.6–14 Cf. *Bhāvaśuddhi* (370.2–11): पदार्थानां संसर्गं प्रति योग्यतायाः प्रमाणान्तराधीनत्वादिति शङ्कते– एतत्समानं लोकवेदयोरित्याह– समानमिति॥ एतदेव व्यनक्ति– तथा हीति॥ न कारकमक्रियात्मना ऽगुणेन संसर्गयोग्यमपि तु क्रिययैव। क्रियापि न गुणेन, किं तु कारकेणेत्यर्थः। व्यवस्थाप्यत इति संबन्धः। उदाहरणान्तरमाह– तथेति॥ भव्यस्य हि भावार्थस्य कार्योद्देशप्रवृत्तकृतिव्याप्यता, तेन कृतिप्रणाडिकया नियोगविषयत्वं युक्तम्। यद्द्रव्यगुणौ भूतौ तदर्थौ भवतः, तयोस्तु परस्वादिवत्कृतिव्याप्यतया नियोगविषयत्वे भावो ऽर्थो भूताभ्यां द्रव्यगुणाभ्यामुपदिश्येत, न चैतद्युक्तम्, इति संसर्गयोग्यताग्राहि प्रमाणान्तरमेवेत्यर्थः॥

64.1 नन्वयमत्राह] *conj.*; नन्वयमात्रा MS **64.2** तु] *em.*; न्त MS **64.4** पदार्थसंसर्ग°] *em.*; पदापदार्थसंसर्ग° MS • विधिनेत्यत] *em.*; विधिनित्यत MS **64.5** °द्वाक्यात्संसर्ग°] *em.*; °द्वाक्यासंसर्ग° MS **64.6** °व्याहारमात्रसाम्यात्ततो] *em.*; °व्याहरति। मात्रसाम्यात् तत्रो MS **64.8** अरूणया क्रीणातीति] *em.*; अतिथि। करुणा क्रीयातीति MS

कारके]णेत्यर्थः। **तथा** भव(ति **भावार्थौ नियोगविषयः**। भा)[वार्थस्य का](र्यो-द्देशप्रवृत्तकृतिव्याप्यता तेन कृतिप्रणाडिकया नि)[योगविषयत्वं युक्तम्। य]-द्द्रव्यगुणौ भूतौ तद[र्थौ भवतः, तयो]स्तु परश्वादिवत्कृतिव्याप्य(तया नियोगविषयत्वे भव्यो⟨f.*157v⟩ भावो ऽर्थो भूताभ्यां द्रव्यगुणाभ्या)[मुपदिश्येत। न चैवं युक्तमित्यपि संसर्गयोग्य]ताग्राहि प्रमाणान्तरमेवेत्यर्थः।

अथ न विवक्षैकपदावगम्या, तदर्थमात्रविवक्षाया निष्प्रयोजनत्वात्। तस्माद्विवक्षाविशेषसिद्धिर्नासंसृष्टेषु पदार्थेषु भवतीति तया विवक्षया प्रयुक्ताः संसृज्यन्ते। सा च प्रमाणान्तरसिद्ध इति। एवमपि विवक्षानिबन्धनः स्यात्, तत्प्रयुक्तानां संसर्गात्, न प्रमाणान्तरनिबन्धनः। यतो न तत्तस्य प्रतिपादकम्, न प्रयोजकं वा। यत्तु प्रमाणान्तरसिद्धे विवक्षेति। भवतु। न तु तस्य संसर्ग उपयोगः। तथा हि विप्रलम्भकवाक्ये ऽपि संसर्गप्रतीतिः। यत्तु विरोधे न संसर्गः। कामम्। न तु ततः संसर्गः। विरोधे ऽपि तु नासंसर्गः, प्रतीतेः। प्रतीतो ऽपि तु बाध्यते प्रमाणान्तरेण। एवं चानृतं किंचिद्वचः, किंचिदनर्थकम्– दशदाडिमादि, किंचित्सत्यम्। अन्यथानृतानर्थकविभागो न स्यात्।

चोदय(ति– **अथ न विवक्षैकपदगम्या**। सा)[हि न च नामपदा](र्थेष्वसंसृष्टेषु भवति, पदार्थमात्रस्य श्रोतुरबुभुत्सितत्वात्।)अबुभुत्सितं तु बोधयन्तो नैते

65.1 विवक्षैकपदगम्या] AB; विवक्षैकपदावगम्या *edn* **65.6-7**न तु तस्य संसर्ग उपयोगः। तथा हि] न तस्य संसर्ग उपयोगः। तथा च *edn*

65.1–2 Cf. *Bhāvaśuddhi* (370.11–12): चोदयति– अथेति॥ हेतुमाह– तदर्थमात्रेति॥ पदार्थमात्रस्य श्रोतुरबुभुत्सितत्वादित्यर्थः।

64.10 कारकेणेत्यर्थः] *em.*; किं तु कारकणेत्यर्थः MS **64.11-13** नियोगविषयत्वं युक्तम्। यद्द्रव्यगुणौ भूतौ तदर्थौ भवतः, तयोस्तु परश्वादिवत्कृतिव्याप्यतया नियोगविषयत्वे भव्यो] *em.*; ··· [योगविषयत्वे युक्तम्]यद्द्रव्यगुणौ भूतौ तदर्थौ (---[9]---)[दिवत्कृतिव्या] (---[17]---) [गु](णौ भूतौ तदर्थौ [भवतः तयो]स्तु परश्वादिवत्कृतिव्याप्य(···MS

लौकिका न (परीक्षका वा स्युः । --- [21] --- तयेति । पदानि हि प्रतिपादयन्ति तद्विवक्षा)[गोचरम्] । तदमी तद्विवक्षाप्रयुक्तास्तद्गोचरं (संसर्गं गमयन्तीत्यर्थः । प्रमाणस्य संसर्गप्रयोजकत्वे किमायातम् ?) सा च [मानान्त](रपूर्वेति मानान्तराधीनैव) [पदा]र्थसंसर्गसिद्धिः । य]त्र पुनर्न मानान्तरमपे(क्ष्यते तत्र प्रयो)जककारणान्तर(साधा)रण्येन न च तदन्यतो वेत्यर्थः । परिहरति– **एवमपीति** । विवक्षानन्तरभावात्तदन्वय[व्यति](रेकानुविधानाच्च । **यत**) [इति ।] (न तत्प्रमाणान्त)रं प्रतिपादकं वक्तृस्थं हि तत् । ननु मा भूत्प्रतिपादकम्, प्रयोजकं तु भविष्यति प्रयोजकप्रयोजकत्वादित्यत (आह– **न प्रयोजकं वेति** । नु प्रमाणान्तर)[प्रयोजकत्वम् । **न तु तस्येत्यत्र**] हेतुमुपन्यस्यति– **तथा हीति** । यत्तु मानान्तरविरोधिजरद्गवादिवा(क्यात्सं)(f.*158r)(सर्गानवगमा)[न्मानान्तरमनुविधत्ते पदार्थसंस]र्गावगम इति, उत्तरम्– **कामम्** । भवतु तद्विरोधे संसर्गावगमः, **न त्वेतावता त**[तो](मानान्तरात्संस)[र्गा](वगम इति । मानान्तरेण संसर्ग)[विषयेण] तदवगममुपलक्षयति । एतदुक्तं भवति– औत्सर्गि[कस्य कार्यस्य] नापवादकाभावः कारणमपि तु तदपवाद(विषयराहित्यम्, मानान्त)(रे-

---

65.15–16 Cf. *Mahābhāṣya* III.1.3: प्रकल्प्य चापवादविषयं तत उत्सर्गो ऽभिनिविशते ।

65.3–6 Cf. *Bhāvaśuddhi* (370.last-371.5): अत्राह– तयेति॥ विवक्षागोचरप्रतिपादनाय पदानि प्रयुज्यन्ते, सेयं पदरचना संसर्गविवक्षाप्रयुक्ता संसर्गं गमयतीत्यर्थः॥ एवमपि प्रमाणस्य संसर्गप्रयोजकत्वे किमायातम्? अत्राह– सा चेति॥ विवक्षा मानान्तरपूर्वा, इति मानान्तराधीनैव पदार्थसंसर्गसिद्धिरित्यर्थः॥
65.7–10 Cf. *Bhāvaśuddhi* (371.6-9): परिहरति– एवमिति॥ तदनन्तरभावात्, तदन्वयव्यतिरेकानुविधानाच्चेत्यर्थः । हेतुमाह – यत इति॥ तत्प्रमाणान्तरं तस्य श्रोतुर्न प्रतिपादकम्, वक्तृस्थत्वात्, न प्रयोजकम्; विवक्षाप्रयुक्तत्वात् प्रयोगस्येत्यर्थः ।
65.11–12 Cf. *Bhāvaśuddhi* (371.12–14): सत्यामपि विवक्षायां मानान्तरविरोधिजरद्गवादिवाक्यात् संसर्गानवगमाद् मानान्तरमनुविधत्ते संसर्गावगम इति शङ्कते– यत्त्विति॥
65.13–14 Cf. *Bhāvaśuddhi* (372.2-3): तद्विरोधे संसर्गावगमो भवतु, न त्वेतावता ततो मानान्तरात्संसर्गावगम इत्यर्थः॥

65.3 लौकिका] *em.*; कौकिका MS **65.4** °प्रयुक्तास्त°] *em.*; °प्रयुक्तः त° MS **65.8** °नन्तरभावा°] *em.*; °नन्तरं भावा° MS **65.12** यत्तु] *em.*; यतु MS **65.13** °मनुविधत्ते] *em.*; °मनुविधीयन्ते MS • कामम्] *em.*; कार्यं MS • तद्विरोधे] *em.*; तद्विरोधि MS **65.13-14**संसर्गाव°] *em.*; संसर्गानव° MS **65.15** औत्सर्गिक°] *em.*; ओत्सर्गिक° MS **65.16** कारणमपि] *em.*; कारणां अपि MS

णैव तदुपपत्तावुभयहेतुभावकल्पनस्याप्रमाणकत्वा]दिति। संसर्गप्रतीत्यभावमभ्युपगम्यैतदुक्तम्, [पर]मार्थतस्तु सो ऽपि ना(स्तीत्याह– **विरोधे ऽपि**) [त्विति। चैत्यवन्दनादि](वाक्येभ्यो ऽ)[पि संसर्ग]विज्ञानं सर्व(जनीनमशक्यापह्नवमित्यर्थः। न)[खल्वयमसंसर्गाग्रह] इत्युपपादितं विभ्रमविवेके।(--- [35] --- हेतु)[भावे योग्यतायास्तदु]पजनो न जातु बीजमवनिपाथःप(वनतेजांसि --- [29] ---)[त्कारकशेषत्वाद्] विभक्त्यन्तपदकदम्बकसमभिव्याहाराभिधान(नियमात्प्रतीतिरि)[ति वाच्यम्।](पदार्थ)[संसर्ग](ग्रहादेवार्थतत्त्व)[विज्ञानं नान्यहेतोः। हेतुता च स्वा]भाविकी सत्तोपयुज्यते न समारोपितधूमभावा धूमम(तिः। तुर्हि चैत्यवन्दना)⟨f.*158v⟩(दिवाक्यं प्रमाणं स्यादित्यत्राह– **प्रतीतो ऽपीति**।)

[तत्र जरद्गवादिवाक्येष्वाशुतरो]बाधः, धातुवादनिधिप्राप्तिदैत्यकन्यादिवशीकरणाद्युपदेशे[षु] (विचारात्तु पण्डितरूपाणामिति)[। अत एव च त्रैविध्यमित्या](ह– **एवं** चेति। अनर्थकानि)[हि बालानां वचांसि] दृश्यन्ते, यथा दश दाडिमानि षडपूपा भवन्तीति।(यद्यप्येतदपि मिथ्यैव तथाप्याशु)[तरबाधोत्पादादनर्थकमुक्तम्।

अथ प्रमाणान्तरेणोपलभ्यार्थं विवक्षित्वा परस्मै प्रतिपादयति पुरुषः। तेन तद्वचसः प्रमाणान्तरोपलब्धिरेवार्थः। सैव प्रयोजिका पदार्थसंसर्गस्य। तस्याः प्रयोजिकाया अभावान्न वेदे पदार्थसंसर्गसिद्धिः। मा भूत्सा। विशिष्टार्थ एव प्रयोजकः।

65.17–20 Cf. *Bhāvaśuddhi* (372.3-5): संसर्गप्रतीत्यभावमभ्युपगम्यैतदुक्तम्, परमार्थतस्तु सो ऽपि नास्तीत्याह– विरोधे ऽपि त्विति॥ चैत्यवन्दनादिवाक्येभ्यो विज्ञानं सर्वजनीनमशक्यापह्नवमित्यर्थः॥

65.24–30 Cf. *Bhāvaśuddhi* (372.5–11): तर्ह्यनधिगताधिगन्तृत्वाद् चैत्यवन्दनादिवाक्यं प्रमाणमेव स्यादिति, अत्राह – प्रतीतो ऽपीति॥ तत्र जरद्गवादिवाक्येष्वाशुतरो बाधः, चैत्यवन्दनाद्युपदेशेषु विचारात्तु पण्डितरूपाणामित्यर्थः। अत एव च त्रैविध्यमित्याह– एवं चेति॥ अनर्थकानि हि बालानां वचांसि दृश्यन्ते, यथा– 'दश दाडिमानि', 'षडपूपा भवन्ती'ति। यद्यप्येतदपि मिथ्यैव; तथाप्याशुतरबाधादनर्थकमुक्तम्॥

65.17 °स्याप्रमाणक°] *em.*; °स्याप्रामाणक° MS **65.18** सो ऽपि] *em.*; सेपि MS **65.21** °मवनिपाथः°] *em.*; °मवनिपायः° MS **65.24** सत्तोपयुज्यते] *em.*; सत्वोपयुज्यते MS • समारोपित°] *em.*; समारोपि° MS **65.26** °वादनिधिप्राप्ति°] *em.*; °वोदिनिप्राप्ति° MS **65.27** °करणाद्युपदेशे°] MS[pc]; °करणायुद्युपदेशे° MS[ac]

अथ लोकावगम्यत्वाच्छब्दसामर्थ्यस्य लौकिकप्रयोजकाभावान्न संसर्गः, विधिमत्त्वे ऽपि न स्यात्। अथ लोके संसर्गमात्रपरत्वे ऽर्थापत्तिः। न तद्विशेषे, तन्मात्रेणप्रतीतिप्रयोगयोरुपपत्तेः। विनापि प्रमाणान्तरोपलब्ध्या विशिष्टार्थगतिसिद्धिः। अथ प्रमाणान्तराल्लोके संसर्गसत्यतावगमः। अपूर्वो ऽपि हि श्रोतुः संसर्गो वक्तुः प्रमाणानुमानमुखेन सत्यतां लभते तदसंभवे ऽसत्यत्वाद्बुद्धादिवाक्येषु। तेन प्रमाणान्तरनिबन्धनो लोके संसर्ग उच्यते। भवतु। वेदे तु प्रमाणान्तरसंभेदाभावात्स्वातन्त्र्येणार्थप्रतीतेः शब्दनिबन्धन एव। ...

चोदयति– **अथेति**।] चैत्यवन्दनादिवाक्यानां विपरीतार्थानामप्यस्ति मानान्तरापेक्षा न खलु [बु](द्धावनालिख्यार्थं विव)[क्ष]ति। न चादृष्टपूर्वो ऽर्थस्तत्त्वेन वा समारोपेण वा [शक्यो बुद्धावा]लेखितुम्। न चान्यप्रमाणादृते तद्दर्शनम्, तस्माच्चैत्यवन्दनादि[ष्वपि](साध्यसाधन)सम्बन्धं पाकौदनादिषु दृष्टमारोप्य वचनरचनेति न क्वचिद्व्यभिचार] इत्यर्थः। परिहरति– **मा भूदिति**। विशिष्टार्थप्रत्ययप्रयुक्ता(न्यभिधानानि तत्स)[म्बन्धमर्थमभि]दधति [विशिष्ट][प्रत्ययप्रयुक्तत्वा)[द]वान्तरव्या[पाराणां तेषां तत्र] प्रवृत्तेः, अन्यथा त्वर्थाभिधानानुपपत्तेः। यथाहुरत्रभवन्तो (वार्त्तिककारमि)[श्रा]ः–

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।

66.9–12 *Ślokavārttika Vākyā. 342-343*: साक्षाद्यद्यपि कुर्वन्ति ··· पदार्थप्रतिपादनम्॥

66.1–5 Cf. *Bhāvaśuddhi* (372.14-373.3): चैत्यवन्दनादिवचनस्यानृतस्य नेयं गतिरित्याह– सैवेति॥ अनृतवचनानामप्यस्ति मानान्तरापेक्षा, न खलु (बुद्धो) बुद्धावनालिख्यार्थं विवक्षति। न चादृष्टपूर्वो ऽर्थस्तत्त्वेन वा समारोपेण वा शक्यो बुद्धावालिखितुम्। न चान्यप्रमाणान्तरादृते तद्दर्शनम्॥ तस्माच्चैत्यवन्दनादिष्वपि साध्यसाधनसम्बन्धं पाकौदनादिषु दृष्टमारोप्य वचनरचना, इति न क्वचिव्यभिचार इत्यर्थः॥

66.1-2 मानान्तरा॰] *em.*; मनान्तरा॰ MS **66.3** बुद्धावालेखितुम्] *em.*; बुद्धेवालेखितुम् MS **66.4** पाकौदनादिषु दृष्टमारोप्य] *em.*; पादाकौदनादिषु दृष्टंमारोप्य MS **66.6** ॰र्थप्रत्यय॰] *em.*; ॰र्थप्रत्याय॰ MS **66.7** अन्यथा त्वर्थाभिधाना॰] MS[pc]; अन्यर्थात्वार्थोभिधाना॰ MS[ac] **66.9** साक्षाद्यद्यपि] *em.*; साक्षाद्यपि MS • ॰प्रतिपादनम्] *em.*; ॰प्रतिपादं MS

वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वाले(व काष्ठानां पदार्थप्रतिपादनम्)॥ ···

॥ ⊗⊗⊗⊗⊗⊗⊗⊗⊗⊗ ॥

न च लोके पदैः स्वार्थाः स्वरूपमात्रनिष्ठतयैव प्रत्याय्यन्ते किं तु विशिष्टार्थप्रत्ययप्रयुक्ताः, तथा व्यवहारोपपत्तेः। तथा च प्रतिपदार्थं संसर्गाक्षेपः। स्यादेतत्– लोके बुद्धिपूर्वप्रयुक्तानां मा भूदानर्थक्यमिति संसर्गार्थता। वेदे तु नार्थवत्त्वे प्रमाणमस्ति, अतः पदार्थान्तरमनर्थकमेवास्तु। नैतत्सारम्। नान्यथानर्थक्यमित्यप्रमाणो ऽर्थः शक्यः प्रतिपत्तुम्, यस्य कस्यचित्प्रतिपत्तिप्रसङ्गात्। तस्माद्व्यवहारात्संसर्गप्रयुक्तस्वार्थावबोधसामर्थ्यमेव पदानां गम्यते, ततो वेदे ऽपि संसर्गाक्षेपः। यदि चान्यपदार्थानामानर्थक्यम्, विध्यर्थस्य तन्न कस्मात्? अथ मतम्– पदान्तराणि प्रमाणान्तरसिद्धे ऽर्थे प्रयुज्यन्ते। तानि यथावगतार्थानुवादपर्यवसितानि। तथा ह्यनूद्यमानो ऽर्थो यथावगममनुवादान्नापूर्वार्थाक्षेपायालम्। विधायकस्तु शब्दो ऽनन्यगम्यार्थविषयस्तदर्थः प्रमीयमाणः शक्नोत्यपूर्वमर्थमाक्षेप्तुमन्यथानवकल्पमानः। तस्माद्वेदे विधिनिबन्धनो ऽपूर्वसंसर्ग इति। तदयुक्तम्। प्रमाणान्तराविषयश्चेद्विधायकार्थः, तत्र संबन्धज्ञानमशक्यमिति निह्नूयेत। तथा च संबन्धज्ञानानपेक्षत्वादव्युत्पन्नो ऽपि प्रवर्तेत, संबन्धज्ञानापेक्षता च पदधर्मो व्युत्क्रम्येत, तन्निरपेक्षता वाक्यधर्म आश्रीयेत। अथ संबन्धापेक्षता नास्य निह्नूयेत, बलात्प्रमाणान्तरसिद्धार्थतापद्येत। तथा च न विशेषः।

66.10 नैतस्मि॰] *em.*; नैतेस्मि॰ MS 66.11 वाक्यार्थमितये तेषां प्रवृत्तौ] *em.*; वाह्यार्थमतयेषां तेषां वृत्तौ MS

…⟨f.*A^{r}⟩ [विशिष्टार्थबोधं] प्रति हेतुभावं तावदवस्यन्ति। न चाविशिष्टप्रत्ययं विना विशिष्टप्रत्ययो न चैष पदजातादन्य इति विशिष्टप्रत्यय(स्य मूलमर्थबो)[धो ऽ]विशिष्टाभिधानपदानाम्। अत एव पदात्तदर्थः प्रतीतो ऽर्थान्तरमाकाङ्क्षति। नान्तरीयकतया त्वपेक्षणे नापेक्षोपरतिरिति न विशि[ष्ट](पदप्रत्ययौ तदनु)कृती स्याताम्। तथा च स्वसामर्थ्यस्मारिताविशिष्टार्थद्वारेण लक्षणया विशिष्टार्थप्रत्ययोपपत्तेर्न विशिष्टाभिधानम्, यावत्पदसा(मर्थ्यादेव तत्स)[मु]न्नेतव्यमित्येतदपि सूचितं भवति ।नान्यथानर्थक्यमिति ।यदि हि [विशिष्टार्थप्रत्यायन]प्रयुक्तानामर्थानां दृष्टेनैव प्रकारेण विशि[ष्टा](भिधायित्वं तर्हि संसर्गस्य विशिष्ट)प्रत्ययं प्रति न निमित्तभावो वास्तवः। अतो नानर्थव्यभिचारितस्याविशिष्टार्थप्रत्ययप्रतिलम्भसंभवः। न हि लोष्टदर्शनं निःप्रयो[ज](नमिति तद्दर्शनं पुनर)[पि] सुवर्णदर्शनाय कल्पते। तस्माद्व्यवहारादनादेरौत्पत्तिकं समर्थं प्रत्यायनप्रयुक्तं स्वार्थावबोधसामर्थ्यमेव गम्यते।[त](तो लोके यानि पदानि) [वे]दे ऽपि तान्येव वृद्धव्यवहा[रा](त्संसर्गप्रत्यायका)[नि पदानी-ति] संसर्गप्रत्यायनप्रयुक्ति⟨f.*A^{v}⟩(परता तेषामाक्षिप्यते। संसर्गरहितानां पदानां)[स्वार्थानां] रूपमात्रपरत्वे ऽनुपपत्तिः, प्रयोजकाभावे प्रयोज्याभावप्रसङ्गात्। संस(र्गप्रयुक्तानां) [स्वार्थानां संसृज्यमानानां च](--- [21] ---) शेषं सुगमम्॥ •॥

शब्दादेव मिते यो ऽपि मन्यते संगतिग्रहम्॥ ७८॥
नान्योन्यसंश्रयावद्यं न स्वयं प्रमिते हि सः।
परेण शब्दावगते तत्प्रवृत्त्या च सूचिते॥ ७९॥
पदार्थान्तरवत्तत्र सुकरः संगतिग्रहः।

यो ऽपि मन्यते– न प्रमाणान्तरसिद्धे विध्यर्थे संबन्धज्ञानमपि तु शब्दसिद्ध एव। न चान्योन्यसंश्रयदोषः शब्दात्सिद्धे संबन्धज्ञानं संबन्धज्ञानपूर्विका च शब्दात्सिद्धिरिति। यतो न स्वयं

67.1 °बोधं] *em.*; बिधं° MS • विशिष्ट°] MS^{pc}; विशिष्टा° MS^{ac} 67.4-4°न्तरमाकांक्षति] *em.*; °न्तरंमाकांक्षति MS 67.6 यावत्पद°] MS^{pc}; यावत्पपद° MS^{ac} 67.8 °मर्थानां] *em.*; °मर्थाना MS 67.9 वास्तवः] MS^{pc}; वास्तावः MS^{ac} 67.11 सुवर्ण°] *em.*; सुववर्ण्ण° MS^{ac} 67.12 °सामर्थ्यमेव] *em.*; °सामर्थ्यामव MS 67.16 शेषं] *em.*; शेष MS

शब्दात्प्रमिते तदुच्यते, किं तु वृद्धप्रयुक्ताद्वृद्धान्तरेणावगते। तदवगमाच्च तस्य वृद्धस्य या प्रवृत्तिस्तयानुमिते 'नूनमनेन वृद्धेन प्रतिपन्नः कश्चित्प्रवृत्तिहेतुरर्थो ऽस्माच्छब्दात्, येनायमेतच्छ्रवणात्प्रवृत्तः' इति, यथा 'गामानय' इति सास्नादिमदानयनदर्शनात्तत्प्रत्ययमनुमाय तत्र संबन्धग्रहणमिति।

शब्दादेव मिते यो ऽपि मन्यते सङ्ग(तिग्रहम्। अपि च) [शब्दात्तदवबोधमन्तरेण] न तेन शब्दस्य संबन्धज्ञानं संबन्धिज्ञानाधीनत्वात्तस्य, न च संबन्धज्ञानं विना शब्दात्तत्प्रतीतिरित्यन्योन्यसंश्रयदो[ष] (प्रसज्येतेत्यत्राह–)[**नान्योन्यसंश्रयावद्यम्**। कुतः?] (**न स्वयं प्र**)**मिते हि सः सङ्गतिग्रहः। किं तु परेण विदितसङ्गतिना शब्दादवगते ऽर्थे तदवग**[ति](रित्यत्यन्त)[परोक्षा कथं व्युत्पित्सुना](वगतेत्यत्राह– **तत्प्रवृत्त्या च सूचिते। पदार्था**)**न्तरवत्तत्र सुकरः संगतिग्रहः**। सुगमम्॥ ॰॥

तस्यैवमनुमेयत्वे कथं शब्दैकगोचरः॥ ८०॥
तस्यापि शब्दपूर्वत्वादनुमानैकगोचरः।
कस्मान्न शब्दबोधो ऽपि ह्यनुमानपुरस्सरः॥ ८१॥
नेदंप्रथमता लभ्या बीजाङ्कुरवदेतयोः।
शब्दाद्बोद्धुश्चानुमानं सर्वस्यैव पुरः स्थितम्॥ ८२॥
पदार्थान्तरवत्तेन तस्य शब्दो ऽनुवादकः।
अनुमानाद्बुध्यमानः शब्दाद्बुद्धं न बुध्यते॥ ८३॥
प्रतिपत्त्रन्तरे बोधो नान्यबोधानुवादकृत्।

68.1–7 Cf. *Bhāvaśuddhi* (379.19–380.7): शब्दात्सिद्धे नियोगसंबन्धग्रहणान्नान्यसिद्धार्थत्वमिति शङ्कते– शब्दादेवेति॥ लिङाद्यर्थे बुद्धे संबन्धज्ञानम्, ज्ञानान्तरसंबन्धाद् लिङादिशब्दात्तदर्थधीरित्यन्योन्याश्रयदोष इति, अत्राह– नान्योन्येति॥ कुत इति? अत्राह– न स्वयमिति॥ सः =सङ्गतिग्रहः, किन्तु परेण विदितसंगतिना शब्दादवगतेर् ऽर्थे तदवगतिः, इत्यत्यन्तपरोक्षा कथं व्युत्पित्सुना ऽवगतेति? अत्राह– तत्प्रवृत्त्येति॥

68.1 मिते] *em.*; मित्रे MS **68.2** संबन्धज्ञानं संबन्ध॰] *em.*; संबन्धिज्ञानं संबन्धि॰ MS **68.5** ॰वगते ऽर्थे] *em.*; ॰वगतो अथ MS

प्रवृत्तिहेतुमात्रं च शब्दार्थः स्यादलौकिकः॥ ८४॥
न स कल्पयितुं शक्यस्तत्सिद्धेर्लौकिकादपि।

यदि प्रवृत्त्युन्नीयमानप्रत्ययविशेषणत्वेन व्यवस्थितो ऽनुमेयो विधायकार्थः संबन्धज्ञानविषयः, न तर्हि शब्दैकप्रमाणकः। अथानुमानं शब्दपूर्वकमिति तथोच्यते, शाब्दो ऽपि प्रत्ययो ऽनुमानपूर्वकः इत्यनुमानैकगोचरः स्यात्। न खलु बीजाङ्कुरयोरिवानयोरेकस्य प्राथम्यं व्यवस्थापयितुं शक्यम्, शब्दावगतस्यानुमानादनुमितस्य विदितसंगतेः शब्दादवगमात्। अपि च सर्वप्रतिपत्तॄणामनुमानपूर्वा शब्दात्प्रतिपत्तिरिति तेषां शब्दो ऽनुवादक एव; तथा हि– शब्दाद्बुध्यमानो ऽनुमितं विदितसंगतिं बुध्यते सर्वः प्रतिपत्ता, न त्वनुमिमानः शब्दावगतमनुमिमीते। ननु शब्दावगत एवानुमीयते। सत्यमनेन तु प्रतिपत्त्रा, न चान्यदीया प्रतिपत्तिरन्यप्रतिपत्तिमनुवादीकरोति। प्रवृत्तिहेतुमात्रे च संबन्धव्युत्पत्तेस्तन्मात्रं शब्दार्थः स्यात्। न चालौकिकः कल्पयितुमपि शक्यः, लौकिकादपि प्रवृत्तिसिद्धेः।

अ(त्रोत्तरमाह– तस्य प्रवृ)[त्तिहेतोरे]**वमनुमेयत्वे कथं शब्दैकगोचरः**। पर

69.1–15 Cf. *Bhāvaśuddhi* (381.14-382.10): अत्रोत्तरमाह– तस्येति॥ प्रवृत्तिहेतोरनुमेयत्वे पर आह– तस्यापीति॥ तस्यापि = अनुमानस्य परप्रवृत्तिलिङ्गकस्य, शब्दपूर्वत्वात्; शब्दावगतिपूर्विकैव हि प्रवृत्तिः परस्येति। उत्तरम्– अनुमानैकगोचर इति॥ कुत इति? अत्राह– शाब्दबोधो ऽपीति॥ वृद्धस्य शाब्दबोधो ऽपि। स खलु वृद्धतरस्य प्रवृत्त्या लिङ्गेनानुमाय तद्धेतुप्रत्ययं तत्र लिङ्गादेव संबन्धमग्रहीत्, तस्मादसावर्थं स्मरन् अनुभवपुरस्सरमेव स्मरेत्, अनुभवश्चास्यानुमानमित्यनुमानपुरस्सरमज्ञासीत्, एवं वृद्धतरो वृद्धतमादित्याह– नेदम्प्रथमतेति॥ शब्दानुमानयोरन्योन्यकार्यकरणभावेनावस्थितयोरस्मादगृह्यमाणविशेषत्वे शब्दैकगोचरत्वासिद्धिः, विपरीतो वा विशेषो गृह्यत इत्याह– शब्दाविति॥ शब्देन बुद्धमेवानुमानात् बुध्यत इति, अत्राह– अनुमानादिति॥ व्युत्पित्सुः = शब्दाद्बुद्धो वृद्धेनायमित्यनुमिमानः॥ कस्माद् बुद्धो न बुध्यत इति? अत्राह– प्रतिपत्त्रन्तर इति॥ शाब्दो बोधो नान्यस्य व्युत्पित्सोर्बोधस्यानुवादकः; गृहीतग्राहितामात्रेण भाक्तमनुवादत्वमनुमानस्य म-

आह– तस्याप्यनुमानस्य परप्रवृत्तिलिङ्गकस्य शब्दपूर्वक[स्य शब्दा](वगतिपूर्विकै) ⟨f.*B^{r}⟩(व हि प्रवृत्तिः स्या)[त् ।] उत्तरम्– **अनुमानैकगोचरः कस्मान्न।** कुतः? **वृद्धस्य शाब्दबोधो ऽपि ह्यनुमानपुरस्सरः।** स खलु वृद्धतरस्य प्रवृत्त्या (लिङ्गेनानु)माय [तद्धेतुप्रत्ययं त]त्र लिङ्गादेः संबन्धमग्र[हीत], तेन तस्मादसावर्थं स्मरन्ननुभवपुरस्सरमेव स्मरेत्, अनुभवश्चास्यानुमानमित्यनुमान[पुर](स्सरमज्ञासीत्। एवं) वृद्धतरो ऽपि वृद्धतमादित्याह– **ने[दंप्रथमता लभ्या बीजाङ्कुरवदे]तयोः** शब्दानुमानयोरन्योन्यकार्यकारणभावेनाव[स्थि](त)[यो]ः। तस्मादगृह्यमाणविशेषत्वेन पौर्वा[पर्ये न श]ब्दैकगोचरत्वसिद्धिः। विपरीतो वा गृह्यते विशेष इत्याह–

शब्दाद्बोद्धुश्चानुमानं सर्व[स्यै](व पु)रःस्थितम्।
पदार्थान्तरवत्तेन तस्य शब्दो ऽनुवादकः।

ननु नानुमानमेवेत्याह–

अनुमानाद्बुध्यमानः शब्दाद्बुद्धं न बुध्यते।

ननु व्युत्पित्सुः श(ब्दाद्बु⟨f.*B^{v}⟩द्धो वृद्धेनायमित्यनुमिमानः) [कस्माद्बुद्धं] न बुध्यत इत्याह– **प्रतिपत्त्रन्तरे वृद्धे शाब्दो बोधो नान्यस्य व्युत्पित्सोर्बोधस्यानुवादकृ[त्]**, (गृहीत)[ग्रा]हितामात्रे[ण भा]क्तमनुवादत्वमनुमानस्या[मन्तव्यम्]। एतदुक्तं भवति– समानज्ञातृकं हि पूर्वविज्ञानमुत्तराणि पिष्टपेषणवद्वैयर्थ्यमुपनयति, न तु (असमान)ज्ञातृकम्। न खलु देवदत्तः शास्त्रं वेदेति न यज्ञ[दत्तस्त]द्बुभु[त्सते]। बु[द्धावनालब्धो]ऽनर्थकः। तस्माच्छब्द एव तस्यैव ज्ञातुः पूर्वोत्पन्नमनुमानं (शब्दे पुनरुच्चा)[र्य]माणे ऽ[न्यं] प्रति पुनरापद्यमानं प्रतिपत्त्रन्तरस्थ[मित्यनुमान]पुरस्सरमनुवाद इति सिद्धम्।

न्तव्यम्॥

69.3 कस्मान्न।] *em.*; कस्मान्ना MS **69.4** ॰पुरस्सरः] *em.*; ॰पुनः परः MS **69.6** स्मरन्ननुभव॰] *em.*; स्मरन्नभव॰ MS • अनुभव॰] *em.*; अत्रभव॰ MS **69.8** ॰कारणभावे॰] MS^{pc}; ॰कारणवाभावे॰ MS^{ac} **69.10** इत्याह] *em.*; त्याह MS **69.12** ॰वत्तेन तस्य] *em.*; ॰वत्तस्य MS • ॰नुवादकः] *em.*; ॰नुवादतः MS **69.14** शब्दाद्बुद्धं] *em.*; शब्दोद्बुद्धं MS **69.15** प्रतिपत्त्रन्तरे] *em.*; प्रतिपत्त्रे MS **69.16** व्युत्पित्सो॰] *em.*; व्युत्पत्सो॰ MS • ॰नुवादकृत्] *em.*; ॰नुवादत्वकृत् MS **69.18** ॰विज्ञानमु॰] *em.*; ॰विज्ञामु॰ MS **69.20** तस्यैव] *em.*; तास्यैव MS **69.22** सिद्धम्] MS^{pc}; स्थितं सिद्धम् MS^{ac}

अपि च **प्रवृत्तिहेतुमात्रं च शब्दार्थः** [स्या](दलौकिकः, प्रवृ)त्या हि कार्येण तन्मात्रानुमानात्। [न च] तन्मात्र[प्रवृत्तिः] प्रवृत्त[ये कल्पते।] न हि सर्वं सर्वस्य प्रवर्तकम्। अत एवालौकिकविशेषक[ल्पनं] (कार्यमवगम्य नि)⟨f.*C^{r}⟩[योज्यः] प्रवर्तत एवेति चेत्तत्राह– अलौकिके **न स** (**कल्पयितुं यु**)[**क्तः**]। कुतः? तस्याः प्रवृत्तेः **सिद्धेर्लौकिकादपि**। तथा हि स्तनपानादावपि क[थं](चित्कार्यत्वेनावगत)[मनुग्रहमनुकूल]साधनत्वज्ञानमनुप्रवृत्तिहेतु[मवगच्छति वा](लो ऽ)पि, [ति]न शब्दश्रवणसमनन्तरभाविनीमपि प्रवृत्तिमुपलभ्य तेनाधिगतसंब[न्धं](पदं वृद्धा व्यवहर)[न्ती]ति नालौकिकमदृष्टसंबन्धं हि तत्, दृष्टे च संभवत्य](दृष्टकल्प)नमसदृशमतिप्रसङ्गादित्यभिसन्धिः।

स्यादेतत्– वैदिकीषु प्रवृत्तिषु तदसंभवादलौकिककल्पना। नैतत्। लोकावगतसामर्थ्यो हि शब्दो वेदे ऽपि प्रतिपादकः। तत्र लौकिकीषु प्रवृत्तिषु लौकिके विदितसंबन्धे वेदे ऽपि तत्प्रतिपत्तिरेव स्यात्, असंभवे वा मिथ्यात्वम्। अथ बहुविधत्वात्प्रवृत्तिहेतूनां व्यभिचारादशब्दार्थत्वे प्रवृत्तिहेतुसामान्यं शब्दार्थः। तत्र वेदे लौकिकानां विशेषाणामसंभवादलौकिकं विशेषान्तरं प्रतीयते। एवमपि यः शब्दार्थो वेदे सामान्यं स लोकसिद्ध इति नानुवादता व्यावर्तते पदार्थान्तरवत्। यो ऽपि विशेषः सो ऽन्यासंभवेन परिशेषानुमानगोचर इति न प्रमाणान्तराविषयत्वम्। न च परिशेषानुमानमपि श्रेयःसाधनतायाः संभवात्।

